[3][*स्पष्टीकरणम्* १-अस्मिन् अनुच्छेदे (क) खण्डात् (ङ) खण्डान्तेषु भागेषु "राज्य" शब्दः सङ्घस्य राज्यक्षेत्रम् अन्तर्भावयति, किन्तु पारन्तुके "राज्य" शब्दः सङ्घस्य राज्यक्षेत्रं न अन्तर्भावयति।

स्पष्टीकरणम् २- (क) खण्डेन संसदि प्रदत्तः अधिकारः कस्यापि राज्यस्य भागं वा सङ्घस्य राज्यक्षेत्रस्य भागं वा, अन्यस्य राज्यस्य, सङ्घस्य वा राज्यक्षेत्रस्य भागेन संयोज्य नूतनराज्यनिर्माणस्य, नूतनसङ्घराज्यक्षेत्रनिर्माणस्य वा अधिकारम् अन्तर्भावयति।]

४. प्रथमानुसूचीं चतुर्थानुसूचीं च संशोधयितुम्, अनुपूरकप्रासङ्गिकानुषङ्गिकविषयेषु उपबन्धयितुं च द्वितीयतृतीयानुच्छेदयोः अधीनं प्रणीताः विधयः।

(१) द्वितीये, तृतीये वा अनुच्छेदे निर्दिष्टः कोऽपि विधिः प्रथमानुसूच्याः चतुर्थानुसूच्याश्च संशोधनार्थं तादृशान् उपबन्धान् अन्तर्वेशयेत् यादृशाः तस्य विधेः उपबन्धान् क्रियान्वितान् कर्तुम् आवश्यकाः स्युः; तथा च तादृशान् अनुपूरकान्, आनुषङ्गिकान्, पारिणामिकान् अपि उपबन्धान् (तादृशेन विधिना प्रभावितस्य राज्यस्य विधानमण्डले वा राज्यानां विधानमण्डलेषु वा संसदि वा प्रतिनिधित्वसम्बद्धैः उपबन्धैः सहितान्) अन्तर्वेशयेत्, यादृशान् संसद् आवश्यकान् मन्येत।

(२) पूर्वोक्तसदृशः कोऽपि विधिः ३६८-तमानुच्छेदस्य प्रयोजनानां कृते अस्य संविधानस्य संशोधनम् इति न मन्येत।

---

1 संविधानस्य (पञ्चमं संशोधनम्) अधिनियमः, १९५५ इत्यस्य २-अनुभागेन पारन्तुकात् प्रति एषः पारन्तुकः संनिवेशितः।

2 'प्रथमसूच्याः "क" भागे "ख" भागे वा उल्लिखितस्य' इति एतत्संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च लोपितम्।

3 संविधानस्य (अष्टादशं संशोधनम्) अधिनियमः, १९६६ इत्यस्य २-अनुभागेन एते स्पष्टीकरणे अन्तर्वेशिते।

भागः २
नागरिकता

५. संविधानस्य प्रारम्भे नागरिकता –

अस्य संविधानस्य प्रारम्भे सः प्रत्येकं जनः यस्य भारतस्य राज्यक्षेत्रे अधिवासः विद्यते, तथा च-

(क) यस्य भारतस्य राज्यक्षेत्रे जन्म अभूत्; अथवा

(ख) यस्य मातापित्रोः अन्यतरस्य भारतस्य राज्यक्षेत्रे जन्म अभूत्; अथवा

(ग) यः तादृशात् प्रारम्भात् अव्यवहितपूर्वं पञ्चवर्षेभ्यः अन्यूनं भारतस्य राज्यक्षेत्रे सामान्यतः निवसन् वर्तते,

भारतस्य नागरिकः भवेत्।

६. पाकिस्तानतः प्रव्रज्य भारतम् आगतानां केषांचित् जनानां नागरिकताधिकाराः -पञ्चमानुच्छेदे यत् किमपि सत्यपि यः पाकिस्ताने इदानीम् अन्तर्भावितात् राज्यक्षेत्रात् भारतस्य राज्यक्षेत्रं प्रति प्रव्रज्य आगतः अस्ति, सः जनः अस्य संविधानस्य प्रारम्भे भारतस्य नागरिकः इति मन्येत यदि-

(क) सः अथवा तस्य मातुः पितुः अन्यतरः, पितामह्याः पितामहस्य वा अन्यतरः, मातामह्याः मातामहस्य वा अन्यतरः, १९३५-वर्षस्य भारतशासनाधिनियमेन (यथामूलाधिनियमितरूपेण) परिभाषिते भारते अजनिष्ट, तथा च

(ख) (१) यदि सः जनः तादृशः अस्ति यः १९४८-वर्षस्य जुलाईमासस्य एकोनविंशतिदिनाङ्कात् पूर्वम् एवं प्रव्रजितः अस्ति, तर्हि यदि सः प्रव्रजनदिनात् आरभ्य भारतस्य राज्यक्षेत्रे सामान्यतः निवसन् वर्तते; अथवा

(२) यदि सः जनः तादृशः अस्ति यः १९४८-वर्षस्य जुलाईमासस्य एकोनविंशतितमे दिने, ततः परं वा एवं प्रव्रजितः अस्ति, तर्हि यदि भारतीयाधिनिवेशशासनेन तदर्थं नियुक्तेन अधिकारिणा, तादृशाधिकारिणे अस्य संविधानस्य प्रारम्भात् पूर्वं तत् शासनेन विहिते प्रारूपे विहितया रीत्या च तदर्थं तेन कृतावेदनानन्तरं भारतस्य नागरिकः इति पञ्जीबद्धः अस्ति-

परन्तु कोऽपि जनः एवं पञ्जीबद्धः न भवेत् यदि सः स्वीयावेदनदिनात् अव्यवहितपूर्वं न्यूनात् न्यूनं षण्मासान् भारतस्य राज्यक्षेत्रे निवसन् न वर्तते।

७. पाकिस्तानं प्रव्रजितानां केषांचित् जनानां नागरिकताधिकाराः-पञ्चम-षष्ठानुच्छेदयोः यत् किमपि सत्यपि १९४७-वर्षस्य मार्चमासस्य प्रथमात् दिनात् परं भारतस्य राज्यक्षेत्रात् पाकिस्ताने इदानीम् अन्तर्भावितं राज्यक्षेत्रं प्रव्रजितः यः जनः अस्ति, सः भारतस्य नागरिकः न मन्येत-

भारतस्य संविधानम्

(भागः २-नागरिकता)

परन्तु एतदनुच्छेदगतं किमपि तं जनं न विषयीकुर्यात् यः पाकिस्ताने इदानीम् अन्तर्भावितं राज्यक्षेत्रम् एवं प्रव्रजितः भूत्वा कस्यापि विधेः प्राधिकारेण, तदधीने वा दत्तायाः अनुज्ञायाः अधीनं पुनर्निवासार्थं, स्थायिप्रत्यावर्तनार्थं वा भारतस्य राज्यक्षेत्रं प्रतिनिवृत्तः अस्ति; किञ्च एतादृशः प्रत्येकं जनः षष्ठानुच्छेदगतस्य (ख) खण्डस्य प्रयोजनानां कृते १९४८-वर्षस्य जुलाईमासस्य एकोनविंशात् दिनात् परं भारतस्य राज्यक्षेत्रं प्रव्रजितः अस्ति इति मन्येत।

८. भारतात् बहिः निवसतां भारतीयसमुद्भववतां केषांचित् जनानां नागरिकताधिकारः- पञ्चमानुच्छेदे यत् किमपि सत्यपि यः कोऽपि जनः, यस्य मातुः पितुः अन्यतरः, पितामह्याः पितामहस्य अन्यतरः, मातामह्याः मातामहस्य अन्यतरः वा १९३५-वर्षस्य भारतशासनाधिनियमेन (यथामूलाधिनियमितरूपेण) परिभाषिते भारते अजनिष्ट, यश्च एवं परिभाषितात् भारतात् बहिः कस्मिन् अपि देशे सामान्यतः निवसन् अस्ति। सः जनः भारतस्य नागरिकः इति मन्येत, यदि अस्य संविधानस्य प्रारम्भात् पूर्वं, परं वा भारताधिनिवेशस्य शासनेन, भारतस्य शासनेन वा, विहिते प्रारूपे विहितया रीत्या च, तेन तदानीम् अध्युषिते देशे विद्यमानाय भारतस्य राजनयिकाय वाणिज्यदूतकाय वा प्रतिनिधये नागरिकतावाप्त्यर्थं तेन आवेदने कृते सति; तादृशेन राजनयिकेन, वाणिज्यदूतकेन वा प्रतिनिधिना सः भारतस्य नागरिकः इति पञ्जीबद्धः अस्ति।

९. यैः स्वेच्छयार्जिता वैदेशिकनागरिकता, न तेषां जनानां नागरिकता- यदि केनापि जनेन स्वेच्छया वैदेशिकनागरिकता अर्जिता अस्ति, तर्हि सः पञ्चमानुच्छेदस्य आधारेण भारतस्य नागरिकः न भवेत्; न च षष्ठानुच्छेदस्य सप्तमानुच्छेदस्य वा आधारेण भारतस्य नागरिकः इति मन्येत।

१०. नागरिकताधिकाराणाम् अनुवृत्तिः- यः कोऽपि जनः एतस्य भागस्य पूर्वगामिनाम् उपबन्धानाम् अन्यतमस्य कस्यापि अधीनं नागरिकः अस्ति तथा वा मन्यते सः संसदा यः कोऽपि विधिः प्रणीतः भवेत् तस्य उपबन्धानाम् अधीनं भारतस्य नागरिकतया अनुवर्तेत।

११. संसदा विधिना नागरिकताधिकारविनियमनम्- एतस्य भागस्य पूर्वगामिनाम् उपबन्धानां किमपि नागरिकतार्जन-समापने, नागरिकतासम्बद्धान् अन्यान् सर्वान् विषयान् च उद्दिश्य कस्यापि उपबन्धस्य निर्माणे संसदः शक्तिं न अल्पीकुर्यात्।

भागः ३

मूलाधिकाराः

साधारण

१२. परिभाषा- अस्मिन् भागे, यावत् सन्दर्भेण अन्यथा अपेक्षितं न भवेत् तावत्, "राज्य" इति शब्दः भारतस्य शासनं संसदं च, प्रत्येकं राज्यानां शासनं विधानमण्डलं च, तथा भारतस्य राज्यक्षेत्राभ्यन्तरान् भारतस्य नियन्त्रणाधीनान् वा, सर्वान् स्थानीयान् अन्यान् प्राधिकारिणः अन्तर्भावयति।

१३. मूलाधिकारैः असङ्गताः तेषाम् अल्पीकराः वा विधयः- (१) अस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वं भारतस्य राज्यक्षेत्रे प्रवृत्ताः सर्वे विधयः तावन्मात्रं शून्याः भवेयुः यावत् ते अस्य भागस्य उपबन्धैः असङ्गताः भवेयुः।

(२) राज्यं तादृशं कमपि विधिं न प्रणयेत् यः एतेन भागेन प्रदत्तान् अधिकारान्, अपहरति, अल्पीकरोति वा; अथ च अस्य खण्डस्य उल्लङ्घनेन प्रणीतः विधिः उल्लङ्घनमात्रां यावत् शून्यः भवेत्।

(३) एतस्मिन् अनुच्छेदे यावत् सन्दर्भेण अन्यथा अपेक्षितं न भवति तावत्-

(क) "विधि" शब्दः भारतस्य राज्यक्षेत्रे विधिशक्तिधरं यं कमपि अध्यादेशम्, आदेशम्, उपविधिं, नियमं, विनियमम्, अधिसूचनां, रूढिं, प्रथां च अन्तर्भावयति;

(ख) "प्रवृत्ताः सर्वे विधयः" इतिः शब्दसमूहः केनापि विधानमण्डलेन, अन्येन च क्षमेण प्राधिकारिणा भारतस्य राज्यक्षेत्रे, अस्य संविधानस्य प्रारम्भात् पूर्वं पारितान्, प्रणीतान् वा, पूर्वम् अनिरस्तान् च विधीन् अपि अन्तर्भावयति, यद्यपि तादृशः कोऽपि विधिः, तस्य कोऽपि भागो वा पूर्णतया, विशिष्टेषु क्षेत्रेषु वा; तदा प्रवृत्तः न भवेत्।

[1][(४) एतद् अनुच्छेदगतं किमपि ३६८-तमानुच्छेदाधीनम् अस्य संविधानस्य किमपि संशोधनं न विषयीकुर्यात्।]

समतायाः अधिकारः

१४. विधिसमक्षे समता- भारतस्य राज्यक्षेत्रे राज्यं कमपि जनं विधिसमक्षे समतायाः विधीनां समसंरक्षणात् वा वञ्चितं न कुर्यात्।

१५. धर्मस्य, मूलवंशस्य, जातेः, लिङ्गस्य, जन्मस्थानस्य वा आधारतः विभेदस्य प्रतिषेधः- (१) राज्यं कमपि नागरिकं प्रति केवलं धर्मस्य, मूलवंशस्य, जातेः, लिङ्गस्य, जन्मस्थानस्य वा, एतेषाम् अन्यतमस्य वा कस्यापि आधारतः विभेदं न कुर्यात्।

(२) कोऽपि नागरिकः केवलं धर्मस्य, मूलवंशस्य, जातेः, लिङ्गस्य, जन्मस्थानस्य वा, एतेषाम् अन्यतमस्य वा कस्यापि आधारतः-

---

1 संविधानस्य (चतुर्विंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य २-अनुभागेन एषः खण्डः संनिवेशितः।

(क) आपणेषु, सार्वजनिकभोजनालयेषु, विश्रामालयेषु, सार्वजनिकमनोरञ्जनस्थानेषु च प्रवेशविषये;

(ख) राज्यनिधितः पूर्णतः अंशतः वा पोषितानां साधारणजनतायाः उपयोगाय समर्पितानां कूपानां, तडागानां, स्नानतीर्थानां, मार्गाणां, सार्वजनिकसमागमस्थलानां वा उपयोगस्य विषये, निर्योग्यतायाः, दायित्वस्य, निर्बन्धनस्य, प्रतिबन्धनस्य वा अधीनः न भवेत्।

(३) एतदनुच्छेदगतं किमपि स्त्रीणां, बालानां च कृते कस्यापि विशेषोपबन्धस्य करणात् राज्यं न निवारयेत्।

[1][(४) एतदनुच्छेदगतं वा, २९–तमानुच्छेदस्य (२) खण्डगतं वा किमपि सामाजिकदृष्ट्या, शैक्षणिकदृष्ट्या वा, अप्रगतनागरिकाणां केषाञ्चित् वर्गाणाम् उन्नतिकृते, अनुसूचितजातीनां कृते, अनुसूचितजनजातीनां कृते वा, कस्यापि विशेषोपबन्धस्य करणात् राज्यं न निवारयेत्।]

[2][(५)अस्य अनुच्छेदस्य अथवा अनुच्छेदः १९ इत्यस्य खण्डः (१) उपखण्डः (छ) इत्यस्य कोऽपि विषयः राज्यं सामाजिक-शैक्षिकदृष्ट्या पश्चवर्त्ति-जनानां केषाम् अपि वर्गाणाम् उन्नत्यै अथवा अनुसूचितजातिभ्यः तथा अनुसूचितजनजातिभ्यः, विधिना, कांश्चिद् अपि विशेषोपबन्धान् कर्तुं न निवारयेत्, यावत् एतादृशः विशेषोपबन्धः, अनुच्छेदः ३० इत्यस्य खण्डः (१) इत्यत्र निर्दिष्टाभ्यः अल्पसङ्ख्यक-शिक्षासंस्थाभ्यः पृथक्, शैक्षिकसंस्थासु, यदन्तर्गते निजी-शैक्षिकसंस्थाः अपि सन्ति, यदि ताः राज्यात् सहाय्यप्राप्ता अप्राप्ता वा, प्रवेशेन सम्बन्धिताः सन्ति।]

[3][(६) अयम् अनुच्छेदः तथा १९ इत्यस्य खण्डः (१) इत्यस्य उपखण्डः (छ) अथवा अनुच्छेदः २९ इत्यस्य खण्डः (२) इत्यस्य कोऽपि विषयः, राज्यं-

(क) खण्डः (४) तथा खण्डः (५) इत्यनयोः उल्लिखितेभ्यः वर्गेभ्यः पृथग्नागरिकाणां केषांचित् आर्थिकदृष्ट्या अशक्तवर्गाणाम् उन्नत्यै कोऽपि विशेषोपन्बन्धान् कर्तुं न अवरोधयेत्; तथा

(ख) खण्डः (४) तथा खण्डः (५) इत्यनयोः उल्लिखितेभ्यः वर्गेभ्यः पृथग्नागरिकाणां केषांचित् आर्थिकदृष्ट्या अशक्तवर्गाणाम् उन्नत्यै कोऽपि विशेषोपबन्धान् कर्तुं न अवरोधयेत्, यावत् एतादृशः उपबन्धः, एतादृशेषु शैक्षणिकसंस्थासु यस्यान्तर्गते अनुच्छेदः ३० इत्यस्य खण्डः (१) इत्यत्र निर्दिष्टाभ्यः अल्पसङ्ख्यक-शैक्षणिकसंस्थाभ्यः पृथक् अशासकीयसंस्थाः अपि सन्ति, यद्वा ताः राज्येन सहायिता असहायिता वा सन्ति, प्रवेशसम्बन्धिनः ये विद्यमान-आरक्षणनियमाः सन्ति तदतिरिच्य अधिकाधिकं १०-प्रतिशतं स्थानानि आर्थिकदृष्ट्या अशक्तवर्गाणां कृते आरक्षितानि भवेयुः।

---

1 संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य २-अनुभागेन एषः खण्डः परिवर्धितः।

2 संविधानस्य (त्रिनवतितमं संशोधनम्) अधिनियमः, २००५ वर्षस्य २-अनुभागेन (२०-१-२००६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

3 संविधानस्य (त्र्यधिकैकशततमं संशोधनम्) अधिनियमः, २०१९ वर्षस्य २-अनुभागेन (१४-१-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

स्पष्टीकरणम्- अयम् अनुच्छेदः तथा अनुच्छेदः १६ इत्यस्य प्रयोजनार्थं "आर्थिकदृष्ट्या अशक्तवर्गाः" ते भवेयुः, ये राज्येन कुटुम्बस्य निर्धारितः आयः तथा आर्थिक-विपन्नतायाः अन्यैः सूचकैः आधृताः यथाकालं अधिसूचयेत्।]

१६. लोकनियोजनविषयेषु अवसरसमता- (१) राज्याधीने कस्मिन्नपि पदे नियोजनस्य, नियुक्तेः वा सम्बन्धिषु विषयेषु सर्वेषां नागरिकाणां कृते अवसरस्य समता भवेत्।

(२) केवलं धर्मस्य, मूलवंशस्य, जातेः, लिङ्गस्य, उद्भवस्य, जन्मस्थानस्य, निवासस्य वा एतेषाम् अन्यतमस्य कस्यापि वा आधारतः राज्याधीनस्य नियोजनस्य पदस्य वा विषयकस्यापि नागरिकस्य अपात्रता न भवेत्, न वा तं प्रति विभेदः करणीयः भवेत्।

(३) एतदनुच्छेदगतं किमपि [1][कस्यापि राज्यस्य, सङ्घराज्यक्षेत्रस्य वा शासनस्य, अथवा एतेषाम् अन्यतमस्य अभ्यन्तर्गतस्य कस्यापि स्थानीयस्य अन्यस्य वा प्राधिकारिणः अधीने] कस्मिन् अपि पदे नियोजनस्य नियुक्तेः वा, प्रकारस्य प्रकाराणां वा सम्बन्धे एतादृशस्य नियोजनस्य, एतादृश्याः नियुक्तेः वा पूर्वं, तस्मिन् राज्ये, सङ्घस्य राज्यक्षेत्रे वा निवासस्य अपेक्षां विदधानस्य कस्यापि विधेः प्रणयनात् संसदं न निवारयेत्।

(४) एतदनुच्छेदगतं किमपि राज्याधीनासु सेवासु, यस्य कस्यापि अप्रगतस्य नागरिकवर्गस्य प्रतिनिधित्वं, सम्बन्धिराज्यमत्या, अपर्याप्तम् अस्ति तस्य कृते नियुक्तीनां पदानां वा आरक्षणार्थं कस्यापि उपबन्धस्य करणात् राज्यं न निवारयेत्।

[2][(४क) अस्य अनुच्छेदस्य कोऽपि विषयः राज्यम् अनुसूचितजातीनां तथा अनुसूचितजनजातीनां पक्षे, येषां प्रतिनिधित्वं राज्यस्य मते राज्याधीनासु सेवासु अपर्याप्तम् अस्ति, राज्याधीनासु सेवासु [3][केषाञ्चित् वर्गस्य अथवा वर्गाणां प्रोन्नतिविषयकेषु, पारिणामिकज्येष्ठतया सहितं] आरक्षणार्थम् उपबन्धकर्तुं न अवरोधयेत्।

[4][(४ख) अस्य अनुच्छेदस्य कोऽपि विषयः कस्मिन् अपि वर्षे काश्चित् अपूरिताः एतादृशीः रिक्तीः, याः खण्डः (४) तथा (४क) इत्यस्य अधीनेभ्यः कृतारक्षणेभ्यः कस्यापि उपबन्धस्य अनुसारं तस्मिन् वर्षे पूरितार्थं रिक्तयः आरक्षिताः सन्ति, केषु अपि उत्तरवर्त्तिवर्षे अथवा वर्षेषु पूरितार्थम् इतरवर्गाणां रिक्तीनां रूपे विचारकरणे न निवारयेत् तथा एतादृशस्य वर्गस्य रिक्तिषु तस्य वर्षस्य रिक्तिभिः सह यस्मिन् ताः पूर्यमाणाः सन्ति, तस्य वर्षस्य रिक्तीनां सकलसङ्ख्यायाः सम्बन्धे पञ्चाशत्-प्रतिशतम् आरक्षणस्य अधिकतमं सीमायाः अवधारणार्थं न विचारयेत्।

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६-इत्यस्य २९-अनुभागेन "प्रथमानुसूच्यामुल्लिखितस्य कस्यापि राज्यस्य अथवा तद्राज्यक्षेत्रे कस्यापि स्थानीयस्यान्यस्य वा प्राधिकारिणः अधीने" इति एतस्मात् प्रति एतत् संनिवेशितम्।

2 संविधानस्य (सप्तसप्ततितमं संशोधनम्) अधिनियमः, १९९५ वर्षस्य २-अनुभागेन (१७-६-१९९५ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

3 संविधानस्य (पञ्चाशीतितमं संशोधनम्) अधिनियमः, २००१ वर्षस्य २-अनुभागेन (भूतलक्षिप्रभावेण) (१७-६-१९९५ दिनाङ्कात् प्रवर्तमानप्रभावेण) केषांचित् शब्दानां स्थाने संनिवेशितः।

4 संविधानस्य (एकाशीतितमं संशोधनम्) अधिनियमः, २००० वर्षस्य २-अनुभागेन (९-६-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

(५) एतदनुच्छेदगतं किमपि कस्यापि तस्य विधेः प्रवृत्तौ प्रभावं न आपादयेत् यः एवम् उपबन्धयति यत् कस्यापि धर्मविशेषस्य अनुयायी, सम्प्रदायविशेषेण सम्बद्धः एव वा जनः कस्याः अपि धार्मिक्याः साम्प्रदायिक्याः वा संस्थायाः कार्यसम्बन्धेन पदधारी तत्शासिनिकायस्य सदस्यः वा भवेत्।

[1][(६) अस्य अनुच्छेदस्य कोऽपि विषयः राज्यं विद्यमान-आरक्षणस्य अतिरिक्तं तथा प्रत्येकं प्रवर्गेषु स्थानानाम् अधिकाधिकं १०-प्रतिशतम् इति अध्याधीनं, खण्डः (४) इत्यत्र उल्लिखितेभ्यः वर्गेभ्यः पृथग् नागरिकाणां केषांचित् आर्थिकदृष्ट्या अशक्तवर्गाणां पक्षे नियोजनानां तथा स्थानानाम् आरक्षणार्थम् उपबन्धान् कर्तुं न अवरोधयेत्।]

१७. अस्पृश्यतायाः निराकरणम्- "अस्पृश्यता" समाप्यते; तस्याश्च केनापि रूपेण आचरणं निषिध्यते। अस्पृश्यतया उत्पद्यमानायाः कस्याः अपि निर्योग्यतायाः प्रवर्तनं विधेः अनुसारेणदण्डनीयः अपराधः भवेत्।

१८. सम्मानपदानां निराकरणम्- (१) सेनाविषयकं विद्याविषयकं वा वैशिष्ट्यं व्यतिरिच्य किमपि सम्मानपदं राज्येन न प्रदीयेत। (२) कोऽपि भारतस्य नागरिकः कस्मादपि वैदेशिकराज्यात् किमपि सम्मानपदं न स्वीकुर्यात्।

(३) यः कोऽपि जनः भारतस्य नागरिकः न अस्ति, सः यावत् राज्याधीनं लाभस्य वा विश्वासस्य वा पदं धारयति तावत्, राष्ट्रपतेः सम्मतिं विना कस्मादपि, वैदेशिकराज्यात् किमपि सम्मानपदं न स्वीकुर्यात्।

(४) लाभस्य विश्वासस्य वा किमपि पदं धारयमाणः कोऽपिजनः वैदेशिकराज्यात्, तदधीनं वा केनापि रूपेण किमपि उपायनम्, उपलब्धिं, पदं वा राष्ट्रपतेः सम्मतिं विना न स्वीकुर्यात्।

स्वातन्त्र्याधिकारः

१९. वाक्स्वातन्त्र्यादिविषयकाणां केषांचित् अधिकाराणां संरक्षणम्- (१) सर्वेषां नागरिकाणाम्-

(क) वाक्-स्वातन्त्र्ये, अभिव्यक्तिस्वातन्त्र्ये च;

(ख) शान्तिपूर्वकं निरायुधं च सम्मेलने;

(ग) सङ्गमानां सङ्घानां [2][अथवा सहकारिसमितीनां] च निर्माणे;

(घ) भारतस्य राज्यक्षेत्रे सर्वत्र अबाधं सञ्चरणे;

---

[1] संविधानस्य (त्र्यधिकैकशततमं संशोधनम्) अधिनियमः, २०१९ वर्षस्य ३-अनुभागेन (१४-१-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

[2] संविधानस्य (सप्तनवतितमं संशोधनम्) अधिनियमः, २०११ वर्षस्य २-अनुभागेन (८-२-२०१२ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

(ङ) भारतस्य राज्यक्षेत्रस्य कस्मिंश्चिदपि भागे निवासे, स्थिरवासे च; [1][तथा]

[2][(च) * * * * *]

(छ) कस्याः अपि वृत्तेः, उपजीविकायाः, व्यापारस्य, कार्यस्य वा अनुवर्तने, अधिकारः भवेत्।

[3][(२) (१) खण्डीय (क) उपखण्डगतं किमपि उक्तोपखण्डेन प्रदत्तस्य अधिकारस्य प्रयोगे [4][भारतस्य प्रभुतायाः अखण्डतायाश्च] राज्यस्य सुरक्षायाः, वैदेशिकराज्यैः सह मैत्रीपूर्णसम्बन्धानां, लोकव्यवस्थायाः, शिष्टाचारस्य, सदाचारस्य वा हितानाम् अर्थे; अथवा न्यायालयावमानस्य, मानहानेः, अपराधोद्दीपनस्य वा सम्बन्धे, कोऽपि विद्यमानः विधिः यावत् युक्तियुक्तानि, निर्बन्धनानि अधिरोपयति, तावत् एतस्य प्रवर्तनं न प्रभावयेत् न वा एतादृशानि निर्बन्धनानि अधिरोपयतः कस्यापि विधेः प्रणयनात् राज्यं निवारयेत्।]

(३) उक्तखण्डस्य (ख) उपखण्डगतं किमपि उक्तोपखण्डेन प्रदत्तानाम् अधिकाराणां प्रयोगे [4][भारतस्य प्रभुतायाः अखण्डतायाश्च] लोकव्यवस्थायाः वा हितानाम् अर्थे कोऽपि विद्यमानः विधिः, यावत् युक्तियुक्तानि निर्बन्धनानि अधिरोपयति, तावत् एतस्य प्रवर्तनं न प्रभावयेत्, न वा एतादृशानि निर्बन्धनानि अधिरोपयतः कस्यापि विधेः प्रणयनात् राज्यं निवारयेत्।

(४) उक्तखण्डस्य (ग) उपखण्डगतं किमपि उक्तोपखण्डेन प्रदत्तानाम् अधिकाराणां प्रयोगे, [4][भारतस्य प्रभुतायाः अखण्डतायाश्च] लोकव्यवस्थायाः सदाचारस्य वा हितानाम् अर्थे कोऽपि विद्यमानः विधिः यावत् युक्तियुक्तानि निर्बन्धनानि अधिरोपयति तावत्, एतस्य प्रवर्तनं न प्रभावयेत्, न वा एतादृशानि निर्बन्धनानि अधिरोपयतः कस्यापि विधेः प्रणयनात् राज्यं निवारयेत्।

(५) [5][उक्तखण्डस्य (घ) उपखण्डे, (ङ) उपखण्डे वा] गतं किमपि उक्तोपखण्डाभ्यां प्रदत्तानाम् अधिकाराणां प्रयोगे साधारणजनतायाः हितानाम् अर्थे, कस्यापि अनुसूचितायाः जनजातेः हितानां संरक्षणाय कोऽपि विद्यमानः विधिः यावत् युक्तियुक्तानि निर्बन्धनानि अधिरोपयति, तावत् एतस्य प्रवर्तनं न प्रभावयेत्; न वा एतादृशानि निर्बन्धनानि अधिरोपयतः कस्यापि विधेः प्रणयनात् राज्यं निवारयेत्।

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य २-अनुभागेन एषः शब्दः अन्तर्वेशितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन (च) उपखण्डः लोपितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य ३-अनुभागेन द्वितीयखण्डात् प्रति एषः खण्डः भूतलक्षिप्रभावेण संनिवेशितः।

4 संविधानस्य (षोडशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य २-अनुभागेन एते शब्दाः संनिवेशिताः।

5 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य २–अनुभागेन "उक्तखण्डीय (घ) (ङ) (च) उपखण्ड"–इत्येतत् प्रति एतत् संनिवेशितम् (२०-६-१९७९ दिनाङ्कात् प्रवर्त्तमानप्रभावेण)।

(६) उक्तखण्डस्य (छ) उपखण्डगतं किमपि उक्तोपखण्डेन प्रदत्तानाम् अधिकाराणां प्रयोगे साधारणजनतायाः हितानाम् अर्थे, कोऽपि विद्यमानः विधिः यावत् युक्तियुक्तानि निर्बन्धनानि अधिरोपयति तावत् एतस्य प्रवर्तनं न प्रभावयेत्, न वा एतादृशानि निर्बन्धनानि अधिरोपयतः कस्यापि विधेः प्रणयनात् राज्यं निवारयेत्; तथा च विशिष्टतया [1][उक्तोपखण्डगतं किमपि-

(प्रथमः) कस्याः अपि वृत्तेः, उपजीविकायाः, व्यापारस्य, कार्यस्य वा करणे आवश्यकीः वृत्तिसम्बन्धिनीः शिल्पसम्बन्धिनीः वा अर्हताः,

(द्वितीयः) राज्येन, राज्यस्य स्वामित्वे नियन्त्रणे वा स्थितेन केनापि निगमेन, नागरिकाणां पूर्णतः अंशतः वा अपवर्जनं कृत्वा, अन्यथा वा, कस्यापि व्यापारस्य, कार्यस्य उद्योगस्य, सेवायाः वा अनुसरणम्,

कोऽपि विद्यमानः विधिः यावत् विषयीकरोति तावत् एतस्य प्रवर्तनं न प्रभावयेत् न वा एतद्विषयकस्य कस्यापि विधेः प्रणयनात् राज्यं निवारयेत्।]

२०. अपराधानां हेतोः दोषसिद्धेः सम्बन्धे संरक्षणम्- (१) कोऽपि जनः अपराधत्वेन आरोपितायाः क्रियायाः करणसमये प्रवृत्तस्य विधेः अतिक्रमणम् अन्तरेण केनापि अपराधेन सिद्धदोषः न क्रियेत, न वा तावत्याः शास्तेः अधिकतरायाः शास्त्याः भागी भवेत्, यावती तदपराधस्य करणस्य समये प्रवृत्तस्य विधेः अधीनम् अधिरोपिता भवेत्।

(२) कोऽपि जनः एकस्य एव अपराधस्य कृते एकवारात् अधिकम् अभियोजितः दण्डितश्च न भवेत्।

(३) केनापि अपराधेन अभियुक्तः कोऽपि जनः स्वात्मनः विरुद्धं साक्षित्वेन बलात् प्रवर्तितः न भवेत्।

२१. प्राणानां दैहिकस्वतन्त्रतायाश्च संरक्षणम्- कोऽपि जनः स्वस्य प्राणेभ्यः, दैहिकस्वतन्त्रतायाः वा, विधिना स्थापितायाः प्रक्रियायाः अनुसारेण एव वियोजितः भवेत्, नान्यथा।

[2][**२१क. शिक्षायाः अधिकारः-** राज्यं, षड्-वर्षवयसः चतुर्दश-वर्षवयः पर्यन्तं सर्वेभ्यः बालकेभ्यः निःशुल्का तथा अनिवार्या शिक्षा प्रदातुम् एतादृश्यां रीत्यां, यत् राज्यं विधिना अवधारयेत्, उपबन्धयेत्।]

२२. अवस्थाविशेषेषु बन्दीकरणात्, निरोधात् च संरक्षणम्- (१) यः जनः बन्दीकृतः अस्ति सः एतादृशस्य बन्दीकरणस्य कारणानि यथाशक्यं शीघ्रं न चेद् अवबोधितः, अभिरक्षायां निरुद्धः न तिष्ठेत्; न वा सः स्वेष्टेन विधिव्यवसायिना सह परामर्शस्य, तेन कर्तव्यायाः आत्मप्रतिरक्षायाश्च अधिकारात् वञ्चितः भवेत्।

---

1 संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य ३-अनुभागेन "उक्तोपखण्डगतं किमपि" इत्येतस्मात्प्रारभ्य "राज्यं निवारयेत्" यावत् इत्येतेभ्यः शब्देभ्यः प्रति एतत्संनिवेशितम्।

2 संविधानस्य (षडशीतितमं संशोधनम्) अधिनियमः, २००२ वर्षस्य २-अनुभागेन (१-४-२०१० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

(२) यः कोऽपि बन्दीकृतः अभिरक्षायां निरुद्धश्च अस्ति सः नेदिष्ठस्य दण्डाधीशस्य समक्षं, तादृशबन्दीकरणात् आरभ्य, बन्दीकरणस्थानात् दण्डाधीशस्य न्यायालयं गमनार्थम् आवश्यकं कालं विहाय, चतुर्विंशतिर्होराकालावधौ, उपस्थाप्येत; अपि च एतादृशः कोऽपि जनः दण्डाधीशस्य प्राधिकारं विना उक्तकालावधेः परम् अभिरक्षायां निरुद्धः न भवेत्।

(३) (१) खण्डगतं, (२) खण्डगतं च किमपि-

(क) यः तत् काले वैदेशिकः शत्रुः अस्तिः, अथवा

(ख) यः निवारकनिरोधाय उपबन्धं कुर्वतः विधेः अधीनं बन्दीकृतः, निरुद्धः वा अस्ति, तं कमपि जनं न विषयीकुर्यात्।

*(४) निवारकनिरोधाय उपबन्धं कुर्वन् कोऽपि विधिः कस्यापि जनस्य मासत्रयकालावधेः परं निरोधं तावत् प्राधिकृतं न कुर्यात् यावत्-

(क) येः जनाः उच्चन्यायालयस्य न्यायाधीशाः सन्ति आसन् वा, एवं नियुक्त्यर्हाः सन्ति वा तैः सम्भूय संवृत्ता मन्त्रणामण्डली, उक्तस्य मासत्रयकालावधेः समाप्तेः प्राक्, न प्रतिवेदयेत् यद् अस्याः मते निरोधस्य कृते पर्याप्तं कारणम् अस्ति इति-

---

* संविधानस्य (चतुश्चत्वारिंशततमं संशोधनम्) अधिनियमः,१९७८ इत्यस्य ३-अनुभागेन (अधिसूचनायाः दिनाङ्कात् यत् अधिसूचितं नास्ति) खण्डः-४ इत्यस्य स्थाने निम्नलिखितं प्रतिष्ठापित भवेत्—

(४) निवारकनिरोधाय उपबन्धयन् कोऽपि विधिः कस्यापि जनस्य निरोधं मासद्वयकालावधेः परं तावत् न प्राधिकृतं कुर्यात्, यावत् समुचितोच्चन्यायालयस्य मुख्यन्यायमूर्तिनः पुरःप्रशंसनानुसारं घटितया मन्त्रणामण्डल्या उक्तमासद्वयावधेः समाप्तेः प्राक् एतस्याः मते तादृशनिरोधाय पर्याप्तं कारणम् अस्ति इति प्रतिवेदनं दत्तं न भवति ---

'परन्तु मन्त्रणामण्डली एकेन अध्यक्षेण तथा न्यूनात् न्यूनं द्वाभ्यां अन्यसदस्याभ्यां सम्भूय भवेत् तथा अध्यक्षः समुचितस्य उच्चन्यायालयस्य सेवारतः न्यायाधीशः भवेत् तथा अन्यसदस्याः कस्यचिद् अपि उच्चन्यायालयस्य सेवारताः, सेवानिवृत्ताः वा न्यायाधीशाः भवेयुः -:

अपरं च एतत्खण्डगतं किमपि कस्यापि जनस्य निरोधं तादृशस्य कालावधेः परं न प्राधिकृतं कुर्यात् यादृशः (७) खण्डस्य (क) उपखण्डस्य अधीनं संसदा निर्मितेन विधिना विहितः भवेत्।

स्पष्टीकरणम् – एतस्मिन् खण्डे "समुचितोच्चन्यायालयः" इत्येतेन अभिप्रेयते-

(१) भारतशासनेन अथवा एतत् शासनस्य अधीनस्थेन केनापि अधिकारिणा प्राधिकारिणा वा कृतस्य निरोधादेशस्य अनुसरणे निरुद्धस्य जनस्य विषये-दिल्ली सङ्घराज्यक्षेत्रस्य उच्चन्यायालयः;

(२) सङ्घराज्यक्षेत्रात् भिन्नस्य कस्यापि राज्यस्य शासनेन कृतस्य निरोधादेशस्य अनुसरणे निरुद्धस्य जनस्य विषये तद्राज्यस्य उच्चन्यायालयः; तथा

(३) कस्यापि सङ्घराज्यक्षेत्रस्य प्रशासकस्य अधीनस्थेन केनापि अधिकारिणा, प्राधिकारिणा वा कृतस्य निरोधादेशस्य अनुसरणे निरुद्धस्य जनस्य विषये – सः उच्चन्यायालयः यः संसदा एतत् सम्बन्धे निर्मितेन विधिना तदधीनं वा विनिर्दिष्टः भवेत्।

परन्तु एतदुपखण्डगतं किमपि (७) खण्डीय (ख) उपखण्डस्य अधीनं संसदा प्रणीतेन केनापि विधिना विहितात् अधिकतमात् कालात् परं कस्यापि जनस्य निरोधं प्राधिकृतं न कुर्यात्; अथवा

(ख) एतादृशः जनः (७) खण्डीय (क) उपखण्डस्य (ख) उपखण्डस्य वा अधीनं संसदा प्रणीतस्य कस्यापि विधेः उपबन्धानाम् अनुसारं न निरुद्धः अस्ति।

(५) निवारकनिरोधाय उपबन्धं कुर्वतः कस्यापि विधेः अधीनं प्रदत्तस्य आदेशस्य अनुसारं यदा कोऽपि जनः निरुध्यते तदा तस्य आदेशस्य प्रदाता प्राधिकारी, यथाशक्यं शीघ्रं, तं जनं तान् आधारान् संसूचयेत् यान् आश्रित्य स आदेशः कृतः अस्ति; किञ्च तस्मै तस्य आदेशस्य विरुद्धम् अभ्यावेदनं कर्तुं यथाशक्यं शीघ्रम् अवसरं दद्यात्।

(६) (५) खण्डगतं किमपि न अपेक्षते यत् तस्मिन् खण्डे निर्दिष्टस्य आदेशस्य प्रदाता प्राधिकारी, तानि तथ्यानि प्रकटीकुर्यात् येषां प्रकटीकरणं तादृशः प्राधिकारी लोकहितविरोधीति मन्यते।

(७) संसद्विधिना विधातुं क्षमते यत्-

*(क) कासां परिस्थितीनाम् अधीनं कस्य प्रकारस्य, केषां वा प्रकाराणां विषयेषु, कश्चित् जनः (४) खण्डीयः (क) उपखण्डस्य उपबन्धानाम् अनुसारं मन्त्रणामण्डल्याः मतम् अनासाद्य निवारकनिरोधाय उपबन्धं कुर्वतः कस्यापि विधेः अधीनं, मासत्रयात् अधिककालावधिः निरुद्धः कर्तुं शक्यते;

**(ख)कस्य प्रकारस्य विषये, केषां प्रकाराणां वा विषयेषु कोऽपि जनः निवारकनिरोधाय उपबन्धयतः कस्यापि विधेः अधीनम् अधिकतमं कियत्कालावधिः निरुद्धः कर्तुं शक्यते; तथा च

(ग) मन्त्रणामण्डल्या *(४) खण्डीयः (क) उपखण्डाधीनं, परिप्रश्ने अनुसरणीया प्रक्रिया का भवेत् इति।

---

* संविधानस्य (चतुश्चत्वारिंशततमं संशोधनम्) अधिनियमः,१९७८ इत्यस्य (३ख) (i)-अनपभागेन (दिनाङ्कः सूचयिष्यते) उपखण्डः (क) लोपितः

** (२) (ख) उपखण्डः (क) उपखण्डरूपेण पुनः अक्षराङ्कितः भवेत्, तथा (दिनाङ्कः सूचयिष्यते)

*** (३) (ग) उपखण्डः (ख) उपखण्डरूपेण पुनः अक्षराङ्कितः भवेत् तथा एवं पुनः अक्षराङ्किते उपखण्डे (दिनाङ्कः सूचयिष्यते)

**** (४) खण्डीय (क) उपखण्डाधीनम्" इति शब्देभ्यः, कोष्ठकाभ्याम्, अङ्कात् च प्रति " (४) खण्डाधीनम्" इति शब्दः कोष्ठकः अङ्कश्च संनिवेशिताः भवेयुः। (दिनाङ्कः सूचयिष्यते)

भारतस्य संविधानम्

(भागः ३-मूलाधिकाराः)

शोषणविरोधी-अधिकारः

२३. मानवदुर्व्यापारस्य, बलात् श्रमस्य च प्रतिषेधः- (१) मानवस्य दुर्व्यापारः, विष्टिश्च (बेगार), बलात् गृहीतस्य श्रमस्य एतादृशाः अन्ये प्रकाराश्च प्रतिषिद्धाः सन्ति तथा च अस्य उपबन्धस्य किमपि उल्लङ्घनं विधेः अनुसारं दण्डनीयः अपराधः भवेत्।

(२) एतद् अनुच्छेदगतं किमपि सार्वजनिकप्रयोजनार्थम् अपरिहार्यसेवायाः अधिरोपणात् राज्यं न निवारयेत्; किञ्च राज्यं एतादृश्याः सेवायाः अधिरोपणे, केवलं धर्मस्य, मूलवंशस्य, जातेः, वर्गस्य, एतेषाम् अन्यतमस्य वा कस्यापि आधारतः कमपि विभेदं न कुर्यात्।

२४. कर्मान्तादिषु बालानां नियोजनस्य प्रतिषेधः- चतुर्दशभ्यः वर्षेभ्यः अर्वाग्वयः कोऽपि बालकः कस्मिन् अपि कर्मान्ते, खनौ वा कर्मणि न नियुज्येत, न वा अन्यस्मिन् परिसङ्कटमये नियोजने व्यापृतः क्रियेत।

धर्मस्वतन्त्रतायाः अधिकारः

२५. अन्तःकरणे, धर्मस्य स्वानुरूपप्रतिपादने, आचरणे, प्रचारे च स्वतन्त्रता- (१) लोकव्यवस्थायाः, सदाचारस्य, स्वास्थ्यस्य, एतद्भागीयानाम् अन्येषाम् उपबन्धानां च अधीनं, सर्वे जनाः अन्तःकरणस्य स्वतन्त्रतायां, धर्मस्य स्वानुरूपप्रतिपादने, आचरणे, प्रचारकरणे च, समानतया स्वत्ववन्तः सन्ति।

(२) एतद् अनुच्छेदगतं किमपि, तस्य कस्यापि विद्यमानस्य विधेः प्रवर्तनं न प्रभावयेत् न वा तस्य कस्यापि विधेः प्रणयनात् राज्यं निवारयेत् यः-

(क) कस्यापि आर्थिकस्य, वित्तीयस्य, राजनीतिकस्य अन्यस्य वा लौकिकस्य धार्मिकाचरणेन सम्बद्धस्य क्रियाकलापस्य विनियमनं, निर्बन्धनं वा करोति;

(ख) सामाजिककल्याणाय, सामाजिकसुधारणायै च उपबन्धयति; हिन्दूनां सर्वेभ्यः वर्गेभ्यः विभागेभ्यश्च सार्वजनिकरूपाणां हिन्दूधार्मिकसंस्थानाम् अपावरणं वा करोति।

स्पष्टीकरणम् १- कृपाणस्य धारणं वहनं च सिखधर्मस्य अभ्युपगमे अन्तर्भावितम् इति मन्येत।

स्पष्टीकरणम् २- (२) खण्डीयः (ख) उपखण्डे हिन्दूनां प्रतिनिर्देशः, सिखस्य, जैनस्य, बौद्धस्य च धर्मस्य अभ्युपगन्तॄणां जनानां प्रति निर्देशम् अन्तर्भावयति इति अर्थः कृतः भवेत्; हिन्दूधार्मिकसंस्थानां प्रतिनिर्देशस्य अर्थश्च तदनुसारेण कृतः भवेत्।

२६. धार्मिककार्याणां प्रबन्धे स्वतन्त्रता- लोकव्यवस्थायाः, सदाचारस्य, स्वास्थ्यस्य च अधीनतया, प्रत्येकं धार्मिकसम्प्रदायः तस्य विभागः वा

(क) धार्मिकाणां, पूर्तसम्बन्धिनां वा प्रयोजनानां कृते संस्थानां स्थापने पोषणे वा;

(ख) धार्मिकविषयैः सम्बद्धानां स्वकार्याणां प्रबन्धकरणे;

(ग) जङ्गमायाः स्थावरायाश्च सम्पत्तेः अर्जने स्वामित्वे च; तथा

(घ) एतादृश्याः सम्पत्तेः विधेः अनुसारेण प्रशासने च,

अधिकारवान् भवेत्।

२७. कस्यापि धर्मविशेषस्य अभिवृद्ध्यर्थं कराणां सन्दाये स्वतन्त्रता- केनापि जनेन ते कराः बलात् न सन्दापनीयाः येषाम् आगमाः कस्यापि विशिष्टस्य धर्मस्य, धार्मिकस्य सम्प्रदायस्य वा अभिवृद्ध्यर्थं, पोषणार्थं वा करणीयानां व्ययानां कृते विनिर्देशपूर्वकं विनियोजिताः सन्ति।

२८. कासुचित् शिक्षासंस्थासु धार्मिकशिक्षार्थं धार्मिकोपासनार्थं वा उपस्थितौ स्वतन्त्रता- (१) राज्यनिधितः पूर्णतः पोषितायां कस्यामपि शिक्षासंस्थायां कापि धार्मिकी शिक्षा न वितीर्णा भवेत्।

(२) (१) खण्डगतं किमपि, तां शिक्षासंस्थां न विषयीकुर्यात् यस्याः प्रशासनं राज्येन क्रियते, किन्तु या कस्यापि तस्य न्यासस्य, विन्यासस्य वा अधीनं स्थापिता अस्ति, येन एतस्यां संस्थायां धार्मिकशिक्षावितरणम् आवश्यकं कृतम् अस्ति।

(३) राज्यतः मान्यताप्राप्तायां, राज्यनिधितः साहाय्यम् अधिगच्छन्त्यां वा, कस्यामपि शिक्षासंस्थायाम् उपतिष्ठन् कोऽपि जनः, तस्यां प्रदीयमानायां धार्मिकशिक्षायां भागी भवितुम्, तादृश्यां संस्थायां तत् संलग्ने स्थाने वा प्रवर्तितायां धार्मिकोपासनायां वा उपस्थातुं तावत् न विवशीकृतः भवेत् यावत् एतादृशः जनः– यदि च एतादृशः जनः अप्राप्तवयस्कः स्यात्, तर्हि तस्य संरक्षकः वा-स्वस्य सहमतिं तत्र न दत्तवान्।

सांस्कृतिकाः शैक्षिकाश्च अधिकाराः

२९. अल्पसङ्ख्यकवर्गाणां हितसंरक्षणम्- (१) भारतस्य राज्यक्षेत्रे, तस्य कस्मिन् अपि भागे वा निवसतां नागरिकाणां कोऽपि विभागः, यस्य स्वीया विशिष्टा भाषा, लिपिः, संस्कृतिः वा अस्ति, तस्याः परिपालने अधिकारवान् भवेत्।

(२) केवलं धर्मस्य, मूलवंशस्य, जातेः, भाषायाः एतेषाम् अन्यतमस्य कस्यापि आधारतः, कोऽपि नागरिकः राज्येन पोषितायां, राज्यनिधितः साहाय्यम् अधिगच्छन्त्यां वा कस्यामपि शिक्षासंस्थायां प्रवेशात् वञ्चितः न भवेत्।

३०. शिक्षासंस्थानानां स्थापने प्रशासने च अल्पसङ्ख्यकवर्गाणाम् अधिकारः (१) धर्मे, भाषायां वा अधिष्ठिताः सर्वे अल्पसङ्ख्यकाः वर्गाः स्वेष्टशिक्षासंस्थानां स्थापने प्रशासने च अधिकृताः भवेयुः

[1][(१क) (१) खण्डनिर्दिष्टेन केनापि अल्पसङ्ख्यकेन वर्गेण स्थापितायाः, प्रशासितायाः वा शिक्षासंस्थायाः सम्पत्तेः अनिवार्यतया अर्जनार्थम् उपबन्धं कुर्वतः विधेः प्रणयने, राज्यम् एतत् सुनिश्चितं कुर्यात् यत् तादृश्याः सम्पत्तेः अर्जनार्थं, तादृशेन विधिना, तदधीनं वा अवधारितः राशिः एतावान् अस्ति यः उक्तखण्डस्य अधीनं प्रत्याभूतम् अधिकारं निर्बन्धितं निराकृतं वा न करोति ।]

(२) राज्यं शिक्षासंस्थाभ्यः साहाय्यस्य अनुदाने, कस्याः अपि शिक्षा संस्थायाः विरुद्धम्, इयं धर्मे, भाषायां वा अधिष्ठितस्य अमुकस्य अल्पसङ्ख्यकवर्गस्य व्यवस्थाधीना अस्ति इति आधारतः विभेदं न कुर्यात् ।

[2]*　　　　*　　　　*　　　　*

३१. *[सम्पत्तेः अनिवार्यम् अर्जनं संविधानस्य]* *(चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ६-अनुभागेन २०-६-१९७९ दिनाङ्कात् निरसितः ।*

[3][केषांचित् विधीनां व्यावृत्तिः]

[4][३१क. सम्पदाम् अर्जनाय उपबन्धकानां विधीनां व्यावृत्तिरित्यादयः- [5][(१) १३-तमे अनुच्छेदे यत् किमपि अन्तर्विष्टे सत्यपि-

(क) कस्याः अपि सम्पदः तत्सम्बन्धितानां केषामपि अधिकाराणां वा राज्येन अर्जनार्थम्, एतादृशानाम् अधिकाराणां निर्वापणार्थं, परिवर्तनार्थं वा; अथवा

(ख) कस्याः अपि सम्पत्तेः लोकहितार्थं, तत्सम्पत्तेः उचितप्रबन्धस्य सुनिश्चितकरणोद्देश्येन वा परिसीमितकालावधिं यावत् राज्यद्वारा तस्य प्रबन्धस्य ग्रहणार्थम्; अथवा

(ग) कस्यापि निगमद्वयस्य, तदधिकनिगमानां वा लोकहितार्थम्, अथवा एतेषाम् अन्यतमस्य उचितं प्रबन्धं सुनिश्चेतुं, समामेलनार्थम्; अथवा

(घ) निगमानां प्रबन्धाभिकर्तॄणां, सचिवानां, कोषाध्यक्षाणां, प्रबन्धनिदेशकानां, निदेशकानां, प्रबन्धकानां वा केषामपि अधिकाराणां, तेषां भागधारकाणां केषांचित् मतदानाधिकाराणां वा निर्वापणार्थं, परिवर्तनार्थम्; अथवा

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण अन्तर्वेशितः) ।

2 उपर्युक्ताधिनियमस्य ५-अनुभागेन "सम्पत्तेः अधिकारः" इति उपशीर्षकं लोपितम् (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

3 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३-अनुभागेन अन्तर्वेशितः (३-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

4 संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य ४-अनुभागेन अन्तर्वेशितः भूतलक्षिप्रभावेण ।

5 संविधानस्य (चतुर्थं संशोधनम्) अधिनियमः, १९५५ इत्यस्य ३-अनुभागेन (१) खण्डात् प्रति संनिवेशितः भूतलक्षिप्रभावेण ।

(ङ) कस्यापि खनिजस्य, खनिजतैलस्य वा अन्वेषणस्य सम्प्राप्तेः वा प्रयोजनार्थं कृतस्य समयस्य, पट्टस्य, अनुज्ञप्तेः वा आधारेण प्रोद्भवतां केषामपि अधिकाराणां निर्वापणाय परिवर्तनाय वा, अथ च एतादृशस्य कस्यापि समयस्य, पट्टस्य, अनुज्ञप्तेः वा अप्राप्तकाले समाप्तिकरणाय, शून्यीकरणाय वा,

उपबन्धं कुर्वन् कोऽपि विधिः [1][१४-तमानुच्छेदेन, १९-तमानुच्छेदेन वा] प्रदत्तानाम् अधिकाराणां कतमस्य असङ्गतः अपहारकः, न्यूनीकारक: वा अस्ति इति आधारेण शून्यीभूतः न मन्येत- [परन्तु यदि स: विधिः, कस्यापि राज्यस्य विधानमण्डलेन प्रणीत: विधिः अस्ति तर्हि अस्य अनुच्छेदस्य उपबन्धाः तस्य विषये तावत् अनुप्रयुक्ताः न भवेयुः यावत् सः राष्ट्रपतेः विचारार्थम् आरक्षितः सन् तस्य अनुमतिं न लब्धवान्]-

[2][अपरं च यदि कोऽपि विधिः केनापि राज्येन, कस्याः अपि सम्पदः अर्जनार्थं कमपि उपबन्धं करोति, यत्र च सम्पदि समाविष्टा कापि भूमिः केनापि जनेन स्वीयकृषिकर्मकृते धृता अस्ति, तत्र राज्येन एतादृश्याः भूमेः एतादृशः भागः यः, तदानीं प्रवर्तमानस्य कस्यापि विधेः अधीनम्, तस्मै जनाय अनुप्रयुक्तायाः अधिकतमसीमायाः अभ्यन्तरम् अस्ति, तर्हि एतादृश्याः भूमेः कस्यापि भागस्य, अथवा एतदुपरिनिर्मितस्य अथवा एतेन अनुलग्नस्य कस्यापि भवनस्य, संरचनायाः वा अर्जनं केवलं तदा विधिपूर्णं भवेत् यदा एतादृश्याः भूमेः, भवनस्य, संरचनायाः वा अर्जनविषयकः विधिः एतादृशस्य प्रतिकरस्य प्रदानाय उपबन्धयति यस्य परिमाणं तेषाम् आपणमूल्यपरिमाणात् न्यूनतरं न अस्ति ।]

(२) एतस्मिन् अनुच्छेदे-

[3][(क) "सम्पद्" शब्दस्य कस्यापि स्थानिकक्षेत्रस्य सम्बन्धे स एव अर्थः भवेत् यः तस्य अथवा तस्य स्थानीयस्य समतुल्यस्य शब्दस्य एतस्मिन् क्षेत्रे प्रवृत्तभूधृतीनां सम्बन्धे विद्यमानविधौ अस्ति; तथा च एषः शब्दः-

(प्रथमः) कमपि "जागीरम्", "इनामं", "मुआफीं" अथवा तादृशम् अन्यत् अनुदानं तथा च [4][तमिलनाडु] राज्ये केरलराज्ये च कमपि "जन्मम्" अधिकारम्;

(द्वितीयः) "रैयतवाडी" संस्थापनाधीनं धृतां कामपि भूमिम्;

(तृतीयः) कृषेः प्रयोजनस्य अथवा एतत् सहायकप्रयोजनानां कृते धृतां, पट्टेन प्रदत्तां वा, तथा च अनुर्वरभूमिं, वनभूमिं, गोचरभूमिं तथा च भूमेः कृषकैः, कृषिश्रमिकैः, ग्रामीणशिल्पिभिः अधिभोगे धृतानि भवनस्थलानि अन्यानि संरचनास्थलानि च समावेशयन्तीं भूमिं च, अन्तर्भावयेत्;]

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ७-अनुभागेन "१४- तम अनुच्छेदेन, १९-तम अनुच्छेदेन १३१-तम अनुच्छेदेन वा" इत्येतत् प्रति संनिवेशितम् (२०-६- १९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (सप्तदशं संशोधनम्) अधिनियमः, १९६४ इत्यस्य २-अनुभागेन संनिवेशितः।

3 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन (क) उपखण्डात् प्रतिसंनिवेशितः भूतलक्षिप्रभावेण।

4 मद्रासराज्य (नामपरिवर्तनम्) अधिनियमः, १९६८ वर्षस्य ५३-तमः इत्यस्य ४-अनुभागेन "मद्रास" इत्येतत् प्रति संनिवेशितम् (१४-१-१९६९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(ख) "अधिकाराणाम्" इति पदे कस्याः अपि सम्पदः सम्बन्धे, कस्मिन् अपि स्वत्वधारिणि, उपस्वत्वधारिणि अवरस्वत्वधारिणि, भूधृतिधारके, [1][*रैयते, अवररैयते*] अन्यस्मिन् मध्यवर्तिनि न्यस्तानाम् अधिकाराणां तथा च भूराजस्वविषयकाणां विशेषाधिकाराणां च अन्तर्भावः अस्ति।

[2][**३१ख. केषांचित् अधिनियमानां, विनियमानां च विधिमान्यकरणम्-** ३१ख अनुच्छेदे अन्तर्विष्टानाम् उपबन्धानां व्यापकतायां प्रतिकूलं प्रभावं परिहाय, नवम्याम् अनुसूच्यां विनिर्दिष्टानाम् अधिनियमानां विनियमानाम् अथवा तदीयानाम् उपबन्धानां च कोऽपि एतेन आधारेण शून्यः अस्ति, कदापि शून्यीभूतः आसीत् इति वा न मन्येत यत् एतादृशः अधिनियमः, विनियमः, उपबन्धः वा अस्य भागस्य कैरपि उपबन्धैः असङ्गतः अस्ति, तैः प्रदत्तानाम् अधिकाराणां वा कमपि हरति, अल्पीकरोति वा; किञ्च कस्यापि न्यायालयस्य, न्यायाधिकरणस्य वा कमपि प्रतिकूलं निर्णयम्, आज्ञप्तिम्, आदेशं वा अविगणय्य, उक्तानाम् अधिनियमानां, विनियमानां वा प्रत्येकं क्षमस्य कस्यापि विधानमण्डलस्य तन्निरसने, तत्संशोधने वा शक्तेः अधीनं प्रवृत्तः अनुवर्तेत।]

[3][**३१ग. कानिचित् निदेशकानि तत्त्वानि प्रभावयुक्तानि कुर्वतां विधीनां व्यावृत्तिः-** १३-अनुच्छेदे किमपि सत्यपि [4][चतुर्थभागे अधिकथितानि सर्वाणि कानि अपि वा तत्त्वानि] सुनिश्चेतुं राज्यस्य नीतिं प्रभावयन् कोऽपि विधिः एतदाधारेण शून्यीभूतः न मन्येत, यत् तादृशः विधिः [5][१४-तमानुच्छेदस्य, १९-तमानुच्छेदस्य वा प्रदत्तानाम् अधिकाराणां कतमस्य असङ्गतः, अपहारकः, अल्पीकारकः वा] अस्ति; [6][तथा च यदि कोऽपि विधिः, एतादृशीं घोषणां करोति यत् सः अमुकां नीतिं प्रभावयितुम् अस्ति तदा सः विधिः कस्मिन् अपि न्यायालये अनेन आधारेण प्रश्नगतः न क्रियेत यत् सः अमुकां नीतिं न प्रभावयति इति।]-

परन्तु यदि सः विधिः कस्यापि राज्यस्य विधानमण्डलेन प्रणीतः विधिः अस्ति तर्हि अस्य अनुच्छेदस्य उपबन्धाः तस्य विषये तावत् अनुप्रयुक्ताः न भवेयुः यावत् सः राष्ट्रपतेः विचारार्थम् आरक्षितः सन् तस्य अनुमतिं न लब्धवान्।]

[7]**३१घ.** [*राष्ट्रविरोधिक्रियाकलापविषये विधीनां व्यावृत्तिः*] संविधानस्य (*त्रिचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७७ इत्यस्य २-अनुभागेन १३-४-१९७८ दिनाङ्कात् निरसितः)।*

---

1 संविधानस्य (चतुर्थं संशोधनम्) अधिनियमः, १९५५ इत्यस्य ३-अनुभागेन अन्तर्वेशितः भूतलक्षिप्रभावेण।

2 संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य ५–अनुभागेन अन्तर्वेशितः।

3 संविधानस्य (पञ्चविंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य ३-अनुभागेन अन्तर्वेशितः (२०-४-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ४-अनुभागेन "३९-तमानुच्छेदस्य (ख) उपखण्डे, (ग) उपखण्डे वा अधिकथितानि कानि अपि सिद्धान्तानि" इति एतस्मात् प्रति एतत् (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण) सनिवेशितम्।

5 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ८-अनुभागेन "१४-अनुच्छेदेन, १९-अनुच्छेदेन, ३१-अनुच्छेदेन वा" इति एतस्मात् प्रति एतत् (२०-६-१६७६ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितम्।

6 केशवानन्दभारती वि० केरलराज्यं (१९७३) *केशवानन्दभारती परं केरलराज्यम्* इति वादे उच्चतमन्यायालयेन "एतत् अप्रवर्तनशीलम् अस्ति" इति उद्घोषितम्।

7 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५-अनुभागेन (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

सांविधानिकानाम् उपचाराणाम् अधिकार:

३२. अनेन भागेन प्रदत्तानाम् अधिकाराणां प्रवर्तनाय उपचाराः-

(१) अनेन भागेन प्रदत्तानाम् अधिकाराणां प्रवर्तनाय समुचितया कार्यपद्धत्या उच्चतमन्यायालये कार्यप्रवृत्तेः अधिकार: प्रत्याभूतः अस्ति।

(२) निदेशानाम्, आदेशानां वा, बन्दीप्रत्यक्षीकरण-परमादेश-प्रतिषेध अधिकारपृच्छा-उत्प्रेषणादिलेखान् अन्तर्भावयतां लेखानां वा एतेन भागेन प्रदत्तानाम् अधिकाराणाम् अन्यतमस्य कस्यापि प्रवर्तनाय, ये अपि एषां मध्ये समुचिताः स्युः तेषां प्रदाने, शक्ति: उच्चतमन्यायालये भवेत्।

(३) उच्चतमन्यायालयाय (१), (२) खण्डाभ्यां प्रदत्तासु शक्तिषु प्रतिकूलं प्रभावं परिहाय, संसद् विधिना अन्यं कमपि न्यायालयं, स्वीयाधिकारितायाः स्थानीयसीमानाम् अभ्यन्तरे उच्चतमन्यायालयेन (२) खण्डाधीनं प्रयोक्तव्याः सर्वाः शक्तीः तासाम् एकतमां वा प्रयोक्तुं शक्तिमन्तं कर्तुं क्षमते।

(४) अनेन अनुच्छेदेन प्रत्याभूतः अधिकार:, अनेन संविधानेन अन्यथा उपबन्धितं वर्जयित्वा, न निलम्बित: भवेत्।

[1]**३२क.** [*राज्यविधीनां सांविधानिकवैधता ३२- तमानुच्छेदस्य अधीनासु कार्यपद्धतिषु न विचारणीया] संविधानस्य (त्रिचत्वारिंशत्तमं संशोधनम्) अधिनियम:, १९७७ इत्यस्य ३-अनुभागेन १३-४-१९७८ दिनाङ्कात् निरसितः।*

[2]**[३३. अनेन भागेन प्रदत्तानाम् अधिकाराणां बलादिषु अनुप्रयोगे संसदः उपान्तरणे शक्तिः-**

संसद् विधिना अवधारयितुं क्षमते यद् अनेन भागेन प्रदत्तानाम् अधिकाराणाम् अन्यतमः-

(क) सशस्त्रबलानां सदस्येषु; अथवा

(ख) लोकव्यवस्थायाः परिपालनार्थं न्यस्तभाराणां बलानां वा सदस्येषु;

(ग) आसूचनायाः प्रत्यासूचनायाः वा प्रयोजनार्थं राज्येन स्थापिते कस्मिंश्चिदपि विभागे सङ्घटने वा नियुक्तेषु जनेषु; अथवा

(घ) (क), (ख), (ग) खण्डेषु निर्दिष्टे कस्यचिद् अपि बलस्य, विभागस्य, सङ्घटनस्य च प्रयोजनार्थं स्थापिते, दूरसञ्चारतन्त्रे तद् विषये वा नियुक्तेषु जनेषु,

अनुप्रयोगे तेषां कर्तव्य-समुचितपालनपरतायाः अनुशासनपरतायाश्च सुनिश्चयाय कियन्मात्रं निर्बन्धित:, निराकृतः वा भवेत् इति।]

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ६-अनुभागेन अन्तर्वेशितः (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)|

2 संविधानस्य (पञ्चाशत्तमं संशोधनम्) अधिनियमः १९८४ इत्यस्य २-अनुभागेन ३३-तमानुच्छेदात् प्रति एषः अनुच्छेदः संनिवेशितः।

भारतस्य संविधानम्

(भागः ३-मूलाधिकाराः)

३४. यावत् कस्मिन् अपि क्षेत्रे सेनाविधिः प्रवृत्तः अस्ति तावत् अनेन भागेन प्रदत्तेषु अधिकारेषु निर्बन्धनम्- पूर्वगामिषु एतद् भागोपबन्धेषु यत् किमपि सत्यपि, संसद् विधिना सङ्घस्य, राज्यस्य वा सेवायां स्थिताय कस्मै अपि जनाय, अन्यस्मै कस्मै वा जनाय सेनाविधिः यस्मिन् प्रवृत्तः आसीत् तस्मिन् कस्मिन् अपि भारतराज्यक्षेत्राभ्यन्तरे क्षेत्रे, व्यवस्थायाः परिपालनार्थं, पुनः स्थापनार्थं वा तेन कृते कस्मिन् अपि कार्ये क्षतिपूर्तिं प्रदातुं क्षमते, अथवा तादृशे क्षेत्रे सेनाविधेः अधीनं दत्तं दण्डादेशं, भाजितं दण्डम्, आदिष्टं समपहारम्, अन्यत् वा कार्यं विधिमान्यं कर्तुं क्षमते।

३५. अस्य भागस्य उपबन्धान् कार्यकरान् कर्तुं विधानम्- अस्मिन् संविधाने यत् किमपि सत्यपि-

(क) (प्रथमः) येषां विषयाणां कृते संसदा प्रणीतेन विधिना १६-तमानुच्छेदीय (३) खण्डस्य, ३२-तमानुच्छेदीय (३) खण्डस्य, ३३-तमानुच्छेदस्य, ३४-तमानुच्छेदस्य च अधीनम् उपबन्धाः भवितुं क्षमन्ते तेषां विषयाणाम् अन्यतमं कमपि उद्दिश्य, तथा च

(द्वितीयः) एतद् भागाधीनम् अपराधाः इति घोषितानि यानि कार्याणि तेषु दण्डं विधातुं, विधिं निर्मातुं च संसद् शक्तिं भजेत, न हि कस्यापि राज्यस्य विधानमण्डलम्; तथा च एतत्संविधानस्य प्रारम्भात् परं यथाशक्यं शीघ्रम् (२) उपखण्डे निर्दिष्टेषु कार्येषु दण्डं विधातुं संसद् विधीन् प्रणयेत्;

(ख) (क) खण्डीये (प्रथमे) उपखण्डे निर्दिष्टानां विषयाणाम् अन्यतमेन केनापि सम्बद्धः, तत्खण्डीये (द्वितीये) उपखण्डे निर्दिष्टे कस्मिन् अपि कार्ये दण्डाय उपबन्धं कुर्वन् वा, भारतस्य राज्यक्षेत्रे, अस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वं प्रवृत्तः कोऽपि विधिः, तत्रत्य निबन्धनानां तथा च ३७२-तमानुच्छेदाधीनं तत्र यानि कृतानि भवेयुः तेषाम् अनुकूलनानाम्, उपान्तराणां च अधीनं तावत् प्रवृत्तः अनुवर्तेत यावत् संसदा परिवर्तितः, निरसितः, संशोधितः वा न भवेत्।

स्पष्टीकरणम्- एतदनुच्छेदे "प्रवृत्तः कोऽपि विधिः" इति पदानां तथैव अर्थः ग्राह्यः यथा ३७२-तमानुच्छेदे।

भागः ४

राज्यनीतेः निदेशकानि तत्त्वानि

३६. परिभाषा- अस्मिन् भागे, यावत् सन्दर्भेण अन्यथा अपेक्षितं न भवेत् तावत् "राज्यस्य" तथैव अर्थः भवति यथा तृतीये भागे।

३७. अस्मिन् भागे अन्तर्विष्टानां तत्त्वानाम् अनुप्रयोगः- अस्मिन् भागे अन्तर्विष्टाः उपबन्धाः न प्रवर्तनीयाः भवेयुः केनापि न्यायालयेन; तथापि तत्र अधिकथितानि तत्त्वानि देशस्य शासनकर्मणि मूलभूतानि सन्ति; विधीनां प्रणयने च एषाम् अनुप्रयोगः राज्यस्य कर्तव्यं भवेत्।

३८. लोककल्याणस्य अभिवृद्धये राज्यं सामाजिकव्यवस्थाम् आसादयेत्- [1][(१)] राज्यं लोककल्याणस्य अभिवृद्धये सामाजिकव्यवस्थायाः यथाशक्यं कार्यसाधकतया स्थापनेन, संरक्षणेन च प्रयतेत यस्यां सामाजिकः आर्थिकः राजनीतिकश्च न्यायः राष्ट्रियजीवनस्य सर्वाः संस्थाः अनुप्राणयेत्।

[2][(२) राज्यं विशेषतया, आयस्य असमानताः न्यूनीकर्तुं प्रयतेत; तथा च न केवलं व्यक्तिषु किन्तु विभिन्नक्षेत्रेषु निवसतां, विभिन्नव्यवसायेषु निरतानां वा लोकसमूहानां मध्ये अपि प्रतिष्ठायाः, सुविधानाम्, अवसराणां च विषये असमानतानां समापने अपि प्रयतेत।]

३९. राज्येन अनुसरणीयानि कानिचित् नीतेः तत्त्वानि- राज्यं विशेषतया स्वनीतिं तथा सञ्चालयेत् यथा-

(क) नागरिकाः, नराः, नार्यश्च समानतया जीविकायाः पर्याप्तसाधने अधिकारं भजेयुः;

(ख) समाजस्य भौतिकसम्पत्तेः स्वाम्यं नियन्त्रणं च तथा संविभक्तं भवतु यथा सर्वोत्तमं समानं हितं साधितं भवेत्;

(ग) आर्थिकव्यवस्था एवं प्रचलेत् येन सम्पत्तेः उत्पादनसाधनानां तथा पुञ्जीकरणं न स्यात् यथा सर्वसाधारणस्य हितानां हानिः भवेत्;

(घ) नराणां नारीणां च समाने कार्ये समानं वेतनं भवेत्;

(ङ) पुरुषश्रमिकाणां, स्त्रीश्रमिकाणां च स्वास्थ्यस्य शक्तेश्च बालानां सुकुमारावस्थायाश्च दुरुपयोगः न भवेत्; तथा च आर्थिकावश्यकतया विवशाः नागरिकाः वयसः शक्तेश्च अननुकूलेषु वृत्तिकर्मसु युक्ताः न भवेयुः।

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ९-अनुभागेन ३८-तमः अनुच्छेदः तस्य (१) खण्डरूपेण पुनरङ्कितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन उक्तदिनात् प्रवर्तमानप्रभावेण अन्तर्वेशितः।

[1](च) बालेभ्यः स्वातन्त्र्यमये गौरवमये वातावरणे स्वस्थरीत्या विकासाय अवसराः सुविधाश्च दत्ताः भवेयुः, शिशवः, अल्पवयजनाश्च शोषणात् नैतिकपरित्यागात् आर्थिकपरित्यागात् च रक्षिताः भवेयुः ।]

[2][**३९क. न्यायसमानता, निःशुल्का वैधिकसहायता च-** राज्यम् एतत् सुनिश्चितं कुर्यात् यद् विधिपद्धतेः प्रचालनं तथा भवेत् यथा अवसरसमानतायाः आधारेण न्यायस्य प्रापणं सुलभ्यं भवेत्, तथा च विशेषतया उपयुक्तविधानेन, उपयुक्तव्यवस्थाभिः, अन्यथा कयापि रीत्या वा निःशुल्कवैधिकसहायताप्रदानाय तथा प्रबन्धं कुर्यात् यथा आर्थिकनिर्योग्यतानाम् अन्यनिर्योग्यतानां वा कारणेन कोऽपि नागरिकः न्यायप्राप्त्यवसरात् वञ्चितः न भवति ।]

४०. ग्रामपञ्चायतानां सङ्घटनम्- राज्यम् उपक्रमेत सङ्घटनं ग्रामपञ्चायतानां निदधीत च तेषु तादृशीः शक्तीः प्राधिकारं च, यादृशीः स्वायत्तशासनस्य एकरूपेण कार्यकरणे योग्यतां सम्पादयितुं तेभ्यः आवश्यकाः भवेयुः ।

४१. अवस्थाविशेषेषु वृत्तिकर्म, शिक्षां, लोकसाहाय्यं च प्राप्तुम् अधिकारः- राज्यं स्वीयस्य आर्थिकसामर्थ्यस्य विकासस्य च मर्यादानाम् अभ्यन्तरे वृत्तिकर्मणः, शिक्षायाश्च अधिकारं, वृत्तिकर्मलोपस्य, वार्धक्यस्य अङ्गहानेश्च अवस्थासु, अनर्हायाः अर्थशून्यतायाः दशासु लोकसाहाय्यस्यः अधिकारं च प्रापयितुं कार्यसाधकम् उपबन्धं कुर्यात् ।

४२. कर्मणः न्याय्यानां मानवोचितदशानां, प्रसूतिसाहाय्यस्य च उपबन्धः- राज्यं न्याय्यानां मानवोचितानां च कर्मणः दशानां सुनिश्चयार्थं, प्रसूतिसाहाय्यस्य प्रापणार्थं च उपबन्धं कुर्यात् ।

४३. श्रमिकाणां कृते निर्वाहवेतनादीनि- राज्यम् उपयुक्तविधानेन, आर्थिकसङ्घटनेन, अन्यया कयापि रीत्या वा कार्षिकान्, औद्योगिकान्, अन्यान् वा श्रमिकान् कर्म, निर्वाहवेतनं, शिष्टजीवनस्तरस्य, अवकाशस्य सम्पूर्णतया उपभोगस्य च सुनिश्चायिकाः कर्मणः दशाः, तथा सामाजिकान्, सांस्कृतिकान् अवसरान् प्रापयितुं च प्रयतेत; विशेषतया च राज्यं, ग्रामपरिसरेषु कुटीरोद्योगानां प्रवृद्ध्य, वैयक्तिककार्यकरणस्य, सहकार्यकरणस्य वा आधारेण प्रयतेत ।

[3][**४३क. उद्योगानां प्रबन्धे कर्मकराणां भागित्वम्-**राज्यम् उपयुक्तविधानेन, अन्यया कयापि रीत्या वा, उद्योगसंलग्नानाम् उपक्रमाणां स्थापनानां, अन्यसङ्घटनानां वा प्रबन्धेषु कर्मकराणां भागित्वं सुनिश्चेतुं प्रयतेत ।]

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ७-अनुभागेन (च) खण्डात् प्रति संनिवेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 उपर्युक्ताधिनियमस्य ८–अनुभागेन संनिवशितः उक्तदिनाङ्कात् प्रवर्तमानप्रभावेण ।

3 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ९-अनुभागेन संनिवेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[1][**४३ख. सहकारिसमितीनां संवर्धनम्-** राज्यं सहकारिसमितीनां स्वैच्छिकरचनायाः, स्वशासिकार्यकरणस्य, लोकतान्त्रिकनियन्त्रणस्य तथा वृत्तिप्रबन्धनस्य संवर्धनाय प्रयतेत।]

४४. नागरिकाणाम् अर्थे समाना व्यवहारसंहिता- राज्यं भारतस्य समस्ते राज्यक्षेत्रे नागरिकाणां कृते समानां व्यवहारसंहितां प्रापयितुं प्रयतेत।

[2][**४५.षड्वर्षेभ्यः न्यूनवयस्-बालकेभ्यः प्रारम्भिकबाल्यावस्थायाः अभिरक्षणायाः तथा शिक्षायाः उपबन्धः-** राज्यं सर्वेभ्यः बालकेभ्यः षड्-वर्षवयः-पूरणपर्यन्तं, प्रारम्भिकबाल्यावस्थायै अभिरक्षणायै तथा शिक्षायै उपबन्धितुं प्रयतेत।]

४६. अनुसूचितजातीनां, जनजातीनाम्, अन्येषां दुर्बलतरवर्गाणां च शैक्षिकार्थिकहिताभिवृद्धिः- राज्यं जनतायाः दुर्बलतराणां वर्गाणां, विशिष्टतया च अनुसूचितजातीनाम् अनुसूचितजनजातीनां च शैक्षिकानाम्, आर्थिकानां च हितानां विशेषावधानतया अभिवृद्धिं कुर्यात्; तान् सामाजिकात् अन्यायात् शोषणस्य सर्वेभ्यः प्रकारेभ्यश्च संरक्षयेत्।

४७. पोषणाहारस्तरस्य जीवनस्तरस्य च उन्नमनं, सार्वजनिकस्वास्थ्यस्य च सुधारणं राज्यस्य कर्तव्यम्- राज्यं स्वीयजनतायाः पोषणाहारस्तरस्य, जीवनस्तरस्य च उन्नमनं, लोकस्वास्थ्यस्य सुधारणं च स्वीयप्रथमकर्तव्यानाम् अन्यतमं मन्येत; विशेषतः राज्यं मादकपेयानां स्वास्थ्यहानिकराणां च औषधानां भेषज्यप्रयोजनं व्यतिरिच्य–उपभोगस्य प्रतिषेधाय प्रयतेत।

४८. कृषेः पशुपालनस्य च सङ्घटनम्- राज्यम् आधुनिकीभिः वैज्ञानिकीभिश्च प्रणालीभिः कृषिं, पशुपालनं च सङ्घटयितुं प्रयतेत, विशेषतया च बीजवंशानां परिरक्षणाय, सुधारणाय च, गवां, वत्सानाम्, अन्येषां दोह्यानां वाह्यानां च पशूनां वध-प्रतिषेधाय प्रक्रमेत च।

[3][**४८क. पर्यावरणस्य संरक्षण-सुधारणं च, वनस्य वन्यजीवानां रक्षणं च-** राज्यं देशस्य पर्यावरणस्य संरक्षणं तस्मिन् सुधारणं च कर्तुं तथा वनानां वन्यजीवानां च रक्षणं कर्तुं प्रयतेत।]

---

1 संविधानस्य (सप्तनवतितमं संशोधनम्) अधिनियमः, २०११ वर्षस्य ३-अनुभागेन (१५-२-२०१२ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

2 संविधानस्य (षडशीतितमं संशोधनम्) अधिनियमः, २००२ वर्षस्य ३-अनुभागेन (१-४-२०१० दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुच्छेदः ४५-इत्यस्य स्थाने संनिवेशितः।

3 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य १०-अनुभागेन संनिवेशितः (उक्त-दिनाङ्कात् प्रवर्तमानप्रभावेण।)

४९. राष्ट्रियमहिमशालिनां स्मारकाणां स्थानानां, वस्तूनां च रक्षणम्- राज्यस्य भवेद् अयं कर्तव्यताभारः यत् तत् कुर्यात् [1][संसदा प्रणीतेन विधिना तदधीनं वा] राष्ट्रियमहिमशाली इति घोषितस्य कलात्मिकायाः ऐतिहासिक्याः वा अभिरुचेः प्रत्येकं स्मारकस्य, स्थानस्य वस्तुनः वा यथायथं लुण्ठनात्, विरूपणात्, विनाशात्, अपसारणात्, व्ययनात्, निर्यातात् वा रक्षणम्।

५०. न्यायपालिकायाः कार्यपालिकातः पृथक्करणम्- राज्यं राज्यस्य लोकसेवासु न्यायापालिकां कार्यपालिकातः पृथक् कर्तुं प्रक्रमेत।

५१. आन्ताराष्ट्रियाः शान्तेः सुरक्षायाश्च अभिवृद्धिः- राज्यं-

(क) आन्ताराष्ट्रियाः शान्तेः सुरक्षायाश्च अभिवृद्धये;

(ख) राष्ट्राणां मध्ये न्याय्यानां, सम्मानपूर्णानां च सम्बन्धानां रक्षणाय;

(ग) सङ्घटितानां लोकानां परस्परव्यवहारेषु आन्ताराष्ट्रियविधिं प्रति, सन्धिबन्धनं प्रति च सम्मानस्य पोषणाय;

(घ) आन्ताराष्ट्रियविवादानां मध्यस्थद्वारा समाधानस्य प्रोत्साहनाय; च प्रयतेत।

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २७-अनुभागेन "संसदा विधिना घोषितेन" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

[1][भागः ४क

मूलकर्तव्यानि

५१क. मूलकर्तव्यानि-

(क) संविधानस्य पालनं, तथा तस्य आदर्शान् प्रति, संस्थां प्रति, राष्ट्रध्वजं प्रति, राष्ट्रगानं प्रति च आदरः;

(ख) स्वतन्त्रतायाः कृते अस्माकं राष्ट्रिय आन्दोलनं यैः उच्चैः आदर्शैः प्रेरितम् आसीत् तान् हृदि कृत्य तेषां पालनम्;

(ग) भारतस्य प्रभुतायाः, एकतायाः, अखण्डतायाश्च रक्षणम्, अक्षुण्णतया धारणं च;

(घ) देशस्य संरक्षणम्, आहूते सति राष्ट्रसेवाविधानं च;

(ङ) भारतस्य सर्वेषु लोकेषु समरसतायाः, समानभ्रातृत्व–भावनायाश्च तथा अभिवर्धनं यथा धर्म-भाषा-प्रदेश-वर्गादिमूलः भेदभावः निरसति; तथा च नारी–गरिम्णः विरोधिनीनां प्रथानां त्यागः;

(च) अस्माकं सामासिकसंस्कृतेः गौरवशालिपरम्परायाः महत्त्वस्य अवगमः, तस्याः परिरक्षणं च;

(छ) वनानां, सरसां, नदीनां, वन्यजीवानां च समावेशकस्य प्राकृतिकपर्यावरणस्य रक्षणं संवर्धनं च; तथैव सर्वेषां प्राणिनां प्रति दयाभावश्च;

(ज) वैज्ञानिकदृष्टिकोणस्य, मानववादस्य, जिज्ञासाभावस्य, सुधारणाभावस्य च विकासः;

(झ) सार्वजनिकसम्पत्तेः सुरक्षणं, हिंसायाः प्रत्याख्यानं च;

(ञ) यथा राष्ट्रं निरन्तरं प्रयत्नस्य उपलब्धेश्च उच्चतरं स्तरं स्पृशेत् तथा व्यक्तिगतेषु, सामूहिकेषु च कार्यकरणक्षेत्रेषु उत्कर्षाधिगमं प्रति सदा प्रयतनं च;

[2][(ट) यदि मातापितरम् अथवा अभिभावकः स्तः षड्वर्षवयसः चतुर्दशवर्षवयः पर्यन्तम् आत्मनः, यथास्थिति, बालकेभ्यः अथवा यथाप्रकरणं प्रतिपाल्याय शिक्षायाः अवसरं दद्यात् ।]

भारतस्य सर्वेषां नागरिकाणां कर्त्तव्यं भवेत् ।]

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ११-अनुभागेन एषः भागः संनिवेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण ।)

2 संविधानस्य (षडशीतितमं संशोधनम्) अधिनियमः, २००२ वर्षस्य ४-अनुभागेन (१-४-२०१० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः ।

भागः ५

सङ्घः

अध्यायः १- कार्यपालिका

राष्ट्रपतिः उपराष्ट्रपतिश्च

५२. भारतस्य राष्ट्रपतिः- भारतस्य एकः राष्ट्रपतिः भवेत्।

५३. सङ्घस्य कार्यपालिका शक्तिः- (१) सङ्घस्य कार्यपालिकाशक्तिः राष्ट्रपतौ निहिता भवेत्; सः च एतस्याः प्रयोगम् अस्य संविधानस्य अनुसारेण स्वयं, स्वस्य अधीनस्थानाम् अधिकारिणां द्वारा वा, कुर्यात्।

(२) पूर्वगामिनः उपबन्धस्य व्यापकतायां प्रतिकूलं प्रभावं परिहाय, सङ्घस्य रक्षाबलानां सर्वोच्चः समादेशः राष्ट्रपतौ निहितः भवेत्; तस्य प्रयोगश्च विधिना विनियमितः भवेत्।

(३) एतदनुच्छेदगतं किमपि-

(क) कस्यापि राज्यस्य शासनाय, अन्यस्मै वा प्राधिकारिणे केनापि विद्यमानेन विधिना प्रदत्तानि कानि अपि कृत्यानि राष्ट्रपतौ अन्तरितानि करोति इति न मन्येत;

(ख) राष्ट्रपतेः अन्येभ्यः प्राधिकारिभ्यः विधिना कृत्यानां प्रदानात्, संसदं न निवारयेत्।

५४. राष्ट्रपतेः निर्वाचनं- राष्ट्रपतेः निर्वाचनम् एवं विधेः निर्वाचकगणस्य सदस्याः कुर्युः यस्मिन्-

(क) संसदः उभयोः सदनयोः निर्वाचिताः सदस्याः;

(ख) राज्यानां विधानसभानां निर्वाचिताः सदस्याश्च, भवेयुः।

[1][स्पष्टीकरणम्- अस्मिन् अनुच्छेदे तथा च पञ्चपञ्चाशत्तमे अनुच्छेदे, दिल्ली-राष्ट्रिय-राजधानी-क्षेत्रं तथा च *पांडिचेरी-सङ्घक्षेत्रम् इति "राज्यम्" इत्यस्य अन्तर्गते स्तः।]

५५. राष्ट्रपतेः निर्वाचनस्य रीतिः- (१) यावत् शक्यं राष्ट्रपतेः निर्वाचने भिन्नानां राज्यानां प्रतिनिधित्वस्य माने एकरूपता भवेत्।

(२) राज्यानां मध्ये परस्परम् एतादृशीम् एकरूपतां तथा समस्तानां राज्यानां सङ्घस्य च मध्ये समतुल्यतां सम्पादयितुं, संसदः प्रत्येकराज्यविधानसभायाश्च निर्वाचितः प्रत्येकं सदस्यः एतादृशि निर्वाचने येषां दाने अधिकृतः तेषां मतानां सङ्ख्या निम्नलिखितया रीत्या निर्धारिता भवेत्-

(क) राज्यविधानसभायाः प्रत्येकं निर्वाचितः सदस्यः तावन्ति मतानि भजेत, यावन्ति एकसहस्रस्य गुणितानि तत्सभायाः निर्वाचितानां सदस्यानां पूर्णसङ्ख्यया राज्यस्य जनसङ्ख्यां विभज्य प्राप्ते भागफले स्युः;

---

[1] संविधानस्य (सप्ततितमं संशोधनम्) अधिनियमः, १९९२ वर्षस्य २-अनुभागेन (१-६-१९९५ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

* पांडिचेरी (नाम-परिवर्तनम्) अधिनियमः, २००६ (२००६ वर्षस्य ४४) इत्यस्य ३-अनुभागेन (१-१०-२००६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अधुना एतत् पुडुचेरी इति अस्ति।

(ख) एकसहस्रस्य उक्तानि गुणितानि स्वीकृत्य यदि शेषः पञ्चशतेभ्यः अन्यूनः स्यात् तदा (क) उपखण्डे उक्तस्य सदस्यस्य मतानि एकसङ्ख्यया वर्धेरन्।

(ग) संसद: प्रत्येकसदनस्य प्रत्येकं निर्वाचितः सदस्यः मतानां तादृशीं सङ्ख्यां भजेत यादृशी राज्यानां विधानसभानां सदस्यानाम् अर्थे (क), (ख) उपखण्डाभ्यां नियतानां मतानां पूर्णसङ्ख्यां संसत् सदनयो: निर्वाचितानां सदस्यानां पूर्णसङ्ख्यया विभज्य प्राप्ता भवेत्; अर्धांशात् अधिकानि भिन्नानि एकम् इति गणितानि स्युः, अन्यानि च भिन्नानि उपेक्षितानि स्युः।

(३) राष्ट्रपतेः निर्वाचनम् आनुपातिकप्रतिनिधित्वपद्धतिम् अनुसृत्य एकलसङ्क्रमणीयमतेन भवेत्; किञ्च , एतादृशं निर्वाचनं गुप्तमतदानेन भवेत्।

[1][*स्पष्टीकरणम्*–अस्मिन् अनुच्छेदे "जनसङ्ख्या" शब्दस्य अर्थे सा जनसङ्ख्या ग्राह्या या अभिनिश्चिता तस्याम् अन्तिमायां पूर्ववृत्तायां जनगणनायां यस्याः सुसम्बद्धाः अङ्काः प्रकाशिता:-

परन्तु एतस्मिन् स्पष्टीकरणे "अन्तिमायां पूर्ववृत्तायां जनगणनायां यस्याः सुसम्बद्धाः अङ्का प्रकाशिताः" इति कथनं प्रति निर्देशस्य तावत् १९७१-तमवर्षस्य जनगणनां प्रति निर्देशः इति अर्थ: ग्राह्यः यावत् [2][२०२६]-वर्षानन्तरं कृतायाः प्रथमजनगणनायाः सम्बद्धाः अङ्काः प्रकाशिताः न भवेयुः।]

५६. राष्ट्रपतेः पदावधिः- (१) राष्ट्रपतिः स्वपदं पञ्चवर्षावधिः तस्मात् दिनाङ्कात् धारयेत् यस्मिन् सः तत् पदं आरोहति। परन्तु-

(क) राष्ट्रपतिः उपराष्ट्रपतिं सम्बोध्य लिखितेन स्वहस्ताङ्कितेन लेखेन पदं त्यक्तुं क्षमते;

(ख) राष्ट्रपतिः संविधानस्य अतिक्रमणे ६१-तमानुच्छेदे उपबन्धितया रीत्या कृतेन महाभियोगेन पदात् अपसारितो भवेत्;

(ग) राष्ट्रपतिः स्वपदावधेः समाप्तौ अपि तावत् पदधारणम् अनुवर्तयेत् यावत् अस्य उत्तराधिकारी पदं न आरोहति।

(२) (१) खण्डीयपारन्तुकस्य (क) उपखण्डाधीनम् उपराष्ट्रपतेः सम्बोधकं त्यागपत्रं तेन लोकसभायाः अध्यक्षं प्रति अविलम्बं संसूचितं भवेत्।

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य १२-अनुभागेन पूर्वस्पष्टीकरणात् प्रति एतत् स्पष्टीकरणं संनिवेशितम् (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (चतुरशीतितमं संशोधनम्) अधिनियमः, २००१ वर्षस्य २-अनुभागेन (२१-२-२००२ दिनाङ्कात् प्रवर्तमानप्रभावेण "२०००" इत्यस्य स्थाने संनिवेशितः।

(भागः ५-सङ्घः)

५७. पुनर्निर्वाचने पात्रता- यः जनः राष्ट्रपतिरूपेण पदं धारयति, धृतवान् वा विद्यते सः, अस्य संविधानस्य अन्येषाम् उपबन्धानाम् अधीनं, तस्मै पदाय पुनर्निर्वाचनाय पात्रं भवेत्।

५८. राष्ट्रपतेः निर्वाचनस्य अर्हताः- (१) सः एव जनः राष्ट्रपतिरूपेण निर्वाचने पात्रं भवेत् यः-

(क) भारतस्य नागरिकः अस्ति;

(ख) वयसः पञ्चत्रिंशत् वर्षाणि पूरितवान्; किञ्च

(ग) लोकसभायाः सदस्यरूपेण निर्वाचने अर्हः अस्ति।

(२) कोऽपि जनः राष्ट्रपतिरूपेण निर्वाचनस्य पात्रं न भवेत् यदि सः भारतशासनस्य कस्यापि राज्यस्य शासनस्य वा अधीनम् उक्तशासनानाम् अन्यतमस्य नियन्त्रणे स्थितस्य कस्यापि स्थानीयस्य अन्यस्य वा प्राधिकारिणः अधीनं किमपि लाभस्य पदं धारयति।

स्पष्टीकरणम्- कोऽपि जनः लाभस्य किमपि पदं धारयति इति अस्य अनुच्छेदस्य प्रयोजनानाम् अर्थे न मन्येत अस्मात् एव हेतोः यत् सः सङ्घस्य राष्ट्रपतिः, उपराष्ट्रपतिः वा अस्ति, अथवा कस्यापि राज्यस्य राज्यपालः [1][* * *] अस्ति अथवा सङ्घस्य कस्यापि राज्यस्य वा मन्त्री अस्ति।

५९. राष्ट्रपतेः पदस्य प्रतिबन्धाः- (१) राष्ट्रपतिः संसदः अन्यतरस्य सदनस्य कस्यापि वा राज्यस्य विधानमण्डलस्य कस्यापि सदनस्य सदस्यः न भवेत्, किंच यदि अन्यतरस्य कस्यापि संसत्सदनस्य, कस्यापि वा राज्यस्य विधानमण्डलस्य कोऽपि सदस्यः राष्ट्रपतिरूपेण निर्वाचितः भवेत् तर्हि सः तस्मिन् सदने तस्मिन् दिनाङ्के रिक्तीकृतस्थानः मन्येत, यस्मिन् सः राष्ट्रपतिरूपेण स्वपदम् आरोहति।

(२) राष्ट्रपतिः किमपि अन्यत् लाभस्य पदं न धारयेत्।

(३) राष्ट्रपतिः विना भाटकप्रदानं स्वपदावासानाम् उपयोगे स्वत्ववान् भवेत्; किं च तादृशेषु उपलब्धिषु,

भक्तेषु, विशेषाधिकारेषु चापि स्वत्ववान् भवेत् यादृशानि संसदा विधिना अवधारितानि भवेयुः; किं च यावत् एतदर्थम् एवम् उपबन्धः न क्रियेत तावत् तादृशेषु उपलब्धिषु, भक्तेषु विशेषाधिकारेषु च स्वत्ववान् भवेत् यादृशानि द्वितीयानुसूच्यां विनिर्दिष्टानि सन्ति।

(४) राष्ट्रपतेः उपलब्धयः भक्तानि च तस्य पदावधौ न न्यूनीकृतानि भवेयुः।

६०. राष्ट्रपतेः शपथः प्रतिज्ञानं वा- प्रत्येकं राष्ट्रपतिः, राष्ट्रपतिरूपेण कार्यकारी वा राष्ट्रपतेः कृत्यानि निर्वहन् वा प्रत्येकं जनः स्वपदारोहणात् प्राक् भारतस्य मुख्यन्यायमूर्तेः समक्षं तस्य अनुपस्थितौ उच्चतमन्यायालयस्य उपलभ्यज्येष्ठतमन्यायाधीशस्य वा समक्षं शपथं प्रतिज्ञानं वा निम्नलिखिते प्रारूपे कुर्यात्, तं च स्वहस्ताङ्कितं कुर्यात्, तद् यथा-

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राज्यप्रमुखो वा उपराज्यप्रमुखो वा" इत्येते शब्दाः विलोपिताः।

(भागः ५-सङ्गः)

“अहम् अमुकः ईश्वरस्य नाम्ना शपे / सत्यनिष्ठया प्रतिजाने यद् अहं श्रद्धापूर्वकं भारतस्य राष्ट्रपतेः पदस्य कार्यपालनं करिष्यामि (अथवा राष्ट्रपतेः कृत्यानि निर्वक्ष्यामि) तथा च मम सम्पूर्णयोग्यतया संविधानस्य विधेश्च परिरक्षणं, संरक्षणं, प्रतिरक्षणं च करिष्यामि; किञ्च अहं भारतस्य जनतायाः सेवार्थं, कल्याणार्थं च निरतः भविष्यामि”।

६१. राष्ट्रपतौ महाभियोगे प्रक्रिया- (१) यदा संविधानस्य अतिक्रमणात् राष्ट्रपतिः महाभियोगेन अभियोज्यः भवति तदा संसदः अन्यतरतसदनं दोषारोपं कुर्यात्।

(२) तादृशः कोऽपि दोषारोपः तावत् न कृतः भवेत् यावत्-

(क) तादृशं दोषारोपं कुर्वती प्रस्थापना अन्तर्निविष्टा नास्ति कस्मिंश्चित् सङ्कल्पे, यः तत्-सदनसदस्यानां समस्त सङ्ख्यायाः चतुर्थांशात् अन्यूनसङ्ख्यया कृतहस्ताक्षरायाः न्यूनात् न्यूनं चतुर्दशानां दिनानां लिखितसूचनायाः पश्चात् प्रस्तावितः अस्ति यस्यां (सूचनायां) तेषां (सदस्यानां) सङ्कल्पप्रस्तावस्य अभिप्राय: अभिहितः अस्ति; किं च

(ख) तादृश: सङ्कल्पः तत्सदनस्य समस्तसदस्यानां तृतीयांशद्वयात् अन्यूनेन बहुमतेन पारितः नास्ति।

(३) यदा कश्चित् दोषारोपः संसदः अन्यतरेण सदनेन एवं कृतः अस्ति तदा तस्याः अन्यत् सदनं तस्य दोषारोपस्य अन्वेषणं कुर्यात् कारयेत् वा; राष्ट्रपतिश्च एतादृशे अन्वेषणे उपस्थातुं, स्वप्रतिनिधित्वकरणे च अधिकृतः भवेत्।

(४) यदि राष्ट्रपतेः विरुद्धं कृतः दोषारोपः सिद्धः अस्ति इति घोषणां कुर्वन् एतद् अन्वेषणस्य परिणामस्वरूपः सङ्कल्पः तस्य सदनस्य समस्तसदस्यानां तृतीयांशद्वयात् अन्यूनेन बहुमतेन पारितः स्यात् येन तस्य दोषारोपस्य अन्वेषणं कृतं कारितं वा अस्ति तदा तादृशः सङ्कल्पः राष्ट्रपतेः स्वपदात् अपसारणाय प्रभवेत् तस्मात् दिनाङ्कात् यस्मिन् असौ सङ्कल्पः एवं पारितः अस्ति।

६२. राष्ट्रपतिपदस्य रिक्ततापूर्तये निर्वाचनस्य कालः, आकस्मिकरिक्ततापूर्तये निर्वाचितजनस्य पदावधिश्च- (१) राष्ट्रपतेः पदस्य अवधेः समाप्त्या कृतायाः रिक्ततायाः पूर्तये निर्वाचनम् अवधेः समाप्तेः पूर्वं पूर्णं भवेत्।

(२) राष्ट्रपतेः मृत्युना, पदत्यागेन, अपसारणेन, अन्येन हेतुना वा भवन्त्याः तस्य पदस्य रिक्ततायाः पूर्तये निर्वाचनं रिक्ततादिनाङ्कात् परं यथाशक्यम् अविलम्बेन प्रवर्तितं भवेत्, न च तद् रिक्ततायाः प्रारम्भदिनाङ्कात् षण्णां मासेभ्यः परं कस्यामपि अवस्थायां; किञ्च रिक्ततापूर्त्यर्थं निर्वाचितः सः जनः ५६-तमानुच्छेदस्य उपबन्धानाम् अधीनं पञ्चानां वर्षाणां पूर्णावधि पदधारणे स्वत्ववान् भवेत् तस्मात् दिनाङ्कात् यस्मिन् सः स्वपदम् आरोहति।

६३. भारतस्य उपराष्ट्रपतिः- भारतस्य एक: उपराष्ट्रपतिः भवेत्।

६४. उपराष्ट्रपतिः राज्यसभायाः पदेन सभापतिः- उपराष्ट्रपतिः राज्यसभायाः *पदेन* सभापतिः भवेत्; किञ्च लाभस्य किमपि अन्यत् पदं न धारयेत्-

(भागः ५-सङ्घः)

परन्तु यदा कस्मिन् अपि कालावधौ उपराष्ट्रपतिः राष्ट्रपतिरूपेण कार्यं करोति, राष्ट्रपतेः कृत्यानि ६५-तमानुच्छेदस्य अधीनं निर्वहति वा तदा सः राज्यसभायाः सभापतेः पदस्य कर्तव्यानि न आचरेत् तथा च राज्यसभायाः सभापतये ९७-तमानुच्छेदस्य अधीनं सन्देये वेतने, भक्ते वा स्वत्ववान् न भवेत्।

६५. राष्ट्रपतेः पदस्य आकस्मिकरिक्ततायाम् अनुपस्थितौ वा, उपराष्ट्रपतेः राष्ट्रपतिरूपेण कार्यनिर्वर्तनं, तत्कृत्यनिर्वहणं वा- (१) राष्ट्रपतेः पदे तस्य मृत्युना, पदत्यागेन, अपसारणेन, अन्येन हेतुना वा कस्याः अपि रिक्ततायाः प्रसङ्गे उपराष्ट्रपतिः राष्ट्रपतिरूपेण तद्दिनाङ्कपर्यन्तं कार्यं कुर्यात्यावत् नूतनः राष्ट्रपतिः अस्य अध्यायस्य उपबन्धानाम् अनुसारम् अस्याः रिक्ततायाः पूर्वं निर्वाचितः स्वपदम् आरोहति।

(२) यदा राष्ट्रपतिः कृत्यानां निर्वहणे अनुपस्थित्या, अस्वास्थ्येन, अन्येन केनापि हेतुना वा, असमर्थः अस्ति, तदा उपराष्ट्रपतिः तस्य कृत्यानि तद् दिनावधिं निर्वहेत् यावत् राष्ट्रपतिः स्वकर्तव्यानि पुनः आरभते।

(३) उपराष्ट्रपतिः यस्मिन् कालावधौ राष्ट्रपतिरूपेण एवं कार्याणि कुर्वन्, कृत्यानि निर्वहन् च अस्ति तस्मिन् कालावधौ तत्कालावधिम् उद्दिश्य च राष्ट्रपतेः शक्तीः उन्मुक्तीश्च लभेत; तथा उपलब्धिषु, भक्तेषु, विशेषाधिकारेषु च तादृशेषु स्वत्ववान् भवेत् यादृशानि संसदा विधिना अवधारितानि भवेयुः; यावत् च तद्विषये एवं उपबन्धः न क्रियते तावत् तादृशेषु उपलब्धिषु, भक्तेषु, विशेषाधिकारेषु च यादृशानि द्वितीयानुसूच्यां विनिर्दिष्टानि सन्ति।

६६. उपराष्ट्रपतेः निर्वाचनम्- (१) उपराष्ट्रपतेः निर्वाचनं संसदः [1][उभयोः सदनयोः सदस्यैः सम्भूतस्य निर्वाचकगणस्य सदस्याः] आनुपातिकप्रतिनिधित्वपद्धतिम् अनुसृत्य एकलसङ्क्रमणीय मते न कुर्युः; किं च एतादृशं निर्वाचनं गुप्तमतदानेन भवेत्।

(२) उपराष्ट्रपतिः संसदः अन्यतरस्य सदनस्य, कस्यापि वा राज्यस्य विधानमण्डलस्य कस्यापि सदनस्य वा सदस्यः न भवेत्; किं च यदि अन्यतरस्य कस्यापि संसत्-सदनस्य कस्यापि वा राज्यस्य विधानमण्डलसदनस्य कोऽपि सदस्यः उपराष्ट्रपतिरूपेण निर्वाचितः भवेत् तर्हि सः तस्मिन् सदने तस्मिन् दिनाङ्के रिक्तीकृतस्थानः मन्येत, यस्मिन् सः उपराष्ट्रपति रूपेण स्वपदम् आरोहति।

(३) सः एव जनः उपराष्ट्रपतिरूपेण निर्वाचने पात्रं भवेत् यः-

(क) भारतस्य नागरिकः अस्ति;

(ख) वयसः पञ्चत्रिंशत् वर्षाणि पूरितवान्; किं च

---

[1] संविधानस्य (एकादशं संशोधनम्) अधिनियमः, १९६१ इत्यस्य २-अनुभागेन "उभय-सदनयोः सदस्यैः संयुक्ताधिवेशने समवेतैः" इति एतस्मात् प्रति एतत् संनिवेशितम्।

(ग) राज्यपरिषदः सदस्यरूपेण निर्वाचने अर्हः अस्ति।

(४) कोऽपि जन: उपराष्ट्रपतिरूपेण निर्वाचने पात्रं न भवेत् यदि सः भारतशासनस्य, कस्यापि राज्यशासनस्य वा अधीनम् उक्तशासनानाम् अन्यतमस्य नियन्त्रणे स्थितस्य कस्यापि स्थानीयस्य अन्यस्य वा प्राधिकारिणः अधीनं किमपि लाभस्य पदं धारयति।

स्पष्टीकरणम्– कोऽपि जन: लाभस्य किमपि पदं धारयति इति अस्य अनुच्छेदस्य प्रयोजनानाम् अर्थे न मन्येत अस्मात् एव हेतोः, यत् सः सङ्घस्य राष्ट्रपतिः उपराष्ट्रपतिः वा अस्ति अथवा कस्यापि राज्यस्य राज्यपालः [1][* * * *] अस्ति, अथवा सङ्घस्य कस्यापि राज्यस्य वा मन्त्री अस्ति।

६७. उपराष्ट्रपतेः पदावधिः- उपराष्ट्रपतिः स्वपदं पञ्चवर्षावधिं तस्मात् दिनाङ्कात् धारयेत् यस्मिन् सः तत् पदम् आरोहति परन्तु-

(क) उपराष्ट्रपतिः राष्ट्रपतिं सम्बोध्य लिखितेन स्वहस्ताङ्कितेन लेखेन पदं त्यक्तुं क्षमते;

(ख) उपराष्ट्रपतिः राज्यसभायाः तदानीन्तनानां समस्तसदस्यानां बहुमतेन पारितेन, लोकसभया सम्मतेन च राज्यसभायाः सङ्कल्पेन स्वपदात् अपसारितः भवेत्; किन्तु अस्य खण्डस्य प्रयोजनार्थं कोऽपि सङ्कल्पः तावत् न प्रस्तावितः स्यात् यावत् न्यूनात् न्यूनं चतुर्दशदिनानां सूचना तत् सङ्कल्पप्रस्तावस्य अभिप्रायविषयिणी प्रदत्ता न स्यात्।

(ग) उपराष्ट्रपतिः स्वपदावधेः समाप्तौ अपि तावत् पदधारणम् अनुवर्तयेत् यावत् अस्य उत्तराधिकारिपदं न आरोहति।

६८. उपराष्ट्रपतिपदस्य रिक्ततापूर्तये निर्वाचनस्य कालः; आकस्मिकरिक्ततापूर्तये निर्वाचितजनस्य पदावधिश्च।

(१) उपराष्ट्रपतेः पदस्य अवधेः समाप्त्या कृतायाः रिक्ततायाः पूर्तये निर्वाचनम् अवधेः समाप्तेः पूर्वं पूर्णं भवेत्।

(२) उपराष्ट्रपतेः मृत्युना, पदत्यागेन, अपसारणेन अन्येन हेतुना वा भवन्त्याः तस्य पदस्य रिक्ततायाः पूर्तये निर्वाचनं रिक्ततादिनाङ्कात् परं यथाशक्यम् अविलम्बेन प्रवर्तितं भवेत्; किञ्च रिक्तता पूर्त्यर्थं निर्वाचितः सः जन: ६७–तमानुच्छेदस्य अनुबन्धानाम् अधीनं पञ्चानां वर्षाणां पूर्णावधिः पदधारणे स्वत्ववान् भवेत् तस्मात् दिनाङ्कात् यस्मिन् सः स्वपदम् आरोहति।

६९. उपराष्ट्रपतेः शपथ :प्रतिज्ञानं वा- प्रत्येकम् उपराष्ट्रपतिः स्वपदे आरोहणात् प्राक् राष्ट्रपतेः समक्षं, तेन तदर्थं नियुक्तस्य कस्यचित् जनस्य वा समक्षं शपथं प्रतिज्ञानं वा, निम्नलिखिते प्रारूपे

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च " राज्यप्रमुखो वा उपराज्यप्रमुखो वा" इत्येते शब्दाः विलोपिताः।

कुर्यात्, तं च स्वहस्ताङ्कितं कुर्यात्-

“अहम् अमुकः $\frac{\text{ईश्वरस्य नाम्ना}}{\text{सत्यनिष्ठया प्रतिजाने}}$ यद् अहं विधिना स्थापितं भारतस्य संविधानं प्रति श्रद्धां, निष्ठां च धारयिष्ये, तथा च अहं श्रद्धासमन्वितं निर्वर्तयिष्ये तस्य पदस्य कर्तव्यानि यद् अहम् आरोढुम् उद्यतः अस्मि”।

७०. अन्यासु आकस्मिकतासु राष्ट्रपतेः कृत्यानां निर्वहणम्- संसद् अस्मिन् अध्याये अकृतोपबन्धायां कस्यामपि आकस्मिकतायां तादृशम् उपबन्धं कर्तुं क्षमते यादृशं सा राष्ट्रपतेः कृत्यानां निर्वहणाय उचितं मन्येत।

[1]**[७१. राष्ट्रपतेः उपराष्ट्रपतेः वा निर्वाचनेन सम्बद्धाः संसक्ताः वा विषयाः-** (१) राष्ट्रपतेः उपराष्ट्रपतेः वा निर्वाचनात् उत्पन्नानां तेन संसक्तानां वा सर्वासां शङ्कानां, सर्वेषां विवादानां च मीमांसा, विनिश्चयश्च उच्चतमन्यायालयेन क्रियेत; तस्य निर्णयश्च अन्तिमः भवेत्।

(२) यदि कस्यापि जनस्य राष्ट्रपतिरूपेण उपराष्ट्रपतिरूपेण वा निर्वाचनम् उच्चतमन्यायालयेन शून्यं घोषितं भवति तर्हि यथायथं राष्ट्रपतेः उपराष्ट्रपतेः वा पदस्य शक्तीनां कर्तव्यानां च प्रयोगे पालने च तेन कृतानि कार्याणि उच्चतमन्यायालयस्य निर्णयस्य दिनाङ्के तत् पूर्वं वा तस्याः घोषणायाः हेतोः अमान्यानि न भवेयुः।

(३) संसद् अस्य संविधानस्य उपबन्धानाम् अधीनं राष्ट्रपतेः उपराष्ट्रपतेः वा निर्वाचनेन सम्बद्धं तेन संसक्तं वा कमपि विषयं विधिना विनियमयितुं क्षमते।

(४) राष्ट्रपतेः उपराष्ट्रपतेः वा रूपेण कस्यापि जनस्य निर्वाचनं तस्य निर्वाचनं कुर्वतः निर्वाचकगणस्य सदस्येषु केनापि कारणेन विद्यमानायाः रिक्तेः आधारेण प्रश्नगतं न क्रियेत।]

७२. क्षमादीनाम् अनुदाने, अवस्थाविशेषेषु च दण्डादेशानां निलम्बने, परिहारे, लघुकरणे वा राष्ट्रपतेः शक्तिः- (१) राष्ट्रपतिः कस्मिन् अपि अपराधे सिद्धदोषस्य कस्यापि जनस्य दण्डे क्षमाणां प्रविलम्बनानां, विरामाणां, परिहाराणां वा अनुदानाय दण्डादेशस्य वा निलम्बनाय, परिहाराय लघुकरणाय वा तासु सर्वासु अवस्थासु शक्तिं भजेत-

(क) यासु दण्डः दण्डादेशः वा सेनान्यायालयेन दत्तः भवति;

---

1 अनुक्रमशः संविधानस्य (नवत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य २–अनुभागेन (१०-८-१९७५ दिनाङ्कात् प्रवर्तमानप्रभावेण), संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य १०-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण च) संशोधितः एषः अनुच्छेदः इदं रूपं प्राप्तवान्।

(ख) यासु दण्ड: दण्डादेश: वा तद्विषयेण सम्बन्धिनः कस्यापि विधेः विरुद्धे अपराधे भवति यस्मिन् संङ्घस्य कार्यपालिका शक्तिः विस्तृता भवति;

(ग) यासु च मृत्युदण्डादेशः भवति।

(२) सेनान्यायालयेन पारितस्य दण्डादेशस्य निलम्बनाय परिहाराय लघुकरणाय वा सङ्घस्य सशस्त्रबलानां कस्मिन् अपि अधिकारिणे न्यस्तां शक्तिं (१) खण्डस्य (क) उपखण्डगतं किमपि न प्रभावयेत्।

(३) तदानीं प्रवृत्तस्य कस्यापि विधेः अधीनं राज्यस्य राज्यपालेन [1][* * *] प्रयुज्यमानां मृत्युदण्डादेशस्य निलम्बने, परिहारे लघुकरणे वा शक्तिं (१) खण्डस्य (क) उपखण्डगतं किमपि न प्रभावयेत्।

७३. सङ्घस्य कार्यपालिकायाः शक्तेः विस्तारः- (१) अस्य संविधानस्य उपबन्धानाम् अधीनं सङ्घस्य कार्यपालिका शक्तिः-

(क) यान् विषयान् उद्दिश्य संसद् विधीनां प्रणयने शक्तिं भजते तेषु; किं च

(ख) भारतस्य शासनेन कस्यापि सन्धेः, समयस्य वा आश्रयेण प्रयोक्तव्यानाम् अधिकाराणां, प्राधिकाराणाम् अधिकारितायाः प्रयोगे,

विस्तृता भवेत्-

परन्तु (क) उपखण्डे निर्दिष्टा कार्यपालिकाशक्तिः अस्मिन् संविधाने, संसदा कृते कस्मिन् अपि विधौ वा, स्पष्टं उपबन्धितं यदि स्यात् तद् विहाय [2][* * *] कस्मिन् अपि राज्ये तेषु विषयेषु विस्तृता न भवेत् यान् उद्दिश्य राज्यस्य विधानमण्डलम् अपि विधीनां प्रणयने शक्तिं भजते।

(२) संसद् यावत् अन्यथा उपबन्धं न करोति तावत् राज्यं राज्यस्य च कोऽपि अधिकारी, प्राधिकारी वा एतद् अनुच्छेदे किमपि सत्यपि, यादृशानां प्रयोगं तद् राज्यं वा, सः अधिकारी, प्राधिकारी वा अस्य संविधानस्य प्रारम्भात् अव्यहितपूर्वं कर्तुम् अक्षमत, तादृशानां कार्यपालिकायाः शक्तेः कृत्यानां वा प्रयोगम् अनुवर्तयेत् तेषु विषयेषु, यान् उद्दिश्य तस्मै राज्याय विधीनां प्रणयने संसद् शक्तिं भजते।

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राज्यप्रमुखः वा" इत्येतौ शब्दौ लोपितौ।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च "प्रथमानुसूच्या (क) भागे (ख) भागे वा उल्लिखिते" इत्येते शब्दाः अक्षरौ च लोपिताः।

भारतस्य संविधानम्

(भागः ५-सङ्घः)

मन्त्रिपरिषत्

७४. राष्ट्रपतये साहाय्यं मन्त्रणां च दातुं मन्त्रिपरिषत्- [1][(१) राष्ट्रपतये स्वकृत्यानां प्रयोगे साहाय्यं मन्त्रणां च दातुं मन्त्रि-परिषद् भवेत् यस्याः प्रमुखश्च प्रधानमन्त्री भवेत्; राष्ट्रपतिश्च तादृशीं मन्त्रणाम् अनुसृत्य कार्यं कुर्यात्।]

[2][परन्तु राष्ट्रपतिः मन्त्रिपरिषदः तन्मन्त्रणाविषये, साधारणतया अन्यथा वा पुनर्विचारणाय अपेक्षितुं क्षमते; तथा च सः एवं पुनर्विचारात् परं प्रदत्तां मन्त्रणाम् अनुसृत्य कार्यं कुर्यात्।]

(२) राष्ट्रपतये मन्त्रिभिः काचित्मन्त्रणा दत्ता न वा, यदि च दत्ता तर्हि का सा मन्त्रणा इति प्रश्नस्य कस्मिन् अपि न्यायालये मीमांसा न क्रियेत।

७५. मन्त्रिसम्बन्धिनः अन्ये उपबन्धाः- (१) राष्ट्रपतिः प्रधानमन्त्रिणः नियुक्तिं कुर्यात्, अन्येषां मन्त्रिणां नियुक्तिं च राष्ट्रपतिः प्रधानमन्त्रिणः मन्त्रणाम् अनुसृत्य कुर्यात्।

[3][(१क) मन्त्रिपरिषदि प्रधानमन्त्रिणा सह मन्त्रिणाम् आहत्य सङ्ख्या लोकसभायाः सदस्यानां सङ्ख्यायाः पञ्चदशप्रतिशतात् अधिकं न भवेत्।

(१ख) संसदः अन्यतरसदनस्य सदस्यः यः केनचन राजनीतिकदलेन सम्बद्धः, यः दशमानुसूच्याः द्वितीयपरिच्छेदस्य अधीनं तस्य सदनस्य सदस्यतायै निरर्हितः, सः, तस्य निरर्हताकालात् प्रभृतिः तस्य कार्यालयीयपदावधेः समाप्तिपर्यन्तम्, अथवा यदा सः तादृकवधेः समाप्तेः पूर्वं संसदः अन्यतरसदनस्य कृते निर्वचने प्रतिभागी भवति तदा तस्य निर्वाचनस्य कालपर्यन्तम्, एतयोः यत्पूर्वतनं, १-अनुभागस्य अधीनं मन्त्रिपदे नियुक्तये अपि निरर्हितो भवेत्।

(२) मन्त्रिणः राष्ट्रपतेः प्रसादपर्यन्तं स्वपदानि धारयेयुः।

(३) मन्त्रिपरिषत् लोकसभां प्रति समष्टिरूपेण उत्तरदायिनी भवेत्।

(४) कस्यापि मन्त्रिणः स्वपदारोहणात् प्राक् राष्ट्रपतिः तेन पदस्य गोपनीयतायाश्च तृतीयानुसूच्यां तदर्थं निर्दिष्टे प्रारूपे शपथं कारयेत्।

---

[1] संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य १३-अनुभागेन (१) खण्डात् प्रति एषः खण्डः संनिवेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[2] संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः १९७८ इत्यस्य ११-अनुभागेन एतत् अन्तर्वेशितम् (२०-६-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[3] संविधानस्य (एकनवतितमं संशोधनम्) अधिनियमः, २००३, २-अनुभागेन एषः खण्डः अन्तर्वेशितः (१-१-२००४ दिनाङ्कात् प्रवर्तमानप्रभावेण)

(भागः ५-सङ्घः)

(५) यः मन्त्री निरन्तरं षण्णां मासानां कस्मिन् अपि कालावधौ संसदः अन्यतरस्य कस्यापि सदनस्य सदस्यः न भवेत् सः तस्य कालावधेः समाप्तौ मन्त्रित्वात् प्रविरमेत्।

(६) मन्त्रिणां वेतनानि, भक्तानि च तादृशानि भवेयुः यादृशानि संसत् काले काले विधिना अवधारयेत्; अथ च यावत् संसद् एवं न अवधारयेत् तावत् तानि तथा भवेयुः यथा द्वितीयानुसूच्यां विनिर्दिष्टानि सन्ति।

भारतस्य महान्यायवादी

७६. भारतस्य महान्यायावादी- (१) राष्ट्रपतिः उच्चतमन्यायालयस्य न्यायाधीशरूपेण नियुक्तेः अर्हं कमपि जनं भारतस्य महान्यायवादित्वेन नियोजयेत्।

(२) महान्यायवादिनः एतत् कर्त्तव्यं भवेत् यत् सः भारतस्य शासनाय तादृशेषु विधिसम्बन्धिविषयेषु मन्त्रणायाः प्रदानं, तादृशानां विधिरूपाणाम् अन्येषां कर्तव्यानां पालनं च कुर्यात् यादृशानि काले काले तस्मै राष्ट्रपतिना निर्दिष्टानि अर्पितानि वा स्युः तथा च सः अनेन संविधानेन तदधीनं वा तदानीं प्रवृत्तेन अन्येन केनापि विधिना तदधीनं वा आत्मनः प्रदत्तानि कृत्यानि निर्वहेत्।

(३) स्वकर्तव्यानां पालनाय भारतस्य राज्यक्षेत्रे सर्वेषु न्यायालयेषु श्रावणे महान्यायवादिनः अधिकारः भवेत्।

(४) महान्यायवादी राष्ट्रपतेः प्रसादपर्यन्तं स्वपदं धारयेत्, तादृशं पारिश्रमिकं च प्राप्नुयात् यादृशं राष्ट्रपतिः अवधारयेत्।

शासनस्य कार्यस्य सञ्चालनम्

७७. भारतशासनस्य कार्यसञ्चालनम्- (१) भारतशासनस्य सर्वा कार्यपालिका-कृतिः राष्ट्रपतेः नाम्ना कृता इति कथ्येत।

(२) राष्ट्रपतेः नाम्ना दत्तानां निष्पादितानां च आदेशानाम्, अन्येषां लिखितानां च अधिप्रमाणीकरणं तादृश्या रीत्या भवेत् यादृशी राष्ट्रपतिना प्रणेतव्येषु[1] नियमेषु विनिर्दिष्टा स्यात्; किं च एवम् अधिप्रमाणितस्य आदेशस्य लिखितस्य वा विधिमान्यता न प्रश्नगता क्रियेत, यद् अयम् आदेशः इदं लिखितं वा न प्रणीतं निष्पादितं वा राष्ट्रपतिना इति आधारेण।

(३) राष्ट्रपतिः भारतशासनकार्यस्य अधिकसौकर्येण निर्वर्तनाय, मन्त्रिणां मध्ये उक्तकार्यस्य आवण्टनाय च नियमान् प्रणयेत्।

[2](४) * * * *

---

[1] १९५८-वर्षस्य भारतस्य असाधारणराजपत्रस्य द्वितीये भागे तृतीये अनुभागे (द्वितीये) खण्डे १३१५ पृष्ठे प्रकटिता ३-११-१६५८ दिनाङ्किता सां० आ० २२६७ क्रमाङ्किता अधिसूचना द्रष्टव्या, काले काले यथा संशोधिता।

[2] संविधानस्य (द्विचत्वारिशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य १४-अनुभागेन (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण) (४) खण्डः अन्तर्वेशितः आसीत्, संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य १२-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितश्च।

७८. राष्ट्रपतये सूचनादिविषयकाणि प्रधानमन्त्रिणः कर्तव्यानि-

(क) सङ्घकार्याणां प्रशासनविषये मन्त्रिपरिषदः सर्वेषां विनिश्चयानां, विधानार्थं प्रस्थापनानां च राष्ट्रपतये संसूचनम्;

(ख) सङ्घकार्याणां प्रशासनविषये, विधानार्थं प्रस्थापनाविषये च राष्ट्रपतये तादृशं सूचनं यादृशं स अपेक्षेत; अपि च

(ग) यस्मिन् विषये केनापि मन्त्रिणा विनिश्चयः कृतः किन्तु मन्त्रिपरिषदा विचारः कृतः नास्ति, तस्य कस्यापि विषयस्य मन्त्रिपरिषदः विचारार्थं (तस्याः) पुरतः स्थापनं यदि राष्ट्रपतिः एवम् अपेक्षते, इत्येतत् प्रधानमन्त्रिणः कर्तव्यं भवेत्।

अध्यायः २ संसद्

साधारणम्

७९. संसदः सङ्घटनम्- सङ्घाय एका संसद् स्यात् या राज्यसभा लोकसभा च इति ज्ञेयाभ्यां सदनाभ्यां राष्ट्रपतिना च सम्भूय भवेत्।

८०. राज्यसभायाः संरचना- (१) [1][[2] * * *राज्यसभा]-

(क) (३) खण्डस्य उपबन्धानाम् अनुसारेण राष्ट्रपतिना कृतनामनिर्देशनैः द्वादशभिः सदस्यैः; तथा च

(ख) अष्टत्रिंशदधिकद्विशतेभ्यः (२३८) सङ्ख्यकेभ्यः अनधिकैः राज्यानां, [3][सङ्घराज्यक्षेत्राणां च] प्रतिनिधिभिः, सम्भूय भवेत्।

(२) राज्यानां [४][सङ्घराज्यक्षेत्राणां च] प्रतिनिधिभिः पूरणीयानां राज्यसभायाः स्थानानाम् आवण्टनं चतुर्थानुसूचीस्थानां तद्विषयकाणाम् उपबन्धानां अनुसारेण भवेत्।

(३) (१) खण्डस्य (क) उपखण्डाधीनं राष्ट्रपतिना कृतनामनिर्देशनाः सदस्याः निम्नलिखितविषयाणां विशेषज्ञानिनः व्यावहारिकानुभववन्तश्च भवेयुः, यथा-

साहित्यं, विज्ञानं, कला, सामाजिकसेवा च।

---

[1] संविधानस्य (पञ्चत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७४ इत्यस्य ३-अनुभागेन “राज्यपरिषत्” इत्येतस्मात्, प्रति एतत् संनिवेशितम् (१-२-१९७५ दिनाङ्कात् प्रवर्तमानप्रभवेण)।

[2] संविधानस्य (षड्त्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५-इत्यस्य पञ्चमेन ५-अनुभागेन “दशमानुसूच्याः ४- प्रच्छेदस्य उपबन्धानाम् अधीनम्” इत्येते-शब्दाः लोपिताः (२६-४-१९७५ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[3] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य” ३-अनुभागेन एते शब्दाः परिवर्धिताः।

(४) राज्यसभायाः कृते, प्रत्येकराज्यस्य प्रतिनिधयः [1][* * *] तद्राज्यस्य राज्यविधानसभायाः निर्वाचितैः सदस्यैः आनुपातिकप्रतिनिधित्वपद्धतिम् अनुसृत्य एकलसङ्क्रमणीयमतेन निर्वाचिताः भवेयुः।

(५) राज्यसभायाः कृते [2][सङ्घस्य राज्यक्षेत्राणां] प्रतिनिधयः तादृश्या रीत्या वृताः स्युः यादृशीं संसद् विधिना विदधीत।

[3][**८१. लोकसभायाः संरचना-** (१) [4][३३१-तमानुच्छेदस्य उपबन्धानां [5][* * *] अधीनं] लोकसभा-

(क) राज्येषु प्रादेशिकनिर्वाचनक्षेत्रेभ्यः प्रत्यक्षं निर्वाचनेन वृत्तैः [6][त्रिंशदधिकपञ्चशतम्] इत्यतः अनधिकैः [6][सदस्यैः]; तथा च।

(ख) सङ्घस्य राज्यक्षेत्राणां प्रतिनिधानार्थम्, एतादृश्या रीत्या, या संसदा विधिना उपबन्धिता भवेत्, निर्वाचितैः [7][विंशतिः] सङ्ख्यकेभ्यः अनधिकैः [7][सदस्यैः,] सम्भूय भवेत्।

(२) (१) खण्डस्य (क) उपखण्डस्य प्रयोजनानां कृते-

(क) प्रत्येकराज्याय आवंटितानां लोकसभास्थानानां सङ्ख्या तथा निर्धारिता भवेत् यथा तत्-सङ्ख्यायाः राज्यस्य जनसङ्ख्यायाश्च मध्ये अनुपातः सर्वेषु राज्येषु यथासाध्यम् एकविधः भवेत्; तथा च

(ख) प्रत्येकराज्यं तादृश्या रीत्या प्रादेशिकनिर्वाचनक्षेत्रेषु विभज्येत यत् प्रत्येकस्य निर्वाचनक्षेत्रस्य जनसङ्ख्यायाः तथा च तत्प्रति आवण्टितानां स्थानानां सङ्ख्यायाश्च मध्ये अनुपातः समस्तराज्ये यथासाध्यम् एकविधः भवेत्-

[8][परन्तु एतत् खण्डस्य (क) उपखण्डस्य उपबन्धाः कस्मै अपि राज्याय लोकसभास्थानानाम् आवण्टनस्य प्रयोजनानां कृते तावत् प्रवृत्ताः न भवेयुः यावत् तस्य राज्यस्य जनसङ्ख्या षष्टिलक्षसङ्ख्यातः अधिकतरा न भवति।

---

1 उपर्युक्ताधिनियमस्य ३-अनुभागेन "प्रथमानुसूच्याः (क). भागे (ख) भागे वा उल्लिखितस्य" इति लोपितः।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, -१९५६ इत्यस्य ३-अनुभागेन "प्रथमानुमूच्याः ग भागे उल्लिखितानां राज्यानाम्" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

3 उपर्युक्ताधिनियमस्य ४-अनुभागेन ८१-तम, ८२-तमः अनुच्छेदाभ्यां प्रति एतौ अनुच्छेदौ संनिवेशितौ।

4 संविधानस्य (पञ्चत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७४-इत्यस्य ४-अनुभागेन "३३१-तमानुच्छेदस्य उपबन्धानां अधीनम्" इत्येतस्मात् प्रति एतत् संनिवेशितम् (१-३-१९७५ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

5 संविधानस्य (षट्त्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य ५-अनुभागेन "दशमानुसूच्याः ४-प्रच्छेदस्य च" इत्येते शब्दाः अङ्काश्च लोपिताः (२६-४-१९७५ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

6 गोवा-दमण-दीव-पुनर्घटन-अधिनियमः, १९८७ (१९८७ वर्षस्य १८) इत्यस्य ६३-अनुभागेन (३०-५-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) "पञ्चविंशत्यधिकपञ्चशतं सदस्यानां" स्थाने संनिवेशितः।

7 संविधानस्य (एकत्रिंशत्तमं सशोधनम्) अधिनियमः, १९७३ इत्यस्य २-अनुभागेन (१७-१०-१९७३ दिनाङ्कात् प्रवर्तमानप्रभावेण) "पञ्चविंशतिसदस्येभ्यः" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

8 उपर्युक्ताधिनियमस्य २-अनुभागेन अन्तर्वेशितम्।

(३) अस्मिन् अनुच्छेदे "जनसङ्ख्या" शब्दस्य अर्थे सा जनसङ्ख्या ग्राह्या या अभिनिश्चिता तस्याम् अन्तिमायां पूर्ववृत्तायां जनगणनायां यस्याः सुसम्बद्धाः अङ्काः प्रकाशिताः-

[1][परन्तु एतस्मिन् खण्डे "अन्तिमायां पूर्ववृत्तायां जनगणनायां यस्याः सुसम्बद्धा अङ्काः प्रकाशिताः" इति कथनं प्रति निर्देशस्य तावत् १९७१-तमवर्षस्य जनगणनां प्रति निर्देशः इति अर्थः ग्राह्यः यावत् [2][२०२६ इति]- वर्षानन्तरं कृतायाः प्रथमजनगणनायाः सुसम्बद्धाः अङ्काः प्रकाशिताः न भवेयुः, [3][अयम् अर्थः भवेत्,- (i) खण्डः (२) इत्यस्य उपखण्डः (क) तथा तस्य खण्डस्य पारन्तुकप्रयोजनार्थं १९७१-वर्षस्य जनगणनां प्रति निर्देशः अस्ति; तथा (ii) खण्डः (२) इत्यस्य उपखण्डः (ख) इत्यस्य प्रयोजनार्थं [4][२००१] वर्षस्य जनगणनां प्रति निर्देशः अस्ति।]

८२. प्रत्येकजनगणनायाः पश्चात् पुनः समायोजनम्- प्रत्येकजनगणनायाः समाप्तौ राज्येषु लोकसभास्थानानाम् आवण्टनस्य प्रत्येकराज्यस्य प्रादेशिकनिर्वाचनक्षेत्रेषु विभाजनस्य च तादृशेन प्राधिकारिणा तादृश्या रीत्या च क्रियेत यादृशेन संसद् विधिना अवधारयेत्-

परन्तु तादृशं पुनः समायोजनं लोकसभायाः प्रतिनिधित्वे तावत् प्रभावं न आपादयेत् यावत् तदानीं विद्यमानायाः लोकसभायाः विघटनं न भवति-

[5][अपरं च, एतादृशं पुनः समायोजनं तस्मात् दिनाङ्कात् प्रभावम् आपादयेत् यं राष्ट्रपतिः आदेशेन विनिर्दिशेत्; तथा च यावत् तादृशं पुनः समायोजनं प्रभावं न आपादयति तावत् लोकसभायाः कृते निर्वाचनं तेषां निर्वाचनक्षेत्राणाम् आधारेण भवेत् यानि तादृशात् पुनः समायोजनात् पूर्वं विद्यमानानि स्युः- तथैव च यावत् [6][२०२६ इति]-वर्षानन्तरं कृतायाः प्रथमायाः जनगणनायाः सुसम्बद्धाः अङ्काः न प्रकाशिता भवेयुः तावत् एतद् अनुच्छेदस्य अधीनं राज्येभ्यः लोकसभास्थानानाम् आवण्टनस्य प्रत्येकराज्यस्य प्रादेशिकक्षेत्रेषु विभाजनस्य च पुनः समायोजनम् आवश्यकं न भवेत्, [7][अस्य अनुच्छेदस्य-

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य १५-अनुभागेन एतत् अन्तर्वेशितम् (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (चतुरशीतितमं संशोधनम्) अधिनियमः, २००१ वर्षस्य ३-अनुभागेन (२१-२-२००२ दिनाङ्कात् प्रवर्तमानप्रभावेण) "२०००" इत्यस्य स्थाने संनिवेशितः।

3 संविधानस्य (चतुरशीतितमं संशोधनम्) अधिनियमः, २००१ वर्षस्य ३-अनुभागेन (२१-२-२००२ दिनाङ्कात् प्रवर्तमानप्रभावेण) केषांचित् शब्दानां स्थाने संनिवेशितः।

4 संविधानस्य (सप्ताशीतितमं संशोधनम्) अधिनियमः, २००३ इत्यस्य २-अनुभागेन (२६-६-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) "१९९१" इत्यस्य स्थाने संनिवेशितः।

5 संविधानस्य (द्विचरत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य १६-अनुभागेन एतत् अन्तर्वेशितम् (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

6 संविधानस्य (चतुरशीतितमं संशोधनम्) अधिनियमः, २००१ वर्षस्य ४-अनुभागेन (२१-२-२००२ दिनाङ्कात् प्रवर्तमानप्रभावेण) "२०००" इत्यस्य स्थाने संनिवेशितः।

7 संविधानस्य (चतुरशीतितमं संशोधनम्) अधिनियमः, २००१ वर्षस्य ४-अनुभागेन (२१-२-२००२ दिनाङ्कात् प्रवर्तमानप्रभावेण) केषांचित् शब्दानां स्थाने संनिवेशितः।

(i) राज्यानि लोकसभायां १९७१-वर्षस्य जनगणनायाः आधारे पुनःसमायोजितानां स्थानानाम् आवण्टनस्य; तथा

(ii) प्रत्येकं राज्यस्य प्रादेशिकेषु निर्वाचनक्षेत्रेषु विभाजनस्य, ये [1][२००१] वर्षस्य जनगणनायाः आधारेण पुनःसमायोजिताः भवेयुः ।

८३. संसदः सदनयोः अवधिः- (१) राज्यसभायाः विघटनं न भवेत् किन्तु तस्याः सदस्यानां यावत् शक्यं तृतीयांशः प्रत्येकद्वितीयवर्षस्य समाप्तौ संसदा तद्विषये विधिना प्रणीतान् उपबन्धान् अनुसृत्य यथासम्भवं शीघ्रं निवर्तेत ।

(२) लोकसभा यदि पूर्वतरं न विघटिता स्यात् तर्हि स्वप्रथमाधिवेशनाय नियतात् दिनाङ्कात् [2][पञ्च-वर्षाणि] अनुवर्तेत न तदधिकम्; [2][उक्तपञ्चवर्षकालावधेः] समाप्तिश्च लोकसभायाः विघटने परिणमेत् परन्तु यदा आपातस्य उद्घोषणा प्रवर्तमानास्ति तदा संसद् उक्तकालावधिम् एकस्मिन् काले एकवर्षात् अनधिकं, तस्याः उद्घोषणायाः प्रवर्तनस्य पर्यवसानात् परं कस्यामपि अवस्थायां षण्मासावधिम् अनतीत्य च, विधिना वर्धयितुं क्षमते ।

८४. संसदः सदस्यत्वस्य अर्हता- कोऽपि जनः संसदि कस्यापि स्थानस्य पूर्तये वरणार्हः केवलं तदा भवेत् यदा सः-

[3][(क) भारतस्य नागरिकः अस्ति तथा च निर्वाचनायोगेन एतदर्थं प्राधिकृतस्य कस्यापि जनस्य समक्षम् एतत् प्रयोजनस्य कृते तृतीयानुसूच्याम् उल्लिखिते प्ररूपे शपथं, प्रतिज्ञानं वा कुर्यात् तं च स्वहस्ताङ्कितं कुर्यात्]

(ख) राज्यसभायाः स्थानाय अन्यूनत्रिंशद्वर्षवयस्कः, लोकसभास्थानाय च अन्यूनपञ्चविंशतिवर्षवयस्कः विद्यते;

(ग) तादृशीः अन्याः अर्हताः धारयति यादृश्यः संसदा तद्विषये कृतेन केनापि विधिना तदधीनं वा तदर्थं विहिताः भवेयुः ।

---

1 संविधानस्य (सप्ताशीतितमं संशोधनम्) अधिनियमः, २००३ वर्षस्य ३-अनुभागेन (२२-६-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) “१९९१” इत्यस्य स्थाने संनिवेशितः ।

2 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य १३-अनुभागेन “षडवर्षाणि” इत्येत-स्मात् प्रति “पञ्चवर्षाणि” इति तथा च “उक्तषड्वर्षकालावधेः” इत्येतस्मात् प्रति “उक्तपञ्चवर्षकालावधे:"इत्येतत् संनिवेशितम् (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण); संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य १७-अनुभागेन “षड्वर्षाणि इति” “पञ्चवर्षान्' इत्येतस्मात् प्रति तथा च “उक्त षड्वर्षकालावधेः” इति “उक्तपञ्चवर्षकालावधेः” इत्येतस्मात् प्रति संनिवेशितम् आसीत् (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

3 संविधानस्य (षोडशं संशोधनम्) अधिनियमः, १९६३-इत्यस्य ३-अनुभागेन (क) खण्डात् प्रति एषः खण्डः (५-१०-१९६३ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितः ।

[1][**८५.- संसदः सत्राणि, सत्राणाम् अवसानं, विघटनं च-** (१) राष्ट्रपतिः काले काले संसदः प्रत्येकं सदनं तादृशे काले तादृशे स्थाने च अधिवेशनाय आहूतं कुर्यात् यादृशं सः युक्तं मन्येत; किन्तु ईदृशस्य एकस्य सत्रस्य अनन्तिमोपवेशनदिनाङ्कस्य तदनन्तरं भाविनः सत्रस्य प्रथमोपवेशनाय नियतदिनाङ्कस्य च मध्ये षण्णां मासानां व्यवधानं न भवेत्।

(२) राष्ट्रपतिः काले काले-

(क) सदनयोः, तयोः अन्यतरस्य वा, सत्रावसानं कर्तुं;

(ख) लोकसभायाः विघटनं कर्तुं च,] क्षमते।

८६. राष्ट्रपतेः सदने प्रति अभिभाषणे सन्देशप्रेषणे च अधिकारः- (१) राष्ट्रपतिः संसदः अन्यतरसदने, सहसमवेतयोः सदनयोः वा अभिभाषणं कर्तुं क्षमते; तथा च तदर्थं सदस्यानाम् उपस्थितिम् अपेक्षितुं क्षमते।

(२) राष्ट्रपतिः संसदः अन्यतरसदनं प्रति संसदि तदानीं लम्बितविधेयकम् उद्दिश्य, अन्यथा वा, सन्देशान् प्रेषयितुं क्षमते; तथा च यत् सदनं प्रति कोऽपि सन्देशः एवं प्रेषितः अस्ति तत्सदनं तत्सन्देशेन विचाराय अपेक्षितं कमपि विषयं यथानुकूलं शीघ्रं विचारयेत्।

८७. संसदः प्रत्येकसत्रारम्भे राष्ट्रपतेः विशेषाभिभाषणम्- (१) राष्ट्रपतिः [2][प्रत्येकं साधारणनिर्वाचनात् परं लोकसभायाः प्रथमसत्रस्य] आरम्भे एकत्र समवेते संसदः सदनद्वये अभिभाषणं कुर्यात्; तथा च संसदं तस्याः आह्वानस्य कारणानि ज्ञापयेत्।

(२) एतादृशे अभिभाषणे निर्दिष्टानां विषयाणां चर्चार्थं समयं नियन्तुं [3][* * *] प्रत्येकसदनस्य प्रक्रियायाः विनियमनं कुर्वद्भिः नियमः उपबन्धः कृतः भवेत्।

८८. मन्त्रिणां, महान्यायवादिनश्च सदनयोः सम्बन्धिनः अधिकाराः- भारतस्य प्रत्येकं मन्त्री, महान्यायवादी च अन्यतरस्मिन् सदने, सदनयोः कस्मिन् अपि संयुक्तोपवेशने च तथा संसदः कस्यामपि समितौ यस्यां सः नामनिर्दिष्टः सदस्यः भवेत्, तस्यां भाषणाय अन्यथा च कार्यप्रवत्तिषु भागग्रहणाय अधिकारं भजेत किन्तु अस्य अनुच्छेदस्य आश्रयेण सः मतदाने स्वत्ववान् न भवेत्।

---

1 संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य ६-अनुभागेन ८५ अनुच्छेदात् प्रति एषः अनुच्छेदः (१८-६-१९५१ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितः।

2 संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य ७-अनुभागेन "प्रत्येकसत्रस्य" इत्येतस्मात् प्रति एतत् (१८-६-१९५१ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितम्।

3 उपर्युक्ताधिनियमस्य ७-अनुभागेन "तस्य सदनस्य अन्यकार्यात् एतादृश्याश्चर्चायाः पूर्ववर्तितायै च" इत्येते शब्दाः (१८-६-१९५१ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपिताः।

(भागः ५-सङ्घः)

संसदः अधिकारिणः

८९. राज्यसभायाः सभापतिः, उपसभापतिश्च- (१) भारतस्य उपराष्ट्रपतिः पदेन राज्यसभायाः सभापतिः भवेत्।

(२) राज्यसभा स्वीयम् एकं सदस्यं उपसभापतिरूपेण यथासम्भवं शीघ्रं वृणीत, तथा च यदा यदा उपसभापतेः पदं रिक्तं भवति तदा तदा सा सभा अन्यं सदस्यं स्वीय-उपसभापतिरूपेण वृणीत।

९०. उपसभापतेः पदस्य रिक्तता, पदत्यागः पदात् अपसारणं च- राज्यसभायाः उपसभापतिरूपेण पदं धारयन् सदस्यः-

(क) स्वपदं रिक्तं कुर्यात् यदि सः तस्याः सभायाः सदस्यत्वात् विरमति;

(ख) सभापतिं सम्बोध्य स्वहस्ताङ्कितेन लेखेन स्वपदं कदापि त्यक्तुं क्षमते; तथा च

(ग) राज्यसभायाः तदानीन्तनानां समस्तसदस्यानां बहुमतेन पारितेन तत्सभायाः सङ्कल्पेन स्वपदात् अपसारितुं शक्यते-

परन्तु (ग) खण्डस्य प्रयोजनाय कोऽपि सङ्कल्पः तावत् प्रस्तावितः न भवेत् यावत् तत्सङ्कल्पप्रस्तावाशयस्य न्यूनात् न्यूनं चतुर्दशानां दिनानां सूचना न दत्ता भवेत्।

९१. उपसभापतेः अन्यस्य वा जनस्य सभापतिपदस्य कर्तव्यानां पालने सभापतिरुपेण कार्यकरणे वा शक्तिः- (१) यदा सभापतेः पदं रिक्तम् अस्ति तदा, अथवा यस्मिन् काले उपराष्ट्रपतिः राष्ट्रपतिरूपेण कार्याणि कुर्वन्, राष्ट्रपतेः कृत्यानि निर्वहन् च विद्यते, तस्मिन् कस्मिन् अपि कालावधौ, उपसभापतिना तत्पदस्य कर्तव्यानि पालितानि भवेयुः, अथवा यदा उपसभापतेः पदम् अपि रिक्तम् अस्ति तदा राज्यसभायाः तादृशेन सदस्येन पदस्य कर्तव्यानि पालितानि भवेयुः यादृशं राष्ट्रपतिः तत्प्रयोजनाय नियोजयेत्।

(२) राज्यसभायाः कस्मिन् अपि उपवेशने सभापतेः अनुपस्थितौ उपसभापतिः अथवा तस्यापि अनुपस्थितौ तादृशः जनः यादृशः तत् सभायाः प्रक्रियायाः नियमैः अवधारितः भवेत्, अथवा यदि तादृशः अपि जनः अनुपस्थितः तर्हि अन्यः तादृशः जनः यादृशः तया सभया अवधारितः भवेत्, सभापतिरूपेण कार्यं कुर्यात्।

९२. सभापतिः, उपसभापतिः; वा पीठासीनः न स्यात् यदा तस्य स्वपदात् अपसरणाय सङ्कल्पः विचाराधीनः अस्ति- सत्यनिष्ठया प्रतिजाने विचाराधीनः अस्ति तदा सभापतिः, अथवा यदा उपसभापतेः स्वपदात् अपसारणाय कोऽपि सङ्कल्पः, विचाराधीनः अस्ति तदा उपसभापतिः उपस्थितोपि पीठासीनः न भवेत्; किञ्च ९१-तमानुच्छेदस्य (२) खण्डस्य उपबन्धाः प्रत्येकं तादृशम् उपवेशनं तथैव विषयीकुर्युः यथा ते विषयीकुर्वन्ति तद् उपवेशनं यत्र यथायथं सभापतिः उपसभापतिः वा अनुपस्थितः भवति।

(२) यदा उपराष्ट्रपतेः स्वपदात् अपसारणाय कश्चिदपि सङ्कल्पः विचाराधीनः अस्ति तदा सभापतिः राज्यसभायां भाषणाय अन्यथा तस्याः कार्यप्रवृत्तिषु भागग्रहणाय च अधिकारं भजेत; किन्तु १००-तमानुच्छेदे किमपि सत्यपि सः तादृशे सङ्कल्पे, तादृशीषु कार्यप्रवृत्तिषु वा अन्यस्मिन् कस्मिन् अपि विषये मतदाने कथमपि स्वत्ववान् न भवेत्।

९३. लोकसभायाः अध्यक्षः उपाध्यक्षश्च- लोकसभा यथासम्भवं शीघ्रं स्वीयौ द्वौ सदस्यौ अनुक्रमेण अध्यक्षरूपेण, उपाध्यक्षरूपेण च वृणीत; तथा च यदा यदा अध्यक्षस्य, उपाध्यक्षस्य वा पदं रिक्तं भवति तदा तदा लोकसभा अन्यं सदस्यं यथायथं अध्यक्षरूपेण, उपाध्यक्षरूपेण वा वृणीत।

९४. अध्यक्षस्य उपाध्यक्षस्य च पदरिक्तता, पदत्यागः, पदात् अपसारणं च- लोकसभायाः अध्यक्षरूपेण उपाध्यक्षरूपेण वा पदं धारयन् सदस्यः-

(क) स्वपदं रिक्तं कुर्यात् यदि सः लोकसभायाः सदस्यत्वात् प्रविरमेत्;

(ख) यदि तादृशः सदस्यः अध्यक्षः अस्ति तर्हि उपाध्यक्षं, यदि च तादृशः सदस्यः उपाध्यक्षः अस्ति तर्हि अध्यक्षं, सम्बोध्य लिखितेन: स्वहस्ताङ्कितेन लेखेन स्वपदं कदापि त्यक्तुं क्षमते;. तथा च

(ग) तदानीन्तनानां लोकसभायाः समस्तसदस्यानां बहुमतेन पारितेन तस्याः सभायाः सङ्कल्पेन स्वपदात् अपसारितुं शक्यते-

परन्तु (ग) खण्डस्य प्रयोजनाय कोऽपि सङ्कल्पः तावत् प्रस्तावितः न भवेत् यावत् तत्सङ्कल्पप्रस्तावाशयस्य न्यूनात् न्यूनं चतुर्दशदिनानां सूचना न दत्ता भवेत्;

अपरं च यदा यदा लोकसभा विघटिता भवेत् तदा तदा अध्यक्षः स्वपदं तद्विघटनात् परं लोकसभायाः प्रथमोपवेशनस्य अव्यवहितपूर्वकालपर्यन्तं, न रिक्तीकुर्यात्।

९५. उपाध्यक्षस्य, अन्यस्य वा जनस्य अध्यक्षपदस्य कर्तव्यपालने अध्यक्षरूपेण कार्यकरणे वा शाक्तिः- (१) यदा अध्यक्षस्य पदं रिक्तम् अस्ति तदा उपाध्यक्षेण, यदि च उपाध्यक्षस्यापि पदं रिक्तम् अस्ति तर्हि लोकसभायाः तादृशेन सदस्येन तत्पदस्य कर्तव्यानि पलितानि भवेयुः यादृशं राष्ट्रपतिः तत्प्रयोजनाय नियोजयेत्।

(२) लोकसभायाः कस्मिन् अपि उपवेशने अध्यक्षस्य अनुपस्थितौ उपाध्यक्षः, तस्यापि च अनुपस्थितौ तादृशः जनः यादृशः तत्सभायाः प्रक्रियायाः नियमैः अवधारितः भवेत्, यदि तादृशोपि जनः.अनुपस्थितः तर्हि अन्यः तादृशः जनः, यादृशः तद्सभया अवधारितः भवेत्, अध्यक्षरूपेण कार्यं कुर्यात्।

भारतस्य संविधानम्

(भागः ५-सङ्घः)

९६. अध्यक्षः उपाध्यक्षः वा पीठासीनः न स्यात् यदा तस्य स्वपदात् अपसारणाय सङ्कल्पः विचाराधीनः अस्ति- (१) लोकसभायाः कस्मिन् अपि उपवेशने यदा अध्यक्षस्य स्वपदात् अपसारणाय् कोऽपि सङ्कल्पः विचाराधीनः अस्ति तदा अध्यक्षः, अथवा यदा उपाध्यक्षस्य स्वपदात् अपसारणाय कोऽपि सङ्कल्पः विचाराधीनः अस्ति तदा उपाध्यक्षः, उपस्थितोपि पीठासीनः न भवेत्; किञ्च , ९५-तमानुच्छेदस्य (२) खण्डस्य उपबन्धाः प्रत्येकं तादृशम् उपवेशनं तथैव विषयीकुर्युः यथा ते विषयीकुर्वन्ति तद् उपवेशनं यत्र यथायथम् अध्यक्षः उपाध्यक्षः वा अनुपस्थितः भवति।

(२) यदा अध्यक्षस्य स्वपदात् अपसारणाय कश्चिदपि सङ्कल्पः विचाराधीनः अस्ति तदा सः लोकसभायां भाषणाय, अन्यथा तस्याः कार्यप्रवृत्तिषु भागग्रहणाय च अधिकारं भजेत, किन्तु १००-तमानुच्छेदे किमपि सत्यपि सः तादृशे सङ्कल्पे, तादृशीषु कार्यप्रवृतिषु वा अन्यस्मिन् कस्मिन् अपि विषये प्रथमतः मतदाने तु स्वत्ववान् भवेत् किन्तु मतसाम्यदशायां स्वत्ववान् न भवेत्।

९७. सभापतेः, उपसभापतेश्च अध्यक्षस्य, उपाध्यक्षस्य च वेतनानि, भक्तानि च- राज्यसभायाः सभापतये, उपसभापतये च, तथा च लोकसभायाः अध्यक्षाय उपाध्यक्षाय च तादृशानि वेतनानि, भक्तानि च सन्दत्तानि स्युः यादृशानि संसद् विधिना क्रमशः नियतानि कुर्यात्, तथा च यावत् तदर्थम् उपबन्धः कृतः नास्ति तावत् तादृशानि वेतनानि भक्तानि च सन्दत्तानि स्युः यादृशानि द्वितीयानुसूच्यां विनिर्दिष्टानि सन्ति।

९८. संसदः सचिवालयः- (१) संसदः प्रत्येकसदनस्य पृथक् सचिवीयः कर्मचारिवृन्दः भवेत्

परन्तु एतत्खण्डे कस्यापि कथनस्य एवम् अर्थः न ग्राह्यः यद् एतत् संसदः उभयसदनसाधारणानां पदानां सर्जनं निवारयति इति।

(२) संसद् विधिना अन्यतरस्य कस्यापि संसत् सदनस्य सचिवीये कर्मचारिवृन्दे नियोजनं, नियुक्तानां जनानां सेवाविषयकान् प्रतिबन्धान् च विनियमयेत्।

(३) यावत् संसत् (२) खण्डाधीनम् उपबन्धं न करोति, तावत् राष्ट्रपतिः यथायथं लोकसभायाः अध्यक्षेण, राज्यसभायाः सभापतिना वा परामृश्य लोकसभायाः राज्यसभायाः वा सचिवीये कर्मचारिवृन्दे नियोजनस्य नियुक्तानां जनानां सेवाविषयकाणां प्रतिबन्धानां च विनियमनाय नियमान् कर्तुं क्षमते; अपि च एवं कृताः केपि नियमाः उक्तखण्डाधीनं प्रणीतस्य कस्यापि विधेः उपबन्धानाम् अधीनं कार्यक्षमाः भवेयुः।

(भागः ५-सङ्घः)

कार्य-सञ्चालनम्

९९. सदस्यानां शपथः प्रतिज्ञानं वा- संसदः अन्यतरस्य सदनस्य प्रत्येकं सदस्यः स्वस्थानग्रहणात् प्राक् राष्ट्रपतेः समक्षं, तेन तदर्थं नियुक्तस्य कस्यचित् जनस्य वा समक्षं तृतीयानुसूच्यां तदर्थम् उल्लिखिते प्ररूपे शपथं, प्रतिज्ञानं वा कुर्यात् तं च स्वहस्ताङ्कितं कुर्यात्।

१००. सदनयोः मतदानं, रिक्ततासु सतीषु अपि सदनानां कार्यकरणे शक्तिः, गणपूर्तिश्च- (१) अस्मिन् संविधाने अन्यथा उपबन्धितं व्यतिरिच्य, अन्यतरस्य सदनस्य उपवेशने, सदनयोः संयुक्तोपवेशने वा, अध्यक्षात् सभापतिरूपेण अध्यक्षरूपेण वा कार्यकारिणः जनात्, व्यतिरिक्तानाम् उपस्थितानां, मतं ददतां च सदस्यानां बहुमतेन सर्वे प्रश्नाः अवधारिताः स्युः।

सभापतिः, अध्यक्षः वा, तद्रूपेण कार्यकारी जनः वा प्रथमतः मतं न दद्यात् किन्तु मतसाम्यावस्थायां निर्णायकमतं भजेत, प्रयुञ्जीत च।

(२) संसदः अन्यतरत् किमपि सदनं तत्रत्यायाः सदस्यतायाः कस्यामपि रिक्ततायां सत्यामपि कार्यकरणे शक्तिं भजेत, तथा च कोऽपि एवं करणे अस्वत्ववान् जनः उपाविशत् मतं वा अदात्, अन्यथा वा कार्यप्रवृत्तिषु भागग्रहणम् अकरोत् इति एतदनन्तरं ज्ञाते अपि संसदः कार्यप्रवृत्तयः विधिमान्याः भवेयुः।

[1][(३) यावत् संसद् विधिना अन्यथा न उपबन्धयति तावत् संसदः प्रत्येकसदनस्य अधिवेशनस्य घटनाय गणपूर्तिः तत् सदनस्य सदस्यानां पूर्णसङ्ख्यायाः दशमांशेन भवेत्।]

(४) यदि सदनस्य अधिवेशने कस्मिञ्चित् काले गणपूर्तिः नास्ति, तर्हि सभापतेः अध्यक्षस्य वा तद्रूपेण कार्यं कुर्वतः जनस्य वा एतत् कर्तव्यं भवेत् यत् यावत् गणपूर्तिः नास्ति तावत् सदनस्य स्थगनम्, अधिवेशनस्य निलम्बनं वा कुर्यात्।

सदस्यानां निरर्हता

१०१. स्थानानां रिक्तता- (१) कोऽपि जनः उभयोः सदनयोः सदस्यः न भवेत्, तथा च यः जनः; उभयोः. सदनयोः सदस्यः वृतः अस्ति तेन एकस्मिन्, अन्यस्मिन् वा सदने स्थानं रिक्तं कारयितुं संसद् विधिना उपबन्धं कुर्यात्।

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य १८-अनुभागेन (दिनाङ्कं नाधिसूचितम्) खण्डः (३) तथा खण्डः (४) इति लोपितः। अस्य संशोधनस्य संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४५-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितः।

(२) कोऽपि जनः संसदः [1][* * *] कस्यचिद् राज्यस्य विधानमण्डलस्य सदनस्य च उभयोः सदस्यः न भवेत् तथा च यदि कोऽपि जनः संसदः [2][राज्यस्य] विधानमण्डलस्य सदनस्य च उभयोः निर्वाचितः सदस्यः अस्ति, तर्हि तस्य जनस्य संसदि स्थानं तादृशकालावधेः समाप्तेः परं रिक्तं भवेत् यादृशः राष्ट्रपतिना प्रणीतेषुः[*] नियमेषु विनिर्दिष्टः स्यात्, यदि तेन राज्यस्य विधानमण्डले स्थानं पूर्वतः एव न त्यक्तं भवेत्।

(३) यदि संसदः कस्यापि अन्यतरस्य सदनस्य सदस्यः-

(क) [3][१०२-तमानुच्छेदस्य (१) खण्डे, (२) खण्डे वा] वर्णितानां निरर्हतानाम् अन्यतमया कयापि ग्रस्तः भवति, अथवा

[4](ख) यथायथं सभापतिम्, अध्यक्षं वा सम्बोध्य लिखितेन स्वहस्ताङ्कितेन लेखेन स्वस्थानं त्यजति, तस्य त्यागपत्रं च यथायथं सभापतिना अध्यक्षेण वा स्वीकृतं भवति,]

तर्हि तदुत्तरं तस्य स्थानं रिक्तं भवेत्

[5][परन्तु (ख) उपखण्डे निर्दिष्टस्य त्यागपत्रस्य दशायां यदि समुपलब्धेन अवगमेन अन्यथा वा सः यादृशी योग्यां मन्यते तादृश्याः मीमांसायाः परं च यथायथं सभापतिः अध्यक्षः वा समाहितः भवेत् यत् तादृशं त्यागपत्रं स्वैच्छिकम्, अवितथं वा नास्ति तर्हि सः तादृशं त्यागपत्रं न स्वीकुर्यात्।]

(४) यदि संसदः अन्यतरस्य कस्यापि सदनस्य सदस्यः तत्सदनस्य अनुज्ञां विना तस्य सर्वेषु अधिवेशनेषु षष्टिदिनकालावधिः अनुपस्थितः अस्ति, तर्हि तत् सदनं तस्य स्थानं रिक्तम् इति घोषयितुं क्षमते-

परन्तु उक्तस्य षष्टिदिनकालावधेः सङ्गणनायां सः कालावधिः न गणितः भवेत् यस्मिन् सदनम् अवसितसत्रम् अस्ति, निरन्तरं दिनचतुष्टयात् अधिकं स्थगितं वा अस्ति।

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्यां च "प्रथमानुसूचीस्थे (क) भागे (ख) भागे वा उल्लिखित" इत्येते शब्दाः अक्षरौ च लोपिताः।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च "एतादृशराज्य" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

* १९५० वर्षस्य २६-जानवरी दिनाङ्कितस्य भारतस्य असाधारण राजपत्रस्य ६७८-तमे पृष्ठे प्रकटिताः १९५०-वर्षीया; समसामयिकसदस्यत्वप्रतिषेधनियमाः द्रष्टव्याः ये फा० ४६/५०-ग अङ्कितया विधिमन्त्रालयस्य अधिसूचनया सह प्रकाशिताः।

3 संविधानस्य (द्विपञ्चाशत्ततमं संशोधनम्) अधिनियमः, १९८५ इत्यस्य २-अनुभागेन (१-३-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) "अनुच्छेदः १०२ इत्यस्य खण्डः (१)" इत्यस्य स्थाने संनिवेशितः।

4 संविधानस्य (त्रयस्त्रिंशत्ततमं संशोधनम्) अधिनियमः, १९७४ इत्यस्य २-अनुभागेन (ख) उपखण्डात् प्रति एषः उपखण्डः संनिवेशितः।

5 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अन्तर्वेशितः।

(भागः ५-सङ्घः)

१०२. सदस्यतायै निरर्हता- (१) सः कोऽपि जनः संसदः अन्यतरस्य कस्यापि सदनस्य सदस्यरूपेण वृतत्वे स्थितौ च निरर्हः भवेत्-

[1][(क) यदि सः भारतशासनस्य कस्यापि राज्यशासनस्य वा अधीनं लाभस्य किमपि तत् पदं धारयति यत् तस्मात् पदात् अन्यत् अस्ति यस्य धारकः न निरर्हः भवति इति संसदा विधिना घोषितम्;

(ख) यदि सः विकृतचित्तः अस्ति, क्षमेण न्यायालयेन एवं घोषितश्च तिष्ठति;

(ग) यदि सः अनुन्मुक्तः ऋणशोधनाशक्तः अस्ति;

(घ) यदि सः भारतस्य नागरिकः नास्ति, अथवा वैदेशिक राज्यस्य स्वेच्छया अर्जितां नागरिकतां भजते, अथवा कमपि वैदेशिकाराज्यं प्रति निष्ठाम् अनुषक्तिं वा अभिस्वीकुर्वन् वर्तते;

(ङ) यदि संसदा प्रणीतेन केनापि विधिना तदधीनं वा एवं निरर्हः कृतः अस्ति।

[2][*स्पष्टीकरणम्-* कोऽपि जनः भारतशासनस्य कस्यापि राज्यशासनस्य वा अधीनं लाभस्य पदं धारयति इति एतदनुच्छेदस्य प्रयोजनानाम् अर्थे इति शब्दाङ्ककोष्ठकेभ्यः प्रति कोऽपि जनः भारतशासनस्य कस्यापि राज्यशासनस्य वा अधीनं लाभस्य पदं धारयति इति एतत्खण्डस्य प्रयोजनानाम् अर्थे इति शब्दाङ्ककोष्ठकाः संनिवेशिताः भवेयुः।

[3][(२) कोऽपि जनः संसदः अन्यतरसदनस्य सदस्यत्वाय निरर्हः भवेत् यदि सः दशमानुसूच्याः अधीनम् एवं निरर्हः भवति।]

[4]**[१०३. सदस्यानां निरर्हतानां प्रश्नेषु विनिश्चयः-** (१) यदि कोऽपि प्रश्नः उत्पद्यते यत् संसदः अन्यतरस्य कस्यापि सदनस्य सदस्यः १०२-तमानुच्छेदस्य (१) खण्डे वार्णितानां निरर्हतानाम् अन्यतमां कामपि भजते न वा इति, तर्हि सः प्रश्नः राष्ट्रपतेः विनिश्चयार्थं निर्देश्यः तथा च तस्य विनिश्चयः अन्तिमः भवेत्।

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य १९-अनुभागेन (दिनाङ्कं न अधिसूचितम्) इत्थं पठनाय प्रस्थापितः : "(क) यदि तद् भारतशासनस्य अथवा कस्यापि राज्यशासनस्य अधीनः कोऽपि एतादृशः लाभस्य पदं धारयति, यत् संसदा विधिना तस्य धारकं निरर्हितं घोषितम्"। अस्य संशोधनस्य संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४५-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितः।

2 संविधानस्य (द्विपञ्चाशततमं संशोधनम्) अधिनियमः, १९८५ इत्यस्य ३-अनुभागेन (१-३-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) "(२) अस्य अनुच्छेदस्य प्रयोजनाय" इत्यस्य स्थाने प्रतिष्ठापितः।

3 संविधानस्य (द्विपञ्चाशत्ततमं संशोधनम्) अधिनियमः, १९८५ इत्यस्य ३-अनुभागेन (१-३-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

4 अनुक्रमशः संविधानस्य (द्विचत्वारिंशत्ततमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २०-अनुभागेन (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण) तथा च संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य १४-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) एषः अनुच्छेदः संशोधितः इदं रूपं प्राप्तवान्।

(२) एतादृशे कस्मिन् अपि प्रश्ने विनिश्चयस्य प्रदानात् पूर्वं राष्ट्रपतिः निर्वाचनायोगस्य मतिम् आप्नुयात्; तथा च तादृश्याः मतेः अनुसारेण कार्यं कुर्यात्।]

१०४. ९९-तमानुच्छेदस्य अधीनं शपथस्य प्रतिज्ञानस्य वा करणात् पूर्वम् अथवा अनर्हे निरर्हीकृते वा स्थानग्रहणात् मतदानात् वा शास्तिः- यदि कोऽपि जनः ९९-तमानुच्छेदस्य अपेक्षाणां पूर्तेः पूर्वं, यदा सः जानाति यत् सः संसदः अन्यतरस्य कस्यापि सदनस्य सदस्यतायां न अर्हः अस्ति, निरर्हः कृतः अस्ति वा, संसदा प्रणीतस्य कस्यापि विधेः उपबन्धैः प्रतिषिद्धः अस्ति वा, तदा संसदः अन्यतरस्मिन् सदने उपविशति, मतं वा ददाति तर्हि यस्मिन् दिने सः उपविशति, मतं वा ददाति तं प्रत्येकं दिनं प्रति सङ्घदेयस्य ऋणस्य रूपेण प्रत्यादेयानां पञ्चशतरुप्यकाणां शास्तेः सः भागी भवेत्।

संसदः, तस्याः सदस्यानां च शक्तयः, विशेषाधिकाराः, उन्मुक्तयश्च

१०५. संसदः सदनयोः, तयोः सदस्यनाम् तयोः समितीनां च शक्तयः, विशेषाधिकारादयश्च- (१) एतत्संविधानस्य उपबन्धानां च संसदः प्रक्रियायाः विनियामकानां नियमानां स्थाय्यादेशानां च अधीनं संसदि भाषणस्य स्वातन्त्र्यं भवेत्।

(२) संसदः सदस्यस्य विरुद्धं संसदि, तस्याः कस्यामपि समित्यां वा, तस्य कामपि उक्तिं किमपि मतदानं वा उद्दिश्य कस्मिन् अपि न्यायालये कार्यप्रवृत्तिः न भवेत् तथा च कस्यापि जनस्य संसदः अन्यतरस्य कस्यापि सदनस्य प्राधिकारैः तदधीनं वा कस्यापि प्रतिवेदनस्य, पत्रस्य, मतानां, कार्यप्रवृत्तीनां वा प्रकाशनम् उद्दिश्य तादृशं दायित्वं न भवेत्।

[1][(३) अन्येषु विषयेषु संसदः प्रत्येकसदनस्य, तथा तत्प्रत्येकसदनस्य सदस्यानां समितीनां च शक्तयः, विशेषाधिकाराः, उन्मुक्तयश्च तादृशाः भवेयुः यादृशाः संसदा काले काले विधिना परिणिश्चिताः भवेयुः; तथा च यावत् न एवं परिणिश्चिताः तावत् [2][ते भवेयुः ये तत्सदनस्य, तस्य सदस्यानां समितीनां च संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८, इत्यस्य १५-अनुभागस्य प्रवर्तनात् अव्यवहितपूर्वम् आसन्।]

---

1 संविधानस्य (द्विःचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २१-अनुभागेन (दिनाङ्कं नाधिसूचितम्) प्रतिष्ठापितः। एतत् संशोधनम्, संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४५-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) विलोपितम्।

2 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य १५-अनुभागेन कतिपयेभ्यः शब्देभ्यः प्रति एतत् संनिवेशितम् (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)

(भागः ५-सङ्घः)

(४) ये जनाः अस्य संविधानस्य आश्रयेण संसदः सदने, तस्याः कस्यामपि समितौ वा भाषितुम्, अन्यप्रकारेण तस्याः कार्यप्रवृत्तिषु भागं ग्रहीतुं, वा अधिकारवन्तः सन्ति तेषां सम्बन्धं (१), (२), (३) खण्डानाम् उपबन्धाः तथैव विषयीकुर्युः यथा ते संसदः सदस्यान् विषयीकुर्वन्ति।

१०६. सदस्यानां वेतनानि, भक्तानि च- संसदः प्रत्येकसदनस्य सदस्याः तादृशानां वेतनानां भक्तानां च प्राप्तौ स्वत्ववन्तः भवेयुः यादृशानि संसदा विधिना काले काले अवधारितानि भवेयुः, तथा च यावत् तद्विषये एवम् उपबन्धाः न कृताः तावत् तादृशैः मानैः तादृशैः प्रतिबन्धैश्च वेतनानां भक्तानां च, यादृशानि अस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वं भारताधिनिवेशस्य संविधानसभायाः सदस्यान् विषयीकुर्वाणानि आसन्।

विधानप्रक्रिया

१०७. विधेयकानां पुरःस्थापनस्य, पारणस्य च उपबन्धाः- (१) धनविधेयकैः अन्यैः वित्तीयविधेयकैश्च सम्बद्धानां १०९, ११७-तमानुच्छेदयोः उपबन्धानाम् अधीनं किमपि विधेयकं संसदः अन्यतरस्मिन् कस्मिन् अपि सदने आरभेत।

(२) १०८-१०९ तमानुच्छेदयोः अधीनं किमपि विधेयकं संसदः सदनाभ्यां पारितं, इति तावत् न मन्येत यावत् उभाभ्यां सदनाभ्यां संशोधनेन विना, केवलैः तादृशैः संशोधनैः सह वा तत् न स्वीकृतं भवति यादृशानि उभाभ्यां सदनाभ्यां स्वीकृतानि सन्ति।

(३) संसदि लम्बितं विधेयकं सदनयोः सत्रावसानकारणात् व्यपगतं न भवेत्।

(४) राज्यसभायां लम्बितं यद् विधेयकं लोकसभया न पारितं भवति तत् लोकसभायाः विघटने व्यपगतं न भवेत्।

(५) यद् विधेयकं लोकसभायां लम्बितम् अस्ति, अथवा लोकसभयां पारितं भूत्वा राज्यसभायां लम्बितम् अस्ति तत्-१०८-तमानुच्छेदस्य उपबन्धानाम् अधीनं लोकसभायाः विघटने व्यपगतं भवेत्।

१०८. अवस्थाविशेषेषु उभयोः सदनयोः संयुक्तोपवेशनम् -(१) यदि किमपि विधेयकम् एकेन सदनेन पारितम् अस्ति अन्यत् सदनं प्रति प्रेषितं च अस्ति, ततः परं च-

(क) तद्विधेयकं तेन अन्येन सदनेन निराकृतं भवति; अथवा

(ख) तद्विधेयके करणीयेषु संशोधनेषु उभे सदने अन्तिमरूपेण

(ग) तेन अन्येन सदनेन तद्विधेयके न पारिते सति, तद्विधेयकस्य प्राप्तेः दिनाङ्कात् षड्भ्यः मासेभ्यः अधिकं कालम् अत्येति।

तर्हि राष्ट्रपतिः लोकसभायाः विघटनहेतुना तद्विधेयके यदि व्यपगतं न भवति, तर्हि तस्मिन् विधेयके विचारविमर्शस्य, मतदानस्य च प्रयोजनार्थं संयुक्तोपवेशने अधिवेशनाय आह्वानस्य आशयविषयिणीम् अधिसूचनां सदनाभ्यां-यदि ते सदने उपविष्टे स्तः तर्हि सन्देशेन, यदि च ते सदने उपविष्टे न स्तः तर्हि लोकाधिसूचनया दद्यात्-

परन्तु एतत् खण्डगतं किमपि धनविधेयकं न विषयीकुर्यात्।

(२) यादृशः (१) खण्डे निर्दिष्टः अस्ति तादृशस्य कस्यापि कालावधेः सङ्गणनायां सः कालावधिः न गणितः स्यात् यस्मिन् तत्खण्डस्य (१) उपखण्डे निर्दिष्टं तत्सदनम् अवसितसत्रं निरन्तरं दिनचतुष्टयात् अधिकदिनानि स्थगितं वा अस्ति।

(३) यदा राष्ट्रपतिः सदनयोः संयुक्तोपवेशने अधिवेशनार्थम् आह्वानस्य आशयविषयिणीम् अधिसूचनां (१) खण्डस्य अधीनं दत्तवान् अस्ति तदा अन्यतरत् अपि सदनं तद्विधेयके कार्यप्रवृत्तिम् अग्रे न कुर्यात्; किन्तु राष्ट्रपतिः अधिसूचनायाः दिनात् उत्तरं कस्मिन् अपि काले अधिसूचनायां विनिर्दिष्टप्रयोजनाय संयुक्तोपवेशने अधिवेशनार्थं सदने आह्वातुं क्षमते, तथा च यदि सः एवं करोति तर्हि तदनुसारेण सदने अधिविशेताम्।

(४) यादृशानि संयुक्तपोपवेशने स्वीकृतानि भवन्ति तादृशैः संशोधनैः सह कानि अपि चेत् सन्ति यदि उभयोः सदनयोः संयुक्तोपवेशने विधेयकम् उभयोः सदनयोः उपस्थितानां, मतं ददतां च समस्तानां सदस्यानां मध्ये बहुमतेन पारितम् अस्ति तर्हि अस्य संविधानस्य प्रयोजनानां कृते उभाभ्यां सदनाभ्यां तत् पारितम् इति मन्येत- परन्तु संयुक्तोपवेशने

(क) यदि विधेयकम् एकेन सदनेन पारितं भूत्वा द्वितीयेन सदनेन संशोधनैः सह न पारितं भवति तथा च यस्मिन् सदने तत् आरब्धं तत् प्रति न निवर्तितं भवति तर्हि यादृशानि विधेयकस्य पारणे कालविलम्बेन आवश्यकानि सञ्जातानि तादृशैः संशोधनैः सह कानि अपि संशोधनानि विधेयके प्रस्थापितानि न भवेयुः;

(ख) यदि विधेयकम् एवं पारितं निवर्तितं च अस्ति तर्हि यादृशानि पूर्वोक्तानि तादृशानि एव संशोधनानि, तथा च येषु सदनयोः सहमतिः न संवृत्ता तैः विषयैः यादृशानि सम्बद्धानि तादृशानि अन्यानि संशोधनानि विधेयके प्रस्थापितानि भवेयुः; तथा च एतत् खण्डस्य अधीनं कानि संशोधनानि ग्राह्याणि इति अस्मिन् विषये पीठासीनस्य जनस्य विनिश्चयः अन्तिमः भवेत्।

(५) संयुक्तोपवेशने सदनयोः अधिवेशनार्थम् आह्वानस्य आशयविषयिण्याः राष्ट्रपतेः अधिसूचनायाः पश्चात् यद्यपि अन्तरा लोकसभायाः विघटनं संवृत्तम् अस्ति तथापि अस्य अनुच्छेदस्य अधीनं संयुक्तोपवेशनं भवितुं शक्यते, तथा च तस्मिन् विधेयकं पारितं भवितुं शक्यते।

१०९. धनविधेयकानां विषये विशेषप्रक्रिया- (१) धनविधेयकं राज्यसभायां पुरःस्थापितं न भवेत्।

(भागः ५-सङ्घः)

(२) यदि लोकसभया धनविधेयकं पारितम् अस्ति ततः परं तद्विधेयकं राज्यसभां प्रति तस्याः पुरःप्रशंसनानां कृते प्रेषितं भवेत्, राज्यसभा च तद्विधेयकस्य प्राप्तेः दिनाङ्कात् चतुर्दशानां दिनानां कालावधेः अभ्यन्तरं तद् विधेयकं स्वस्य पुरःप्रशंसनैः सह लोकसभां प्रति निवर्तयेत्; लोकसभा च ततः परं राज्यसभायाः सर्वाणि पुरःप्रशंसनानि तदन्यतमं किमपि वा स्वीकुर्यात् निराकुर्यात् वा।

(३) यदि राज्यसभायाः पुरःप्रशंसनानाम् अन्यतमं किमपि लोकसभा स्वीकरोति, तर्हि तद्धनविधेयकं राज्यसभया पुरः प्रशंसितैः लोकसभया च स्वीकृतैः संशोधनैः सह उभाभ्यां सदनाभ्यां पारितम् इति मन्येत।

(४) यदि राज्यसभायाः पुरःप्रशंसनानाम् अन्यतमं किमपि लोकसभा न स्वीकरोति, तर्हि तद्धनविधेयकं राज्यसभया पुरःप्रशंसितानां संशोधनानां अन्यतमेन केनापि विना तेन रूपेण उभाभ्यां सदनाभ्यां पारितम् इति मन्येत येन रूपेण तत् लोकसभया पारितम् आसीत्।

(५) यदि लोकसभया पारितं, राज्यसभां प्रति तस्याः पुरःप्रशंसनानां कृते प्रेषितं च धनविधेयकं चतुर्दशदिनानाम् उक्तकालावधेः अभ्यन्तरे लोकसभां प्रति न निवर्तेत तर्हि उक्तकालावधेः समाप्तौ उभाभ्यां सदनाभ्यां तेन रूपेण तत् पारितं इति मन्येत येन रूपेण तत् लोकसभया पारितम् आसीत्।

११०. "धनविधेयकानां" परिभाषा- (१) एतद् अध्यायस्य प्रयोजनानां कृते किमपि विधेयकं धनविधेयकम् इति मतं भवेत् यदि तस्मिन् केवलं निम्नलिखितैः सर्वैः विषयैः, तेषाम् अन्यतमेन केनापि वा सम्बद्धाः उपबन्धाः सन्ति, यथा-

(क) कस्यापि करस्य अधिरोपणम्, उत्सादनं, परिहारः, परिवर्तनं, विनियमनं वा;

(ख) भारतशासनेन करणीयस्य धनोद्धारस्य, कस्याः अपि प्रत्याभूतेः दानस्य वा विनियमनम् अथवा भारतशासनेन अङ्गीकृतैः अङ्गीकर्तव्यैः वा वित्तीयैः आभारैः सम्बन्धिनः विधेः संशोधनम्;

(ग) भारतस्य सञ्चितनिधेः, आकस्मिकतानिधेः वा अभिरक्षा तादृशे कस्मिन् अपि निधौ धनस्य विनिवेशनं, तस्मात् धनस्य प्रत्याहरणं वा;

(घ) भारतस्य सञ्चितनिधेः मध्यात् धनस्य विनियोगः;

(ङ) कस्यापि व्ययस्य भारतसञ्चितनिधौ भारितव्ययरूपेण घोषणं, तादृशस्य कस्यापि व्ययस्य राशेः वर्धनं वा;

(च) भारतस्य सञ्चितनिधौ, भारतस्य लोकलेखायां वा धनस्य प्रापणम्, अथवा तादृशस्य धनस्य अभिरक्षा, निर्गमनं वा, सङ्घस्य राज्यस्य वा लेखानां परीक्षणम्; अथवा

(छ) (क) उपखण्डात् आरभ्य (च) उपखण्डपर्यन्तेषु विनिर्दिष्टविषयाणाम् अन्यतमस्य कस्यापि आनुषङ्गिकः कोऽपि विषयः।

(२) किमपि विधेयकं धनविधेयकम् अस्ति इति केवलम् एतेन एव हेतुना न मतं भवेत् यत् तत् अर्थदण्डानाम्, अन्यासाम् आधिकशास्तीनां वा अधिरोपणाय, अनुज्ञप्तीनाम् अर्थे प्रशुल्कानाम्, आचरितसेवानाम् अर्थे वा प्रशुल्कानाम् अभियाचनायै सन्दानाय वा उपबन्धयति; अथवा एतेन हेतुना यत् तत् केनापि स्थानीयेन प्राधिकारिणा, निकायेन वा, स्थानीयप्रयोजनानाम् अर्थे कस्यापि करस्य अधिरोपणाय, उत्सादनाय, परिहाराय, परिवर्तनाय, विनियमनाय वा उपबन्धयति।

(३) किमपि विधेयकं धनविधेयकम् अस्ति न वा, इति कोऽपि प्रश्नः यदि उत्पद्यते तर्हि तत्र लोकसभायाः अध्यक्षस्य विनिश्चयः अन्तिमः भवेत्।

(४) १०९-तमानुच्छेदस्य अधीनं यदा धनविधेयकं राज्यसभां प्रति प्रेषितं भवेत्, तथा च यदा १११-तमानुच्छेदस्य अधीनं तद् राष्ट्रपतेः समक्षम् अनुमत्यर्थम् उपस्थापितं भवेत् तदा प्रत्येकधनविधेयके, लोकसभायाः अध्यक्षेण हस्ताङ्कितम्-''एतत् धनविधेयकम् अस्ति'' इति प्रमाणपत्रं पृष्ठाङ्कितं भवेत्।

१११. विधेयकानि प्रति अनुमतिः- यदा किमपि विधेयकं संसदः सदनाभ्यां पारितं भवेत् तदा तत् राष्ट्रपतेः समक्षम् उपस्थापितं भवेत् तथा च राष्ट्रपतिः घोषयेत् यत् सः तद्विधेयकम् अनुमन्यते वा तत् प्रति अनुमत्तिं निरुणद्धि वा इति-

परन्तु राष्ट्रपतिः तद् विधेयकस्य स्वानुमत्यर्थम् उपस्थापनात् परं तद् विधेयकं यदि तद् धनविधेयकं नास्ति तर्हि यथासम्भवं शीघ्रं सदनं प्रति निवर्तयितुं क्षमते, एवं प्रार्थयता सन्देशेन सह यत् ते सदने तद् विधेयकं, तस्मिन् विनिर्दिष्टान् कान् अपि उपबन्धान् वा पुनर्विचारयेताम्, विशेषतश्च तादृशानां केषामपि संशोधनानां पुरःस्थापनायाः वाञ्छनीयतां विचारयेताम्, यादृशानि सः स्वीये सन्देशे पुरःप्रशंसयेत्; तथा च यदा विधेयकम् एवं निवर्तितं भवति तदा ते सदने तद्विधेयकं तदनुसारेण पुनः विचारयेताम्, तथा च यदि तद्विधेयकं सदनाभ्यां संशोधनेन सह, विना वा, पुनः पारितं, राष्ट्रपतेः समक्षम् अनुमत्यर्थं च उपस्थापितं भवति तर्हि राष्ट्रपतिः तस्य अनुमतिं न निरुन्ध्यात्।

वित्तीयविषयाणां प्रक्रिया

११२. वार्षिकवित्तविवरणम्- (१) राष्ट्रपतिः प्रत्येकं वित्तीयवर्षस्य विषये तद्वर्षार्थम् अस्मिन् भागे ''वार्षिकवित्तविवरणम्'' इति निर्दिष्टं भारतशासनस्य प्राक्कलितानां प्राप्तीनां, व्ययानां च विवरणम् उभयोः सदनयोः समक्षं निधापयेत्।

(२) वार्षिकवित्तविवरणे प्रदत्तस्य व्ययस्य प्राक्कलनेषु-

(क) यः व्ययः अस्मिन् संविधाने भारतस्य सञ्चितनिधेः उपरि भारितव्ययरूपेण वर्णितः तस्य पूर्तये अपेक्षिताः राशयः; तथा च

(ख) भारतस्य सञ्चितनिधितः करिष्यमाणत्वेन प्रस्थापितानाम् अन्येषां व्ययानां पूर्तये अपेक्षिताः राशयश्च, पृथक्-पृथक् प्रदर्शिताः स्युः; तथा च राजस्वलेखार्थं व्ययस्य अन्यस्मात् व्ययाद् भेदः करणीयः।

(३) निम्नलिखितः व्ययः भारतस्य सञ्चितनिधौ भारितः व्ययः भवेत्-

(क) राष्ट्रपतेः उपलब्धयः, भक्तानि च, तथा च तस्य पदेन सम्बद्धः अन्यः व्ययः;

(ख) राज्यसभायाः समाप्तेः उपसभापतेश्च तथा च लोकसभायाः अध्यक्षस्य, उपाध्यक्षस्य च वेतनानि भक्तानि च;

(ग) वृद्धिं, निक्षेपनिधिभारः, मोचनभारं च तथा च उद्धारदानेन, ऋणसेवया, ऋणमोचनेन च सम्बद्धम् अन्यं व्ययं च अन्तर्भावयन्तः ऋणभाराः येषां भारतशासनस्य दायित्वं भवति;

(घ) (प्रथमः) उच्चतमन्यायालयस्य न्यायाधीशेभ्यः, तेषां सम्बन्धेन वा सन्देयानि वेतनानि, भक्तानि, निवृत्तिवेतनानि च;

(द्वितीयः) ‘‘फेडरल" न्यायालयस्य न्यायाधीशेभ्यः, तेषां सम्बन्धेन वा सन्देयानि वेतनानि, भक्तानि, निवृत्तिवेतनानि चः;

(तृतीयः) यः उच्चन्यायालयः भारतस्य राज्यक्षेत्रे अन्तर्भावितस्य कस्यापि क्षेत्रस्य सम्बन्धे अधिकारितां प्रयुङ्क्ते, यः वा [1][भारताधिनिवेशस्य राज्यपालस्य प्रान्ते] अन्तर्भावितस्य कस्यापि क्षेत्रस्य सम्बन्धे अस्य संविधानस्य प्रारम्भात् पूर्वं कञ्चिदपि कालम् अधिकारितां प्रयुक्तवान् तस्य न्यायाधीशेभ्यः, तेषां सम्बन्धेन वा सन्देयानि निवृत्तिवेतनानि

(ङः) भारतस्य नियन्त्रकमहालेखापरीक्षकाय तस्य सम्बन्धेन वा सन्देयानि वेतनं, भक्तानि, निवृक्तिवेतनं च;

(च) कस्यापि न्यायालयस्य, मध्यस्थन्यायाधिकरणस्य वा निर्णयस्य, आज्ञप्तेः, मध्यस्थनिर्णयस्य वा तुष्ट्यर्थम् अपेक्षिताः राशयः

(छ) अनेन संविधानेन, संसदः विधिना वा एवं भारितः करणीयः इति घोषितः कोऽपि अन्यः व्ययः।

११३. प्राक्कलनानां विषये संसदः प्रक्रियाः -(१) प्राक्कलनेषु यानि यानि भारतस्य सञ्चितनिधौ भारितव्ययेन सम्बद्धानि सन्ति तानि संसदः मतदानार्थं न पुरतः स्थापितानि भवेयुः, किन्तु एतत् खण्डगतस्य कस्यापि कथनस्य एवम् अर्थः न ग्राह्यः यद् एतत् तेषां प्राक्कलनानाम् अन्यतमस्य कस्यापि चर्चा संसदः अन्यतरस्मिन् सदने निवारयति इति।

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६-इत्यस्य २९-अनुभागेन अनुसूच्या च ‘‘प्रथमानुसूच्याः (क) भाग उल्लिखितस्य राज्यस्य स्थानिनि प्रान्ते’’ इत्येतस्मात् प्रति एतत् संनिवेशितम्।

(२) उक्तप्राक्कलनानां यावन्मात्रम् अन्यव्ययेन सम्बध्यते तावन्मात्रं लोकसभायाः समक्षम् अनुदानानाम् अभियाचनारूपेण पुरतः स्थापितं भवेत्; तथा च लोकसभा कस्याः अपि अभियाचनायाः अनुमतौ, अनुमतेः प्रत्याख्याने वा कस्याः अपि अभियाचनायाः तस्यां विनिर्दिष्टं राशिं न्यूनीकृत्वा अनुमतौ वा, शक्तिं भजेत।

(३) राष्ट्रपतेः पुरःप्रशंसनात् एव अनुदानस्य कापि अभियाचना कृता भवेत्, नान्यथा।

११४. विनियोगविधेयकानि- (१) ११३-तमानुच्छेदस्य अधीनं लोकसभया यदा अनुदानानि कृतानि सन्ति तदुत्तरं यथासम्भवं शीघ्रं भारतसञ्चितनिधितः-

(क) लोकसभया एवं कृतानाम् अनुदानानां; तथा च

(ख) भारतस्य सञ्चितनिधौ भारितस्य किन्तु संसदः समक्षं पूर्वं निहिते विवरणे प्रदर्शितराशेः कस्यामपि अवस्थायाम् अनधिकस्य व्ययस्य, पूर्त्यर्थम् अपेक्षितानां सर्वेषां धनराशीणां विनियोगार्थम् उपबन्धयितुं विधेयकं पुरःस्थापितं भवेत्।

(२) एवं कृतस्य अनुदानस्य राशिं परिवर्तयितुं तस्य लक्ष्यं वा परिवर्तयितुं, भारतस्य सञ्चितनिधौ भारितस्य व्ययस्य राशिं वा परिवर्तयितुं, यत् किमपि संशोधनं कार्यक्षमं भवेत्, तत् संसदः कस्मिन् अपि अन्यतरस्मिन् सदने तादृशे कस्मिन् अपि विधेयके प्रस्थापितं न भवेत्, तथा च किमपि संशोधनम् एतत्खण्डाधीनम् अग्राह्यम् अस्ति न वा, इति विषये पीठासीनस्य जनस्य विनिश्चयः अन्तिमः भवेत्।

(३) ११५-११६-तमानुच्छेदयोः उपबन्धानाम् अधीनं, भारतस्य सञ्चितनिधितः किमपि धनम् एतदनुच्छेदस्य उपबन्धानाम् अनुसारेण पारितेन विधिना कृतेन विनियोगेन एव प्रत्याहरणीयं, नान्यथा।

११५. अनुपूरकाणि, अपराणि, अधिकानि वा अनुदानानि- (१) यदि-

(क) ११४-तमानुच्छेदस्य उपबन्धानाम् अनुसारेण प्रणीतेन विधिना कस्यामपि विशेषसेवायां वर्तमाने वित्तीयवर्षे व्ययार्थं प्राधिकृतः राशिः तद्वर्षस्य प्रयोजनानां कृते अपर्याप्तः इति अवगतः अस्ति; अथवा तस्य वित्तीयवर्षस्य वार्षिकवित्तविवरणेन अननुध्यातायां सेवायाम् अनुपूरकस्य, अपरस्य वा व्ययस्य आवश्यकता वर्तमाने वित्तीयवर्षे उत्पन्ना अस्ति; अथवा

(ख) वित्तीयवर्षस्य कस्यामपि सेवायां तत्सेवार्थं तद्वर्षार्थम् अनुदत्तात् राशेः अधिकं धनं व्ययितम् अस्ति,

तर्हि राष्ट्रपतिः यथायथम् उभयोः सदनयोः समक्षं तस्य व्ययस्य प्राक्कलितं राशिं प्रदर्शयत् अन्यद् विवरणं निधापयेत्; अथवा लोकसभायां तादृश्याः अधिकतायाः अभियाचनाम् उपस्थापयेत्।

(२) एदादृशस्य कस्यापि विवरणस्य, व्ययस्य च अभियाचनायाः वा सम्बन्धे भारतस्य सञ्चितनिधितः तादृशस्य व्ययस्य, तादृश्याः अभियाचनायाः वा सम्बन्धे च, अनुदानस्य पूर्तये धनानां विनियोगं प्राधिकृतं कुर्वतः प्रणेतव्यस्य कस्यापि विधेः सम्बन्धे अपि च, ११२, ११३, ११४-तमानुच्छेदानाम् उपबन्धाः तथा कार्यक्षमाः भवेयुः यथा ते वार्षिकवित्तविवरणस्य, तस्मिन् वर्णितव्ययस्य च सम्बन्धे अनुदानस्य कस्यापि अभियाचनायाः सम्बन्धे च भारतस्य सञ्चितनिधितः तादृशस्य कस्यापि व्ययस्य अनुदानस्य वा पूर्तये धनानां विनियोगं प्राधिकृतं कुर्वतः प्रणेतव्यस्य विधेः सम्बन्धे च कार्यक्षमाः भवन्ति।

११६. लेखानुदानं, प्रत्ययानुदानम्, अपवादानुदानं च- (१) अस्य अध्यायस्य पूर्वगामिषु उपबन्धेषु किमपि सत्यपि-

(क) कस्यापि वित्तीयवर्षस्य भागार्थं प्राक्कलितस्य व्ययस्य सम्बन्धे किमपि अनुदानं, तादृशे अनुदाने मतदानार्थं ११३-तमानुच्छेदे विहितायाः प्रक्रियायाः पूर्तौ लम्बितायां सत्यां तथा तस्य व्ययस्य सम्बन्धे ११४-तमानुच्छेदस्य उपबन्धानाम् अनुसारेण विधेः पारणे लम्बिते सति, अग्रिमं दातुम्;

(ख) यदा कस्याः अपि सेवायाः महत्तया, अनिश्चितरूपतया वा, अभियाचना वार्षिकवित्तविवरणे साधारणतया विवरणेन सह वर्णयितुं, न शक्यते तदा भारतस्य सम्पत्तिसाधनेषु अपूर्वचिन्तितायाः अभियाचनायाः पूर्त्यै अनुदानं कर्तुम्;

(ग) कस्यापि वित्तवर्षस्य विद्यमानसेवायाः अभागभूतस्य अनुदानस्य कृते अपवादानुदानं कर्तुम् च, लोकसभा शक्तिं भजेत; तथा च उक्तानुदानानि येभ्यः प्रयोजनेभ्यः कृतानि भवन्ति तानि उद्दिश्य भारतस्य सञ्चितनिधितः धनस्य विधिना आहरणं प्राधिकर्तुं संसत् शक्तिं भजेत।

(२) ११३, ११४-तमानुच्छेदयोः उपबन्धाः (१) खण्डाधीनम् अनुदानस्य, तत् खण्डाधीनं प्रणेतव्यस्य कस्यापि विधेः सम्बन्धे तथैव कार्यक्षमाः भवेयुः, यथा ते वार्षिकवित्तविवरणे वर्णितं कमपि व्ययम् उद्दिश्य किमपि अनुदानं कर्तुं, भारतस्य सञ्चितनिधितः तादृशस्य व्ययस्य पूर्त्यै धनानां विनियोगं प्राधिकर्तुं च प्रणेतव्यस्य विधेः सम्बन्धे कार्यक्षमाः भवन्ति।

११७ वित्तविधेयकानां विषये विशेषाः उपबन्धाः- (१) ११०-तमानुच्छेदस्य (१) खण्डस्य (क) उपखण्डम् आरभ्य (च) उपखण्डपर्यन्तेषु उपखण्डेषु विनिर्दिष्टानां विषयाणाम् अन्यतमाय कस्मै अपि उपबन्धं कुर्वद् विधेयकं, संशोधनं वा, राष्ट्रपतेः पुरःप्रशंसनपूर्वकमेव पुरःस्थापितं, प्रस्तावितं वा भवेत्, नान्यथा; तथा च तादृशम् उपबन्धं कुर्वद् विधेयकं राज्यसभायां पुरःस्थापितं न भवेत्-

परन्तु कस्यापि करस्य न्यूनीकरणाय, उत्सादनाय वा उपबन्धं कुर्वतः संशोधनस्य प्रस्तावार्थम् एतत् खण्डाधीनं किमपि पुरःप्रशंसनम् अपेक्षितं न भवेत्।

(२) किमपि विधेयकं, संशोधनं वाः उक्तविषयाणाम् अन्यतमाय कस्मै अपि उपबन्धं करोति इति केवलम् एतेन एव हेतुना न मन्येत यत् तत् अर्थदण्डानाम्, अन्यासाम् अर्थशास्तीनाम् अधिरोपणाय, अनुज्ञप्तीनाम् अर्थे प्रशुल्कानाम्, आचरितसेवानाम् अर्थे प्रशुल्कानां वा अभियाचनायै, सन्दानाय वा उपबन्धयति; अथवा एतेन हेतुना यत् तत् केनापि स्थानीयेन प्राधिकारिणा निकायेन वा स्थानीयप्रयोजनानाम् अर्थे कस्यापि करस्य अधिरोपणाय, उत्सादनाय, परिहाराय, परिवर्तनाय, विनियमनाय वा उपबन्धयति।

(३) यस्मिन् विधेयके अधिनियमिते प्रवर्तिते च भारतस्य सञ्चितनिधितः व्ययं करणीयं भवेत्; तत् संसदः केनापि अन्यतरेण सदनेन तावत् पारितं न भवेत् यावत् तादृशे विधेयके विचारार्थं राष्ट्रपतिः तत् सदनस्य कृते पुरःप्रशंसनं न कुर्यात्।

सामान्यप्रक्रिया

११८. प्रक्रियायाः नियमाः- (१) अस्य संविधानस्य उपबन्धानाम् अधीनं संसदः प्रत्येकसदनं *स्वीयप्रक्रियायाः स्वीयकार्यसञ्चालनस्य च विनियमनार्थं नियमान् प्रणेतुं क्षमते।

(२) यावत् (१) खण्डाधीनं नियमाः प्रणीताः न सन्ति तावत् अस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वं भारताधिनिवेशस्य विधानमण्डलम् उद्दिश्य ये प्रक्रियानियमाः स्थाय्यादेशाश्च प्रवृत्ताः आसन् ते तादृशानाम् उपान्तराणाम्, अनुकूलनानां च अधीनं संसदः सम्बन्धे कार्यक्षमाः भवेयुः, यादृशानि यथायथं राज्यसभायाः सभापतिः लोकसभायाः अध्यक्षः वा तत्र कर्तुं क्षमते।

(३) राष्ट्रपतिः राज्यसभायाः सभापतिना लोकसभायाः अध्यक्षेण च परामृश्य उभयोः सदनयोः संयुक्तोपवेशनानि परस्परसञ्चारान् च उद्दिश्य प्रक्रियायाः नियमान् प्रणेतुं क्षमते।

(४) उभयोः सदनयोः संयुक्तोपवेशने लोकसभायाः अध्यक्षः पीठासीनः भवेत्; तस्य अनुपस्थितौ तादृशः वा जनः यादृशः (३) खण्डाधीनं कृतायाः प्रक्रियायाः नियमैः अवधारितः भवेत्।

११९. संसदि वित्तीयकार्यसम्बन्धिप्रक्रियायाः विधिना विनियमनम् -वित्तीयकार्यस्य यथाकालं समाप्त्यर्थं संसत् कमपि वित्तीयविषयं भारतस्य संचितनिधितः, धनस्य विनियोगं कुर्वतः किमपि विधेयकं वा विषयीकृत्य प्रत्येकसदनस्य प्रक्रियां, कार्यसञ्चालनं च विधिना विनियमयितुं क्षमते; तथा च यदि यावत् च एवं प्रणीतस्य कस्यापि विधेः उपबन्धः ११८-तमानुच्छेदस्य (१) खण्डाधीनं संसदः केनापि अन्यतरेण सदनेन प्रणीतैः नियमैः तदनुच्छेदस्य (२) खण्डाधीनं वा संसदः सम्बन्धे कार्यक्षमेण केनापि नियमेन स्थाय्यादेशने वा असङ्गतः अस्ति तर्हि तादृशः उपबन्धः अभिभवेत्।

---

* संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २२-अनुभागेन (दिनाङ्कं न अधिसूचितम्) "(यस्यान्तर्गतं सदनस्योपवेशनस्य गठनाय गणपूर्तिः सम्मिलिता अस्ति)" शब्दाः तथा कोष्ठकाः अन्तर्वेशिताः अस्य संविधानसंशोधनस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनयमः, १९७८ इत्यस्य ४५-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितः।

१२०. संसदि प्रयोज्या भाषा- (१) १७-भागे किमपि सत्यपि, किन्तु ३४८-तमानुच्छेदस्य उपबन्धानाम् अधीनं, संसदः कार्यं हिन्दीभाषायां आङ्ग्लभाषायां वा कृतं भवेत्-

परन्तु यः हिन्दीभाषायाम् आङ्ग्लभाषायां वा स्वाभिप्रायस्य सुतराम् अभिव्यक्तिं कर्तुं न शक्नोति तस्मै सदस्याय यथायथं राज्यसभायाः सभापतिः लोकसभायाः अध्यक्षः वा तादृशरूपेण कार्यकारी जनः वा स्वस्य मातृभाषायां तत्सदनस्य सम्बोधने अनुज्ञां दातुं क्षमते।

(२) यावत् संसद् विधिना अन्यथा न उपबन्धयति तावत् अस्य संविधानस्य प्रारम्भात् पञ्चदशवर्षाणां कालावधेः समाप्तेः परम् एषः अनुच्छेदः एवं कार्यक्षमः भवेत् यथा एतस्मिन् "आङ्ग्लभाषायां वा" इत्येते शब्दाः लुप्ताः स्युः।

१२१. संसदि चर्चायां निर्बन्धनम्- उच्चतमन्यायालयस्य, उच्चन्यायालयस्य वा न्यायाधीशेन स्वकर्तव्यपालने कृतम् आचरणम् उद्दिश्य संसदि कापि चर्चा इतः परम् उपबन्धितरीत्या तस्य न्यायाधीशस्य अपसारणं प्रार्थयतः समावेदनस्य राष्ट्रपतये दानार्थं प्रस्तावे एव भवेत्, नान्यथा।

१२२. न्यायालयाः संसदः कार्यप्रवृत्तीनां विषये परिप्रश्नं न कुर्युः- (१) संसदः कासामपि कार्यप्रवृत्तीनां विधिमान्यता प्रक्रियायाः कस्याः अपि अभिकथितायाः अनियमिततायाः आधारेण, प्रश्नगता न कृता भवेत्।

(२) अनेनः संविधानेन, एतदधीनं वा संसदि प्रक्रियायाः कार्यसञ्चालनस्य वा विनियमनं कर्तुं, व्यवस्थां रक्षितुं वा यस्मिन् शक्तयः निहिताः सः संसदः कोऽपि अधिकारी, सदस्यः वा तासां शक्तीनां स्वकृतस्य प्रयोगस्य विषये कस्यापि न्यायालयस्य अधिकारितायाः अधीनः न भवेत्।

अध्याय ३- राष्ट्रपतेः विधायिन्यः शक्तयः

१२३. संसदः विश्रान्तिकाले राष्ट्रपतेः अध्यादेशप्रख्यापने शक्तिः- (१) यस्मिन् काले संसदः उभे सदने सत्रे स्तः, तस्मात् अन्यस्मिन् कस्मिन् अपि काले, यदि राष्ट्रपतिः समाहितः भवति यत् तं अचिरकाये अवश्यं प्रवर्तयन्त्यः परिस्थितयः विद्यन्ते, तर्हि सः तादृशान् अध्यादेशान् प्रख्यापयितुं क्षमते यादृशान् अपेक्षयन्त्यः परिस्थितयः तेन प्रतीयन्ते।

(२) एतदनुच्छेदस्य अधीनं प्रख्यापिते अध्यादेशे तादृशम् एव बलं कार्यक्षमता च विद्यते यादृशं संसदः अधिनियमे अस्ति किन्तु तादृशः प्रत्येकम् अध्यादेशः-

(क) संसदः उभयोः सदनयोः पुरतः स्थापितः भवेत्, तथा च संसदि पुनः समवेता षण्णां सप्ताहानां समाप्तौ अथवा यदि तत् कालावधेः समाप्तेः प्राक् उभाभ्यां सदनाभ्यां तस्य निरनुमोदनस्य सङ्कल्पौ स्तः तर्हि तयोः सङ्कल्पयोः द्वितीयस्य पारणोत्तरं सः प्रवर्तनात् विरमेत्;

(ख) राष्ट्रपतिना कस्मिन् अपि काले प्रत्याहृतः भवेत्।

स्पष्टीकरणम्- यदा संसदः सदने पुनःसमवायार्थं भिन्नयोः दिनाङ्कयोः आहूते भवतः तदा एतत् खण्डस्य प्रयोजनानाम् अर्थे षण्णां सप्ताहानां कालावधिः तयोः दिनाङ्कयोः उत्तरदिनाङ्कात् सङ्गणितः भवेत्।

(३) यदि, यावन्मात्रं च, एतदनुच्छेदस्य अधीनम् अध्यादेशः कमपि तम् उपबन्धं करोति, यं संसद् अस्य संविधानस्य अधीनम् अधिनियमितुं न क्षमते तर्हि सः शून्यः भवेत्।

[1](४)* * * * *

अध्याय ४- सङ्घस्य न्यायपालिका

१२४. उच्चतमन्यायालस्य स्थापना, घटनं च- (१) भारतस्य एकः उच्चतमन्यायालयः भवेत् यश्च एकेन मुख्यन्यायमूर्तिना तथा च यावत् संसद् विधिना अधिकतरां सङ्ख्या न विदधाति तावत् *सप्तभिः न्यायाधीशैः सम्भूय भवेत्।

(२) [2][१२४क-अनुच्छेदाभ्यन्तरे राष्ट्रिय-न्यायिक-नियुक्ति-आयोगेन पुरःप्रशंसने सति] राष्ट्रपतिः एतदर्थं यादृशान् आवश्यकान् मन्येत तादृशैः उच्चतमन्यायालयस्य, राज्यानाम् उच्चन्यायालयानां च न्यायधीशैः परामृश्य, स्वहस्तेन स्वमुद्रया च अङ्कितेन अधिपत्रेण उच्चतमन्यायालयस्य प्रत्येकं न्यायाधीशं नियुक्तं कुर्यात् स च न्यायाधीशः यावत् वर्षाणां पञ्चषष्टिः वयः प्राप्नोति तावत् पदं धाययेत्-

[3][* * * * *]

[4]अपरं च-(क) कोऽपि न्यायाधीशः राष्ट्रपतिं सम्बोध्य लिखितेन स्वहस्ताङ्कितेन लेखेन स्वपदं त्यक्तुम् क्षमते;

(ख) (४) खण्डे उपबन्धितया रीत्या कोऽपि न्यायाधीशः अपसारितुं शक्यते।

---

1 संविधानस्य (अष्टत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य २-अनुभागेन अन्तर्वेशितः आसीत् भूतलक्षिप्रभावेण; संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य १६-अनुभागेन च निरसितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेणः),

*उच्चतमन्यायालयस्य (न्यायाधीश-सङ्ख्या) संशोधनम् अधिनियमः, २०१९ (२०१९ वर्षस्य ३७) इत्यस्य २-अनुभागेन (९-८-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) अधुना "त्रयस्त्रिंशत्"।

2 संविधानस्य (नवनवतितमं संशोधनम्) अधिनियमः, २०१४, २-अनुभागेन "राष्ट्रपतिः एतदर्थं यादृशान् आवश्यकान् मन्येत तादृशैः उच्चन्यायालयस्य, राज्यानाम् उच्चन्यायालयानां च न्यायाधीशैः परामृश्य " इत्यस्य स्थाने प्रतिष्ठापितः (१३-४-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण)। इदं संशोधनं सुप्रीम-कोर्ट-एडवोकेट-आन रिकार्ड-असोसिएशन् तथा च अन्ये विरुद्धं भारतसङ्घः इति वादे ए.आई.आर २०१६ एस.सी. ११७ इत्यनेन १६.१०.२०१५ दिनाङ्के उद्घोषितेन निर्णयेन उच्चन्यायालयेन अभिखण्डितम्।

3 संविधानस्य (नवनवतितमं संशोधनम्) अधिनियमः, २०१४, २-अनुभागेन प्रथमः पारन्तुकः लोपितः (१३-४-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण)। अयं पारन्तुकः यथा- "परन्तु मुख्यन्यायमूर्तेः अन्यस्य न्यायाधीशस्य नियुक्तेः विषये भारतस्य मुख्यन्यायमूर्तिः सर्वदा परामृष्टः भवेत्"। इदं संशोधनम् एडवोकेट-आन रिकार्ड-असोसिएशन् तथा च अन्ये विरुद्धं भारतसङ्घः इति वादे ए.आई.आर २०१६ एस.सी. ११७ इत्यनेन १६.१०.२०१५ दिनाङ्के उद्घोषितेन निर्णयेन उच्चन्यायालयेन अभिखण्डितम्।

4 संविधानस्य (नवनवतितमं संशोधनम्) अधिनियमः, २०१४, २-अनुभागेन "अपरं च" इत्यस्य स्थाने प्रतिष्ठापितः (१३-४-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण)। इदं संशोधनम् एडवोकेट-आन रिकार्ड-असोसिएशन् तथा च अन्ये विरुद्धं भारतसङ्घः इति वादे ए.आई.आर २०१६ एस.सी. ११७ इत्यनेन १६.१०.२०१५दिनाङ्के उद्घोषितेन निर्णयेन उच्चन्यायालयेन अभिखण्डितम्।

(भागः ५-सङ्घः)

[1][(२क) उच्चतमन्यायालयस्य न्यायाधीशस्य वयः तेन प्राधिकारिणा तया च रीत्या अवधारितं भवेत् यं संसद् विधिना उपबन्धयति ।]

(३) कोऽपि जनः उच्चतमन्यायालयस्य न्यायाधीशरूपेण नियुक्तः अर्हः केवलं तदा भवेत् यदा सः भारतस्य नागरिकः अस्तिः; तथा च

(क) कस्यचित् उच्चन्यायालयस्य कयोश्चित् उच्चन्यायालययोः केषांचित् उच्चन्यायालयानां वा न्यूनात् न्यूनं पञ्चवर्षाणि निरन्तरक्रमेण न्यायाधीशः संवृत्तः अस्ति; अथवा

(ख) उच्चन्यायालयस्य कयोश्चित् उच्चन्यायालययोः केषांचित् उच्चन्यायालयानां वा न्यूनात् न्यूनं दशवर्षाणि निरन्तरक्रमेण अधिवक्ता संवृत्तः अस्ति; अथवा-

(ग) राष्ट्रपतेः मतौ सुविख्यातः विधिवेत्ता अस्ति ।

स्पष्टीकरणम् १- अस्मिन् खण्डे "उच्चन्यायालयः" अभिदधाति तम् उच्चन्यायालयं यः भारतराज्यक्षेत्रस्य कस्मिन् अपि भागे अधिकारितां प्रयुङ्क्ते, अस्य संविधानस्य प्रारम्भात् प्राक् कदाचित् अपि प्रयुक्तवान् वा ।

स्पष्टीकरणम् २- कोऽपि जनः यस्मिन् कालावधौ अधिवक्ता संवृत्तः अस्ति तदवधेः एतत् खण्डस्य प्रयोजनाय सङ्गणनायां सः कोऽपि कालावधिः अन्तर्भावितः भवेत् यस्मिन् सः जनः अधिवक्ता संवृत्तः, ततः परं मण्डलन्यायाधीशस्य पदात् अन्यूनतरं न्यायिकपदं धृतवान् च ।

(४) उच्चतमन्यायालस्य न्यायधीशः स्वपदात् तावत् अपसारितः न भवेत् यावत् एतादृशाय अपसारणाय सिद्धस्य दुराचारस्य, असमर्थत्वस्य वा आधारेण संसदः उभाभ्यां सदनाभ्याम् अमुकसदनस्य समस्तानां सदस्यानां सङ्ख्यायाः मध्ये बहुमतेन, तथा तत्र उपस्थितानां मतं ददतां च सदस्यानां न्यूनात् न्यूनं तृतीयांशद्वयसङ्ख्यकेन बहुमतेन समर्थिते समावेदने तस्मिन् एव सत्रे राष्ट्रपतेः समक्षम् उपस्थापिते सति तद्विषये राष्ट्रपतिना आदेशः प्रदत्तः न स्यात् ।

(५) (४) खण्डाधीनं समावेदनं प्रदातुं तथा न्यायाधीशस्य दुराचारम् असमर्थतां वा अन्वेष्टुं साधयितुं च अपेक्षितां प्रक्रियां संसद् विधिना विनियमयेत् ।

(६) उच्चतमन्यायालयस्य न्यायाधीशरूपेण नियुक्तः प्रत्येकं जनः स्वपदे आरोहणात् प्राक् राष्ट्रपतेः समक्षं तेन तदर्थं नियुक्तस्य कस्यचित् जनस्य समक्षं वा तृतीयानुसूच्यां तदर्थम् उल्लिखिते प्ररूपे शपथं, प्रतिज्ञानं वा कुर्यात् तं च स्वहस्ताङ्कितं कुर्यात् ।

(७) येन उच्चतमन्यायालयस्य न्यायाधीशरूपेण पदं धारितम् अस्तिः सः कोऽपि जनः भारतराज्यक्षेत्रस्य अभ्यन्तरे कस्मिन् अपि न्यायालये, अथवा कस्यापि प्राधिकारिणः समक्षम् अभिवचनं, कार्यं वा न कुर्यात् ।

[2][**१२४क. राष्ट्रिय-न्यायिक-नियुक्ति-आयोगः-** (१) राष्ट्रिय-न्यायिक-नियुक्ति-आयोगः इति नाम्ना आयोगः भवेत्, यः एतान् सदस्यान् आदाय निर्मितो भवेत्-

---

1 संविधानस्य (पञ्चदशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य २-अनुभागेन अन्तर्वेशितः ।

2 संविधानस्य (नवनवतितमं संशोधनम्) अधिनियमः, २०१४, ३-अनुभागेन एषः खण्डः अन्तर्वेशितः (१३-४-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण) । इदं संशोधनम् एडवोकेट-आन रिकार्ड-असोसिएशन् तथा च अन्ये विरुद्धं भारतसङ्घः इतवादे ए.आई.आर २०१६ एस.सी. ११७ इत्यनेन १६.१०.२०१५ दिनाङ्के उद्घोषितेन निर्णयेन उच्चन्यायालयेन अभिखण्डितम् ।

(क) भारतस्य मुख्यन्यायमूर्तिः- अध्यक्षः पदेन;

(ख) अन्यौ द्वौ ज्येष्ठौ न्यायाधीशौ मुख्यन्यायमूर्तेः निकट-न्यूनपदे नियुक्तौ-पदेन सदस्यौ;

(ग) सङ्घस्य विधि-तथा-न्याययोः प्रभारी मन्त्री-पदेन सदस्यः;

(घ) प्रधानमन्त्री, भारतस्य मुख्यन्यायमूर्तिः, लोकसभायाः विपक्षनेता अथवा विपक्षनेतुः अभावे सति बृहत्तमविपक्षदलस्य नेता इति एतेभ्यः मिलितेभ्यः निर्मितया समित्या नामनिर्देश्यमानौ द्वौ प्रकृष्टजनौ-सदस्यौ;

परन्तु प्रकृष्टजनयोः एकः प्रकृष्टजनः, अनुसूचितजातिः, अनुसूचितजनजातिः, अन्यपश्चवर्तिवर्गः, अल्पसंख्यकवर्गः अथवा स्त्री, इत्येतेषु नामनिर्दिष्टो भवेत्।

अपरं च, एकः प्रकृष्टजनः वर्षत्रयस्य कृते नामनिर्दिष्टो भवेत् तथा च पुनर्नामनिर्देशनाय अनर्हः भवेत्।

(२) राष्ट्रिय-न्यायिक-नियुक्ति-आयोगस्य कार्यं कार्यप्रवृत्तिः वा, आयोगस्य घटने त्रुटिसत्यां रिक्ततासत्यां वा अविधिमान्यो न भवेत्।

१२४ख. आयोगस्य कृत्यानि -एतानि राष्ट्रिय-न्यायिक-नियुक्ति-आयोगस्य कर्तव्यानि भवेयुः-

(क) भारतस्य मुख्यन्यायमूर्तेः, उच्चतमन्यायालयस्य न्यायाधीशानाम्, उच्चन्यायालयानां मुख्यन्यायमूर्तीनां, उच्चन्यायालयानां न्यायाधीशानां नियुक्त्यै व्यक्तीनां पुरःप्रशंसनम्;

(ख) उच्चन्यायालयानां मुख्यन्यायमूर्तीनाम्, उच्चन्यायालयानाम् अन्यन्यायाधीशानाम् एकात् उच्चन्यायालयात् अपरे उच्चन्यायालये अन्तरणस्य पुरःप्रशंसनम्;

(ग) पुरःप्रशंसितस्य व्यक्तेः कार्यदक्षतायाः अखण्डतायाः च पुष्टिं कुर्यात्।

१२४ग. विधेः विनिर्मातुं संसदः शक्तिः- भारतस्य मुख्यन्यायमूर्तेः, उच्चतमन्यायालयस्य अन्येषां न्यायाधीशानां, उच्चन्यायालयानां मुख्यन्यायमूर्तीनाम् अन्येषां न्यायाधीशानां च नियुक्तेः प्रक्रियां विनिमयितुं क्षमा भवेत्, तथा च आयोगं तस्य कृत्यानाम् अनुबन्धनाय विनियमप्रक्रियां, व्यक्तीनां नियुक्त्यै चयनप्रक्रियां, तथा च तम् आवश्यकरूपेण विचार्यान् विषयान् विनियमितुं सशक्तं कर्तुं संसद् विधिना क्षमा भवेत्।]

१२५. न्यायाधीशानां वेतनादीनि- [1][(१) उच्चतमन्यायालयानां न्याधीशानाम् एतादृशां वेतनानां संदायं कुर्यात् यत् संसदः विधिना अवधारयेत् तथा यावत्पर्यन्तम् एतदर्थम् इत्थं प्रकारस्य उपबन्धः न क्रियते तावत्पर्यन्तम् एतादृशां वेतनानां संदायं कुर्यात् यत् द्वितीय-अनुसूच्यां विनिर्दिष्टम् अस्ति।]

(२) प्रत्येकं न्यायाधीशः तादृशेषु विशेषाधिकारेषु, भक्तेषु तथैव च अनुपस्थित्यनुमति-सम्बन्धिषु, निवृत्ति वेतनसम्बन्धिषु च तादृशेषु अधिकारेषु स्वत्ववान् भवेत् यादृशानि संसत् प्रणीतेन विधिना तदधीनं वा काले काले अवधारितानि भवेयुः; तथा च यावत् एवं न अवधारितानि, तावत् तादृशेषु विशेषाधिकारेषु, भक्तेषु, अधिकारेषु च यादृशानि द्वितीयानुसूच्यां विनिर्दिष्टानि सन्ति-

---

[1] संविधानस्य (चतुःपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८६ वर्षस्य २-अनुभागेन (१-४-१९८६ दिनाङ्कात् प्रवर्तमानप्रभावेण) खण्डः (१) इत्यस्य स्थाने संनिवेशितः।

परन्तु नियुक्तेः परं कस्यापि न्यायाधीशस्य विशेषाधिकारेषु, भक्तेषु वा अनुपस्थित्यनुमतिसम्बन्धिषु, निवृत्तिवेतनसम्बन्धिषु अधिकारेषु वा तादृशं परिवर्तनं न भवेत् यादृशं तस्मै लाभस्य न्यूनीकारकं भवेत्।

१२६. कार्यकारिणः मुख्यन्यायमूर्तेः नियुक्तिः- यदा भारतस्य मुख्यन्यायमूर्तेः पदं रिक्तं भवेत्; अथवा यदा मुख्यन्यायमूर्तिः अनुपस्थित्या अन्येन वा कारणेन स्वपदस्य कर्तव्यानां पालने असमर्थः भवेत् तदा तत् पदस्य कर्तव्यानि तत् न्यायालयस्य अन्येषां न्यायाधीशानाम् अन्यतमेन केनापि पालितानि भवेयुः, यं राष्ट्रपतिः तत् प्रयोजनाय नियोजयेत्।

१२७. तदर्थन्यायाधीशानां नियुक्तिः- (१) यदि कस्मिन् अपि काले उच्चतमन्यायालयस्य सत्रं सम्पादयितुम्, अनुवर्तयितुं वा तत् न्यायालयस्य न्यायाधीशानां गणपूर्तिः न भवेत्, तर्हि [1][राष्ट्रिय-न्यायिक-नियुक्ति-आयोगः भारतस्य मुख्यन्यायमूर्तिना पुरःप्रशंसिते सति, राष्ट्रपतेः पूर्वसम्मत्या] तथा च सम्बद्ध-उच्चन्यायालयस्य मुख्यन्यायमूर्तिना परामृश्य भारतस्य उच्चन्यायालयस्य न्यायाधीशरूपेण नियुक्तये अर्हः भारतस्य मूख्यन्यायमूर्तिना नामनिर्दिष्टं कमपि उच्चन्यायालयस्य न्यायाधीशम् उच्चतमन्यायालयस्य उपवेशनेषु, यावान् कालावधिः आवश्यकः तावति कालावधौ तदर्थन्यायाधीशरूपेण उपस्थित्यर्थं लेखेन प्रार्थयितुं क्षमते।

(२) एवं नामनिर्दिष्टस्य न्यायाधीशस्य, उच्चतमन्यायालयस्य उपवेशनेषु यस्मिन् अस्य उपस्थितिः अपेक्षिता अस्ति तत्कालावधौ तस्मिन् काले च, स्वपदस्य अन्यकर्तव्येभ्यः पूर्ववर्तितया उपस्थितिः कर्तव्यं भवेत्; तथा च यदा सः एवम् उपतिष्ठन् भवेत् तदा सः उच्चतमन्यायालयस्य न्यायाधीशस्य सर्वाः अधिकारिताः शक्तीश्च, सर्वान् विशेषाधिकारांश्च भजेत, सर्वाणि कर्तव्यानि च निर्वहेत्।

१२८. उच्चतमन्यायालयस्य उपवेशेनेषु सेवानिवृत्तन्यायाधीशानाम् उपस्थितिः- अस्मिन् अध्याये किमपि सत्यपि [2][राष्ट्रिय-न्यायिक-नियुक्ति-आयोगः] भारतस्य मुख्यन्यायमूर्तिः कस्मिन् अपि काले राष्ट्रपतेः पूर्वसम्मत्या उच्चतमन्यायालये न्यायाधीशरूपेण उपस्थातुं कार्यं कर्तुं च कमपि तादृशं जनं प्रार्थयितुं क्षमते यः उच्चतम न्यायालयस्य, फैडरल-न्यायालयस्य वा न्यायाधीशपदं धारितवान्; [3][अथवा यः उच्चन्यायालयस्य पदं धारितवान्; तथा च उच्चतमन्यायालयस्य न्यायाधीशपदे नियुक्तये सम्यक्तया अर्हतां धारयति]; तथा च एवं प्रार्थितः प्रत्येकं तादृशः जनः यदा एवम् उपस्थितः कार्यं कुर्वन् च भवेत् तदा तादृशेषु भक्तेषु स्वत्ववान् भवेत् यादृशानि राष्ट्रपतिः आदेशेन अवधारयेत् तथा च तत् न्यायालयस्य न्यायाधीशस्य सर्वाः अधिकारिताः, शक्तीश्च सर्वान् विशेषाधिकारांश्च भजेत, किन्तु सः अन्यथा तस्य न्यायालयस्य न्यायाधीशः इति न मन्येत,

---

1 संविधानस्य (नवनवतितमं संशोधनम्) अधिनियमः, २०१४, ४-अनुभागेन "भारतस्य मुख्यन्यायमूर्तिः राष्ट्रपतेः पूर्वसम्मत्या " इत्यस्य स्थाने प्रतिष्ठापितः (१३-४-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण)। इदं संशोधनम् एडवोकेट-आन रिकार्ड-असोसिएशन् तथा च अन्ये विरुद्धं भारतसङ्घः इति वादे ए.आई.आर २०१६ एस.सी. ११७ इत्यनेन १६.१०.२०१५ दिनाङ्के उद्घोषितेन निर्णयेन उच्चन्यायालयेन अभिखण्डितम्।

2 संविधानस्य (नवनवतितमं संशोधनम्) अधिनियमः, २०१४, ५-अनुभागेन "भारतस्य मुख्यन्यायमूर्तिः" इत्यस्य स्थाने प्रतिष्ठापितः (१३-४-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण)। इदं संशोधनम् एडवोकेट-आन रिकार्ड-असोसिएशन् तथा च अन्ये विरुद्धं भारतसङ्घः इति वादे ए.आई.आर २०१६ एस.सी. ११७ इत्यनेन १६.१०.२०१५ दिनाङ्के उद्घोषितेन निर्णयेन उच्चन्यायालयेन अभिखण्डितम्।

3 संविधानस्य (पञ्चदशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य ३-अनुभागेनः अन्तर्वेशितः।

परन्तु यावत् पूर्वोक्तः कोऽपि तादृशः जनः एवं कर्तुं न सम्मनुते तावत् सः तत् न्यायालयस्य न्यायाधीशरूपेण उपविशेत् कार्यं कुर्यात् च इति एतद् अनुच्छेदगतं किमपि तस्माद् अपेक्षते इति न मन्येत।

१२९. उच्चतमन्यायालयः अभिलेखन्यायालयः- उच्चतमन्यायालयः अभिलेखन्यायालयः भवेत्, तथा स्वावमाने दण्डनशक्तिं अन्तर्भावयन्तीः एतादृशन्यायालयस्य सर्वाः शक्तीश्च भजेत।

१३०. उच्चतमन्यायालयस्य स्थानम्- उच्चतमन्यायालयः देहल्याम् अथवा तादृशे अन्यस्मिन् स्थाने, अन्येषु स्थानेषु वा उपविशेत् यादृशानि राष्ट्रपतेः अनुमोदनेन भारतस्य मुख्यन्यायमूर्तिः काले काले नियतानि कुर्यात्।

१३१. उच्चतमन्यायालयस्य प्रारम्भिकाधिकारिता- अस्य संविधानस्य उपबन्धानाम् अधीनम्-
(क) भारतशासनस्य तथा च एकस्य राज्यस्य अधिकानां राज्यानां वा मध्ये, अथवा

(ख) एकस्मिन् पक्षे भारतशासनस्य कस्यापि राज्यस्य अधिकानां वा राज्यानां तथा अन्यस्मिन् पक्षे एकस्य अधिकानां वा अन्येषां राज्यनां मध्ये; अथवा

(ग) द्वयोः राज्ययोः अधिकानां राज्यानां वा मध्ये, कस्मिन् अपि विवादे उच्चतमन्यायालयः अन्यान् सर्वान् न्यायालयान् अपवर्ज्य प्रारम्भिकाम् अधिकारितां भजते, यावत् च यदि च सः विवादः तं कमपि (विधेः वा तथ्यस्य वा) प्रश्नम् अन्तर्गृह्णाति यस्मिन् कस्यापि वैधस्य अधिकारस्य अस्तित्वं विस्तारः वा संश्रयते-

[1][परन्तु उक्ताधिकारिता तस्मिन् विवादेन विस्तारं प्राप्नुयात् यः एतादृशात् सन्धेः, समयात्, प्रसंविदः वचनबन्धात्, सनदाख्यलेखात्, तत्समात् अन्यस्मात् लिखितात् वा उत्पन्नः भवति यद् अस्य संविधानस्य प्रारम्भात् पूर्वं कृतं निष्पादितं वा आसीत् तथा च एतादृशात् प्रारम्भात् परं च प्रवर्तमानम् अस्ति अथवा एतादृशम् उपबन्धं करोति यत् उक्ताधिकारिता एतादृशे विवादे न विस्तारं प्राप्नुयात्।]

[2]]१३१क. *[केन्द्रीयविधीनां सांविधानिकवैधतया सम्बद्धानां प्रश्नानां विषये उच्चतमन्यायालयस्य अनन्या अधिकारिता] संविधानस्य (त्रिचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७७ इत्यस्य ४-अनुभागेन निरसितः (१३-४-१९७८ दिनाङ्कात् प्रवर्तमानप्रभावेण)।*

१३२. केषुचित् न्यायविषयेषु उच्चन्यायालयेभ्यः प्राप्तासु पुनर्विचारप्रार्थनासु उच्चतमन्यायालयस्य पुनर्विचाराधिकारिता- (१) भारतराज्यक्षेत्रे कस्यापि उच्चन्यायालयस्य व्यावहारिक्याम् आपराधिक्याम् अन्यस्यां वा कार्यप्रवृत्तौ कस्यापि निर्णयस्य, आज्ञप्तेः, अन्तिमादेशस्य, वा पुनर्विचारणाय प्रार्थना उच्चतमन्यायालये भवेत् [3][यदि सः उच्चन्यायालयः १३४ अनुच्छेदस्य अधीनं प्रमाणयति] यत् सः वादः अस्य संविधानस्य निर्वचने कमपि सारवन्तं प्रश्नम् अन्तर्भावयति;

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य ५-अनुभागेन पारन्तुकात् प्रति एषः पारन्तुकः संनिवेशितः।

[2] संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २३-अनुभागेन एषः अनुच्छेदः अन्तर्वेशितः (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[3] संविधानस्य (चतुश्चत्वरिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य १७-अनुभागेन "यदि सः उच्चन्यायालयः प्रमाणयति" इत्येतस्मात् प्रति एतत् संनिवेशितम् (१-८-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[1](२)* * * * *

(३) यत्र एतादृशं प्रमाणपत्रं दत्तं [2][* * *] तत्र तद्वादस्यः कोऽपि पक्षः उच्चतमन्यायालयं कोऽपि एतादृशः पूर्वोक्तसदृशः प्रश्नः असम्यक्तया विनिश्चितः इति आधारेण [2][* * *] पुनर्विचारं प्रार्थयेत्।

स्पष्टीकरणम्- एतदनुच्छेदस्य प्रयोजनानां कृते "अन्तिमादेशस्य" इति कथनं तस्य वादपदस्य विनिश्चायकम् आदेशम् अन्तर्भावयति यद् वादपदं यदि पुनर्विचारं प्रार्थयितुः अनुग्राहकत्वेन विनिश्चितं भवेत् तर्हि तस्य वादस्य अन्तिमव्यावभादानाय पर्याप्तं भवेत्।

१३३. व्यावहारिकविषयेषु उच्चन्यालयेभ्यः प्राप्तासु पुनर्विचारप्रार्थनासु उच्चतमन्यालयस्य पुनर्विचारप्रार्थनासम्बन्धिनी अधिकारिता- [3][(१) भारतराज्यक्षेत्रे कस्यापि उच्चन्यायालयस्य व्यावहारिणक्यां कार्यप्रवृत्तौ कस्यापि निर्णयस्य, आज्ञप्तेः अन्तिमादेशस्य वा पुनर्विचारार्थं प्रार्थना उच्चतमन्यायालये भवेत् [4][यदि उच्चन्यायालयः १३४क अनुच्छेदस्य अधीनं प्रमाणयति यत्]-

(क) सः वादः कमपि सार्वजनिकं महत्त्ववन्तं सारवन्तं विधिप्रश्नम् अन्तर्भावयति तथा च

(ख) उच्चन्यायालयस्य मतौ तस्य प्रश्नस्य उच्चतमन्यायालयेन विनिश्चयः आवश्यकः अस्ति।]

(२) १३२-तमानुच्छेदे किमपि सत्यपि (१) खण्डाधीनं पुनर्विचारं प्रार्थयमानः कोऽपि विवादी उच्चतमन्यायालयं ज्ञापयेत् एतादृश्याः पुनर्विचारप्रार्थनायाः आधाराणाम् अन्यतमम् एकं यत् अस्य संविधानस्य निर्वचनसम्बन्धे कोऽपि सारवान् विधिप्रश्नः असम्यक्तया विनिश्चितः इति।

(३) एतस्मिन् अनुच्छेदे किमपि सत्यपि उच्चन्यायालयस्य एकेनैव न्यायाधीशेन कृतस्य, निर्णयस्य, आज्ञप्तेः अन्तिमादेशस्य वा कापि पुनविचारप्रार्थना उच्चतमन्यायालयं तावत् न संश्रयेत् यावत् संसद् विधिना अन्यथा न उपबन्धयति।

१३४. आपराधिकेषु विषयेषु उच्चतमन्यायालयस्य पुनविचारप्रार्थना सम्बन्धिनी अधिकारिता- (१) भारतराज्यक्षेत्रे आपराधिक्यां कार्यप्रवृत्तौ उच्चन्यायालयस्य कस्यापि निर्णयस्य, अन्तिमादेशस्य दण्डादेशस्य वा उच्चतमन्यायालये पुनर्विचारप्रार्थना भवेत्, यदि सः उच्चन्यायालयः

(क) पुनविचारप्रार्थनायां कस्यापि अभियुक्तस्य जनस्य दोषमुक्तेः आदेशं परावर्तितवान्; तथा च तस्मै जनाय मृत्युदण्डादेशं दत्तवान्; अथवा

(ख) स्वस्य प्राधिकाराधीनात् कस्मादपि न्यायालयात् स्वपुरतः परीक्षणाय कमपि अभियोगं प्रत्याहृतवान्, तथा च तादृशे परीक्षणे अभियुक्तं जनं सिद्धदोषं कृतवान्, तस्मै मृत्युदण्डादेशं दत्तवान् च, अथवा

(ग) [5][१३४क अनुच्छेदाधीनं प्रमाणयति] यत् सः अभियोगः उच्चतमे न्यायालये पुनर्विचारप्रार्थनायोग्यतां भजते इति-

---

1 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन (२) खण्डः लोपितः (१-८-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन कतिपयाः शब्दाः लोपिताः (१-८-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (त्रिंशत्तमं संशोधनम्) अधिनियमः, १९७२ इत्यस्य २-अनुभागेन (१) खण्डात् प्रति एषः खण्डः संनिवेशितः (२७-२-१९७३ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य १८-अनुभागेन "यदि सः उच्च न्यायालयः प्रमाणयति" इत्येतस्मात् प्रति एतत् संनिवेशितम् (१-८-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

5 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य १९-अनुभागेन "प्रमाणयति" इति शब्दात् प्रति एतत् संनिवेशितम् (१-८-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(भागः ५-सङ्घः)

परन्तु (ग) उपखण्डाधीनं पुनर्विचारप्रार्थना तादृशानाम् उपबन्धानाम् अधीनं स्यात् यादृशाः १४५-तमानुच्छेदस्य (१) खण्डस्य अधीनं कृताः तन्निमित्तं स्युः, तथा च तादृशानां प्रतिबन्धानाम् अधीनं स्यात् यादृशान् उच्चन्यायालयः नियमयेत्, अपेक्षेत वा।

(२) संसद् उच्चतमन्यायालयाय भारतराज्यक्षेत्रस्य उच्चन्यायालयस्य आपराधिक्यां कार्यप्रवत्तौ कस्यापि निर्णयस्य, अन्तिमादेशस्य, दण्डादेशस्य पुनर्विचारार्थं प्राप्तानां प्रार्थनानां ग्रहणे, श्रवणे च काः अपि अपराः शक्तीः विधिना प्रदातुं क्षमते, तादृशानां प्रतिबन्धानां परिसीम्नां च अधीनं यादृशाः तद् विधौ विनिर्दिष्टाः स्युः।

[1]**[१३४क. उच्चतमन्यायालये पुनर्विचारप्रार्थनाकृते प्रमाणपत्रम्-** १३२-तमानुच्छेदस्य (१) खण्डे, १३३-तमानुच्छेदस्य (१) खण्डे, १३४-तमानुच्छेदस्य (१)खण्डे वा निर्दिष्टं निर्णयम्, आज्ञप्तिम्, अन्तिमादेशं, दण्डादेशं वा पारयन्, ददन् वा प्रत्येकम् उच्चन्यायालयः एतादृशात् पारितकरणात्, प्रदानात् वा परं यथासम्भवं शीघ्रं, यथायथं १३२-तमानुच्छेदस्य (१) खण्डे, १३३-तमानुच्छेदस्य (१) खण्डे १३४-तमानुच्छेदस्य (१) खण्डे वा निर्दिष्टस्वरूपं प्रमाणपत्रम् एतद्वादस्य सम्बन्धे दातव्यं न वा इति प्रश्नस्य अवधारणम्-

(क) यदि सः एवं कर्तुम् उचितं मन्यते तर्हि, स्वप्रेरणया कर्तुं क्षमते; तथा च

(ख) यदि एतादृशस्य निर्णयस्य, आज्ञप्तेः अन्तिमादेशस्य दण्डादेशस्य वा पारितकरणात् प्रदानात् वा परं सपदि एव व्यथितपक्षकारेण, तस्य कृते वा, मौखिकम् आवेदनं कृतं भवेत् तर्हि कुर्यात्।]

१३५. विद्यमानविध्यधीनं "फेडरल' न्यायालयस्य अधिकारिता शक्तयश्च उच्चतमन्यायालयेन प्रयोक्तव्याः- यावत् संसद् विधिना अन्यथा न उपबन्धयति तावत्, उच्चतमन्यायालयः अपि तस्य कस्यापि विषयस्य, सम्बन्धेन अधिकारितां शक्तीश्च भजेत यं १३३-तमानुच्छेदगताः १३४-तमानुच्छेदगताः वा उपबन्धाः न विषयीकुर्वन्ति, यदि तद्विषयसम्बन्धे अधिकारिता शक्तयश्च कस्यापि विद्यमानस्यविधेः. अधीनम् अस्य संविधानस्य प्रारम्भात् प्राक् "फेडरल" न्यायालयेन प्रयोक्तव्याः आसन्।

१३६. पुनर्विचारप्रार्थनायै उच्चतमन्यायालयस्य विशेषानुमतिः- (१) एतस्मिन् अध्याये किमपि सत्यपि उच्चतमन्यायालयः भारतराज्यक्षेत्रे केनापि न्यायालयेन न्यायाधिकरणेन वा कस्मिन् अपि वादे, विषये वा पारितस्य, कृतस्य वा निर्णयस्य, आज्ञप्तेः, अवधारणस्य, दण्डादेशस्य, आदेशस्य वा पुनर्विचारार्थं प्राप्तायाः प्रार्थनायाः कृते स्वविवेकेन विशेषानुमतिं दातुं क्षमते।

(२) (१) खण्डगतं किमपि सशस्त्रबलसम्बन्धिना केनापि विधिना तदधीनं वा घटितेन केनापि न्यायालयेन न्यायाधिकरणेन वा पारितं, कृतं वा निर्णयम्, अवधारणं दण्डादेशम्, आदेशं वा न विषयीकुर्यात्।

१३७. उच्चतमन्यायालयेन कृतानां निर्णयानाम् आदेशानां च पुनर्विलोकनम्- उच्चतमन्यायालयः संसदा प्रणीतस्य कस्यापि विधेः अधीनं १४५-तमानुच्छेदम् अनुसृत्य प्रणीतानां नियमानां वा अधीनं कस्यापि स्वोदीरितस्य निर्णयस्य स्वप्रदत्तस्य आदेशस्य वा पुनर्विलोकने शक्तिं भजेत।

---

1 उपर्युक्ताधिनियमस्य २०-अनुभागेन एषः अनुच्छेदः अन्तर्वेशितः (१-८-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

१३८. उच्चतमन्यायालयस्य अधिकारितायाः वृद्धिः- (१) उच्चतमन्यायालयः सङ्घसूचीस्थविषयाणाम् अन्यतमस्य कस्यापि विषयस्य सम्बन्धेन तादृशीः अपराः अधिकारिताः शक्तीश्च भजेत यादृशीः संसद् विधिना प्रदद्यात्।

(२) यदि संसद् उच्चतमन्यायालयेन तादृशीनाम् अधिकारितानां शक्तीनां च प्रयोगाय विधिना उपबन्धयेत् तर्हि उच्चतमन्यायालयः कस्यापि विषयस्य सम्बन्धेन तादृशीः अपराः अधिकारिताः शक्तीश्च भजेत यादृश्यः भारतशासनेन, कस्यापि राज्यस्य शासनेन च विशेषसमयेन प्रदत्ताः स्युः।

१३९. केषांचित् लेखविशेषाणां प्रचालनार्थे उच्चतमन्यायालयाय शक्तीनां प्रदानम्- ३२-तमानुच्छेदस्य (२) खण्डे वर्णितेभ्यः व्यतिरिक्तानां केषामपि प्रयोजनानां कृते निदेशानाम्, आदेशानां, *बन्दीप्रत्यक्षीकरण- परमादेश- प्रतिषेध- अधिकारपृच्छा- उत्प्रेषणादीन्* च अन्तर्भावयतां लेखानां वा तेषाम् अन्यतमस्य कस्यापि प्रचालने शक्तिं संसद् विधिना उच्चतमन्यायालयाय प्रदद्यात्।

[1]**१३९क. [केषांचित् वादानाम् अन्तरणम्-** [2][(१) येषु समानाः, सारतः समानाः वा, विधिप्रश्नाः अन्तर्भाविताः सन्ति, तादृशाः वादाः यदि उच्चतमन्यायालयस्य समक्षं तथा च एकस्य उच्चन्यायालयस्य तदधिकानां वा उच्चन्यायालयानां समक्षं लम्बिताः सन्ति, तथा च उच्चतमन्यायालयः स्वप्रेरणया, अथवा भारतस्य महान्यायवादिना वा तादृशस्य कस्यापि वादविषयस्य पक्षकारेण कृतस्य आवेदनस्य आधारेण समाहितः भवति यद् एतादृशाः प्रश्नाः सार्वजनिकमहत्वयुक्ताः सारवन्तश्च सन्ति तर्हि उच्चतमन्यायालयः उच्चन्यायालयस्य उच्चन्यायालयानां वा समक्षं लम्बितं वादविषयं वादविषयान् वा स्वस्य समक्षं प्रत्याहर्तुं, स्वयं च तादृशानां सर्वेषां वादविषयाणां निर्वर्तनं च कर्तुं क्षमते-

परन्तु उच्चतमन्यायालयः एवं प्रत्याहृतं वादविषयम् उक्तविधिप्रश्नानाम् अवधारणात् परं तादृशानां प्रश्नानां विषये स्वीयनिर्णयस्य प्रतिलिपिना सह यस्मात् उच्चन्यायालयात् सः प्रत्याहृतः आसीत् तस्मै प्रतिनिर्वर्तयितुं क्षमते तथा च सः उच्चन्यायालयः तादृशस्य वादविषयस्य प्राप्तौ तादृशस्य निर्णयस्य अनुरूपं तस्य वादविषयस्य निर्वर्तनं कर्तुं परां कार्यप्रवृत्तिं कुर्यात्]।

(२) उच्चतमन्यायालयः कस्यापि उच्चन्यायालयस्य समक्षं लम्बितं कमपि वादविषयं कामपि पुनर्विचारप्रार्थनां वा, अन्यां कामपि कार्यप्रवृत्तिं वा कस्मै अपि अन्यस्मै उच्चन्यायालयाय अन्तरितं कर्तुं क्षमते यदि स न्यायप्रयोजनपूर्त्यर्थम् एवं कर्तुं समीचीनं मन्येत।]

१४०. उच्चतमन्यायालयस्य आनुषङ्गिकशक्तयः- उच्चतमन्यायालयम् अनेन संविधानेन तदधीनं वा तस्मै प्रदत्ताधिकारितायाः अधिकाप्रभाविरूपेण प्रयोगे समर्थं कर्तुं, संसद् एतत्संविधानस्य उपबन्धानाम् अन्यतमेन केनापि न असङ्गतानां तादृशीनाम् अनुपूरकशक्तीनां प्रदानाय उपबन्धयेत् यादृश्यः आवश्यकाः वाञ्छनीयाश्च प्रतीयेरन्।

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २४-अनुभागेन एषः अनुच्छेदः अन्तर्वेशितः (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य २१-अनुभागेन (१) खण्डात् प्रति एषः खण्डः संनिवेशितः (१-८-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(भागः ५-सङ्घः)

१४१. उच्चतमन्यायालयेन घोषितः विधिः सर्वन्यायालयानां आबद्धकारी- उच्चतमन्यायालयेन घोषितः विधिः भारतराज्यक्षेत्रस्य अभ्यन्तरे सर्वेषां न्यायालयानाम् आबद्धकारी भवेत्।

१४२. उच्चतमन्यायालयस्य आज्ञप्तीनाम्, आदेशानां च प्रवर्तनं प्रकटनादीनां विषये आदेशश्च- (१) उच्चतमन्यायालयः स्वाधिकारितायाः प्रयोगे तादृशीम् आज्ञप्तिं पारयितुं, तादृशम् आदेशं वा कर्तुं क्षमते यादृशः स्वस्य समक्षं लम्बिते कस्मिन् अपि वादे, विषये वा पूर्णं न्यायं कर्तुम् आवश्यकः भवेत्; तथा च एवं पारिता आज्ञप्तिः, कृतः आदेशः वा भारतस्य राज्यक्षेत्रे सर्वत्र तादृश्या रीत्या प्रवर्तनीयः भवेत् यादृशी संसदा प्रणीतेन केनापि विधिना तदधीनं वा विहिता स्यात् तथा च यावत् तदर्थम् उपबन्धः न प्रणीतः अस्ति तावत् एतादृश्या रीत्या यादृशीं राष्ट्रपतिः आदेशेन[1] विदधीत।

(२) कस्यापि जनस्य उपस्थितेः सम्पादनं, केषामपि लेख्यानां प्रकटनं पुरोनिधानं वा, कस्यापि स्वावमानस्य अन्वेषणं कारयितुं दण्डं दातुं वा एतदर्थं संसदा प्रणीतस्य कस्यापि विधेः उपबन्धानाम् अधीनतया उच्चतमन्यायालयः सर्वस्य भारतस्य राज्यक्षेत्रस्य सम्बन्धेषु कस्यापि आदेशस्य समस्तां, सर्वां च शक्तिं भजेत।

१४३. उच्चतमन्यायालयेन परामर्शाय राष्ट्रपतौ शक्तिः- (१) यदि कस्मिन् अपि काले राष्ट्रपतिः प्रत्येति यद् विधेः तथ्यस्य वा प्रश्नः उत्पन्नः अस्ति, उत्पत्तुं सम्भवति वा यः तादृशस्य भावः तादृशसार्वजनिक महत्त्ववान् च अस्ति यद् उच्चतमन्यायालयस्य तद्विषये मतिप्राप्तिः समीचीना अस्ति तर्हि सः तं प्रश्नं विचारार्थं तस्मै न्यायालयाय निर्दिशेत्, सः न्यायालयश्च, यादृशम् उचितं मन्येत तादृशात् श्रवणात् परं राष्ट्रपतिं स्वमतिं प्रतिवेदयेत्।

(२) १३१-तमानुच्छेदस्य पारन्तुके [2][* * *] यत् किमपि सत्यपि राष्ट्रपतिः [3][उक्त-पारन्तुके] वर्णितप्रकारकं विवाद उच्चतमन्यायालयाय तन्मत्यर्थं निर्दिशेत्; अथ च उच्चतमन्यायालयः यादृशम् उचितं मन्येत तादृशात् श्रवणात् परं तद्विषयिकीं स्वमतिं राष्ट्रपतिं प्रतिवेदयेत्।

१४४. उच्चतमन्यायालयस्य साहाय्ये असैनिकैः न्यायिकैश्च प्राधिकारिभिः कार्यकरणम्- भारतराज्यक्षेत्रस्थाः सर्वे असैनिकाः न्यायिकाश्च प्राधिकारिणः उच्चतमन्यायालयस्य साहाय्ये कार्यं कुर्युः।

[4]**[१४४.क.** *विधीनां सांविधानिकवैधतासम्बन्धिनां प्रश्नानां निर्वर्तनस्य कृते विशेषोबन्धाः] संविधानस्य (चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७७ इत्यस्य ५- अनुभागेन निरसितः (१३-४-१९७८ दिनाङ्कात् प्रवर्तमानप्रभावेण)।*

१४५. न्यायालयस्य नियमादयः- (१) संसदा प्रणीतस्य कस्यापि विधेः उपबन्धानाम् अधीनम् उच्चतमन्यायालयः काले काले राष्ट्रपतेः अनुमोदनेन तत् न्यायालयस्य कार्यपद्धत्याः प्रक्रियायाश्च साधारणतया विनियमनाय नियमान् प्रणेतुं क्षमते ये-

(क) तस्मिन् न्यायालये विधिव्यवसायं कुर्वाणानां जनानां सम्बन्धिनः नियमान्;

---

1 उच्चतमन्यायालयस्य (आज्ञप्तीनाम् आदेशानाम् च) प्रवर्तनाय १९५४-वर्षस्य आदेशः (सां० आ० ४७) द्रष्टव्यः।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९- अनुमाभेन अनुसूच्याच "(१) खण्डगतं" इति लोपितम्।

3 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च "उक्त खण्डे" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

4 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २५-अनुभागेन एषः अनुच्छेदः अन्तर्वेशितः (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(ख) पुनर्विचारप्रार्थनानां श्रवणार्थं प्रक्रियायाः सम्बन्धिनः तथा च तत् न्यायालयस्य पुनर्विचारप्रार्थनाविषयाः यस्मिन् कालाभ्यन्तरे प्रवेशनीयाः सन्ति तत्कालमन्तर्भावयतां पुनर्विचारप्रार्थनाभिः सम्बध्यमानानाम् अन्यविषयाणां सम्बन्धिनश्च नियमान्;

(ग) तृतीयभागेन प्रदत्तानाम् अधिकाराणाम् अन्यतमस्य कस्यापि प्रवर्तनार्थं न्यायालयस्य कार्यप्रवृत्तीनां सम्बन्धिनः नियमान्;

[1][(गग) [2][१३९क अनुच्छेदस्य] अधीनं तस्मिन् न्यायालये कार्यप्रवृत्तीनां सम्बन्धिनः नियमान्];

(घ) १३४- तमानुच्छेदस्य (१) खण्डस्य (ग) उपखण्डस्य अधीनं पुनर्विचारप्रार्थनानां ग्रहणसम्बन्धिनः नियमान्

(ङ) तेन न्यायालयेन उदीरितः निर्णयः, कृतः वा आदेशः येषाम् अधीनं पुनर्विलोकितः भवेत् तेषां प्रतिबन्धानां सम्बन्धिनः, यत् कालाभ्यन्तरे एतादृशं पुनर्विलोकनार्थं तं न्यायालयम् आवेदनपत्राणि प्रदेयानि सन्ति तं कालम् अन्तर्भावयन्त्याः एतादृश्याः पुनर्विलोकनप्रक्रियायाः सम्बन्धिनश्च नियमान्;

(च) तस्मिन् न्यायालये कासु कार्यप्रवृत्तिषु जायमानानां तदानुषङ्गिकानां व्ययानां सम्बन्धिनः तत्रत्यानां कार्यप्रवृत्तीनां सम्बन्धे मूल्यरूपेण प्रभारितानां प्रशुल्कानां सम्बन्धिनश्च नियमान्;

(छ) प्रातिभाव्यस्वीकरणस्य सम्बन्धिनः नियमान्;

(ज) कार्यप्रवृत्तीनां रोधस्य सम्बन्धिनः नियमान्;

(झ) यां सः न्यायालयः तुच्छाम्, उद्वेगकरीं, विलम्बनम् उद्दिश्य कृतां वा प्रत्येति तस्याः पुनर्विचारप्रार्थनायाः सङ्क्षेपतः अवधारणार्थम् उपबन्धकरान् नियमान्;

(ञ) ३१७-तमानुच्छेदस्य (१) खण्डे निर्दिष्टे अन्वेषणे अनुप्रयुक्तायाः प्रक्रियायाः सम्बन्धिनः नियमान् च अन्तर्भावयन्ति।

(२) अस्य अनुच्छेदस्य अधीनं प्रणीताः नियमाः [3][(३) खण्डस्य उपबन्धानाम् [4]***] अधीनं, कस्मै अपि प्रयोजनाय उपवेष्टव्यम् अस्ति तेषां न्यायाधीशानां न्यूनतमां सङ्ख्यां नियतां कर्तुं क्षमन्ते, एकाकिन्यायाधीशानां खण्डन्यायालयानां च शक्तीनां विषयेषु उपबन्धयितुं चापि क्षमन्ते।

(३) अस्य संविधानस्य निर्वचनस्य सम्बन्धी कोऽपि सारवान् विधिप्रश्नः यस्मिन् वादे अन्तर्भावितः अस्ति तस्य विनिश्चयार्थं १४३-तमानुछेदस्य अधीनं कस्यापि निर्देशार्थं निवेदनस्य श्रवणार्थं वा यैः उपवेष्टव्यम् अस्ति तेषां न्यायाधीशानां [5][[4]***न्यूनतमा सङ्ख्या] पञ्च भवेत्;

---

[1] संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २६-अनुभागेन एषः उपखण्डः अन्तर्वेशितः (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[2] संविधानस्य (त्रिचत्वारिंशत्तम संशोधनम्) अधिनियमः १९७७ इत्यस्य ६-अनुभागेन "१३१क १३९क च अनुच्छेदयोः" इत्येतस्मात् प्रति एतत् संनिवेशितम् (१३-४-१९७८ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[3] संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २६-अनुभागेन" (३) खण्डगतोपबन्धानाम्" इत्येतस्मात् प्रति एतत् संनिवेशितम् (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[4] संविधानस्य (त्रिचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७७ इत्यस्य ६-अनुभागेन कतिपयाः शब्दाः अङ्काः अक्षराश्च लोपिताः (१३-४-१९७८ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[5] संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २६-अनुभानेन "न्यूनतमा सङ्ख्या" इत्येतस्मात् प्रति एतत् संनिवेशितम् (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

परन्तु यत्र अस्य अध्यायस्य १३२-तमानुच्छेदात् भिन्नानाम् उपबन्धानाम् अधीनं पुनर्विचारप्रार्थनां श्रृण्वन् न्यायालयः पञ्चभ्यः न्यूनैः न्यायाधीशैः सम्भूतः अस्ति, तथा च पुनर्विचारप्रार्थनायाः श्रवणप्रसरे सः न्यायालयः समाहितः अस्ति यत् एषा पुनर्विचारप्रार्थना संविधाननिर्वचनस्य एतादृशं सारवन्तं विधिप्रश्नम् अन्तर्भावयति यस्य अवधारणं तस्याः पुनर्विचारप्रार्थनायाः निर्वर्तनार्थम् आवश्यकम् अस्ति तत्र एतादृशः न्यायालयः एतादृशं प्रश्न अन्तर्भावयति कस्यापि वादस्य विनिश्चयार्थम् अनेन खण्डेन अपेक्षितरूपेण घटिताय न्यायालयाय मत्यर्थं तं प्रश्नम् प्रदद्यात् तथा च तस्य मत्याः प्राप्तौ तस्याः पुनर्विचारप्रार्थनायाः निर्वर्तनं कुर्यात् तादृश्याः मतेः अनुरूपम्।

(४) उच्चतमन्यायालयः कमपि निर्णयं विवृते एव न्यायालये व्याहृतं कुर्यात्, नान्यथा; तथा च १४३-तमानुच्छेदाधीनं प्रतिवेदनम् अपि विवृतन्यायालये व्याहृतमत्यनुसारं कुर्यात्, नान्यथा।

(५) कोऽपि निर्णयः कापि एतादृशी मतिश्च तस्य वादस्य श्रवणे उपस्थितानां न्यायाधीशानां मध्ये बहुसङ्ख्यकानां सहमत्या एवम् उच्चतमन्यायालयेन व्याहृतौ भवेताम्, नान्यथा; किन्तु एतत् खण्डगतं किमपि यः सहमतः न भवति तं न्यायाधीशं विमतस्य निर्णयस्य, मतेः वा व्याहरणात् न निवारयेत्।

१४६. उच्चतमन्यायालयस्य अधिकारिणः सेवकाः व्ययाश्च- (१) उच्चतमन्यायालयस्य अधिकारिणां, सेवकानां च नियुक्तयः भारतस्य मुख्यन्यायमूर्तिना, तेन निर्दिष्टेन अन्येन न्यायाधीशेन अधिकारिणा वा, कृताः भवेयुः-

परन्तु राष्ट्रपतिः नियमेन एतद् अपेक्षितुं क्षमः यत् यादृश्यः अवस्था नियमे विनिर्दिष्टाः स्युः तादृशीषु अवस्थासु यः कोऽपि जनः न्यायालयेन पूर्वम् एव असंलग्नः सः जनः सङ्घलोकसेवायोगेन सह परामर्शनं कृत्वा एव न्यायालयेन संपृक्ते कस्मिन् अपि पदे नियुक्तः भवेत्, नान्यथा।

(२) संसदा प्रणीतस्य कस्यापि विधेः उपबन्धानाम् अधीनम् उच्चतमन्यायालयस्य अधिकारिणां सेवाकानां च सेवाप्रतिबन्धाः तादृशाः भवेयुः यादृशाः भारतस्य मुख्यन्यायमूर्तिना अथवा तदर्थं नियमप्रणयनार्थं भारतस्य मुख्यन्यायमूर्तिना प्राधिकृतेन न्यायालयस्य अन्येन न्यायाधीशेन, अधिकारिणा वा प्रणीतैः नियमैः विहिताः भवेयुः-

परन्तु एतत्खण्डाधीनं प्रणीताः नियमाः यावत् पर्यन्तं वेतनैः भक्तैः अनुपस्थित्यनुमत्या, निवृत्तिवेतनैः वा सम्बद्धाः सन्ति तावत् ते राष्ट्रपतेः अनुमोदनम् अपेक्षेरन्।

(३) उच्चतमन्यायालयस्य अधिकारिभ्यः सेवकेभ्यश्च तेषां सम्बन्धे वा प्रदेयानि सर्वाणि वेतनानि, भक्तानि निवृत्तिवेतनानि च अन्तर्भावयन्तः उच्चतमन्यायालयस्य प्रशासनव्ययाः भारतस्य सञ्चितनिधौ भारिताः भवेयुः तथा तेन न्यायालयेन आदत्ताः प्रशुल्काः अन्यानि धनानि वा तस्य निधेः भागाः भवेयुः।

(भागः ५-सङ्घः)

१४७. निर्वचनम्- अस्मिन् अध्याये, ६-भागस्य ५-अध्याये च अस्य संविधानस्य निर्वचनेन सम्बन्धिनः कस्यापि सारवतः विधिप्रश्नस्य ये निर्देशाः सन्ति तेषाम् अर्थः एवं कृतः भवेत् यत् ते भारतशासनाधिनियमः १९३५ इत्यस्य (तम् अधिनियमं संशोधयन्ति अनुपूरयन्ति वा कानि अपि अधिनियमनानि अन्तर्भावयतः) अथवा कस्यापि सपरिषदादेशस्य, तदधीनं वा प्रणीतस्य कस्यापि आदेशस्य अथवा भारतीयस्वतन्त्रताधिनियमः, १९४७ इत्यस्य तदधीनं प्रणीतस्य कस्यापि आदेशस्य वा निर्वचनेन सम्बन्धिनः कस्यापि सारवतः विधिप्रश्नस्य निर्देशान् अन्तर्भावयन्ति।

अध्यायः ५- भारतस्य नियन्त्रकमहालेखापरीक्षकः

१४८. भारतस्य नियन्त्रकमहालेखापरीक्षकः- (१) भारतस्य एकः नियन्त्रकमहालेखापरीक्षकः भवेत् यः राष्ट्रपतिना स्वहस्ताङ्कितेन मुद्रासहितेन अधिपत्रेण नियुक्तः भवेत्, तथा च सः केवलम् उच्चतमन्यायालयस्य न्यायाधीशानां कृते निर्धारितरीत्या तैरेव च आधारैः पदात् अपसारितः भवेत्।

(२) भारतस्य एकः नियन्त्रकमहालेखापरीक्षकरूपेण नियुक्तः प्रत्येकं जनं स्वपदारोहणात् प्राक् राष्ट्रपतेः, तेन तदर्थं नियुक्तस्य कस्यचित् जनस्य वा समक्षं तृतीयानुसूच्याम् एतदर्थम् उल्लिखिते प्रारूपे शपथं, प्रतिज्ञानं वा कुर्यात् तं स्वहस्ताङ्कितं कुर्यात्।

(३) नियन्त्रकमहालेखापरीक्षकस्य वेतनं सेवायाः अन्ये च प्रतिबन्धाः तादृशाः भवेयुः यादृशाः संसदा विधिना अवधारिताः स्युः तथा च यावत् ते एवम् अवधारिताः न स्युः तावत् तथा भवेयुः यथा द्वितीयानुसूच्यां विनिर्दिष्टाः-

परन्तु नियन्त्रकमहालेखापरीक्षकस्य अनुपस्थित्यनुमत्या, निवृत्तिवेतनेन, निवृत्तिवयसा वा सम्बन्धिषु तस्य अधिकारेषु तस्य नियुक्तेः परं तादृशं परिवर्तनं न भवेत् यादृशं तस्मै लाभस्य न्यूनीकारकं भवेत्।

(४) नियन्त्रकमहालेखापरीक्षकः स्वपदधारणात् प्रविरामात् परं भारतशासनस्य अधीनाय कस्यापि राज्यशासनस्य अधीनाय वा कस्मै अपि पदाय पात्रं न भवेत्।

(५) भारतस्य लेखापरीक्षालेखाविभागे सेवां कुर्वाणानां जनानां सेवाप्रतिबन्धाः नियन्त्रक-महालेखापरीक्षकस्य प्रशासनशक्तयश्च एतत्संविधानस्य उपबन्धानां संसदा प्रणीतस्य कस्यापि विधेश्च अधीनं, तादृशाः भवेयुः यादृशाः नियन्त्रकमहालेखापरीक्षकेण सह परामर्शनात् परं राष्ट्रपतिना प्रणीतैः नियमैः विहिताः स्युः।

(६) नियन्त्रकमहालेखापरीक्षकस्य कार्यालयस्य प्रशासनव्ययाः, तत् कार्यालये सेवां कुर्वाणेभ्यः जनेभ्यः तत्सम्बन्धे च प्रदेयानि सर्वाणि वेतनानि, भक्तानि, निवृत्तिवेतनानि च अन्तर्भावयन्तः भारतस्य सञ्चितनिधौ भारिताः भवेयुः।

१४९. नियन्त्रकमहालेखापरीक्षकस्य कर्तव्यानि शक्तयश्च- नियन्त्रकमहालेखापरीक्षकः सङ्घस्य च राज्यानां च अन्यस्य कस्यापि च प्राधिकारिणः निकायस्य वा लेखानां सम्बन्धे तादृशानि कर्तव्यानि आचरेत् तादृशीः शक्तीश्च प्रयोजयेत् यादृशानि संसदा प्रणीतेन केनापि विधिना तदधीनं वा विहितानि भवेयुः यावत् च तदर्थम् उपबन्धः एवं प्रणीतः न स्यात् तावत् सङ्घस्य राज्यानां च सम्बन्धे सः तादृशानि कर्तव्यानि आचरेत् तादृशीः शक्तीश्च प्रयोजयेत् यादृशानि अस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वं भारताधिनिवेशस्य लेखानां सम्बन्धे प्रान्तानां लेखानां च सम्बन्धे भारतस्य महालेखापरीक्षकाय प्रदत्तानि आसन् तेन प्रयोक्तव्यानि वा आसन्।

[1]**[१५०. सङ्घस्य राज्यानां च लेखानां प्ररूपम्-** तादृशेन रूपेण सङ्घस्य राज्यानां च लेखाः रक्षिताः भवेयुः यादृशेन रूपेण भारतस्य नियन्त्रकमहालेखापरीक्षकस्य [2][मन्त्रणां प्राप्य] राष्ट्रपतिः विदधीत।]

१५१. लेखापरीक्षाप्रतिवेदनानि- (१) भारतस्य नियन्त्रकमहालेखापरीक्षकस्य सङ्घस्य लेखाभिः सम्बध्यमानानि प्रतिवेदनानि राष्ट्रपतेः पुरतः स्थापितानि भवेयुः यः तानि संसदः प्रत्येकं सदनस्य समक्षं संनिधापयेत्।

(२) भारतस्य नियन्त्रकमहालेखापरीक्षकस्य राज्यस्य लेखाभिः सम्बध्यमानानि प्रतिवेदनानि तद्राज्यसम्बन्धिनः राज्यपालस्य [3][* * *] पुरतः स्थापितानि भवेयुः यः तानि राज्यविधानमण्डलस्य समक्षं संनिधापयेत्।

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २७-अनुभागेन १५०-तमानुच्छेदात् प्रति एषः संनिवेशितः (१-४-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः १९७८ इत्यस्य २२-अनुभागेन "विमर्शानन्तरं" इत्येतस्मात् प्रति एतत् संनिवेशितम् (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभानेन "राजप्रमुखस्य वा" इत्येतौ शब्दौ लोपितौ।

भागः ६

भागः ६- [1][* * *] राज्यानि

अध्याय : १-साधारणम्

१५२. परिभाषा- अस्मिन् भागे, यावत् सन्दर्भेण अन्यथा अपेक्षितं न स्यात्, तावत् "राज्य" शब्दः [2][जम्मूकश्मीरराज्यं नान्तर्भावयति ।]

अध्याय : २-कार्यपालिका

राज्यपालः

१५३. राज्यानां राज्यापालः- प्रत्येकं राज्यस्य कृते एकः राज्यपालः भवेत्- [3][परन्तु एतदनुच्छेदगतं किमपि, कस्यापि एकस्य जनस्य, द्वयोः, अधिकानां वा राज्यानां कृते राज्यपालरूपेण नियुक्तिं न निवारयेत् ।]

१५४. राज्यस्य कार्यपालिका शक्तिः- (१) राज्यस्य कार्यपालिका शक्तिः राज्यपाले निहिता भवेत्, सः एतस्याः प्रयोगम् अस्य संविधानस्य अनुसारेण स्वयं, स्वस्य अधीनस्थानां पदाधिकारिणां द्वारा वा, कुर्यात् ।

(२) एतदनुच्छेदगतं किमपि-

(क) अन्यस्मै कस्मै अपि प्राधिकारिणे, केनापि विद्यमानविधिना प्रदत्तानि कानि अपि कृत्यानि राज्यपाले अन्तरितानि करोति, इति न मन्येत; अथवा

(ख) राज्यपालस्य कस्मै अपि अधीनप्राधिकारिणे कृत्यानां विधिना प्रदानात् संसदं राज्यस्य विधानमण्डलं वा, न निवारयेत् ।

१५५. राज्यपालस्य नियुक्तिः- राज्यस्य राज्यपालः राष्ट्रपतिना स्वहस्ताङ्कितेन मुद्रासहिताधिपत्रेण नियुक्तः भवेत् ।

१५६. राज्यपालस्य पदावधिः- (१) राज्यपालः राष्ट्रपतेः प्रसादपर्यन्तं पदं धारयेत् ।

(२) राज्यपालः, राष्ट्रपतिं सम्बोध्य लिखितेन स्वहस्ताङ्कितेन लेखेन स्वपदं त्यक्तुं क्षमते ।

(३) अस्य अनुच्छेदस्य पूर्वगामिनाम् उपबन्धानाम् अधीनम्, राज्यपालः स्वपदारोहणस्य दिनात् पञ्चवर्षावधिं यावत् पदं धारयेत्-

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च प्रथमानुसूचीस्थाः (क)-भागीय" इति शब्दाः लोपिताः ।

[2] उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च "प्रथमानुसूचीस्थ (क)-भाग उल्लिखितराज्यमभिदधाति" इत्येतस्मात् प्रति एतत् संनिवेशितम् ।

[3] उपर्युक्ताधिनियमस्य ६-अनुभागेन एषः पारन्तुकः परिवर्धितः ।

परन्तु राज्यपालः स्वपदावधेः समाप्तौ अपि तावत् पदधारणम् अनुवर्तयेत् यावत् तस्य उत्तराधिकारी स्वपदं न आरोहति।

१५७. राज्यपालरूपेण नियुक्तये अर्हताः- सः एव जनः राज्यपालरूपेण नियुक्तेः पात्रं भवेत्, यः भारतस्य नागरिकः अस्ति, यश्च वयसः पञ्चत्रिंशद्वर्षाणि पूरितवान्।

१५८. राज्यपालस्य प्रतिबन्धाः- (१) राज्यपालः संसदः अन्यतरस्मिन् सदने प्रथमानुसूच्यां विनिर्दिष्टस्य कस्यापि वा राज्यस्य विधानमण्डलस्य एकतरस्य सदनस्य सदस्यः न भवेत्; किञ्च यदि संसदः अन्यतरस्य सदनस्य प्रथमानुसूच्यां विनिर्दिष्टस्य कस्यापि वा राज्यस्य विधानमण्डलस्य एकतरस्य सदनस्य वा सदस्यः राज्यपालरूपेण नियुक्तः भवेत्, तर्हि सः तस्मिन् सदने तस्मिन् दिनाङ्के रिक्तीकृतस्थानः मन्येत यस्मिन् सः राज्यपालरूपेण स्वपदम् आरोहति।

(२) राज्यपालः अन्यत् किमपि लाभस्य पदं न धारयेत्।

(३) राज्यपालः विना भाटकप्रदानं स्वपदावासानाम् उपयोगे स्वत्ववान् भवेत्, किञ्च तादृशेषु उपलब्धिषु, भक्तेषु, विशेषाधिकारेषु चापि स्वत्ववान् भवेत् यादृशानि संसदा विधिना अवधारितानि भवेयुः; किञ्च यावत् एतदर्थम् एवम् उपबन्धः न क्रियेत तावत् तादृशेषु उपलब्धिषु, भक्तेषु, विशेषाधिकारेषु च स्वत्ववान् भवेत् यादृशानि द्वितीयानुसूच्यां विनिर्दिष्टानि सन्ति।

[1][(३क) यत्र एक एव जनः द्वयोः अधिकानां वा राज्याना राज्यपालरूपेण नियुक्तः भवति तत्र तस्मै राज्यपालाय देयानि उपलब्धयः भक्तानि च एतेषां राज्यानां मध्ये तादृशेन अनुपातेन आवष्टितानि भवेयुः यादृशं राष्ट्रपतिः आदेशेन अवधारयेत्।]

(४) राज्यपालस्य उपलब्धयः भक्तानि च तस्य पदावधौ न न्यूनीकृतानि भवेयुः।

१५९. राज्यपालस्य शपथः प्रतिज्ञानं वा- प्रत्येकं राज्यपालः, राज्यपालस्य कृत्यानि निर्वहन् वा प्रत्येकं जनः, स्वपदारोहणात् प्राक् तद्राज्यस्य सम्बन्धे अधिकारितायाः प्रयोक्तुम् उच्चन्यायालयस्य मुख्यन्यायमूर्तेः, तस्य अनुपस्थितौ तन्न्यायालयस्य उपलभ्यज्येष्ठतमन्यायाधीशस्य वा समक्षं शपथं, प्रतिज्ञानं वा निम्नलिखिते प्ररूपे कुर्यात् तं च स्वहस्ताङ्कितं कुर्यात् तद्यथा-

अहम् अमुकः ईश्वरस्य नाम्ना शपे / सत्यनिष्ठया प्रतिजाने यद् अहं श्रद्धापूर्वकं....... (राज्यस्य नाम) राज्यपालस्य कार्यपालनं करिष्यामि (अथवा राज्यपालस्य कृत्यानि निर्वक्ष्यामि), तथा च मम सम्पूर्णयोग्यतया संविधानस्य विधेश्च परिरक्षणं, संरक्षणं, प्रतिरक्षणं च करिष्यामि किञ्च अहं......... (राज्यस्य नाम) जनतायाः सेवार्थं कल्याणार्थं च निरतः भविष्यामि।

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६, इत्यस्य ७-अनुभागेन एषः खण्डः अन्तर्वेशितः।

१६०. आकस्मिकताविशेषेषु राज्यपालस्य कृत्यानां निर्वहणं- राष्ट्रपतिः तादृशान् उपबन्धान् कर्तुं क्षमते यादृशान्, अस्मिन् अध्याये यस्याः कृते उपबन्धः कृतः न भवेत् तादृश्याम् आकस्मिकतायां, राज्यस्य राज्यपालस्य कृत्यानां निर्वहणार्थं सः उचितान् मन्यते।

१६१. क्षमादीनाम् अनुदाने अभियोगविशेषेषु च दण्डादेशानां निलम्बने, परिहारे, लघूकरणे वा राज्यपालस्य शक्तिः- यस्मिन् विषये राज्यस्य कार्यपालिकाशक्तिः विस्तारम् आप्नोति तेन विषयेण सम्बध्यमानस्य कस्यापि विधेः विरुद्धे अपराधे राज्यस्य राज्यपालः सिद्धदोषस्य कस्यापि जनस्य दण्डे क्षमाणां प्रविलम्बनानां विरामाणां परिहाराणां वा अनुदानाय, दण्डादेशस्य वा निलम्बनाय, परिहाराय लघुकरणाय वा शक्तिं भजेत।

१६२. राज्यस्य कार्यपालिकायाः शक्तेः विस्तारः- अस्य संविधानस्य उपबन्धानाम् अधीनं राज्यस्य कार्यपालिकाशक्तिः तेषु विषयेषु विस्तृता भवेत् येषां सम्बन्धे तद्राज्यस्य विधानमण्डलं विधिप्रणयने शक्तिं भजते-

परन्तु राज्यस्य विधानमण्डलं, संसत् च यस्मिन् विषये विधिं प्रणेतुं शक्तिं भजते तस्मिन् कस्मिन् अपि विषये राज्यस्य कार्यपालिका शक्तिः संसदा प्रणीतेन केनापि विधिना, अनेन संविधानेन वा सङ्घाय, तत्प्राधिकारिभ्यः स्पष्टतया प्रदत्तायाः शक्तेः अधीना, तादृश्या शक्त्या परिसीमिता च भवेत्।

मन्त्रिपरिषत्

१६३. राज्यपालाय साहाय्यस्य मन्त्रणायाश्च प्रदानार्थं मन्त्रिपरिषत्- (१) अनेन संविधानेन तदधीनं वा येषु विषयेषु राज्यापालात् अपेक्ष्यते यत् सः स्वकृत्यानि तेषाम् अन्यतमं किमपि वा स्वविवेकानुसारं कुर्यात् तानि व्यतिरिच्य, राज्यपालाय स्वकृत्यानां प्रयोगे साहाय्यं मन्त्रणां च प्रदातुं मन्त्रिपरिषद् भवेत् यस्याः प्रमुखश्चः मुख्यमन्त्री भवेत्।

(२) यस्मिन् विषये राज्यपालः, एतत्संविधानेन तदधीनं वा, स्वविवेकानुसारं कार्यं कर्तुम् अपेक्षितः अस्ति तद्रूपः अयं विषयः, तदन्यः वा अयं विषयः इति कोऽपि प्रश्नः यदि उत्पन्नः भवेत् तदा राज्यपालेन स्वविवेकानुसारं तस्य प्रश्नस्य कृतः विनिश्चयः अन्तिमः भवेत्; तथा च राज्यपालेन कृतस्य कस्यापि कार्यस्य विधिमान्यता तेन स्वविवेकानुसारं कृतं कार्यम् अर्हम् आसीत् न वा इति आधारेण प्रश्नगता न क्रियेत।

(३) राज्यपालाय मन्त्रिभिः काचिन्मन्त्रणा दत्ता न वा, यदि च दत्ता तर्हि का सा मन्त्रणा इति प्रश्नस्य कस्मिन् अपि न्यायालये मीमांसा न क्रियेत।

१६४. मन्त्रिसम्बन्धिनः अन्ये उपबन्धाः- (१) राज्यपालः मुख्यमन्त्रिणः नियुक्तिं कुर्यात्; अन्येषां मन्त्रिणां नियुक्तिं च राज्यपालः मुख्यमन्त्रिणः मन्त्रणाम् अनुसृत्य कुर्यात्; मन्त्रिणश्च राज्यपालस्य प्रसादपर्यन्तं पदं धारयेयुः-

परन्तु [1][छत्तीसगढ़ः झारखण्डः]-मध्यप्रदेश-[2]ओडिशाराज्येषु जनजातीनां कल्याणस्य भारसाधकः एकः मन्त्री भवेत्, यः तदितरं च अनुसूचितजातीनाम् अप्रगतवर्गाणां च कल्याणस्य अन्यस्य कस्यापि कार्यस्य भारसाधकः भवेत्।

[3][(१क) राज्ये मन्त्रिपरिषदि मुख्यमन्त्रिणा सह मन्त्रिणाम् आहत्य सङ्ख्या राज्यस्य विधानसभायाः सदस्यानां सङ्ख्यायाः पञ्चदशप्रतिशतात् अधिका न भवेत्।

परन्तु, कस्मिन् अपि राज्ये मन्त्रिपरिषदि मुख्यमन्त्रिणा सह मन्त्रिणाम् आहत्य सङ्ख्या द्वादशतः न्यूना न भवेत्।

अपि च, संविधानस्य (एकनवतितमं संशोधनम्) अधिनियमः, २००३ इत्यस्य प्रारम्भे यदि राज्ये मन्त्रिपरिषदि मुख्यमन्त्रिणा सह मन्त्रिणाम् आहत्य सङ्ख्या राज्यस्य विधानसभासदस्यानां सङ्ख्यायाः पूर्वोक्तपञ्चदशप्रतिशतात् अधिका भवेत्, अथवा प्रथमपारन्तुके निर्दिष्टसङ्ख्यातः अधिका भवेत्, तत्र राज्ये मन्त्रिणाम् आहत्य सङ्ख्या, राष्ट्रपतिना लोकाधिसूचनया [4]निर्दिष्टदिनाङ्कात् षण्मासाभ्यन्तरे अस्य खण्डस्य उपबन्धनानुरूपम् अनुकृतिं नीयेत।

(१ख) कस्यचित् राजनीतिकदलस्य, कस्याश्चित् राज्यस्य विधानसभायाः वा, कस्यचित् विधानपरिषदा युक्तस्य राज्यस्य विधानमण्डलस्य कस्यचिद् सदनस्य वा, कश्चित् सदस्यः, यः दशमानुसूच्याः द्वितीयगद्यांशस्य अधीनं तस्य सदनस्य सदस्यतायै निरर्हितः, तस्य निरर्हताकालप्रभृतिः तस्य कार्यालयीयपदावधेः समाप्तिपर्यन्तम्, अथवा यदा सः तादृक्-अवधेः समाप्तिपूर्वं कस्याश्चित् राज्यविधानसभायाः, विधानपरिषदा युक्तस्य विधानमण्डलस्य कस्यचिद् सदनस्य वा कृते निर्वचने प्रतिभागी भवति तदा तस्य निर्वाचनस्य कालपर्यन्तम्, एतयोः यत्पूर्वतनं, सः १-अनुभागस्य अधीनं मन्त्रिपदे नियुक्त्यै अपि निरर्हितो भवेत्।

(२) मन्त्रिपरिषद् राज्यस्य विधानसभां प्रति समष्टिरूपेण उत्तरदायिनी भवेत्।

(३) कस्यापि मन्त्रिणः स्वपदारोहणात् प्राक्, राज्यपालः तेन पदस्य गोपनीयतायाश्च तृतीयानुसूच्यां तदर्थं निर्दिष्टे प्रारूपे शपथं कारयेत्।

---

1 संविधानस्य (चतुर्नवतितमं संशोधनम्) अधिनियमः, २००६ वर्षस्य २-अनुभागेन (१२-६-२००६ दिनाङ्कात् प्रवर्तमानप्रभावेण) बिहारस्य स्थाने संनिवेशितः।

2 उडीसा (नामपरिवर्तनम्) अधिनियमः, २०११ (२०११ वर्षस्य १५) इत्यस्य ४-अनुभागेन (१-११-२०११ दिनाङ्कात् प्रवर्तमानप्रभावेण) "उडीसा" इत्यस्य स्थाने संनिवेशितः।

3 संविधानस्य (एकनवतितमं संशोधनम्) अधिनियमः, २००३, ३-अनुभागेन एषः खण्डः अन्तर्वेशितः (१-१-२००४ दिनाङ्कात् प्रवर्तमानप्रभावेण)

4 द्रष्टव्या अधिसूचना सं का.आ. २१(ङ), (दिनाङ्कः ७-१-२००४)।

(४) यः मन्त्री निरन्तरं षण्णां मासानां कस्मिन् अपि कालावधौ राज्यविधानमण्डलस्य सदस्यः न भवेत् सः तस्य कालावधेः समाप्तौ मन्त्रित्वात् प्रविरमेत्।

(५) मन्त्रिणां वेतनानि, भत्तानि च तादृशानि भवेयुः यादृशानि राज्यविधानमण्डलं काले काले विधिना अवधारयेत्; अथ च यावद् राज्यविधानमण्डलं एवं न अवधारयेत् तावत् तानि तथा भवेयुः यथा द्वितीयानुसूच्या विनिर्दिष्टानि सन्ति।

राज्यस्य महाधिवक्ता

१६५. राज्यस्य महाधिवक्ता- (१) प्रत्येकं राज्यस्य राज्यपालः उच्चन्यायालयस्य न्यायाधीशरूपेण नियुक्तेः अर्हं कमपि जनं राज्यस्य महाधिवक्तृत्वेन नियोजयेत्।

(२) महाधिवक्तुः एतत् कर्तव्यं भवेत् यत् सः तद्राज्यशासनाय तादृशेषु विधिसम्बन्धिविषयेषु मन्त्रणायाः प्रदानं, तादृशानां च विधिरूपाणाम् अन्येषां कर्तव्यानां पालनं च कुर्यात् यादृशानि काले काले तस्मै राज्यपालेन निर्दिष्टानि अर्पितानि वा स्युः, तथा च सः अनेन संविधानेन तदधीनं वा तदानीं प्रवृत्तेन केनापि अन्येन विधिना तदधीनं वा आत्मनः प्रदत्तानि कृत्यानि निर्वहेत्।

(३) महाधिवक्ता राज्यपालस्य प्रसादपर्यन्तं स्वपदं धारयेत्, तादृशं पारिश्रमिकं च प्राप्नुयात् यादृशं राज्यपालः अवधारयेत्।

शासनकार्यस्य सञ्चालनम्

१६६. राज्यशासनकार्यस्य सञ्चालनम् -(१) राज्यस्य सर्वा कार्यपालिका कृतिः राज्यपालस्य नाम्ना कृता इति कथ्येत।

(२) राज्यपालस्य नाम्ना दत्तानां निष्पादितानां च आदेशानाम्, अन्येषां लिखितानां च अधिप्रमाणीकरणं तादृश्या रीत्या भवेत् यादृशी राज्यपालेन प्रणेतव्येषु नियमेषु विनिर्दिष्टा स्यात्; किं च एवम् अधिप्रमाणितस्य आदेशस्य लिखितस्य वा विधिमान्यता न प्रश्नगता क्रियेत, यद् अयम् आदेशः, इदं लिखितं वा न प्रणीतं निष्पादितं या राज्यपालेन इति आधारेण।

(३) अनेन संविधानेन तदधीनं वा येषु विषयेषु राज्यपालात् अपेक्ष्यते यत् सः स्वविवेकानुसारं राज्यकृत्यानि कुर्यात्, तानि व्यतिरिच्य, राज्यकार्यस्य अधिकसौकर्येण निर्वर्तनाय मन्त्रिणां मध्ये उक्तकार्यस्य आवण्टनाय च राज्यपालः नियमान् प्रणयेत्।

[1](4) * * * * *

१६७. राज्यपालाय सूचनादिविषयकाणि मुख्यमन्त्रिणः कर्तव्यानि- (क) राज्यकार्याणां प्रशासनविषये मन्त्रिपरिषदः सर्वेषां विनिश्चयानां, विधानार्थं प्रस्थापमानां च राज्यस्य राज्यपालाय संसूचनम्;

(ख) राज्यकार्याणां प्रशासनविषये विधानार्थं प्रस्थापना विषये च राज्यपालाय तादृशं सूचनं यादृशं स अपेक्षेत; किञ्च

(ग) यस्मिन् विषये केनापि मन्त्रिणा विनिश्चयः कृतः किन्तु मन्त्रिपरिषदा विचारः कृतः नास्ति, तस्य कस्यापि विषयस्य मन्त्रिपरिषदः विचारार्थं पुरतः स्थापनं यदि राज्यपालः एवम् अपेक्षते, इत्येतत् प्रत्येकं राज्यस्य मुख्यमन्त्रिणः कर्तव्यं भवेत्।

अध्यायः ३- राज्यस्य विधानमण्डलम्

साधारणम्

१६८. राज्यस्य विधानमण्डलम्- (१) प्रत्येकं राज्यस्य विधानमण्डलं भवेत् यत् राज्यपालेन तथा (क) [2]*** [3][आन्ध्रप्रदेशः] बिहार- [4][***] [5][***] [6][तमिलनाडु-] [7][महाराष्ट्र-] [8][कर्णाटक-] [9][***]

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २८-अनुभागेन अन्तर्वेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण); संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः १९७८, इत्यस्य २३-अनुभागेन लोपितश्च (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 "आन्ध्र-प्रदेशः" शब्दौ आन्ध्रप्रदेश-विधानपरिषद्-(उत्सादन)-अधिनियमः, १९८५ (१९८५ वर्षस्य ३४) इत्यस्य ४-अनुभागेन (१-६-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितौ।

3 आन्ध्रप्रदेश-विधानपरिषद्-अधिनियमः, २००५ (२००६ वर्षस्य १) इत्यस्य ३-अनुभागेन (३०-३-२००७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

4 "मुम्बई" इति शब्दः मुम्बईपुनर्घटनम् अधिनियमः १९६० (१९६० वर्षस्य ११) इत्यस्य २०-अनुभागेन लोपितः (१-५-१९६० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

5 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २-अनुभागेन "मध्यप्रदेशः" इति शब्दस्य एतस्मिन् उपखण्डे अन्तर्वेशनाय दिनाङ्कः नियतः नास्ति।

6 तमिलनाडुविधानपरिषद् (उत्सादन)-अधिनियमः, १९८६ (१९८६ वर्षस्य ४०) इत्यस्य ४-अनुभागेन (१-११-१९८६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "तमिलनाडुः" शब्दः लोपितः।

7 मुम्बई-पुनर्घटनम् अधिनियमः १९६० (१९६० वर्षस्य ११) इत्यस्य २०-अनुभागेन अन्तर्वेशितः (१-५-१९६० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

8 मैसूरराज्य- (नामपरिवर्तनम्) अधिनियमः, १९७३ (१९७३ वर्षस्य ३१) इत्यस्य ४-अनुभागेन "मैसूर" इत्येतस्मात् प्रति "कर्णाटक" इति शब्दः संनिवेशितः (१-११-१९७३ दिनाङ्कात् प्रवर्तमानप्रभावेण)। "मैसूर" इतिशब्दः संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य ८ (१)-अनुभागेन अन्तर्वेशितः आसीत्।

9 "पञ्जाब" इति शब्दः पञ्जाबविधानपरिषदः (उत्सादनम्) अधिनियमः] १९६९ (१९६९ वर्षस्य ४६) इत्यस्य ४-अनुभागेन लोपितः (७-१-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[1][[2][तमिलनाडुः, तेलंगाना]] [3][उत्तरप्रदेश] राज्येषु द्वाभ्यां सदनाभ्याम्

(ख) अन्येषु राज्येषु एकसदनेन (च) सम्भूय भवेत्।

(२) यत्र राज्यविधानमण्डलस्य द्वे सदने स्तः, तत्र तयोः एकं विधानपरिषद् इति अपरं च विधानसभा इति विज्ञातं भवेत्; यत्र च केवलम् एकं सदनं अस्ति तत्र तद् विधानसभा इति विज्ञातं भवेत्।

१६९. राज्येषु विधानपरिषदाम् उत्सादनं, सर्जनं वा- (१) १६८-तमानुच्छेदे किमपि सत्यपि विधानपरिषदि राज्ये एतादृश्याः परिषदः उत्सादनाय, एतादृश्या परिषदा रहिते राज्ये एतादृश्याः परिषदः सर्जने वा, संसद् विधिना उपबन्धयितुं क्षमते, यदि राज्यस्य विधानसभा एतद् उद्दिश्य सङ्कल्पं तत् सभायाः सदस्यानां समस्त सङ्ख्यायाः बहुमतेन उपस्थितानां मतं ददतां च सदस्यानां सङ्ख्यायाः तृतीयांशद्वयात् अन्यूनेन बहुमतेन च पारयति।

(२) (१) खण्डे निर्दिष्टः कोऽपि विधिः अस्य संविधानस्य संशोधनाय तादृशान् उपबन्धान् अन्तर्विष्टान् कुर्यात् यादृशाः तद् विधेः उपबन्धान् कार्यक्षमान् कर्तुम् आवश्यकाः स्युः; किं च तादृशान् अनुपूरकान् आनुषङ्गिकान् पारिणामिकान् च उपबन्धान् अन्तर्विष्टान् कर्तुं क्षमते यादृशान् संसद् आवश्यकान् मन्येत।

(३) पूर्वोक्तसदृशः कोऽपि विधिः ३६८-तमानुच्छेदस्य प्रयोजनानां कृते अस्य संविधानस्य संशोधनं इति न मन्येत।

[4]**[१७०. विधानसभानां संरचना-** (१) ३३३-तमानुच्छेदस्य उपबन्धानाम् अधीनं, प्रत्येकराज्यस्य विधानसभा तद्राज्यगतप्रादेशिकनिर्वाचनक्षेत्रेभ्य प्रत्यक्षं निर्वाचनेन वृतैः पञ्चाशतात् अधिकः षष्टितः अन्यूनैश्च सदस्यैः सम्भूय भवेत्।

(२) (१) खण्डस्य प्रयोजनानां कृते प्रत्येकं राज्यम् एतादृश्या रीत्या प्रादेशिकनिर्वाचनक्षेत्रेषु विभज्येत यत् प्रत्येकनिर्वाचनक्षेत्रस्य जनसङ्ख्यायाः तद् प्रति आवण्टितानां स्थानानां सङ्ख्यायाश्च मध्ये अनुपातः समस्तराज्ये यथासाध्यम् एकविधः भवेत्।

---

1 तमिलनाडु-विधान-परिषद्-अधिनियमः, २०१० (२०१० वर्षस्य १६) इत्यस्य ३-अनुभागेन (अधिसूचनायाः दिनाङ्कात्) अन्तर्वेशितः।

2 आन्ध्रप्रदेश-(पुनर्घटन)-अधिनियमः, २०१४ (२०१४ वर्षस्य ६) इत्यस्य ९६-अनुभागेन (१-६-२०१४ दिनाङ्कात् प्रवर्तमानप्रभावेण) "तमिलनाडु" इत्यस्य स्थाने संनिवेशितः।

3 पश्चिमबङ्गालविधानपरिषदः (उत्सादनम्) अधिनियमः, १९६९ (१९६९ वर्षस्य २०) इत्यस्य ४-अनुभागेन "युक्तप्रान्त (उत्तरप्रदेश) पश्चिमबङ्गालानाम्" इति एतस्मात् प्रति "उत्तरप्रदेश" इति एतत् संनिवेशितम् (१-८-१९६९ दिनाङ्कात् प्रवर्तमानप्रभावेण)"।

4 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः १९५६ इत्यस्य ९-अनुभागेन १७० तमानुच्छेदात् प्रति एषः संनिवेशितः।

[1][*स्पष्टीकरणम्-* अस्मिन् खण्डे "जनसङ्ख्या" शब्दस्य अर्थे सा जनसङ्ख्या ग्राह्या या तस्याम् अन्तिमायां पूर्ववृत्तायां जनगणनायाम् अभिनिश्चिताः यस्याः सुसम्बद्धाः अङ्काः प्रकाशिताः-

परन्तु एतस्मिन् स्पष्टीकरणे "अन्तिमायां पूर्ववृत्तायां जनगणनायां यस्याः सुसम्बद्धाः अङ्काः प्रकाशितः" इति निर्देशस्य तावत् [2][२००१] वर्षस्य जनगणनां प्रतिनिर्देशः इति अर्थः ग्रामः यावत् [3][२०२६ इति]-वर्षानन्तरं कृतायाः जनगणनायाः सुसम्बद्धाः अङ्काः प्रकाशिताः न भवेयुः ।]

(३) प्रत्येकजनगणनायाः समाप्तौ प्रत्येकराज्यस्य विधानसभास्थानानां समस्तसङ्ख्यायाः प्रत्येकं राज्यस्य प्रादेशिकनिर्वाचनक्षेत्रेषु विभाजनस्य च तादृशेन प्राधिकारिणा तादृश्या रीत्या च पुनः समायोजनं क्रियेत यत् संसद् विधिना अवधारयेत्

परन्तु एतादृशं पुनः समायोजनं विधानसभायाः प्रतिनिधित्वे तावत् प्रभावं न आपादयेत् यावत् तदानीं विद्यमानायाः विधानसभायाः विघटनं न भवति ।]

[4]अपरं च एतादृशं पुनः समायोजनं तस्मात् दिनात् प्रभावं आपादयेत् यद् राष्ट्रपतिः आदेशेन विनिर्दिशेत्; तथा च यावत् एतादृशं पुनः समायोजनं प्रभावं न आपादयति तावत् विधानसभायाः कृते किमपि निर्वाचनं तेषां निर्वाचनक्षेत्राणां आधारेण भवेत् यानि एतादृशात् पुनः समायोजनात् पूर्वं विद्यमानानि स्युः ।

तथैव च यावत् [2][२०२६ इति] वर्षानन्तरं कृतजनगणनायाः सुसम्बद्धाः अङ्काः प्रकाशिताः न भवेयुः तावत् एतत् खण्डस्य अधीनं प्रत्येकराज्यस्य विधानसभायां स्थानानां समस्तसङ्ख्यायाः अथ च तेषां राज्यानां प्रादेशिक-निर्वाचनक्षेत्रेषु विभाजनस्य समायोजनम् आवश्यकं न भवेत्, [5][अस्य खण्डस्य अधीनम्,-

(i) प्रत्येकं राज्यस्य विधानसभायां १९७१ वर्षस्य जनगणनायाः आधारे पुनः समायोजितानां स्थानानां सकलसङ्ख्यायाः; तथा

(ii) एतादृशाः राज्यस्य प्रादेशिकेषु निर्वाचनन्क्षेत्रेषु विभाजनस्य, ये [3][२००१] वर्षस्य जनगणनायाः आधारे पुनःसमायोजिताः भवेयुः ।]

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २९-अनुभागेन स्पष्टीकरणात् प्रति एतत् संनिवेशितम् (३-१-१९७७ दिनाङ्कात् प्रवर्तनप्रभावेण)।

2 संविधानस्य (चतुरशीतितमं संशोधनम्) अधिनियमः, २००१ वर्षस्य ५-अनुभागेन (२१-२-२००२ दिनाङ्कात् प्रवर्तमानप्रभावेण) "२०००" इत्यस्य स्थाने संनिवेशितः।

3 संविधानस्य (सप्ताशीतितमं संशोधनम्) अधिनियमः, २००३ वर्षस्य ४-अनुभागेन (२६-६-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) "१९९१" इत्यस्य स्थाने संनिवेशितः; संविधानस्य (चतुरशीतितमं संशोधनम्) अधिनियमः, २००१ वर्षस्य ५-अनुभागेन (२१-२-२००२ दिनाङ्कात् प्रवर्तमानप्रभावेण) मूलाङ्कस्य "१९७१ इत्यस्य स्थाने १९९१ इतीमे अङ्काः" प्रतिस्थापिताः।

4 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य २९-अनुभागेन अन्तर्वेशितम् (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

5 संविधानस्य (चतुरशीतितमं संशोधनम्) अधिनियमः, २००१ वर्षस्य ५-अनुभागेन (२१-२-२००२ दिनाङ्कात् प्रवर्तमानप्रभावेण) केषांचित् शब्दानां स्थाने संनिवेशितः।

भारतस्य संविधानम्

(भागः ६-राज्यानि)

१७१. विधानपरिषदां संरचना- (१) विधानपरिषद्वतः राज्यस्य विधानपरिषदः सदस्यानां समस्तसङ्ख्या तद्राज्यविधानसभायाः सदस्यानां समस्तसङ्ख्यायाः [1][तृतीयांशात्] अधिका न भवेत्-

परन्तु कस्यामपि अवस्थायां कस्यापि राज्यस्य विधानपरिषदः सदस्यानां समस्तसङ्ख्या चत्वारिंशत्तः न्यूना न भवेत्।

(२) यावत् संसद् विधिना अन्यथा उपबन्धं न करोति तावत् राज्यविधानपरिषदः रचना (३) खण्डे उपबन्धितरीत्या भवेत्।

(३) राज्यविधानपरिषदः समस्तसङ्ख्यायाः-

(क) यथाशक्यं तृतीयांशः तस्य राज्यस्य नगरपालिकानां मण्डलमण्डलीनां, तादृशानाम् अन्येषां स्थानीयानां प्राधिकरणानां यादृशानि संसद् विधिना विनिर्दिशेत्, सदस्यैः सम्भूय भूतैः निर्वाचकमण्डलैः निर्वाचितः भवेत्;

(ख) यथाशक्यं द्वादशांशः तस्मिन् राज्ये निवासिभिः तैः जनैः सम्भूय भूतैः निर्वाचकमण्डलैः निर्वाचितः भवेत् ये भारतराज्यक्षेत्रीयस्य कस्यापि विश्वविद्यालयस्य न्यूनात् न्यूनं वर्षत्रयं स्नातकाः सन्ति अथवा ये न्यूनात् न्यूनं वर्षत्रयं, तादृशीः अर्हताः धारितवन्तः सन्ति यादृशी संसत्प्रणीतेन केनापि विधिना तदधीनं वा कस्यापि विश्वविद्यालयस्य स्नातकेन तुल्याः इति विहिताः सन्ति;

(ग) यथाशक्यं द्वादशांशः तैः जनैः सम्भूय भूतैः निर्वाचकमण्डलैः निर्वाचितः भवेत् ये तद्राज्यस्य अभ्यन्तरे माध्यमिकपाठशालाभ्यः अनिम्नतरस्तरीयासु तादृशीषु शिक्षासंस्थासु अध्यापने न्यूनात् न्यूनं वर्षत्रयं व्यापृताः सन्ति यादृश्यः संसत् प्रणीतेन केनापि विधिना तदधीनं वा विहिताः सन्ति;

(घ) यथाशक्यं तृतीयांशः तद्राज्यविधानसभायाः सदस्यैः तत् सभायाः असदस्येभ्यः निर्वाचितः भवेत्

(ङ) शेषाः सदस्याः राज्यपालेन (५)-खण्डगतोपबन्धान् अनुसृत्य नामनिर्देशिताः भवेयुः।

(४) (३) खण्डस्य (क), (ख), (ग) उपखण्डानाम् अधीनं निर्वाचनीयाः सदस्याः तादृशेषु प्रादेशिकेषु निर्वाचनक्षेत्रेषु वृताः भवेयुः यादृशानि संसत् प्रणीतेन केनापि विधिना तदधीनं वा विहितानि भवेयुः तथा च उक्त-उपखण्डानाम् अधीनम् उक्तखण्डस्य (घ) उपखण्डस्य अधीनं च निर्वाचनानि आनुपातिकप्रतिनिधित्व पद्धतिम् अनुसृत्य एकलसङ्क्रमणीयमतेन कृतानि भवेयुः।

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य १०-अनुभागेन "एकचतुर्थांशात्" इति शब्दात् प्रति एषः शब्दः संनिवेशितः।

(५) (३) खण्डस्य (ङ) उपखण्डाधीनं राज्यपालेन कृतनामनिर्देशाः सदस्याः निम्नलिखितविषयाणां विशेषज्ञानिनः व्यावहारिकानुभववन्तश्च भवेयुः; तद् यथा-

साहित्यम्, विज्ञानम्, कला, सहकार्यान्दोलनम्, सामाजिकसेवा च।

१७२. राज्यानां विधानमण्डलस्य सदस्यतायै अर्हता- (१) प्रत्येकं राज्यस्य प्रत्येकं विधानसभा यदि पूर्वतरं न विघटिता स्यात् तर्हि स्वप्रथमाधिवेशनाय नियतात् दिनाङ्कात् *[1][पञ्चवर्षाणि] अनुवर्तेत न तदधिकम्, [1]उक्तपञ्चवर्षकालावधेः समाप्तिश्च तस्याः विधानसभायाः विघटने परिणमेत्-

परन्तु यदा आपातस्य उद्घोषणा प्रवर्तमाना अस्ति तदा संसद् उक्तकालावधिम् एकस्मिन् काले एकवर्षात् अनधिकं, तस्याः उद्घोषणायाः प्रवर्तनस्य पर्यवसानात् परं कस्यामपि अवस्थायां षण्मासावधिम् अनतीत्य च विधिना वर्धयितुं क्षमते-

(२) राज्यविधानपरिषदः विघटनं न भवेत् किन्तु तस्याः सदस्यानां यावत् शक्यं तृतीयांशः प्रत्येकद्वितीयवर्षस्य समाप्तौ संसदा तद्विषये विधिना प्रणीतान् उपबन्धान् अनुसृत्य यथासम्भवं शीघ्रं निवर्तेत।

१७३. राज्यविधानमण्डलस्य सदस्यत्वस्य अर्हता- कोऽपि जनः राज्यविधानमण्डले कस्यापि स्थानस्य पूर्तये वरणार्हः केवलं तदा भवेत् यदा सः-

[2][(क) भारतस्य नागरिकः अस्ति; तथा च निर्वाचनायोगेन एतदर्थं प्राधिकृतस्य कस्यापि जनस्य समक्षं एतत्प्रयोजनस्य कृते तृतीयानुसूच्याम् उल्लिखिते प्रारूपे शपथं प्रतिज्ञानं वा कुर्यात् तं च स्वहस्ताङ्कितं कुर्यात्।]

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य २४-अनुभागेन “षड्वर्षाणि” इत्येतस्मात् प्रति एतत् संनिवेशतिम् (६-९-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) “षड्वर्षाणि” इत्येतत् “पञ्चवर्षाणि” इत्येतस्मात् प्रति संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३०-अनुभागेन संनिवेशितम् आसीत् (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)

2 संविधानस्य (षोडशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य ४-अनुमानेन (क) खण्डात् प्रति एषः खण्डः संनिवेशितः।

(ख) विधानसभायाः स्थानाय अन्यूनपञ्चविंशद्वर्षवयस्कः, विधानपरिषदः स्थानाय च अन्यून-त्रिंशद्वर्षवयस्कः विद्यते; तथा च

(ग) तादृशीः अन्याः अर्हताः धारयान्ति यादृश्यः संसदा तद्विषये कृतेन केनापि विधिना तदधीनं या तदर्थं विहिताः भवेयुः ।]

[1][**१७४. राज्यविधानमण्डलस्य सत्राणि, सत्रावसानं, विघटनं च-** (१) राज्यपालः काले काले राज्यस्य विधानमण्डलस्य सदनं सदने या तादृशे काले तादृशे स्थाने च अधिवेशनाय आहूतम् आहूते वा कुर्यात् यादृशं सः युक्तं मन्येत किन्तु ईदृशस्य राज्यविधानमण्डलस्य सत्राणि, सत्राणाम् अवसानं विघटनं च एकस्य सत्रस्य अन्तिमोपवेशनस्य दिनाङ्कस्य तदनन्तरं भाविनः सत्रस्य प्रथमोपवेशनार्थं नियतदिनाङ्कस्य च मध्ये षण्णां मासानां व्यवधानं न भवेत्।

(२) राज्यपालः काले काले

(क) सदनस्य, सदनयोः अन्यतरस्य वा सत्रावसानं कर्तुम्,

(ख) विधानसभायाः विघटनं कर्तुं, च क्षमते।

१७५. राज्यपालस्य सदनं सदने वा प्रति आभिभाषणे सन्देशप्रेषणे च अधिकारः- (१) राज्यपालः विधानसभायाम् अथवा विधानपरिषद्वतः राज्यस्य सम्बन्धे तद्राज्यस्य विधानमण्डलस्य अन्यतरत्सदने, सहसमवेतयोः उभयोः वा सदनयोः वा अभिभाषणं कर्तुं क्षमते, तथा च तदर्थं सदस्यानाम् उपस्थितिम् अपेक्षितुं क्षमते।

(२) राज्यपालः तद्राज्यस्य विधानमण्डलस्य सदनं प्रति, सदने वा प्रति, तदानीं तस्मिन् विधानमण्डले लम्बितविधेयकम् उद्दिश्य अन्यथा वा, सन्देशान् प्रेषयितुं क्षमते; तथा च यत् सदनं प्रति कोऽपि सन्देशः एवं प्रेषितः अस्ति तत्सदनं तत्सन्देशेन विचाराय अपेक्षितं कमपि विषयं यथानुकूलं शीघ्रं विचारयेत्।

१७६. राज्यपालस्य विशेषाभिभाषणम्- (१) राज्यपालः [2][प्रत्येकसाधारणनिर्वाचनात् परं विधानसभायाः प्रथमसत्रस्य आरम्भे तथा च प्रत्येकवर्षस्य प्रथमसत्रस्य आरम्भे] विधानसभायाम् अथवा विधानपरिषद्वतः राज्यस्य सम्बन्धे एकत्रसमवेते सदनद्वये अभिभाषणं कुर्यात्; तथा च विधानमण्डलं तस्य आह्वानस्य कारणानि ज्ञापयेत्।

(२) एतादृशे अभिभाषणे निर्दिष्टानां विषयाणां चर्चार्थं समयं नियन्तुं [3]*** सदनस्य, अन्यतरत्ससदनस्य वा प्रक्रियायाः विनियमनं कुर्वद्भिः नियमैः उपबन्धः कृतः भवेत्।

---

1 संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य ८-अनुभागेन १७४-तमानुच्छेदात् प्रति एषः अनुच्छेदः संनिवेशितः।

2 उपर्युक्ताधिनियमस्य ९-अनुभागेन "प्रत्येकसत्रस्य" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

3 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन "तत् सदनस्य अन्यकार्यात् अस्याः पूर्ववर्तितायै च" इति शब्दाः लोपिताः।

(भागः ६-राज्यानि)

१७७. मन्त्रिणः महाधिवक्तुश्च सदनयोः सम्बन्धिताः अधिकाराः- राज्यस्य प्रत्येकमन्त्री, महाधिवक्ता च तद्राज्यस्य विधानसभायाम्, अथवा विधानपरिषद्वतः राज्यस्य सम्बन्धे उभयोः सदनयोः, भाषणाय अन्यथा च कार्यप्रवृत्तिषु भागग्रहणाय अधिकारं भजेत; तथा च विधान-मण्डलस्य यस्यां समितौ सः नामनिर्दिष्टः सदस्यः भवेत् तस्यां भाषणाय अन्यथा न कार्यप्रवृत्तिषु भागग्रहणाय अधिकारं भजेत किन्तु अस्य अनुच्छेदस्य आश्रयेण सः मतदाने स्वत्ववान् न भवेत्।

राज्यविधानमण्डलस्य अधिकारिणः

१७८. विधानसभायाः अध्यक्षः उपाध्यक्षश्च- प्रत्येकं राज्यस्य विधानसभा यथासम्भवं शीघ्रं स्वीयौ द्वौ सदस्यौ क्रमेण अध्यक्षरूपेण उपाध्यक्षरूपेण च वृणीत; तथा च यदा यदा अध्यक्षस्य उपाध्यक्षस्य वा पदरिक्तं भवति, तदा तदा सा सभा अन्यं सदस्यं यथायथम् अध्यक्षरूपेण उपाध्यक्षरूपेण वा वृणीत।

१७९. अध्यक्षस्य उपाध्यक्षस्य च पदरिक्तता, पदत्यागः पदात् अपसारणं च- विधानसभायाः अध्यक्षरूपेण उपाध्यक्षरूपेण वा पदं धारयन् सदस्यः

(क) स्वपदं रिक्तं कुर्यात् यदि सः तस्याः सभायाः सदस्यत्वात् प्रविरमेत्;

(स) यदि तादृशः सदस्यः अध्यक्षः अस्ति तर्हि उपाध्यक्षं, यदि च तादृशः सदस्यः उपाध्यक्षः अस्ति तर्हि अध्यक्षं, सम्बोध्य लिखितेन स्वहस्ताङ्कितेन लेखेन स्वपदं कदापि त्यक्तुं क्षमते; तथा च

(ग) तदानीन्तनानां तस्याः सभायाः सर्वेषां सदस्यानां बहुमतेन पारितेन तस्याः सभायाः सङ्कल्पेन स्वपदात् अपसारितः भवितुं शक्यते-

परन्तु (ग) खण्डस्य प्रयोजनाय कोऽपि सङ्कल्पः तावत् प्रस्तावितः न भवेत् यावत् तत्सङ्कल्पः प्रस्तावाशयस्य न्यूनात् न्यूनं चतुर्दशदिनानां सूचना न दत्ता भवेत्-

अपरं च यदा यदा सा सभा विघटिता भवेत् तदा तदा अध्यक्षः स्वपदं तद् विघटनात् परं तस्याः सभायाः प्रथमोपवेशनस्य अव्यवहितपूर्वकालपर्यन्तं न रिक्तीकुर्यात्-

१८०. उपाध्यक्ष्यस्य, अन्यस्य वा जनस्य अध्यक्षपदस्य कर्तव्यपालने अध्यक्षरूपेण कार्यकरणे वा शक्तिः- (१) यदा अध्यक्षस्य पदं रिक्तम् अस्ति तदा उपाध्यक्षेण, यदि च उपाध्यक्षस्यापि पदं रिक्तम् अस्ति तदा तस्याः सभायाः तादृशेन सदस्येन तत्पदस्य कर्तव्यानि पालितानि भवेयुः यादृशं तदर्थं राज्यपालः नियोजयेत्।

(२) विधानसभायाः कस्मिन् अपि उपवेशने अध्यक्षस्य अनुपस्थितौ उपाध्यक्षः तस्यापि च अनुपस्थितौ तादृशः जनः यादृशः विधानसभायाः प्रक्रियायाः नियमैः अवधारितः भवेत्, यदि तादृशोऽपि जनः अनुपस्थितः तर्हि अन्यः तादृशः जनः यादृशः तया सभया अवधारितः भवेत्, अध्यक्षरूपेण कार्यं कुर्यात्।

भारतस्य संविधानम्

(भागः ६-राज्यानि)

१८१. अध्यक्षः उपाध्यक्षः वा पीठासीनः न स्यात् यदा तस्य स्वपदात् अपसारणाय सङ्कल्पः विचारधीनः अस्ति- (१) विधानसभायाः कस्मिन् अपि उपवेशने यदा अध्यक्षस्य स्वपदात् अपसारणाय कोऽपि सङ्कल्पः विचाराधीनः अस्ति तदा अध्यक्षः, अथवा यदा उपाध्यक्षस्य स्वपदात् अपसारणाय कोऽपि सङ्कल्पः विचाराधीनः अस्ति तदा उपाध्यक्षः उपस्थितोऽपि पीठासीनः न भवेत्, किं च १८०-तमानुच्छेदस्य (२) खण्डस्य उपबन्धाः प्रत्येकं तादृशम् उपवेशनं तथैव विषयीकुर्युः यथा ते तद् उपवेशनं विषयीकुर्वन्ति यत्र यथायथम् अध्यक्षः उपाध्यक्षः वा अनुपस्थितः भवति।

(२) यदा अध्यक्षस्य स्वपदात् अपसारणाय कश्चिदपि सङ्कल्पः विधानसभायां विचाराधीनः अस्ति तदा सः तस्यां सभायां भाषणाय, अन्यथा तस्याः कार्यप्रवृत्तिषु भागग्रहणाय च अधिकारं भजेत; तथा च १८९-तमानुच्छेदे किमपि सत्यपि तादृशे सङ्कल्पे, तादृशीषु कार्यप्रवृत्तिषु वा, अन्यस्मिन् कस्मिन् अपि विषये वा प्रथमतः मतदाने तु स्वत्ववान् भवेत् किन्तु मतसाम्यदशायां स्वत्ववान् न भवेत्।

१८२. विधानपरिषदः सभापतिः उपसभापतिश्च- विधानपरिषद्वतः प्रत्येकराज्यस्य विधानपरिषद् यथासम्भवं शीघ्रं स्वीयौ द्वौ सदस्यौ क्रमेण सभापतिरूपेण उपसभापतिरूपेण च वृणीतः, तथा च यदा यदा सभापतेः उपसभापतेः वा पदं रिक्तं भवति, तदा तदा सा परिषद् अन्यं सदस्यं यथायथं सभापतिरूपेण उपसभापतिरूपेण वा वृणीत।

१८३. सभापतेः उपसभापतेश्च पदरिक्तता, पदत्यागः पदात् अपसारणं च- विधानपरिषदः सभापतिरूपेण उपसभापतिरूपेण वा पदं धारयन् सदस्यः-

(क) स्वपदं रिक्तं कुर्यात् यदि सः तस्याः परिषदः सदस्यत्वात् प्रविरमेत्;

(ख) यदि तादृशः सदस्यः सभापतिः अस्ति तर्हि उपसभापतिं, यदि न तादृशः सदस्यः उपसभापतिः अस्ति तर्हि सभापति सम्बोध्य लिखितेन स्वहस्ताङ्कितेन लेखेन स्वपदं कदापि त्यक्तुं क्षमते; तथा च

(ग) तदानीन्तनानां तस्याः परिषदः सर्वेषां सदस्यानां बहुमतेन पारितेन तस्याः परिषदः सङ्कल्पेन स्वपदात् अपसारितः भवितुं शक्यते-

परन्तु (ग) खण्डस्य, प्रयोजनाय कोऽपि सङ्कल्पः तावत् प्रस्तावितः न भवेत् यावत् तत्सङ्कल्पप्रस्तावाशयस्य न्यूनात् न्यूनं चतुर्दशदिनानां सूचना न दत्ता भवेत्

१८४. उपसभापतेः अन्यस्य वा जनस्य सभापतिरूपेण कर्तव्यपालने सभापतिरूपेण कार्यकरणे व शक्तिः- (१) यदा सभापतेः पदं रिक्तम् अस्ति तदा उपसभापतिना, यदि च उपसभापतेः अपि पदं रिक्तम् अस्ति तदा तस्याः परिषदः तादृशेन सदस्येन, तत्पदस्य कर्तव्यानि पालितानि भवेयुः यादृशं तदर्थं राज्यपालः नियोजयेत्

(२) विधानपरिषदः कस्मिन् अपि उपवेशने सभापतेः अनुपस्थितौ उपसभापतिः, तस्यापि च अनुपस्थितौ तादृशः जनः यादृशः तस्याः परिषदः प्रक्रियायाः नियमैः अवधारितः भवेत् यदि तादृशोऽपि जन: अनुपस्थितः तर्हि अन्यः तादृशः जनः यादृशः तया परिषदा अवधारितः भवेत्, सभापतिरूपेण कार्यं कुर्यात्।

१८५. सभापतिः उपसभापतिः वा पीठासीनः न स्यात् यदा तस्य स्वपदात् अपसारणाय सङ्कल्पः विचाराधीनः अस्ति- (१) विधानपरिषदः कस्मिन् अपि उपवेशने यदा सभापतेः स्वपदान् अपसारणाय कोऽपि सङ्कल्पः विचाराधीनः अस्ति तदा सभापतिः, अथवा यदा उपसभापतेः स्वपदात् अपसारणाय कोऽपि सङ्कल्पः विचाराधीनः अस्ति तदा उपसभापतिः उपस्थितोऽपि, पीठासीनः न भवेत्; किं च १८४- तमानुच्छेदस्य (२) खण्डस्य उपबन्धाः प्रत्येकं तादृशम् उपवेशनं तथैव विषयीकुर्युः, यथा ते तद् उपवेशनं विषयीकुर्वन्ति यत्र यथायथं सभापतिः उपसभापतिः वा अनुपस्थितः भवति।

(२) यदा सभापतेः स्वपदात् अपसारणाय कश्चिदपि सङ्कल्पः परिषदि विचाराधीनः अस्ति, तदा सः विधानपरिषदि भाषणाय, अन्यथा तस्याः कार्यप्रवृत्तिषु भागग्रहणाय च अधिकारं भजेत; किन्तु १८९-तमानुच्छेदे किमपि सत्यपि, सः तादृशे सङ्कल्पे तादृशीषु कार्यप्रवृतिषु वा अन्यस्मिन् कस्मिन् अपि विषये प्रथमतः मतदाने तु स्वत्ववान् भवेत्, किन्तु मतसाम्यदशायां स्वत्ववान् न भवेत्।

१८६. अध्यक्षस्य उपाध्यक्षस्य सभापतेः उपसभापतेश्च वेतनानि, भक्तानि च- विधानसभायाः अध्यक्षाय, उपाध्यक्षाय तथा च विधानपरिषदः सभापतये, उपसभापतये च तादृशानि वेतनानि, भक्तानि च सन्दत्तानि स्युः यादृशानि तद्राज्यमण्डलं विधिना क्रमशः नियतानि कुर्यात् तथा च यावत् तदर्थम् उपबन्धः कृतः नास्ति तावत् तादृशानि वेतनानि भक्तानि च सन्दत्तानि स्युः यादृशानि द्वितीयानुसूच्यां विनिर्दिष्टानि सन्ति।

१८७. राज्यविधानमण्डलस्य सचिवालयः- (१) विधानमण्डलस्य सदनस्य, प्रत्येकसदनस्य वा, पृथक् सचिवीयः कर्मचारिवृन्दः भवेत्-

परन्तु विधानपरिषद्वतः राज्यस्य विषये एतत्खण्डगतस्य कस्यापि कथनस्य एवम् अर्थः न ग्राह्यः यद् एतत् तादृशविधानमण्डलस्य उभयसदनसाधारणानां पदानां सर्जनं निवारयति इति।

(२) राज्यविधानमण्डलं विधिना तद्राज्यस्य विधानमण्डलस्य सदनस्य सदनयोर्वा सचिवीये कर्मचारिवृन्दे नियोजनं, नियुक्तानां जनानां सेवाविषयकान् प्रतिबन्धान् च विनियमयेत्।

(३) यावत् तद्राज्यविधानमण्डलः (२) खण्डाधीनम् उपबन्धं न करोति, तावत् राज्यपालः यथायथं विधानसभायाः अध्यक्षेण विधानपरिषदः सभापतिना वा, परामृश्य तस्याः सभायाः, तस्याः परिषदः वा सचिवीये कर्मचारिवृन्दे नियोजनस्य, नियुक्तानां जनानां सेवाविषयकाणां प्रतिबन्धानां च विनियमनाय नियमान् कर्तुं क्षमते; किं च एवं कृताः केपि नियमाः उक्तखण्डाधीनं प्रणीतस्य कस्यापि विधेः उपबन्धानाम् अधीनं कार्यक्षमाः भवेयुः।

कार्यसञ्चालनम्

१८८. सदस्यानां शपथः प्रतिज्ञानं वा- राज्यविधानसभायाः, राज्यविधानपरिषदः वा प्रत्येकं सदस्यः स्वस्थानग्रहणात् प्राक् राज्यपालस्य समक्षं तेन तदर्थं नियुक्तस्य कस्यचित् जनस्य वा समक्षं, तृतीयानुसूच्यां तदर्थम् उल्लिखिते प्ररूपे शपथं, प्रतिज्ञानं वा कुर्यात्, तं च स्वहस्ताङ्कितं कुर्यात्।

१८९. सदनेषु मतदानं रिक्ततासु सतीषु अपि सदस्यानां कार्यकरणे शक्तिः, गणपूर्तिश्च- (१) अस्मिन् संविधाने अन्यथा उपबन्धितं व्यतिरिच्य, राज्यविधानमण्डलस्य अन्यतरस्य सदनस्य कस्मिन् अपि उपवेशने, अध्यक्षात्, सभापतेः, तद्रूपेण वा कार्यकारिणः जनात् व्यतिरिक्तानाम्, उपस्थितानां, मतं ददतां सदस्यानां मध्ये बहुमतेन सर्वे प्रश्नाः अवधारिताः स्युः।

अध्यक्षः, सभापतिः, तद्रूपेण कार्यकारी जनः वा प्रथमतः मतं न दद्यात् किन्तु मतसाम्यावस्थायां निर्णायकं मतं भजेत, प्रयुञ्जीत च।

(२) राज्यविधानमण्डलसदनं, तत्रत्यस्य सदस्यस्य कस्यामपि रिक्ततायां सत्यामपि, कार्यकरणे शक्तिं भजेत; तथा च यः कोऽपि एवं करणे अस्वत्ववान् जनः उपाविशत् मतं वा अदात्, अन्यथा वा कार्यप्रवृत्तिषु भागग्रहणम् अकरोत् इति एतदनन्तरं ज्ञाते अपि, राज्यविधानमण्डलस्य कार्यप्रवृत्तयः विधिमान्याः भवेयुः।

[1][(३) यावत् राज्यस्य विधानमण्डलं विधिना अन्यथा न उपबन्धयति तावत् तद्राज्यस्य विधानमण्डलसदनस्य अधिवेशनस्य घटनाय गणपूर्तिः तत् सदनस्य सदस्यानां पूर्णसङ्ख्यायाः दशमांशेन, दशभिः सदस्यैः वा, अत्र यद् अधिकतरं भवति तेन, भवेत्।

(४) यदि राज्यविधानसभायाः राज्यविधानपरिषदः वा अधिवेशने कस्मिंश्चित् काले गणपूर्तिः नास्ति तर्हि अध्यक्षस्य, सभापतेः तद्रूपेण कार्यं कुर्वतः जनस्य वा एतद् कर्तव्यं भवेत् यत् यावत् गणपूर्तिः नास्ति तावत् तत्सदनस्य स्थगनम्, अधिवेशनस्य निलम्बनं वा कुर्यात्।]

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३१-अनुभागेन (दिनाङ्कं नाधिसूचितम्) निरसितम्।" इदं संशोधनं संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४५-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितम्।

सदस्यानां निरर्हताः

१९०. स्थानानां रिक्तता- (१) कोऽपि जनः राज्यविधानमण्डलस्य उभयोः सदनयोः सदस्यः न भवेत् तथा च यः जनः उभयोः सदनयोः सदस्यः वृतः अस्ति तेन एकस्मिन्, अन्यस्मिन् वा सदने स्थानं रिक्तं कारयितुं तद्राज्यविधानमण्डलं विधिना उपबन्धं कुर्यात्।

(२) कोऽपि जनः प्रथमानुसूच्यां विनिर्दिष्टयोः द्वयोः अधिकानां वा राज्यानां विधानमण्डलेषु सदस्यः न भवेत् तथा च यदि कोऽपि जनः द्वयोः अधिकानां वा तादृशराज्यानां विधानमण्डलेषु निर्वाचितः सदस्यः अस्ति तर्हि तस्य जनस्य तादृशानां सर्वेषां राज्यानां विधानमण्डलेषु स्थानं तादृशस्य कालावधेः समाप्तेः परं रिक्तं भवेत् यादृशः राष्ट्रपतिना प्रणीतेषु नियमेषु[1] विनिर्दिष्टः स्यात्, यदि तेन एकराज्यात् व्यतिरिक्तानां सर्वेषां राज्यानां विधानमण्डलेषु स्थानं पूर्वतः एवं न त्यक्तं भवेत्।

(३) यदि राज्यविधानमण्डलस्य कस्यापि अन्यतरस्य सदनस्य सदस्यः-

(क) [2][१९१-तमानुच्छेदस्य (१) खण्डे, (२) खण्डे वा" वर्णितानां निरर्हतानाम् अन्यतमया कयापि ग्रस्तः भवति; अथवा

[3][(ख) यथायथम् अध्यक्षं सभापतिं वा सम्बोध्य लिखितेन स्वहस्ताङ्कितेन लेखेन स्वस्थानं त्यजति तस्य त्यागपत्रं च यथायथम् अध्यक्षेण सभापतिना वा स्वीकृतं भवति],

तर्हि तदुत्तरं तस्य स्थानं रिक्तं भवेत्।

[4][परन्तु (ख) उपखण्डे निर्दिष्टस्य त्यागपत्रस्य दशायां यदि समुपलब्धेन अवगमेन अन्यथा वा, सः यादृशी यथायोग्यां मन्यते तादृश्याः मीमांसायाः परं च यथायथम् अध्यक्षः सभापतिः वा समाहितः भवेत् यत् तादृशं त्यागपत्रं स्वैच्छिकम्, अवितथं वा नास्ति, तर्हि सः तादृशं त्यागपत्रं न स्वीकुर्यात्।]

(४) यदि कस्यचिद् राज्यविधानमण्डलस्य कस्यचित् सदनस्य सदस्यः तत्सदनस्य अनुज्ञां विना तस्य सर्वेषु अधिवेशनेषु षष्टिदिनकालावधौ अनुपस्थितः अस्ति, तर्हि तत् सदनं तस्य स्थानं रिक्तम् इति घोषयितुं क्षमते-

परन्तु उक्तस्य षष्टिदिनकालावधेः सङ्गणनायां सः कालावधिः न गणितः भवेत् यस्मिन् सदनम् अवसितसत्रम् अस्ति, निरन्तरं दिनचतुष्टयात् अधिकं स्थगितं वा अस्ति।

---

[1] भारतस्य असाधारणे राजपत्रे ६७८ पृष्ठे विधिमन्त्रालयस्य एफ० ४६/५० सी क्रमाङ्केन २६-१-१९५० दिनाङ्केन व अङ्कितायां अधिसूचनायां प्रकाशिताः समसामयिकसदस्यताप्रतिषेधनियमाः, १९५० इत्येते द्रष्टव्याः।

[2] संविधानस्य (द्विपञ्चाशततमं संशोधनम्) अधिनियमः, १९८५ इत्यस्य ४-अनुभागेन (१-३-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) "अनुच्छेदः-१९१ इत्यस्य खण्डः-१" इत्यस्य स्थाने अन्तर्वेशितः।

[3] संविधानस्य (त्रयस्त्रिंशत्तमं संशोधनम्) अधिनियमः, १९७४ इत्यस्य ३-अनुभागेन (ख) उपखण्डात् प्रति एषः उपखण्डः संनिवेशितः।

[4] उपर्युक्ताधानियमस्य उक्तेन अनुभागेन एषः पारन्तुकः अन्तर्वेशितः।

१९१. सदस्यतायै निरर्हताः- (१) सः कोऽपि जनः राज्यविधानसभायाः, राज्यविधानपरिषदः वा सदस्यरूपेण वृतत्वे, स्थितौ च निरर्हः भवेत्-

[1][(क) यदि सः भारतशासनस्य, कस्यापि राज्यशासनस्य वा अधीनं लाभस्य किमपि तत् पदं धारयति यत् तस्मात् पदात् अन्यत् अस्ति यस्य धारकः न निरर्हः भवति इति तद्राज्यविधानमण्डलेन विधिना घोषितम्;

(ख) यदि सः विकृतचित्तः अस्ति, क्षमेण न्यायालयेन एवं घोषितश्च तिष्ठति;

(ग) यदि सः अनुन्मुक्तः ऋणशोधनाशक्तः अस्ति;

(घ) यदि सः भारतस्य नागरिकं नास्ति, अथवा वैदेशिकराज्यस्य स्वेच्छया अर्जितां नागरिकतां भजते; अथवा किमपि वैदेशिकराज्यं प्रति निष्ठाम् अनुषक्तिं वा अभिस्वीकुर्वन् वर्तते;

(ङ) यदि सः संसदा प्रणीतेन केनापि विधिना तदधीनं वा एवं निरर्हः कृतः अस्ति।

[2][“*स्पष्टीकरणम्*- कोऽपि जनः भारतशासनस्य प्रथमानुसूच्यां विनिर्दिष्टस्य कस्यापि राज्यशासनस्य वा, अधीनं लाभस्य पदं धारयति इति एतदनुच्छेदस्य प्रयोजनानाम् अर्थे” इति शब्दाङ्ककोष्ठकेभ्यः प्रति कोऽपि जनः भारतशासनस्य, प्रथमानुसूच्यां विनिर्दिष्टस्य कस्यापि राज्यशासनस्य वा, अधीनं लाभस्य पदं धारयति इति एतत्खण्डस्य प्रयोजनानाम् अर्थे” इति शब्दाङ्ककोष्ठकाः संनिवेशिताः भवेयुः।

[3][“(२) कोऽपि जनः राज्यस्य विधानसभायाः विधानपरिषदः वा सदस्यत्वाय निरर्हः भवेत् यदि सः दशमानुसूच्याः अधीनम् एवं निरर्हः भवति।”

[4][**१९२. सदस्यानां निरर्हतानां प्रश्नेषु विनिश्चयः**- (१) यदि कोऽपि प्रश्नः उत्पद्येत यत् राज्यविधानमण्डलसदनस्य सदस्यः १९१-तमानुच्छेदस्य (१) खण्डे वर्णितानां निरर्हतानाम् अन्यतमां कामपि भजते न वा इति, तर्हि सः प्रश्नः राज्यपालःस्य विनिश्चयार्थं निर्देश्यः, तथा च तस्य विनिश्चयः अन्तिमः भवेत्।

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३२-अनुभागेन (दिनाङ्कं नाधिसूचितम्) इत्थं पठनाय प्रतिष्ठापितः “(क) सः भारतशासनस्य अथवा प्रथमानुसूच्यां विनिर्दिष्टस्य राज्यशासनस्य अधीनः कोऽपि एवं लाभस्य पदं धारयति, यत् संसदः विधिना तस्य धारकं निरर्हितं घोषितम्।” इदं संशोधनं संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४५-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितः।

2 संविधानस्य (द्विपञ्चाशततमं संशोधनम्) अधिनियमः, १९८५ इत्यस्य ५-अनुभागेन (१-३-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) “अस्य (२) अनुच्छेदस्य प्रयोजनाय” इत्यस्य स्थाने प्रतिष्ठापितः।

3 संविधानस्य (द्विपञ्चाशततमं संशोधनम्) अधिनियमः, १९८५ इत्यस्य २-अनुभागेन (१-३-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

4 अनुक्रमशः संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३३-अनुभागेन (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण) तथा च संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८, इत्यस्य २५-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) संशोधितः एषः अनुच्छेदः इदं रूपं प्राप्तवान्।

(२) एतादृशे कस्मिन् अपि प्रश्ने विनिश्चयस्य प्रदानात् पूर्वं राज्यपालः निर्वाचनायोगस्य मतिम् आप्नुयात्; तथा च तादृश्याः मतेः अनुसारेण कार्यं कुर्यात्।]

१९३. १८८-तमानुच्छेदस्य अधीनं शपथस्य प्रतिज्ञानस्य वा करणात् पूर्वम् अथवा अनर्हे, निरर्हीकृते वा स्थानग्रहणात् मतदानात् वा शास्तिः-

यदि कोऽपि जनः १८८ तमानुच्छेदस्य अपेक्षाणां पूर्तेः पूर्वं यदा सः जानाति यत् सः तस्याः सदस्यतायां न अर्हः अस्ति, निरर्हः कृतः अस्ति वा, संसदा, तद्राज्यविधानमण्डलेन वा प्रणीतस्य कस्यापि विधेः प्रतिबन्धैः प्रतिषिद्धः अस्ति वा, तदा राज्यविधानसभायां राज्यविधानपरिषदि वा उपविशति, मतं वा ददाति, तर्हि यस्मिन् दिने सः उपविशति, मतं वा ददाति तं प्रत्येकं दिनं प्रति तस्य राज्यदेयस्य ऋणस्य रूपेण प्रत्यादेयानां पञ्चशतरूप्यकाणां शास्तेः सः भागी भवेत्।

राज्यविधानमण्डलानां, तेषां सदस्यानां च शक्तयः, विशेषाधिकाराः, उन्मुक्तयश्च

१९४. विधानमण्डलसदनानां तत्सदस्यानां, तत्समितीनां च शक्तयः विशेषाधिकारादयश्च- (१) एतत्संविधानस्य उपबन्धानां विधानमण्डलस्य प्रक्रियायाः विनियामकानां नियमानां स्थाय्यादेशानां च अधीनं, प्रत्येकराज्यविधानमण्डले वाक्स्वातन्त्र्यं भवेत्।

(२) राज्यविधानमण्डलस्य सदस्यस्य विरुद्धं तस्मिन् विधानमण्डले तस्य कस्यामपि समित्यां वा तस्य कामपि उक्तं किमपि मतदानं वा उद्दिश्य कस्मिन् अपि न्यायालये कार्यप्रवृत्तिः न भवेत्, तथा च कस्यापि जनस्य तादृशविधानमण्डलसदनस्य प्राधिकारैः तदधीनं वा कस्यापि प्रतिवेदनस्य, पत्रस्य मतानां कार्यप्रवृत्तीनां वा प्रकाशनम् उद्दिश्य तादृशं दायित्वं न भवेत्।

[1][(३) अन्येषु विषयेषु राज्यविधानमण्डलसदनस्य, तादृशविधानमण्डलस्य सदस्यानां समितीनां च शक्तयः विशेषाधिकाराः, उन्मुक्तयश्च तादृशाः भवेयुः यादृशाः तद्विधानमण्डलेन काले काले विधिना परिणिश्चिताः भवेयुः, तथा च यावत् न एवं परिणिश्चितातावत्

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३४-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) निम्नाङ्कितरूपेण पठनाय प्रतिष्ठापितः :-

"(३) अन्यस्मिन् विषये कस्यापि राज्यविधानमण्डलस्य कस्यापि सदनस्य तथा एतादृशः मण्डलस्य कस्यापि सदनस्य सदस्यानां तथा समितीनां शक्तयः, विशेषाधिकारः तथा उन्मुक्तयः ते भवेयुः, यत् संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३४-अनुभागस्य प्रारम्भे आसीत् तथा यल्लोकसभया एतादृशस्य सदनस्य तथा तस्य सदस्यानां तथा समितीनां कृते व्यक्ताः भवेयुः, यत्र एतादृशं सदनं विधानसभा अस्ति तथा राज्यसभया एतादृशस्य सदनस्य तथा तस्य सदस्यानां तथा समितीनां कृते व्यक्ताः भवेयुः, यत्र एतादृशं सदनं विधानपरिषद् अस्ति।" इदं संशोधनं संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४५-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपिताः।

[1][ते भवेयुः ये तत्सदनस्य, तस्य सदस्यानां, समितीनां च संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य २६-अनुभागस्य प्रवर्तनात् अव्यवहितपूर्वम् आसन्।]

(४) ये जनाः अस्य संविधानस्य आश्रयेण राज्यविधानमण्डलस्य सदने, तस्य कस्यामपि समितौ वा भाषितुम् अन्यप्रकारेण तस्य कार्यप्रवृत्तिषु भागं ग्रहीतुं वा अधिकारवन्तः सन्ति तेषां सम्बन्धं (१), (२), (३) खण्डानाम् उपन्याः तथैव विषयीकुर्युः यथा ते तद्विधानमण्डलस्य सदस्यान् विषयीकुर्वन्ति।

१९५. सदस्यानां वेतनानि भक्तानि च- राज्यविधानसभायाः राज्यविधानपरिषदश्च सदस्याः तादृशानां वेतनानां भक्तानां च प्राप्तौ स्वत्ववन्तः भवेयुः यादृशानि तद्राज्यविधानमण्डलेन विधिना काले काले अवधारितानि भवेयुः; तथा च यावत् तद्विषये एवम् उपबन्धाः न कृताः तावत् तादृशैः मानैः, तादृशैः प्रतिबन्धश्च वेतनानां भक्तानां च, यादृशानि अस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वं तद्राज्यस्थानीयस्य प्रान्तस्य विधानसभायाः सदस्यान् विषयीकुर्वाणानि आसन्।

विधानप्रक्रिया

१९६. विधेयकानां पुरः स्थापनस्य, पारणस्य च उपबन्धाः- (१) धनविधेयकः, अन्यैः वित्तविधेयकैश्च सम्बद्धानां १९८-२०७ तमानुच्छेदयोः उपबन्धानाम् अधीनं, किमपि विधेयकं कस्यापि विधानपरिषद्वतः राज्यस्य विधानमण्डलस्य अन्यतरस्मिन् कस्मिन् अपि सदने आरभेत।

(२) १९७-१९८तमानुच्छेदयोः उपबन्धानाम् अधीनं किमपि विधेयकं कस्यापि विधानपरिषद्वतः राज्यस्य विधानमण्डलसदनाभ्यां पारितम् इति तावत् न मन्येत यावत् उभाभ्यां सदनाभ्यां संशोधनेन विना, केवलं तादृशैः संशोधनैः सह वा, तत् न स्वीकृतं भवति यादृशानि उभाभ्यां सदनाभ्यां स्वीकृतानि सन्ति।

(३) राज्यविधानमण्डले लम्बितं विधेयकं तदीयस्य सदनस्य सदनयोः वा सत्रावसानकारणात् व्यपगतं न भवेत्।

(४) तद्राज्यविधानपरिषदि लम्बितं यद् विधेयकं विधानसभया न पारितं भवति तद् विधानसभायाः विघटने व्यपगतं न भवेत्।

(५) यद् विधेयकं राज्यविधानसभायां लम्बितम् अस्ति, अथवा विधानसभया पारितं भूत्वा विधानपरिषदि लम्बितम् अस्ति तद् विधानसभायाः विघटने व्यपगतं भवेत्।

१९७. धनविधेयकेभ्यः अन्यविधेयकसम्बन्धिषु विधानपरिषदः शक्तिषु निर्बन्धनानि- (१) यदि कस्यापि विधानपरिषद्वतः राज्यस्य विधानसभया किमपि विधेयकं पारितं भूत्वा विधानपरिषदि प्रेषितं च अस्ति, ततः परं-

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य २९-अनुभागेन कतिपयेभ्यः शब्देभ्यः प्रति एतत् संनिवेशितम् (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(क) तद् विधेयकं तत् परिषदा निराकृतं भवति; अथवा

(ख) तद् विधेयकं तत् परिषदः समक्षं यस्मिन् दिने संस्थापितः तस्मात् दिनात् त्रिभ्यः मासेभ्यः अधिकः कालः अत्येति किन्तु तया तद् विधेयकं न पार्यते; अथवा

(ग) विधानपरिषदा तद् विधेयकं तादृशैः संशोधनैः सह पारितं भवति यादृशैः विधानसभा सहमता न भवति;

तर्हि विधानसभा, स्वप्रक्रियाविनियामकनियमानाम् अधीनं, तद्विधेयकं तस्मिन् एव सत्रे कस्मिन् अपि उत्तरसत्रे वा तादृशैः संशोधनैः सह, विना वा, कानि अपि चेत् तु सन्ति, पारयितुं क्षमते, यादृशानि विधानपरिषदा कृतानि, व्यञ्जितानि, स्वीकृतानि वा सन्ति, तथा च ततः परम् एवं पारितं तद् विधेयकं विधानपरिषदं प्रेषयितुं क्षमते।

(२) यदि विधानसभया द्वितीयवारं तद् विधेयकम् एवं पारितं विधानपरिषदं च प्रेषितम् अस्ति ततः परम्-

(क) तद् विधेयकं तत् परिषदा निराकृतं भवति अथवा

(ख) तत् परिषदः समक्षं यस्मिन् दिने तद् विधेयकं संस्थापितं, तस्मात् दिनात् एकमासात् अधिकः कालः अत्येति किन्तु तया तद्विधेयकं न पार्यते, अथवा

(ग) विधानपरिषदा तद् विधेयकं तादृशैः संशोधनैः सह पारितं भवति यादृशः विधानसभा सहमता न भवति,

तर्हि तद्राज्यविधानमण्डलसदनाभ्यां तद् विधेयकं तेन रूपेण पारितम् इति मतं भवेत् येन रूपेण तत् तद्-विधानसभया द्वितीयवारं तादृशैः संशोधनैः सह कानि अपि सन्ति चेत्, पारितम् आसीत्, यादृशानि तत् परिषदा कृतानि, व्यञ्जितानि वा सन्ति तद् विधानसभया च स्वीकृतानि सन्ति।

(३) एतदनुच्छेदगतं किमपि धनविधेयकं न विषयीकरोति।

१९८. धनविधेयकानां विषये विशेषप्रक्रिया- (१) धनविधेयकं विधानपरिषदि पुरःस्थापितं न भवेत्।

(२) कस्यापि विधानपरिषद्वतः राज्यस्य विधानसभया यदि धनविधेयकं पारितम् अस्ति, ततः परं तद् विधेयकं विधानपरिषदं प्रति तस्याः पुरःप्रशंसनानां कृते प्रेषितं भवेत्, सा विधानपरिषद् च तद् विधेयकस्य प्राप्तेः दिनाङ्कात् चतुर्दशदिनानां कालावधेः अभ्यन्तरं तद् विधेयकं स्वस्य पुरः प्रशंसनैः सह तां विधानसभां प्रति निवर्तयेत्, सा विधानसभा च ततः परं तस्याः विधानपरिषदः सर्वाणि पुरःप्रशंसनानि तदन्यतमं किमपि वा स्वीकुर्यात्, निराकुर्यात् वा।

(३) यदि तस्याः विधानपरिषदः पुरः प्रशंसनानाम् अन्यतमं किमपि सा विधानसभा स्वीकरोति तर्हि तद् धनविधेयकं विधानपरिषदा पुरः प्रशंसितैः विधानसभया च स्वीकृतैः संशोधनैः सह उभाभ्यां सदनाभ्यां पारितम् इति मन्येत।

(४) यदि विधानपरिषदः पुरःप्रशंसनानाम् अन्यतमं किमपि विधानसभा न स्वीकरोति, तर्हि

तद्धनविधेयकं विधानपरिषदा पुरःप्रशंसितानां संशोधनानाम् अन्यतमेन केनापि विना तेन रूपेण उभाभ्यां सदनाभ्यां पारितम् इति मन्येत येन रूपेण तद् विधानसभया पारितम् आसीत्।

(५) यदि विधानसभया पारितं, विधानपरिषदं तस्याः पुरःप्रशंसनानां कृते प्रेषितं च धनविधेयकं चतुर्दश- दिनानाम् उक्तकालावधेः अभ्यन्तरे विधानसभां प्रति न निवर्तेत, तर्हि उक्त कालावधेः समाप्तौः उभाभ्यां सदनाभ्यां तेन रूपेण तत् पारितम् इति मन्येत येन रूपेण तद् विधानसभया पारितम् आसीत्।

१९९. धनविधेयकानां परिभाषा- (१) एतद् अध्यायस्य प्रयोजनानां कृते किमपि विधेयकं धनविधेयकम् इति मतं भवेत् यदि तस्मिन् केवलं निम्नलिखितैः सर्वैः विषयैः तेषाम् अन्यतमेन केनापि वा सम्बद्धाः उपबन्धाः सन्ति, तद्यथा-

(क) कस्यापि करस्य अधिरोपणम्, उत्सादनं परिहारः, परिवर्तनं, विनियमनं वा;

(ग) राज्येन करणीयस्य धनोद्धारस्य कस्याः अपि प्रत्याभूतेः दानस्य वा विनियमनं अथवा तद्राज्येन अङ्गीकृतैः अङ्गीकर्तव्यैः वा वित्तीयैः आभारैः सम्बन्धिनः विधेः संशोधनम्;

(ग) राज्यस्य सञ्चितनिधेः आकस्मिकतानिधेः वा अभिरक्षा तादृशे कस्मिन् अपि निधौ धनस्य विनिवेशनं तस्मात् धनस्य प्रत्याहरणं या

(घ) राज्यस्य सञ्चितनिधेः मध्यात् धनस्य विनियोगः;

(ङ) कस्यापि व्ययस्य राज्यस्य सञ्चितनिधौ भारितव्ययरूपेण घोषणं, तादृशस्य कस्यापि व्ययस्य राशेः वर्धनं वा;

(च) राज्यस्य सञ्चितनिधौ, राज्यस्य लोकलेखायां वा धनस्य प्रापणम्, अथवा तादृशस्य धनस्य अभिरक्षा निर्गमनं वा; अथवा

(छ) (क) उपखण्डात् आरभ्य (च) उपखण्डपर्यन्तेषु विनिर्दिष्टविषयाणाम् अन्यतमस्य कस्यापि आनुषङ्गिकः कोऽपि विषयः।

(२) किमपि विधेयकं धनविधेयकम् अस्ति इति केवलम् एतेन एव हेतुना न मतं भवेत् यत् तत् अर्थदण्डानाम्, अन्यासाम् आर्थिकशास्तीनां वा अधिरोपणाय, अनुज्ञप्तीनाम् अर्थे प्रशुल्कानाम्, आचरितसेवानाम् अर्थे प्रशुल्कानाम् अभियाचनायै सन्दानाय वा उपबन्धयति इति; अथवा एतेन हेतुना यत् तत् केनापि स्थानीयेन प्राधिकारिणा, निकायेन वा स्थानीयप्रयोजनानाम् अर्थे कस्यापि करस्य अधिरोपणाय, उत्सादनाय, परिहाराय परिवर्तनाय विनियमनाय वा उपबन्धयति इति।

(३) कस्यापि विधानपरिषद्वतः राज्यस्य विधानमण्डले पुरःस्थापितं किमपि विधेयकं

धनविधेयकम् अस्ति न वा इति कोऽपि प्रश्नः यदि उत्पद्यते तर्हि तत्र एतादृशराज्यस्य विधानसभायाः अध्यक्षस्य विनिश्चयः अन्तिमः भवेत्।

(४) १९८-तमानुच्छेदस्य अधीनं यदा धनविधेयकं विधानपरिषदं प्रति प्रेषितं भवेत् तथा च यदा २००-तमानुच्छेदस्य अधीनं तद् राज्यपालस्य समक्षम् अनुमत्यर्थम् उपस्थापितं भवेत् तदा प्रत्येकधनविधेयके विधानसभायाः अध्यक्षस्य हस्ताङ्कितम् "एतत् धनविधेयकम् अस्ति" इति प्रमाणपत्रं पृष्ठाङ्कितं भवेत्।

२००. विधेयकानि प्रति अनुमतिः- यदा किमपि विधेयकं राज्यविधानसभया पारितं भवेत्, अथवा कस्यापि विधानपरिषद्वतः राज्यस्य सम्बन्धे तद्राज्यमण्डलस्य उभाभ्यां सदनाभ्यां पारितं भवेत् तदा तत् राज्यपालस्य समक्षम् उपस्थापितं भवेत् तथा च राज्यपालः घोषयेत् यत् सः तद् विधेयकम् अनुमन्यते वा तत्प्रति अनुमतिं निरुणद्धि वा, अथवा सः तद् विधेयकं राष्ट्रपतेः विचारार्थम् आरक्षति इति वा-

परन्तु राज्यपालः तद्विधेयकस्य स्वानुमत्यर्थम् उपस्थापनात् परं तद्विधेयकं यदि धनविधेयकं नास्ति तर्हि यथासम्भवं शीघ्रं निवर्तयितुं क्षमते, एवं प्रार्थयता सन्देशेन सह यत् तत् सदनं, ते सदने वा तद् विधेयकं, तस्मिन् विनिर्दिष्टान् कान् अपि उपबन्धान् वा पुनर्विचारयेतां; विशेषतश्च तादृशानां केषामपि संशोधनानां पुनः स्थापनायाः जातीयतां विचारयेतां यादृशानि सः स्वीये सन्देशे पुरःप्रशंसयेत्; तथा च यदा विधेयकम् एवं निवर्तितं भवति तदा तत् सदनं, ते सदने वा, तद् विधेयकं तदनुसारेण पुनः विचारयेताम्; तथा च यदि तद्विधेयकं तेन सदनेन ताभ्यां सदनाभ्यां वा संशोधनेन सह, विना वा, पुनः पारितं राज्यपालस्य समक्षम् अनुमत्यर्थम् उपस्थापितं भवति तर्हि राज्यपालः तस्य अनुमतिं न निरुध्यात्-

अपरं च, यदि यत् किमपि विधेयकं विधिः भवेत् तर्हि स उच्चन्यायालयस्य शक्तिः एवं न्यूनीकुर्यात् येन स न्यायालयः, अनेन संविधानेन यत् स्थानस्य पूर्त्यैः परिकल्पितः अस्ति तत्स्थानं भयापन्नं भवेत् इति एवं राज्यपालस्य मते सञ्जाते राज्यपालः तद् विधेयकं न अनुमन्येत किन्तु राष्ट्रपतेः विचारार्थं तद् रक्षेत्।

२०१. विचारार्थम् अरक्षितानि विधेयकानि- यदा किमपि विधेयकं राष्ट्रपतेः विचारार्थं राज्यपालेनारक्षितं भवति तदा राष्ट्रपतिः घोषयेत् यत् सः तद् विधेयकम् अनुमन्यते यद् वा तत् प्रति अनुमतिं निरुणद्धि वा इति-

परन्तु यत्र तद् विधेयकं धनविधेयकं नास्ति तत्र राष्ट्रपतिः राज्यपालं निदेशयेत् यत् सः तद् विधेयकं यथायथं राज्यविधानमण्डलस्य सदनं, सदने वा प्रति एतादृशेन सन्देशेन सह प्रत्यावर्तयतु यादृशः २००-तमानुछेदस्य प्रथमपारन्तुके वर्णितः अस्ति; तथा च यदा किमपि विधेयकम् एवं प्रत्यावर्तितम् अस्ति तदा तेन सदनेन ताभ्यां सदनाभ्यां वा तादृशस्य सन्देशस्य प्राप्तेः दिनाङ्कात् षण्णां मासानां कालावधेः अभ्यन्तरं तदनुसारेण एव तत् पुनः विचारणीयं,

तथा च यदि तेन सदनेन ताभ्यां सदनाभ्यां वा संशोधनेन सह, विना वा पुनः पारितं भवेत्, तर्हि तत् राष्ट्रपतेः समक्षं तस्य विचारार्थं पुनः उपस्थिापितं भवेत्।

वित्तीयविषयाणां प्रक्रिया

२०२. वार्षिकवित्तविवरणम्- (१) राज्यपालः प्रत्येकं वित्तीयवर्षस्य विषये तद् वर्षार्थम् अस्मिन् भागे ‘‘वार्षिकवित्तविवरणम्" इति निर्दिष्टम्, राज्यसम्बन्धिनां प्राक्कलितानां प्राप्तीनां, व्ययानां च विवरणं राज्यविधानमण्डलस्य सदनस्य सदनयोः वा समक्षं निधापयेत्।

(२) वार्षिकवित्तविवरणे प्रदत्तस्य व्ययस्य प्राक्कलनेषु-

(क) यः व्ययः अस्मिन् संविधाने राज्यस्य सञ्चितनिधेः उपरि भारितव्ययरूपेण वर्णितः तस्य पूर्तये अपेक्षिताः राशयः; तथा-

(ख) राज्यस्य सञ्चितनिधितः करिष्यमाणत्वेन प्रस्थापितानाम् अन्येषां व्ययानां पूर्तये अपेक्षिता राशयश्च पृथक् पृथक् प्रदर्शिताः स्युः, तथा च राजस्वलेखार्थं व्ययस्य अन्यस्मात् व्ययात् भेदः करणीयः।

(३) निम्नलिखितः व्ययः प्रत्येकराज्यस्य सञ्चितनिधौ भारितः व्ययः भवेत्-

(क) राज्यपालस्य उपलब्धयः भक्तानि च; तथा च तस्य पदेन सम्बद्धः अन्यः व्ययः

(ख) विधानसभायाः अध्यक्षस्य उपाध्यक्षस्य तथा च विधानपरिषदः सभापतेः उपसभापतेश्च वेतनानि भक्तानि च;

(ग) वृद्धिं, निक्षेपनिधिभारं, मोचनभारं च तथा च उद्धारादानेन, ऋणसेवया, ऋणमोचनेन च सम्बद्धम् अन्यं व्ययं च अन्तर्भावयन्तः ऋणभाराः येषां तद् राज्यस्य दायित्वं भवति;

(घ) कस्यापि उच्चन्यायालयस्य न्यायाधीशानां वेतनानां भक्तानां च सम्बन्धी व्ययः;

(ङ) कस्यापि न्यायालयस्य, मध्यस्थन्यायाधिकरणस्य वा निर्णयस्य, आज्ञप्तेः मध्यस्थनिर्णयस्य वा तुष्ट्यर्थम् अपेक्षिताः राशयः;

(च) अनेन संविधानेन राज्यविधानमण्डलेन वा विधिना एवं भारितः करणीयः इति घोषितः कोऽपि अन्यः व्ययः।

२०३. प्राक्कलनानां विषये विधानमण्डलस्य प्रक्रिया- (१) प्राक्कलनेषु यानि यानि राज्यस्य सञ्चितनिधौ भारितव्ययेन सम्बद्धानि सन्ति तानि विधानसभायाः मतदानार्थं न पुरतः स्थापितानि भवेयुः;

किन्तु एतत्खण्डगतस्य कस्यापि कथनस्य एवम् अर्थः न ग्राह्यः यद् एतत् तेषां प्राक्कलनानाम् अन्यतमस्य कस्यापि चर्चा विधानमण्डले निवारयति इति।

(२) उक्तप्राक्कलनानां यावन्मात्रम् अन्यव्ययेन सम्बध्यते तावन्मात्रं विधानसभायाः समक्षम् अनुदानानाम् अभियाचनारूपेण पुरतः स्थापितं भवेत्; तथा च विधानसभा कस्याः अपि अभियाचनायाः अनुमतौ, अनुमतेः प्रत्याख्याने वा कस्याः अपि अभियाचनायाः तस्यां विनिर्दिष्टं राशिं न्यूनीकृत्वा अनुमतौ वा शक्तिं भजेत।

(३) राज्यपालस्य पुरःप्रशंसनात् एव अनुदानस्य कापि अभियाचना कृता भवेत्, नान्यथा।

२०४. विनियोगविधेयकानि- (१) २०३-तमानुच्छेदस्य अधीनं विधानसभया यदा अनुदानानि कृतानि सन्ति तदुत्तरं यथासम्भवं शीघ्रं राज्यस्य सञ्चितनिधितः-

(क) तत् सभया एवं कृतानाम् अनुदानानां; तथा च

(ख) राज्यस्य सञ्चितनिधौ भारितस्य किन्तु तत् सदनस्य तयोः सदनयोः वा समक्षं पूर्वं निहिते विवरणे प्रदर्शितराशेः कस्यामपि अवस्थायाम् अनधिकस्य व्ययस्य पूर्त्यर्थम् अपेक्षितानां सर्वेषां धनराशीणां विनियोगार्थम् उपबन्धयितुं विधेयकं पुरःस्थापितं भवेत्।

(२) एवं कृतस्य अनुदानस्य राशिं परिवर्तयितुं तस्य लक्ष्यं वा परिवर्तयितुं, राज्यस्य सञ्चितनिधौ भारितस्य व्ययस्य राशिं परिवर्तयितुं वा यत् किमपि संसोधनं कार्यक्षमं भवेत्, तत् राज्यविधानमण्डलस्य सदने, कस्मिन् अपि अन्यतरस्मिन् सदने वा तादृशे कस्मिन् अपि विधेयके प्रस्थापितं न भवेत्; तथा च किमपि संशोधनं एतत् खण्डाधीनम् अग्राह्यम् अस्ति न वा इति विषये पीठासीनस्य जनस्य विनिश्चयः अन्तिमः भवेत्।

(३) २०४, २०६-तमानुच्छेदयोः उपबन्धानाम् अधीनं राज्यस्य सञ्चितनिधितः किमपि धनम् एतदनुच्छेदस्य उपबन्धानाम् अनुसारेण पारितेन विधिना कृतेन विनियोगेन एवं प्रत्याहरणीयं, नान्यथा।

२०५. अनुपूरकाणि, अपराणि, अधिकानि वा अनुदानानि- (१) यदि

(क) २०४-तमानुच्छेदस्य उपबन्धानाम् अनुसारेण प्रणीतेन विधिना कस्यामपि विशेषसेवायां वर्तमाने वित्तीयवर्षे व्ययार्थं प्राधिकृतः राशिः तद्वर्षस्य प्रयोजनानां कृते अपर्याप्तः इति अवगतः अस्ति; अथवा तस्य वित्तीयवर्षस्य वार्षिकवित्तविवरणेन अननुध्यातायां सेवायाम् अनुपूरकस्य, अपरस्य वा व्ययस्य आवश्यकता वर्तमाने वित्तीयवर्षे उत्पन्ना अस्ति; अथवा

(ख) वित्तीयवर्षस्य कस्यामपि सेवायां तत् सेवार्थं तद् वर्षार्थम् अनुदत्तात् राशेः अधिकं धनं व्ययितम् अस्ति,

तर्हि राज्यपालः यथायथं राज्यविधानमण्डलस्य सदनस्य, सदनयोः वा समक्षं तस्य व्ययस्य प्राक्कलितं राशिं प्रदर्शयत् अन्यद् विवरणं निधापयेत्; अथवा राज्यस्य विधानसभायां तादृश्याः अधिकतायाः अभियाचनाम् उपस्थापयेत्।

(२) एतादृशस्य कस्यापि विवरणस्य, व्ययस्य च अभियाचनायाः वा सम्बन्धे राज्यस्य सञ्चितनिधितः तादृशस्य व्ययस्य, तादृश्याः अभियाचनायाः वा सम्बन्धे च अनुदानस्य पूर्तये धनानां विनियोगं प्राधिकृतं कुर्वतः प्रणेतव्यस्य कस्यापि विधेः सम्बन्धे अपि च २०२, २०३, २०४-तमानुच्छेदानाम् उपबन्धाः तथा कार्यक्षमाः भवेयुः यथा ते वार्षिकवित्तविवरणस्य तस्मिन् वर्णितव्ययस्य च सम्बन्धे अनुदानस्य कस्याः अपि अभियाचनायाः सम्बन्धे च राज्यस्य सञ्चितनिधितः तादृशस्य कस्यापि व्ययस्य अनुदानस्य वा पूर्तये धनानां विनियोगं प्राधिकृतं कुर्वतः प्रणेतव्यस्य विधेः सम्बन्धे च कार्यक्षमाः भवन्ति।

२०६. लेखानुदानं, प्रत्ययानुदानम्, अपवादानुदानं च- (१) अस्य अध्यायस्य पूर्वगामिषु उपबन्धेषु किमपि सत्यपि-

(क) कस्यापि वित्तीयवर्षस्य भागार्थं प्राक्कलितस्य व्ययस्य सम्बन्धे कमपि अनुदानं, तादृशे अनुदाने मतदानार्थं २०३-तमानुच्छेदे विहितायाः प्रक्रियायाः पूर्तौ लम्बितायां सत्यां, तथा तस्य व्ययस्य सम्बन्धे २०४-तमानुच्छेदस्य उपबन्धानाम् अनुसारेण विधेः पारणे लम्बिते सति, अग्रिमं दातुम्;

(ख) यदा कस्याः अपि सेवायाः महत्तया, अनिश्चितरूपतया वा अभियाचना वार्षिकवित्तविवरणे साधारणतया विवरणेन सह वर्णयितुं न शक्यते तदा राज्यस्य सम्पत्तिसाधनेषु अपूर्वचिन्तितायाः अभियाचनायाः पूर्त्यैः अनुदानं कर्तुम्;

(ग) कस्यापि वित्तवर्षस्य विद्यमानसेवायाः अभागभूतस्य अनुदानस्य कृते अपवादानुदानं राज्यविधानसभा शक्तिं भजेत; तथा उक्तानुदानानि येभ्यः प्रयोजनेभ्यः कृतानि भवन्ति तानि उद्दिश्य राज्यस्य सञ्चितनिधितः धनस्य विधिना आहरणं प्राधिकर्तुं राज्यविधानमण्डलं शक्तिं भजेत।

(२) २०३, २०४-तमानुच्छेदयोः उपबन्धाः (१) खण्डाधीनम् अनुदानस्य तथा तत्खण्डाधीनं प्रणेतव्यस्य कस्यापि विधेः सम्बन्धे तथैव कार्यक्षमाः भवेयुः, यथा ते वार्षिकवित्तविवरणे वर्णितं कमपि व्ययम् उद्दिश्य किमपि अनुदानं कर्तुं,

राज्यस्य सञ्चितनिधितः तादृशस्य व्ययस्य पूर्त्यै धनानां विनियोगं प्राधिकृतं कुर्वतः प्रणेतव्यस्य विधेः सम्बन्धे च कार्यक्षमाः भवन्ति।

२०७. वित्तविधेयकानि विषये विशेषाः उपबन्धाः- (१) १९९-तमानुच्छेदस्य (१) खण्ड (क) उपखण्डम् आरभ्य (च) उपखण्डपर्यन्तेषु उपखण्डेषु विनिर्दिष्टानां विषयाणाम् अन्यतमाय कस्मै अपि उपबन्धं कुर्वद् विधेयकं, संशोधनं वा राज्यपालस्य पुरःप्रशंसनानन्तरमेव पुरःस्थापितं, प्रस्तावितं वा भवेत्, नान्यथा; तथा च तादृशम् उपबन्धं कुर्वद् विधेयकं विधानपरिषदि पुरःस्थापितं न भवेत्-

परन्तु कस्यापि करस्य न्यूनीकरणाय, उत्सादनाय वा उपबन्धं कुर्वतः संशोधनस्य प्रस्तावार्थम् एतत् खण्डाधीनं किमपि पुरः प्रशंसनम् अपेक्षितं न भवेत्।

(२) किमपि विधेयकं संशोधनं वा उक्तविषयाणाम् अन्यतमाय कस्मै अपि उपबन्धं करोति इति केवलम् एतेन एव हेतुना न मन्येत यत् तत् अर्थदण्डानाम् अन्यासां वा अर्थशास्तीनाम् अधिरोपणाय, अनुज्ञप्तीनाम् अर्थे प्रशुल्कानाम् आचरितसेवानाम् अर्थे प्रशुल्कानां वा अभियाचनायै, सन्दानाय वा उपबन्धयति इति; अथवा एतेन हेतुना यत्, केनापि स्थानीयेन प्राधिकारिणा निकायेन वा स्थानीयप्रयोजनानाम् अर्थे कस्यापि करस्य अधिरोपणाय उत्सादनाय, परिहाराय, परिवर्तनाय, विनियमनाय वा उपबन्धयति इति।

(३) यस्मिन् विधेयके अधिनियमिते प्रवर्तिते च राज्यस्य सञ्चितनिधितः व्ययं करणीयं भवेत्, तत् राज्यविधानमण्डलसदनेन तावत् पारितं न भवेत् यावत् तादृशे विधेयके विचारार्थं राज्यपालः तत्सदनस्य कृते पुरः प्रशंसनं न कुर्यात्।

साधारणतया प्रक्रिया

२०८. प्रक्रियायाः नियमाः- (१) अस्य संविधानस्य उपबन्धानाम् अधीनं, राज्यविधानमण्डल-सदनं स्वीयप्रक्रियायाः* स्वीयकार्यसञ्चालनस्य च विनियमनार्थं नियमान् प्रणेतुं क्षमते।

(२) यावत् (१) खण्डाधीनं नियमाः प्रणीताः न सन्ति तावत् अस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वं तत्स्थानीयस्य प्रान्तस्य विधानमण्डलम् उद्दिश्य ये प्रक्रियानियमाः स्थाय्यादेशाश्च प्रवृत्ताः आसन् ते तादृशानाम् उपान्तराणाम्, अनुकूलनानां च अधीनं राज्यविधानमण्डलस्य सम्बन्धे कार्यक्षमाः भवेयुः, यादृशानि यथायथं विधानसभायाः अध्यक्षः, विधानपरिषदः सभापतिः वा तत्र कर्तुं क्षमते।

(३) राज्यपालः, विधानपरिषद्वति राज्ये विधानसभायाः अध्यक्षेण, विधानपरिषदः सभापतिना

---

* संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३५-अनुभागेन (दिनं नाधिसूचितम्) "(यस्यान्तर्गते सदनस्य अधिवेशनस्य गठनार्थं गणपूर्तिः सम्मिलिता अस्ति)" शब्दैः कोष्ठकैश्च अन्तर्वेशितः। इदं संशोधनं संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४५-अनुभागेन (२०-०६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितः।

च परामृश्य उभयोः सदनयोः परस्परसञ्चारान् उद्दिश्य प्रक्रियायाः नियमान् प्रणेतुं क्षमते।

२०९. राज्यविधानमण्डले वित्तीयकार्यसम्बन्धिप्रक्रियायाः विधिना विनियमनम्- वित्तीयकार्यस्य यथाकालं समाप्त्यर्थं राज्यविधानमण्डलं कमपि वित्तीयविषयं राज्यस्य सञ्चितनिधितः धनस्य विनियोगं कुर्वतः किमपि विधेयकं वा विषयीकृत्य राज्यविधानमण्डलस्य सदनस्य, सदनयोः वा प्रक्रियां, कार्यसञ्चालनं च विधिना विनियमयितुं क्षमते; तथा च यदि यावत् च एवं प्रणीतस्य कस्यापि विधेः उपबन्धः २०८ तमानुच्छेदस्य (१) खण्डाधीनं राज्यविधानमण्डलस्य सदनेन अथवा सदनयोः अन्यतरेण केनापि सदनेन प्रणीतैः नियमैः, तदनुच्छेदस्य (२) खण्डाधीनं वा राज्यविधानमण्डलस्य सम्बन्धे कार्यक्षमेण केनापि नियमेन स्थाय्यादेशेन वा असङ्गतः अस्ति तर्हि तादृशः उपबन्धः अभिभवेत्।

२१०. विधानमण्डले प्रयोज्या भाषा- (१) १७-भागे किमपि सत्यपि ३४८-तमानुच्छेदस्य उपबन्धानाम् अधीनं, राज्यविधानमण्डलस्य कार्यं तद्राज्यस्य राजभाषायां, राज्यभाषासु, हिन्दीभाषायाम्, आङ्ग्लभाषायां वा कृतं भवेत्-

परन्तु यः पूर्वोक्तभाषासु स्वाभिप्रायस्य सुतराम् अभिव्यक्तिं कर्तुं न शक्नोति तस्मै सदस्याय यथायथं, विधानसभायाः अध्यक्षः, विधानपरिषदः सभापतिः वा, एतादृशरूपेण कार्यकारी जनः वा, स्वस्य मातृभाषायां तत् सदनस्य सम्बोधने अनुज्ञां दातुं क्षमते।

(२) यावद् राज्यविधानमण्डलं विधिना अन्यथा न उपबन्धयति, तावत् अस्य संविधानस्य प्रारम्भात् पञ्चदशवर्षाणां कालावधेः समाप्तेः परम् एषः अनुच्छेदः एवं कार्यक्षमः भवेत् यथा एतस्मिन् "आङ्ग्लभाषायां वा" इत्येते शब्दाः लुप्ताः इव स्युः;

[1][परन्तु [2][हिमाचलप्रदेशराज्यस्य, मणिपुरराज्यस्य, मेघालयराज्यस्य तथा च त्रिपुराराज्यस्य विधानमण्डलानां] सम्बन्धे एषः खण्डः एवं प्रकारेण प्रभावी भवेत् यथा एतस्मिन् "पञ्चदशवर्षाणाम्" इति पदात् प्रति "पञ्चविंशतिवर्षाणाम्" इति पदं संनिवेशितं भवेत्।]

[3][अपरं च एतत् [4][[5][अरुणाचल-प्रदेशः, गोवा तथा मिजोरमः इत्येतेषां राज्यानां विधानमण्डलानां]] सम्बन्धे एषः खण्डः इत्थं प्रभवेत्,

---

1 हिमाचलप्रदेशराज्याधिनियमः, १९७० (१९७० वर्षस्य ५३) इत्यस्य ४६-अनुभागेन अन्तर्वेशितः (२५-१-१९७१ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 पूर्वोत्तरक्षेत्र-(पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१) इत्यस्य ७१-अनुभागेन "हिमाचलप्रदेश राज्यस्य विधानमण्डलस्य" इत्येतस्मात् प्रति एतत् संनिवेशितम् (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 मिजोरमराज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ३४) इत्यस्य ३९-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

4 अरुणाचलप्रदेश-राज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ६९) इत्यस्य ४२-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) "मिजोरम-राज्य-विधानमण्डलं" इत्यस्य स्थाने संनिवेशितः।

5 गोवा-दमण-दीव-पुनर्घटन-अधिनियमः, १९८७ (१९८७ वर्षस्य १८) इत्यस्य ६३-अनुभागेन (३०-५-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) "अरुणाचल-प्रदेशः तथा मिजोरमः" इत्यनयोः स्थाने संनिवेशितः।

मन्ये अस्मिन् आगामिनः "पञ्चदशवर्षस्य" स्थाने "चत्वारिंशत्वर्षम्" इति शब्दः स्थापितः।]

२११. विधानमण्डले चर्चायां निर्बन्धनम्- उच्चतमन्यायालयस्य उच्चन्यायालयस्य वा न्यायाधीशेन स्वकर्तव्यपालने कृतम् आचरणम् उद्दिश्य कापि चर्चा राज्यविधानमण्डले न भवेत्।

२१२. न्यायालयाः विधानमण्डलस्य कार्यप्रवृत्तिनां विषये परिप्रश्नं न कुर्युः- (१) राज्यविधानमण्डलस्य कासामपि कार्यप्रवृत्तीनां विधिमान्यता प्रक्रियायाः कस्याः अपि अभिकथितायाः अनियमिततायाः आधारेण प्रश्नगता न कृता भवेत्।

(२) अनेन संविधानेन एतदधीनं वा राज्यविधानमण्डले प्रक्रियायाः कार्यसञ्चालनस्य वा विनियमनं कर्तुं, व्यवस्थां रक्षितुं वा यस्मिन् शक्तयः निहिताः सः राज्यविधानमण्डलस्य कोऽपि अधिकारी, सदस्यः वा तासां शक्तीनां स्वकृतस्य प्रयोगस्य विषये कस्यापि न्यायालयस्य अधिकारितायाः अधीनः न भवेत्।

अध्यायः ४- राज्यपालस्य विधायिन्यः शक्तयः

२१३. विधानमण्डलस्य विश्रान्तिकाले राज्यपालस्य अध्यादेशप्रस्थापने शक्तिः- (१) यस्मिन् काले राज्यस्य विधानसभासत्रे अस्ति अथवा विधानपरिषद्वति राज्ये विधानमण्डलस्य उभे सदने सत्रे स्तः, तस्मात् अन्यस्मिन् कस्मिन् अपि काले, यदि राज्यपालः समाहितः भवति यत् तम् अचिरकार्ये अवश्यं प्रवर्तयन्त्यः परिस्थितयः विद्यन्ते, तर्हि सः तादृशान् अध्यादेशान् प्रख्यापयितुं क्षमते यादृशान् अपेक्षयन्त्यः परिस्थितयः तेन प्रतीयन्ते-

परन्तु राज्यपालः राष्ट्रपतेः अनुदेशेन विना कमपि तादृशम् अध्यादेशं न प्रख्यापयेत् यदि-

(क) तान् एव उपबन्धान् अन्तर्वेशयद् विधेयकं विधानमण्डले पुरःस्थापनार्थम् अस्य संविधानस्य अधीनं राष्ट्रपतेः पूर्वानुमतिः अपेक्षिता अभविष्यत्; अथवा

(ख) तान् एव उपबन्धान् अन्तर्वेशयद् विधेयकं राष्ट्रपतेः विचारार्थं रक्षितुं तन्मते आवश्यकम् अभविष्यत्; अथवा

(ग) तान् एव उपबन्धान् अन्तर्वेशयन् राज्यविधानमण्डलस्य अधिनियमः अस्य संविधानस्य अधीनं तावत् अमान्यः अभविष्यत् यावत् राष्ट्रपतेः विचारार्थं तस्मिन् रक्षिते सति राष्ट्रपतेः अनुमतिं सः न प्राप्स्यत्।

(२) एतदनुच्छेदस्य अधीनं प्रख्यापिते अध्यादेशे तादृशम् एव बलं प्रभावश्च भवेत् यादृशं राज्यपालेन अनुमते राज्यविधानमण्डलस्य अधिनियमे भवेत्; किन्तु एतादृशः प्रत्येकम् अध्यादेशः-

(क) राज्यविधानसभायाः पुरतः स्थापितः भवेत् अथवा यस्मिन् राज्ये विधानपरिषद् अस्ति तत्र उभयोः सदनयोः पुरतः स्थापितः भवेत्; तथा च विधानमण्डले पुनः समवेते षण्णां सप्ताहानां समाप्तौ, अथवा यदि तत् कालावधेः समाप्तेः प्राक् विधानसभया तस्य निरनुमोदनस्य सङ्कल्पः पारितः अस्ति, विधानपरिषदा च, यदि अस्ति चेत्, सः स्वीकृतः अस्ति, तर्हि यथायथं तत्सङ्कल्पस्य पारणोत्तरं तत्परिषदा कृतस्य तत्सङ्कल्पस्य स्वीकरणस्य उत्तरं वा सः प्रवर्तनात् प्रविरमेत्;

(ख) राज्यपालेन कस्मिन् अपि काले प्रत्याहृतः भवेत्।

स्पष्टीकरणम्ः- यदा विधानपरिषद्वतः राज्यस्य विधानमण्डलस्य सदने पुनः समवायार्थं भिन्नयोः दिनाङ्कयोः आहूते भवतः तदा एतत् खण्डस्य प्रयोजनानाम् अर्थे षण्णां सप्ताहानां कालावधिः तयोः दिनाङ्कयोः उत्तरदिनाङ्कात् परिगणितः भवेत्।

(३) यदि, यावन्मात्रं च, एतदनुच्छेदस्य अधीनं प्रख्यापितः अध्यादेशः एवं विधं कमपि उपबन्धं करोति यः राज्यविधानमण्डलेन एवं विधेः अधिनियमे कृतः अस्ति यत्कृते राज्यपालः अनुमतिं दत्तवान्, एवम् अधिनियमितश्च अमान्यः भवेत् तर्हि, तावन्मात्रं च, सः अध्यादेशः शून्यः भवेत्-

परन्तु राज्यविधानमण्डलस्य यः अधिनियमः संसदः अधिनियमेन विद्यमानविधिना वा समवर्तिसूच्यां प्रगणितविषयस्य सम्बन्धे विरुद्धः अस्ति तस्य राज्यविधानमण्डलस्य अधिनियमस्य कार्यक्षमतासम्बन्धिनाम् एतत्संविधानस्य उपबन्धानाम् अर्थे राष्ट्रपतेः अनुदेशानाम् अनुसरणार्थम् एतदनुच्छेदस्य अधीनं, यः अध्यादेशः प्रख्यापितः अस्ति सः राज्य- विधानमण्डलस्य अधिनियमः इति मतः भवेत् यः राष्ट्रपतेः विचारार्थं रक्षितः तेन अनुमतश्च अस्ति।

[1] (४)* * * *

---

[1] संविधानस्य (अष्टत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य ३-अनुभागेन (भूतलक्षि प्रभावेण) (४) खण्डः अन्तर्वेशितः आसीत्; ततः परं संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य २७-अनुभागेन लोपितश्च (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(भागः ६-राज्यानि)

अध्याय: ५- राज्यानाम् उच्चन्यायालयाः

२१४. राज्यानां कृते उच्चन्यायालयाः- [1][* * *] प्रत्येकराज्यस्य एकः उच्चन्यायालयः भवेत्।

[2]* * * *

[2]* * * *

२१५. उच्चन्यायालयाः अभिलेखन्यायालयाः- प्रत्येकम् उच्चन्यायालय: अभिलेखन्यायालय: भवेत्, स्वावमाने दण्डनशक्तिम् अन्तर्भावयन्तीः तादृश न्यायालयस्य सर्वाः शक्तीश्च भजेत।

२१६. उच्चन्यायालयानां घटनम्- मुख्यन्यायमूर्तिना तादृशैः अन्यैः न्यायाधीशैश्च यादृशान् राष्ट्रपतिः काले काले नियोक्तुम् आवश्यकान् मन्यते, सम्भूय प्रत्येकम् उच्चन्यायालयः भवेत्।

[3]* * * * *

२१७. उच्चन्यायालये न्यायाधीशस्य नियुक्तिः तस्य पदस्य प्रतिबन्धाश्च- [4][१२४क-अनुच्छेदे निर्दिष्टेण राष्ट्रिय-न्यायिक-नियुक्ति-आयोगेन पुरःप्रशंसिते सति]

(१) राष्ट्रपतिः भारतस्य मुख्यन्यायमूर्तिना, तद् राज्यस्य राज्यपालेन च, मुख्यन्यायमूर्तेः अन्यस्य न्यायाधीशस्य नियुक्तिविषये राज्यस्य उच्चन्यायालयस्य मुख्यन्यायमूर्तिना सह च परामृश्य स्वहस्तेन स्वमुद्रया च अङ्कितेन अधिपत्रेण उच्चन्यायालयस्य प्रत्येकं न्यायाधीशं नियुक्तं कुर्यात्; सः च न्यायाधीशः यदि सः [5][अपरः न्यायाधीशः अथवा कार्यकारी न्यायाधीशः अस्ति तर्हि २२४-तमानुच्छेदे यथा उपबन्धितम् अस्ति तदनुसारं यदि च अन्यः अस्ति तर्हि सः] यावत् [6][वर्षाणां द्विषष्टिः] वयः न आप्नोति तावत् पदं धारयेत्-

परन्तु-

(क) कोऽपि न्यायाधीशः राष्ट्रपतिं सम्बोध्य लिखितेन स्वहस्ताङ्कितेन लेखेन स्वपदं त्यक्तुं क्षमते;

(ख) उच्चन्यायालयस्य न्यायाधीशम् अपसारयितुं १२४-तमानुच्छेदस्य (४) खण्डे

---

1 "(१)" इति कोष्ठकगतः अङ्कः संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च लोपितः।

2 (२) खण्डः (३) खण्डश्च उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च लोपितौ।

3 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य ११-अनुभागेन पारन्तुकः लोपितः।

4 संविधानस्य (नवनवतितमं संशोधनम्) अधिनियमः, २०१४, ६-अनुभागेन "भारतस्य मुख्यन्यायमूर्तिना, तद् राज्यस्य राज्यपालेन च, मुख्यन्यायमूर्तेः अन्यस्य न्यायाधीशस्य नियुक्तविषये राज्यस्य उच्चन्यायालयस्य मुख्यन्यायमूर्तिना सह परामृश्य " इत्यस्य स्थाने प्रतिष्ठापितः (१३-४-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण)। इदं संशोधनम् एडवोकेट-आन रिकार्ड-असोसिएशन् तथा च अन्ये विरुद्धं भारतसङ्घः इति वादे ए.आई.आर २०१६ एस.सी. ११७ इत्यनेन १६.१०.२०१५दिनाङ्के उद्घोषितेन निर्णयेन उच्चन्यायालयेन अभिखण्डितम्।

5 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य १२-अनुभागेन पारन्तुकः लोपितः। "यावद् वर्षाणां षष्टिः वयः प्राप्नोति तावत् पदं धारयेत्" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

6 संविधानस्य (पञ्चदशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य ४-अनुभागेन "वर्षाणां षष्टिः" इत्येताभ्यां शब्दाभ्यां प्रति एतौ शब्दौ संनिवेशितौ।

उपबन्धितया रीत्या राष्ट्रपतिः न्यायाधीशं स्वदात् अपसारयितुं क्षमते;

(ग) कस्यापि न्यायाधीशस्य पदं, राष्ट्रपतिना उच्चतमन्यायालये न्यायाधीशरूपेण तस्य नियुक्तौ, अथवा राष्ट्रपतिना भारतस्य राज्यक्षेत्राभ्यन्तरे अन्यस्मिन् उच्चन्यायालये न्यायाधीशरूपेण तस्य स्थानान्तरे कृते रिक्तं भवेत्।

(२) कोऽपि जनः उच्चन्यायालयस्य न्यायाधीशरूपेण नियुक्तेः अर्हः केवलं तदा भवेत् यदा सः भारतस्य नागरिकः अस्ति; तथा च

(क) भारतस्य राज्यक्षेत्रे न्यूनात् न्यूनं दशवर्षाणि न्यायिकपदं धारयन् संवृत्तः अस्ति; अथवा

(ख) [1][* * *] कस्यापि उच्चन्यायालयस्य कयोश्चिद् उच्चन्यायालयोः केषांचिद् उच्चन्यायालयानां वा निरन्तरक्रमेण न्यूनात् न्यूनं दशवर्षाणि अधिवक्ता संवृत्तः अस्ति; [2][* * *]

[2][ग* * * * *]

स्पष्टीकरणम्- अस्य खण्डस्य प्रयोजनानां कृते-

[3][(क) कोऽपि जनः यस्मिन् कालावधौ भारतस्य राज्यक्षेत्रे न्यायिकपदं धारितवान् तदवधेः सङ्गणनायां, सः कालावधिः अन्तर्भावितः भवेत् यस्मिन् सः जनः न्यायिकपदधारणात् परं कस्यापि उच्चन्यायालयस्य, अधिवक्ता संवृत्तः अथवा कस्यापि अधिकरणस्य सदस्यपदं धारितवान्, अथवा सङ्घस्य वा कस्यापि राज्यस्य अधीनं किमपि तादृशं पदं धारितवान् यदर्थं विधेः विशेषज्ञानम् अपेक्ष्यते।]

[4][कक] कोऽपि जनः यस्मिन् कालावधौ कस्यापि उच्चन्यायालयस्य अधिवक्ता संवृत्तः अस्ति तदवधेः सङ्गणनायां सः कालावधिः अन्तर्भावितः भवेत् यस्मिन् सः जनः कस्यापि उच्चन्यायालयस्य अधिवक्ता संवृत्तः ततः परं च [5][न्यायिकपदं धारितवान् अथवा कस्यापि अधिकरणस्य सदस्यपदं धारितवान् अथवा सङ्घस्य वा राज्यस्य वा अधीनं कमपि तादृशं पदं धारितवान् यदर्थं विधेः विशेषज्ञानम् अपेक्ष्यते।

(ख) कोऽपि जनः यस्मिन् कालावधौ भारतस्य राज्यक्षेत्रे न्यायिकपदं धारितवान्, अथवा उच्चन्यायालयस्य अधिवक्ता संवृत्तः आसीत् तदवधेः सङ्गणनायाम् अस्य संविधानस्य प्रारम्भात् प्राक्तनीयः सः कालावधिः अन्तर्भावितः भवेत्

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "प्रथमानुसूच्याम् उल्लिखिते कस्मिन् अपि राज्ये" इत्येते शब्दाः लोपिताः।

2 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३६-अनुभागेन "अथवा" इति शब्दः (ग) उपखण्डश्च, अन्तर्वेशितौः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण) ; संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य २८-अनुभागेन लोपितौ च (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य २८-अनुभागेन अन्तर्वेशितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 संविधानस्यः (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य २८-अनुभागेन (क) खण्डः (कक) खण्डः इति पुनः अक्षराङ्कितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

5 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः: १९७६ इत्यस्य ३६-अनुभागेन "न्यायिक पदं धृतवान्" इत्यस्मात् प्रति एतत् संनिवेशितं (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

यस्मिन् सः १९४७ वर्षस्य अगस्तमासस्य १५ दिनाङ्कात् प्राक् भारतशासनाधिनियमः, १९३५ इत्यस्मिन् परिभाषिते भारते समाविष्टे कस्मिन् अपि क्षेत्रे न्यायिकपदं धारितवान्, अथवा तादृशे कस्मिन् अपि क्षत्रे कस्यापि उच्चन्यायालयस्य अधिवक्ता संवृत्तः आसीत्।

[1][(३) यदि उच्च न्यायालयस्य न्यायाधीशस्य वयसः विषये कोऽपि प्रश्नः उत्पद्येत तर्हि तस्य प्रश्नस्य विनिश्चयः राष्ट्रपतिना भारतस्य मुख्यन्यायमूर्तिना सह परामृश्य कृतः भवेत्, राष्ट्रपतेः विनिश्चयश्च अन्तिमः भवेत्।]

२१८. उच्चतमन्यायालयसम्बन्धिभिः उपबन्धविशेषैः उच्चन्यायालयानां विषयीकरणम्- १२४-तमानुच्छेदस्य (४), (५) खण्डयोः उपबन्धाः यत्र यत्र उच्चतमन्यायालयं प्रति निर्दिशन्ति तत्र तत्र उच्चन्यायालयं प्रति अपि निर्दिशन्ति इति मत्वा ते उच्चन्यायालयान् तथैव विषयीकुर्युः यथा उच्चतमन्यायालयं विषयीकुर्वन्ति।

२१९. उच्चन्यायालयस्य न्यायाधीशानां शपथः, प्रतिज्ञानं वा- [2][* * *] उच्चन्यायालयस्य न्यायाधीशरूपेण नियुक्तः प्रत्येकं जनः स्वपदे आरोहणात् प्राक् राज्यस्य राज्यपालस्य समक्षं तेन तदर्थं नियुक्तस्य कस्यचित् जनस्य समक्षं वा तृतीयानुसूच्यां तदर्थम् उल्लिखिते, पररूपे शपथं, प्रतिज्ञानं वा, कुर्यात्; तं च स्वहस्ताङ्कितं कुर्यात्।

[3][**२२०. स्थायिन्यायाधीशपदधारणात् परं न्यायाधीशैः विधिवृत्तिकरणे प्रतिषेधः-** यः जनः अस्य संविधानस्य प्रारम्भात् परं कस्यापि उच्चन्यायालयस्य स्थायिन्यायाधीशरूपेण पदं धारितवान् अस्ति सः भारते उच्चतमन्यायालयात् उच्चन्यायालयेभ्यश्च व्यतिरिक्ते अन्यस्मिन् कस्मिन् अपि न्यायालये अथवा कस्यापि प्राधिकारिणः समक्षं अभिवचनं वा कार्यं वा न कुर्यात्।

स्पष्टीकरणम्- अस्मिन् अनुच्छेदे "उच्चन्यायालयः" इति पदं संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६, इत्यस्य प्रारम्भात्[4] पूर्वं या विद्यमाना आसीत् तस्याः प्रथमानुसूच्याः "ख" भागे विनिर्दिष्टस्य राज्यस्य उच्चन्यायालयं न अन्तर्भावयति।]

२२१. न्यायाधीशानां वेतनादीनि- [5][(१) प्रत्येकम् उच्चन्यायालयानां न्यायाधीशानाम् एतादृशां वेतनानां संदायं कुर्यात् यत् संसदः विधिना अवधारयेत् तथा यावत्पर्यन्तम् एतदर्थम् इत्थं

---

1 संविधानस्य (पञ्चदशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य अनुभागेन एतत् अन्तर्वेशितम् (भूतलक्षिप्रभावेण)।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन, अनुसूच्याः च "राज्ये" इति पदं लोपितम्।

3 उपर्युक्ताधिनियमस्य १३-अनुभागेन २२०-तम अनुच्छेदात् प्रति एषः अनुच्छेदः संनिवेशितः।

4 १-११-१९५६ दिनाङ्कात्।

5 संविधानस्य (चतुःपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८६ वर्षस्य ३-अनुभागेन (१-४-१९८६ दिनाङ्कात् प्रवर्तमानप्रभावेण) खण्डः (१) इत्यस्य स्थाने संनिवेशितः।

प्रकारस्य उपबन्धः न क्रियते तावत्पर्यन्तम् एतादृशां वेतनानां संदायं कुर्यात् यत् द्वितीय-अनुसूच्यां विनिर्दिष्टम् अस्ति।]

(२) प्रत्येकं न्यायाधीशः तादृशेषु भक्तेषु, तथैव च अनुपस्थित्यनुमतिसम्बन्धिषु, निवृत्तिवेतनसम्बन्धिषु च तादृशेषु अधिकारेषु स्वत्ववान् भवेत् यादृशानि संसत् प्रणीतेन विधिना तदधीनं वा काले काले अवधारितानि भवेयुः; तथा च यावत् एवं न अवधारितानि तावत् तादृशेषु भक्तेषु, अधिकारेषु च, यादृशानि द्वितीयानुसूच्यां विनिर्दिष्टानि सन्ति-

परन्तु नियुक्तेः परं कस्यापि न्यायाधीशस्य भक्तेषु, अनुपस्थित्यनुमतिसम्बन्धिषु, निवृत्तिवेतन-सम्बन्धिषु अधिकारेषु वा तादृशं परिवर्तनं न भवेत् यादृशं तस्मै लाभन्यूनीकारकः भवेत्।

२२२. एकस्मात् उच्चन्यायालयात् अन्यस्मिन् न्यायाधीशस्य स्थानान्तरणम्- (१) राष्ट्रपतिः [1][१२४क-अनुच्छेदे निर्दिष्टेण राष्ट्रिय-न्यायिक-नियुक्ति-आयोगेन पुरःप्रशंसिते सति] भारतस्य मुख्यन्यायमूर्तिना परामर्शात् परम् एकस्मात् उच्चन्यायालयात् [2][* * *] अन्यस्मिन् कस्मिन् अपि उच्चन्यायालये न्यायाधीशं स्थानान्तरितं कर्तुं क्षमते।

[3][(२) यदा कोऽपि न्यायाधीशः एवं स्थानान्तरितः अस्ति, क्रियेत वा तदा सः यस्मिन् कालावधौ, संविधानस्य (पञ्चदशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य प्रारम्भात् परम् अन्यस्य उच्चन्यायालयस्य न्यायाधीशरूपेण सेवां करोति तस्मिन् कालावधौ स्ववेतनाद् अतिरिक्ते तादृशे प्रतिकरात्मके भक्ते अपि स्वत्ववान् भवेत् यादृशं संसदा विधिना अवधारितं भवेत् तथा च यावत् एवम् अवधारितं न भवेत् तावत् तादश प्रतिकरात्मके भक्ते सः स्वत्ववान् भवेत् यादृशं राष्ट्रपतिः आदेशेन अवधारितं कुर्यात्।]

२२३. कार्यकारिणः मुख्यन्यायमूर्तेः नियुक्तिः- यदा उच्चन्यायालयस्य मुख्यन्यायमूर्तेः पदं रिक्तं भवेत्, अथवा यदा मुख्यन्यायमूर्तिः अनुपस्थित्या, अन्येन वा कारणेन स्वपदस्य कर्तव्यानां पालने असमर्थः भवेत् तदा तत् पदस्य कर्तव्यानि तन्न्यायालयस्य न्यायाधीशानाम् अन्यतमेन केनापि पालितानि भवेयुः यं राष्ट्रपतिः तत्प्रयोजनाय नियोजयेत्।

[4][**२२४. अपराणां कार्यकारिणां च न्यायाधीशानां नियुक्तिः**- (१) यदि कस्यापि उच्चन्यायालयस्य कार्ये कस्याः अपि अस्थायिवृद्धेः कारणात् अवशिष्टकार्यसमुच्चयस्य कारणात्

---

1 संविधानस्य (नवनवतितमं संशोधनम्) अधिनियमः, २०१४, ७-अनुभागेन "भारतस्य मुख्यन्यायमूर्तिना सह परामृश्य" इत्यस्य स्थाने प्रतिष्ठापितः (१३-४-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण)। इदं संशोधनम् एडवोकेट-आन रिकार्ड-असोसिएशन् तथा च अन्ये विरुद्धं भारतसङ्घः इति वादे ए.आई.आर २०१६ एस.सी. ११७ इत्यनेन १६.१०.२०१५दिनाङ्के उद्घोषितेन निर्णयेन उच्चन्यायालयेन अभिखण्डितम्।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६, इत्यस्य १४-अनुभागेन "भारतराज्यक्षेत्रे" इति पदं लोपितम्।

3 संविधानस्य (पञ्चदशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य ५-अनुभागेन अन्तर्वेशितः। मूलपाठस्य (२) खण्डः, संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य १४-अनुभागेन लोपितः आसीत्।

4 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य १५-अनुभागेन २२४-तमात् अनुच्छेदात् प्रति एषः अनुच्छेदः संनिवेशितः।

वा राष्ट्रपतेः प्रतीतिः भवति यत् तत् कालावध्यर्थं तन्न्यायालयस्य न्यायाधीशानां सङ्ख्यावृद्धिः करणीया, तर्हि राष्ट्रपतिः सम्यग्रूपेण [1][(१) राष्ट्रपतिः राष्ट्रिय-न्यायिक-नियुक्ति-आयोगेन सह परामर्शेण, नियोजयितुं क्षमते] इति अर्हान् जनान् तन्न्यायालयस्य अपरन्यायाधीशरूपेण तेन वर्षद्वयादनधिकं विनिर्दिष्टकालावध्यर्थं नियोजयितुं क्षमते।

(२) यदा कस्यापि उच्चन्यायालयस्य मुख्यन्यायमूर्तेः अन्यः कोऽपि न्यायाधीशः स्वस्य अनुपस्थितेः कारणेन अन्येन कारणेन वा स्वकर्तव्यानां पालने असमर्थः स्यात्, अथवा मुख्यन्यायमूर्तिरूपेण अस्थायिरूपेण कार्यकरणार्थं वा नियुक्तः स्यात् [1][राष्ट्रिय-न्यायिक-नियुक्ति-आयोगेन सह परामर्शेण, नियोजयितुं क्षमते] तदा राष्ट्रपतिः सम्यग् रूपेण अर्हं कमपि जनं, तावत् कालावध्यर्थं न्यायाधीशरूपेण कार्यकरणार्थं नियोजयितुं क्षमते यावत् स्थायिन्यायाधीशः स्वकर्तव्यपालनं पुनः आरभते।

(३) उच्चन्यायालयस्य अपरन्यायाधीशरूपेण, कार्यकारिन्यायाधीशरूपेण वा नियुक्तः कोऽपि जनः यदा [2][वर्षाणां द्विषष्टिः] वयः आप्नोति ततः परं पदं न धारयेत्।

[3][**२२४क . उच्चन्यायालयानाम् उपवेशनेषु निवृत्तन्यायाधीशानाम् उपस्थितिः**- अस्मिन् अध्याये किमपि सत्यपि [4][राष्ट्रिय-न्यायिक-नियुक्ति-आयोगः कस्यचिद् राज्यस्य उच्चन्यायालयस्य मुख्यन्यायमूर्तिना निर्देशे कृते सति, राष्ट्रपतेः पूर्वसम्मत्या] कस्यापि राज्यस्य उच्चन्यायालयस्य मुख्यन्यायमूर्तिः कस्मिन् अपि काले राष्ट्रपतेः पूर्वसम्मत्या तस्मिन् उच्चन्यायालये न्यायाधीशरूपेण उपस्थातुं, कार्यं कर्तुं च कमपि तादृशं जनं प्रार्थयितुं क्षमते यः तन्न्यायालस्य अन्यस्य कस्यापि उच्चन्यायालयस्य वा न्यायाधीशरूपेण पदं धारितवान्; तथा च एवं प्रार्थितः तादृशः प्रत्येकं जनः यदा एवं उपस्थितः, कार्यं कुर्वन् च भवेत् तदा तादृशेषु भक्तेषु स्वत्ववान् भवेत् यादृशानि राष्ट्रपतिः आदेशेन अवधारयेत्; तथा च सः तदुच्चन्यायालयस्य न्यायाधीशस्य सर्वाः अधिकारिताः, शक्तीश्च, सर्वान् विशेषाधिकारान् च भजेत किन्तु अन्यथा तस्य उच्चन्यायालयस्य न्यायाधीशः, इति न मन्येत-

परन्तु यावत् पूर्वोक्तः कोऽपि तादृशः जनः एवं कर्तुं न सम्मनुते तावत् सः तन्न्यायालयस्य न्यायाधीशरूपेण उपविशेत्, कार्यं कुर्यात् च इति एतदनुच्छेदगतं किमपि तस्माद् अपेक्षते इति न मन्येत।]

---

1 संविधानस्य (नवनवतितमं संशोधनम्) अधिनियमः, २०१४, ७-अनुभागेन "राष्ट्रपतिः नियोजयितुं क्षमते" इत्यस्य स्थाने प्रतिष्ठापितः (१३-४-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण)। इदं संशोधनम् एडवोकेट-आन रिकार्ड-असोसिएशन् तथा च अन्ये विरुद्धं भारतसङ्घः इति वादे ए.आई.आर २०१६ एस.सी. ११७ इत्यनेन १६.१०.२०१५ दिनाङ्के उद्घोषितेन निर्णयेन उच्चन्यायालयेन अभिखण्डितम्।

2 संविधानस्य (पञ्चदशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य ६-अनुभागेन "वर्षाणां षष्टिः" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

3 संविधानस्य (पञ्चदशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य ७-अनुभागेन एषः अनुच्छेदः अन्तर्वेशितः।

4 संविधानस्य (नवनवतितमं संशोधनम्) अधिनियमः, २०१४, ९-अनुभागेन "उच्चन्यायालयस्य मुख्यन्यायमूर्तिः कस्मिन् अपि काले राष्ट्रपतेः पूर्वसम्मत्या" इत्यस्य स्थाने प्रतिष्ठापितः (१३-४-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण)। इदं संशोधनम् एडवोकेट-आन रिकार्ड-असोसिएशन् तथा च अन्ये विरुद्धं भारतसङ्घः इति वादे ए.आई.आर २०१६ एस.सी. ११७ इत्यनेन १६.१०.२०१५दिनाङ्के उद्घोषितेन निर्णयेन उच्चन्यायालयेन अभिखण्डितम्।

२२५. विद्यमानानाम् उच्चन्यायालयानाम् अधिकारिता- अस्य संविधानस्य उपबन्धानाम् अधीनम्, अनेन संविधानेन समुचिताय विधानमण्डलाय प्रदत्तानां शक्तीनाम् आश्रयेण तद् विधानमण्डलेन प्रणीतस्य कस्यापि विधेः उपबन्धानाम् अधीनं च, कस्यापि विद्यमानस्य उच्चन्यायालयस्य अधिकारिता, प्रशासितः विधिश्च तथा तन्न्यायालयस्य न्यायाधीशानां तस्मिन् न्यायालये न्यायप्रशासनस्य सम्बन्धे तेषां शक्तयश्च तस्य न्यायालयस्य नियमानां प्रणयने तथा तस्मिन् न्यायालये उपवेशनानां नियमने तथा तस्य सदस्यानाम् एकाकित्वेन, खण्डन्यायालयेषु वा उपवेशनानां नियमने सर्वां शक्तिम् अन्तर्भावयन्त्यः तथा एव भवेयुः यथा अस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वम् आसन्-

[1][परन्तु राजस्वसम्बन्धिनि, तस्य सङ्ग्रहार्थम् आदेशितस्य कृतस्य वा कस्यापि कार्यस्य सम्बन्धिनि वा कस्मिन् अपि विषये उच्चन्यायालयानाम् अन्यतमस्य कस्यापि प्रारम्भिकाधिकारितायाः प्रयोगः अस्य संविधानस्य प्रारम्भात् अव्यहितपूर्वं यस्य कस्यापि निबन्धनस्य अधीनम् आसीत् तन्निर्बधनं तादृशीम् अधिकारितां न विषयीकुर्यात्।]

[2][**२२६. केषांचित् लेखविशेषाणां प्रचालने उच्चन्यायालयानां शक्तिः**- (१) ३२-तमानुच्छेदे किमपि सत्यपि [3][* * *] प्रत्येकम् उच्चन्यायालयः येषां सम्बन्धे सः स्वीयाम् अधिकारितां प्रयोजयति तेषु सर्वेषु राज्यक्षेत्रेषु [4][तृतीयभागेन प्रदत्तानाम् अधिकाराणां कस्यापि अन्यतमस्य प्रवर्तनार्थम्, अथवा अन्यस्मै कस्मै अपि प्रयोजनाय वा, तेषां राज्यक्षेत्राणाम् अभ्यन्तरं कस्यापि जनस्य, प्राधिकारिणः समुचितान् विषयान् अधिकृत्य कस्यापि वा शासनस्य वा कृते निदेशानाम्, आदेशानां, *बन्दीप्रत्यक्षीकरण-परमादेश-प्रतिषेध-अधिकारपृच्छा-उत्प्रेषणादीन्* वा लेखान्] अन्तर्भावयन्तां विशेषलेखानां तेषाम् अन्यतमस्य वा प्रचालने शक्तिं भजेत।]

(२) येषां राज्यक्षेत्राणाम् अभ्यन्तरे पूर्णतः भागतः वा वादहेतुकः उत्पन्नः अस्ति तेषां सम्बन्धे अधिकारितायाः प्रयोगं कुर्वन् कोऽपि उच्चन्यायालयः कस्यापि शासनस्य, प्राधिकारिणः, जनस्य

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य २९-अनुभागेन एषः पारन्तुकः अन्तर्वेशितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)। मूलपारन्तुकः संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३७-अनुभागेन लोपितः आसीत् (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३८-अनुभागेन २२६-तमानुच्छेदात् प्रति एषः अनुच्छेदः संनिवेशितः (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (त्रिचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७७ इत्यस्य ७-अनुभागेन "किन्तु १३१-अ अनुच्छेदस्य, २२६-अ अनुच्छेदस्य उपबन्धानाम् अधीनम्" इत्येते शब्दाः अङ्काः, अक्षरे च लोपितानि (१३-४-१९७८ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३०-अनुभागेन *"बन्दीप्रत्यक्षीकरण-परमादेश-प्रतिषेधाधिकारपृच्छोत्प्रेषणस्वरूपान्* तदन्यतमस्य कस्यापि वा स्वरूपलेखान्" इत्येतस्मात् आरभ्य "एतादृशी अवैधिकता न्यायस्य निष्फलतायां परिणता अस्ति" एतदन्तात् पाठात् प्रति एषः पाठः संनिवेशितः (१-८-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

वा कृते अपि, तादृशस्य प्रशासनस्य प्राधिकारिणः वा स्थानं तादृशस्य जनस्य निवासस्थानं वा तेषां राज्यक्षेत्राणाम् अभ्यन्तरे असत्यपि निदेशानाम्, आदेशानां, विशेषलेखानां वा प्रचालने (१) खण्डेन प्रदत्तायाः शक्तेः प्रयोगं कर्तुं क्षमते।

[1][(३) यत्र कोऽपि पक्षकारः, यस्य विरुद्धं (१) खण्डाधीनं कयापि याचिकया सम्बद्धायां प्रक्रियायाम् अन्तरिमः आदेश-व्यादेशरूपेण, निरोधरूपेण अन्यया रीत्या वा-

(क) तादृशाय पक्षकाराय तादृश्याः याचिकायाः, तादृशस्य अन्तरिम-आदेशस्य अभिवचनस्य समर्थनं कुर्वतां पत्राणां च प्रतिलिपिम्,

(ख) तादृशाय पक्षकाराय अवेक्षणावसरम्, च

न दत्वा कृतः अस्ति, सः परपक्षकारश्च उच्चन्यायालयाय आवेदनं कुरुते तथा एतादृशस्य आवेदनस्य एकां प्रतिलिपिम्, यस्य पक्षे एतादृशः आदेशः दत्तः अस्ति तस्मै तस्य अधिवक्त्रे वा ददाति तत्र उच्चन्यायालयः तस्य आवेदनस्य प्राप्तेः तत्प्रतिलिपेः एवं प्रदानस्य च दिनाङ्कयोः परतरात् दिनाङ्कात् सप्ताहद्वयावधेः अभ्यन्तरे, अथवा यदि उच्चन्यायालयः तस्य अवधेः अन्तिमदिनाङ्के विरतः भवेत् तर्हि तदनुवर्तिदिनस्य समाप्तेः प्राक् यस्मिन् उच्चन्यायालयः कार्यं कुर्वन् आसीत्, आवेदनं परिकल्पितं न अस्ति तर्हि यथायथं तदवधेः अथवा उक्तानुवर्तिदिनस्य समाप्तौ, सः आदेशः शून्यीकृतः भवेत्।]

[2][(४) एतेन अनुच्छेदेन उच्चन्यायालयाय प्रदत्ता शक्तिः ३२-तमानुच्छेदस्य (२) खण्डेन उच्चतमन्यायालयाय प्रदत्तायाः शक्तेः अल्पीकरणाय न भवेत्।]

[3][**२२६क.** २२६-तमानुच्छेदस्य अधीनं प्रक्रियासु केन्द्रीयविधीनां सांविधानिकवैधताविषये विचारः न कर्तव्यः] *संविधानस्य (त्रिचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७७ इत्यस्य ८-अनुभागेन निरसितः। (१३-४-१९७८ दिनाङ्कात् प्रवर्तमानप्रभावेण)।*

२२७. सर्वेषां न्यायालयानाम् अधीक्षणे उच्चन्यायालयस्य शक्तिः- [4][(१) प्रत्येकम् उच्चन्यायालयः तेषु सर्वेषु राज्यक्षेत्रेषु सर्वेषां न्यायालयानां न्यायाधिकरणानां च अधीक्षणं कुर्यात्, येषां सम्बन्धे सः अधिकारितां प्रयुङ्क्ते।]

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३०-अनुभागेन (३), (४), (५), (६) खण्डेभ्यः प्रति एष खण्डः संनिवेशितः (१-८-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन (७) खण्डः (४) खण्डरूपेण पुनरङ्काङ्कितः (१-८-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ३९-अनुभागेन अन्तर्वेशितः आसीत् (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 अनुक्रमशः संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ४०-अनुभागेन (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण), तथा च संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३१-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) च संशोधितः एषः खण्डः इदं रूपं प्राप्तवान्।

(२) पूर्वगाम्युपबन्धस्य व्यापकतायां प्रतिकूलं प्रभावम् अकुर्वन् उच्चन्यायालयः-

(क) तादृशान् न्यायालयान् विवरणीः प्रेषणाय आज्ञप्तुम्;

(ख) तादृशानां न्यायालयानां कार्यपद्धत्याः, कार्यप्रवृत्तीनां च विनियमनाय साधारणान् नियमान् प्रणेतुं, प्रचालयितुं, प्ररूपाणि विधातुं; तथा च

(ग) तादृशानां केषामपि न्यायालयानाम् अधिकारिभिः येषाम् अनुसारेण पुस्तकानि प्रविष्टयः लेखाश्च गोप्याः तानि प्ररूपाणि विधातुं, क्षमते।

(३) तादृशानां न्यायालयानां निर्णयप्रवर्तकाय ("शेरिफ") सर्वेभ्यः लिपिकारेभ्यः अधिकारिभ्यश्च तथा तेषु न्यायालयेषु विधिव्यवसायं कुर्वद्भ्यः न्यायवादिभ्यः, अधिवक्तृभ्यः विधिवृत्तिकरेभ्यश्च ये प्रशुल्काः अनुमन्तव्याः तेषां प्रशुल्कानां सारणी अपि उच्चन्यायालयः स्थापयेत् :-

परन्तु (२) खण्डस्य, (३) खण्डस्य वा अधीनं प्रणीताः केपि नियमाः, विहितानि कानि अपि प्ररूपाणि, स्थापिताः काः अपि सारिण्यः वा तदानीं प्रवृत्तस्य कस्यापि विधेः उपबन्धेन असङ्गताः न भवेयुः, तथा च राज्यपालस्य पूर्वानुमोदनम् अपेक्षेरन्।

(४) एतदनुच्छेदगतं किमपि उच्चन्यायालयाय सशस्त्रबलैः सम्बन्धितेन केनापि विधिना तदधीनं वा सङ्घटिते कस्मिन् अपि न्यायालये न्यायाधिकरणे वा अधीक्षणस्य शक्तीः प्रददाति इति न मन्येत।

[1](५) * * * *

२२८. केषांचिद् वादविशेषाणाम् उच्चन्यायालयाय अन्तरणम्- यदि उच्चन्यायालयः समाहितः भवति यत् तस्य अधीने न्यायालये लम्बितः कोऽपि वादः अस्य संविधानस्य निर्वचनेन सम्बद्धं कमपि सारवन्तं विधिप्रश्नम् अन्तर्गृहणाति यस्य निर्धारिणं तस्य वादस्य व्यवस्थादानाय आवश्यकम् अस्ति तर्हि सः [2][तं वादं प्रत्याहरेत्]; तथा च [3][***]

(क) तस्मिन् वादे स्वयम् एव व्यवस्थादानं कर्तुं क्षमते; अथवा

(ख) उक्तं विधिप्रश्नम् अवधारयितुं क्षमते, तथा तं वादं तं न्यायालयं प्रति तत्प्रश्ननिर्णयस्य प्रतिलिप्या सह निवर्तयितुं क्षमते यस्मात् सः वादः प्रत्याहृतः आसीत्; तथा च सः न्यायालयः तस्य प्राप्तेः परं तादृशस्य निर्णयस्य अनुरूपं तस्मिन् वादे व्यवस्थादानाय प्रक्रमेत।

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ४०-अनुभागेन (५) खण्डः अन्तर्वेशितः (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण); संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३१-अनुभागेन लोपितश्च (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ४१-अनुभागेन "स तं वादं प्रत्याहरेत् किं च" इत्याद्यात् प्रति एतत् संनिवेशितं (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (त्रिचत्वारिंशत्तमं संशोधनम्) अधिनियिमः, १९७७ इत्यस्य ९-अनुभागेन "१३१क अनुच्छेदस्य उपबन्धानाम् अधीनम्" इत्येते अङ्काः, अक्षराः, शब्दाश्च लोपिताः (१३-४-१९७८ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[1]**२२८क** *[राज्यविधीनां सांविधानिकवैधतासम्बद्धानां प्रश्नानां विषये व्यवस्थादानाय विशेषोपबन्धाः] संविधानस्य (त्रिचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७७ इत्यस्य १०-अनुभागेन निरसितः (१३-४-१९७८ दिनाङ्कात् प्रवर्तमानप्रभावेण।)*

२२९. उच्चन्यायालयानाम् अधिकारिणः, सेवकाः, व्ययाश्च- (१) उच्चन्यायालयस्य अधिकारिणां, सेवकानां च नियुक्तयः तन्न्यायालस्य मुख्यन्यायमूर्तिना, तेन निर्दिष्टेन तन्न्यायालयस्य अन्येन न्यायाधीशेन, अधिकारिणा वा कृताः भवेयुः-

परन्तु [2][* * *] तस्य राज्यस्य राज्यपालः नियमेन एतद् अपेक्षितुं क्षमते यत् यादृश्यः अवस्थाः नियमे विनिर्दिष्टाः स्युः तादृशीषु अवस्थासु यः कोऽपि जनः तन्न्यायालयेन पूर्वम् एव असंलग्नः सः राज्यसेवायोगेन सह परामर्शनं कृत्वा एव तन्न्यायालयेन सम्पृक्ते कस्मिन् अपि पदे नियुक्तः भवेत्, नान्यथा।

(२) राज्यस्य विधानमण्डलेन प्रणीतस्य कस्यापि विधेः उपबन्धानाम् अधीनम्, उच्चन्यायालयस्य अधिकारिणां, सेवकानां च सेवाप्रतिबन्धाः तादृशा भवेयुः यादृशाः तन्न्यायालयस्य मुख्यन्यायमूर्तिना अथवा तदर्थं नियमप्रणयनार्थं मुख्यन्यायमूर्तिना प्राधिकृतेन तन्न्यायालयस्य अन्येन न्यायाधीशेन अधिकारिणा वा प्रणीतैः नियमैः विहिताः भवेयुः-

परन्तु एतत्खण्डाधीनं प्रणीताः नियमाः यावत् पर्यन्तं वेतनैः, भक्तैः, अनुपस्थित्यनुमत्या, निवृत्तिवेतनैः वा सम्बद्धाः सन्ति तावत् ते [2][* * *] तद्राज्यस्य राज्यपालस्य अनुमोदनम् अपेक्षेरन्।

(३) उच्चन्यायालयस्य अधिकारिभ्यः सेवकेभ्यश्च तेषां सम्बन्धे सन्देयानि सर्वाणि वेतनानि, भक्तानि निवृत्तिवेतनानि च अन्तर्भावयन्तः, तन्न्यायालयस्य प्रशासनव्ययाः तद्राज्यस्य सञ्चितनिधौ भारिताः भवेयुः; तथा च तन्न्यायालयेन आदेयाः, प्रशुल्काः अन्यानि च धनानि तस्य निधेः भागाः भवेयुः।

[3][**२३०. उच्चन्यायालयानाम् अधिकारितायाः सङ्घराज्यक्षेत्रेषु विस्तारः**- (१) संसद् विधिना कस्मिन् अपि सङ्घराज्यक्षेत्रे कस्यापि उच्चन्यायालयस्य अधिकारितां विस्तारयितुं, कस्माद् अपि सङ्घराज्यक्षेत्रात् उच्चन्यायालयस्य अधिकारिताम् अपवर्जयितुं च क्षमते।

(२) यत्र कस्यापि राज्यस्य उच्चन्यायालयः कस्यापि सङ्घराज्यक्षेत्रस्य सम्बन्धे अधिकारितां प्रयुङ्क्ते, तत्र-

(क) एतत्-संविधानगतस्य कस्यापि कथनस्य एवम् अर्थः न ग्राह्यः यत् तत् तद्राज्यस्य विधानमण्डलस्य तदधिकारितायाः वृद्धिं, निर्बन्धनम्, उत्सादनं वा कुर्वतीं शक्तिं प्रददाति; तथा

(ख) २२७-तमानुच्छेदे राज्यपालं प्रति निर्देशस्य, तस्मिन् राज्यक्षेत्रे अधीनस्थानां

---

[1] संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ४२-अनुभागेन अन्तर्वेशितः (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[2] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "यस्मिन् न्यायालयस्य स्वीयं मुख्यं स्थानमस्ति" इति शब्दाः लोपिताः।

[3] उपर्युक्ताधिनियमस्य १६-अनुभागेन २३०, २३१, २३२-तमानुच्छेदेभ्यः प्रति एतौ अनुच्छेदौ संनिवेशितौ।

न्यायालयानां कृते केषामपि नियमानां, प्ररूपाणां, सारणीनां च सम्बन्धे तथा अर्थः ग्राह्यः यथा सः राष्ट्रपतिं प्रति निर्देशः इति।

२३१. द्वयोः अधिकानां वा राज्यानाम् अर्थे एकस्य उच्चन्यायालयस्य स्थापना- (क) एतद् अध्यायस्य पूर्ववर्तिषु उपबन्धेषु किमपि सत्यपि संसद् विधिना द्वयोः अधिकानां वा राज्यानाम् अर्थे, अथवा द्वयोः अधिकानां राज्यानाम् एकस्य सङ्घराज्यक्षेत्रस्य च अर्थे एक एव उच्चन्यायालयं स्थापयितुं क्षमते।

(२) एतादृशस्य कस्यापि उच्चन्यायालयस्य सम्बन्धे-

[1][(क)* * *]

(ख) २१७-तमानुच्छेदे राज्यस्य राज्यपालं प्रति निर्देशस्य अधीनस्थन्यायालयानां कृते केषांचित् नियमानां, प्ररूपाणां, सारणीनां च सम्बन्धे तथा अर्थः ग्राह्यः यथा तन्निर्देशः तद् राज्यस्य राज्यपालं प्रति निर्देशः स्यात् यस्मिन् तस्य उच्चन्यायालयस्य मुख्यं स्थानम् अस्ति।

(ग) २१९-तमानुच्छेदे, २२९-तमानुच्छेदे च राज्यं प्रति निर्देशस्य तथा अर्थः ग्राह्यः यथा तन्निर्देशः तद् राज्यं प्रति निर्देशः स्यात् यस्मिन् तस्य उच्चन्यायालयस्य मुख्यं स्थानम् अस्ति- परन्तु यदि तादृशं मुख्यस्थानं कस्मिन् अपि सङ्घराज्यक्षेत्रे अस्ति तर्हि २१९-तमानुच्छेदे २२९-तमानुच्छेदे च राज्यस्य राज्यपालं प्रति, लोकसेवायोगं प्रति, विधानमण्डलं प्रति, सञ्चितनिधिं प्रति च निर्देशानां तथा अर्थः ग्राह्यः यथा ते निर्देशाः क्रमशः राष्ट्रपतिं प्रति, सङ्घलोकसेवायोगं प्रति, संसदं प्रति, भारतस्य सञ्चितनिधिं प्रति निर्देशाः इति।]

[२३२. निर्वचनम्- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य ६-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुच्छेदाः २३०,२३१ तथा २३२ इत्येषां स्थाने अनुच्छेदौ २३० तथा २३१ इति प्रतिस्थापितौ।]

अध्यायः ६-अधीनस्थाः न्यायालयाः

२३३. मण्डलन्यायाधीशानां नियुक्तिः- (१) कस्मिन् अपि राज्ये जनानां मण्डलन्यायाधीशरूपेण नियुक्तयः, मण्डलन्यायाधीशानां च पदान्तरणं, पदोन्नतिश्च तादृशस्य

---

[1] संविधानस्य (नवनवतितमं संशोधनम्) अधिनियमः, २०१४, १०-अनुभागेन (क)-उपखण्डः लोपितः (१३-४-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण)। इदं संशोधनम् एडवोकेट-आन रिकार्ड-असोसिएशन् तथा च अन्ये विरुद्धं भारतसङ्घः इति वादे ए.आई.आर २०१६ एस.सी. ११७ इत्यनेन १६.१०.२०१५दिनाङ्के उद्घोषितेन निर्णयेन उच्चन्यायालयेन अभिखण्डितम्। संशोधनात् पूर्वं -

*(क)-उपखण्डः एतादृशः आसीत्– २१७-तमानुच्छेदे राज्यस्य राजपालं प्रति निर्देशस्य तथा अर्थः ग्राह्यः यथा तन्निर्देशः तेषां सर्वेषां राज्यानां राज्यपालानां प्रति निर्देशः स्यात् येषां (राज्यानां) सम्बन्धे सः उच्चन्यायालयः अधिकारितां प्रयुङ्क्ते इति।

राज्यस्य सम्बन्धे अधिकारिता प्रयुञ्जानेन उच्चन्यायालयेन सह परामृश्य तद्राज्यस्य राज्यपालेन कृताः भवेयुः।

(२) सङ्घस्य राज्यस्य वा सेवायां पूर्वं न सन् जनः, यदि सः सप्तवर्षेभ्यः अन्यूनकालम् अधिवक्ता, विधिवृत्तिकरः वा संवृत्तः अस्ति, उच्चन्यायालयेन नियुक्तये प्रशंसितः च अस्ति तर्हि मण्डलन्यायाधीशरूपेण नियुक्तेः पात्रं भवेत्।

[1][**२३३क. केषांचित् मण्डलन्यायाधीशानां नियुक्तीनां, तैः प्रदत्तानां निर्णयादीनां च विधिमान्यकरणम्-** कस्यापि न्यायालयस्य कस्मिन् अपि निर्णये, आज्ञप्तौ, आदेशे वा सत्यपि-

(क) (प्रथमः) यः जनः राज्यस्य न्यायिकसेवायां पूर्वतः एव अस्ति अथवा यश्च सप्तवर्षेभ्यः अन्यूनकालम् अधिवक्ता, विधिवृत्तिकरः वा संवृत्तः अस्ति तस्य तस्मिन् राज्ये मण्डलन्यायाधीशरूपेण नियुक्तिः, तथा च

(द्वितीयः) तादृशस्य जनस्य मण्डलन्यायाधीशरूपेण पदस्थापनं, प्रोन्नतिः, अन्तरणं वा, संविधानस्य (विंशतितमं संशोधनम्) अधिनियमः, १९६६ इत्यस्य प्रारम्भात् पूर्वं, कस्मिन् अपि काले २३३-तमानुच्छेदस्य २३५-तमानुच्छेदस्य वा उपबन्धानाम् अनुसारं न कृतम् अस्ति, तर्हि तत् पदस्थापनं, नियुक्तिः, प्रोन्नतिः, अन्तरणं वा उक्तोपबन्धानाम् अनुसारं न अक्रियत इति एतत् तथ्यस्य आधारेण, अवैधं, शून्यीभूतश्च अस्ति इति न मन्येत अथवा कदापि अवैधं, शून्यीभूतं वा आसीत् इत्यपि न मन्येत।

(ख) कस्मिन् अपि राज्ये २३३-तमानुच्छेदस्य २३५-तमानुच्छेदस्य वा अनुसरणं न कृत्वा, अन्यथा मण्डलन्यायाधीशरूपेण नियुक्तेन, पदस्थापितेन, प्रोन्नतेन, अन्तरितेन वा जनेन संविधानस्य (विंशतितमं संशोधनम्) अधिनियमः, १९६६ इत्यस्य प्रारम्भात् पूर्वं प्रयुक्ता अधिकारिता; पारिताः प्रदत्ताः वा निर्णयाः, आज्ञप्तयः, दण्डादेशाः, आदेशाः वा तेन कृतानि अन्यानि कार्याणि, कार्यप्रवृत्तयः वा अवैधानि, अविधिमान्यानि वा आसन् इति केवलम् एतत् तथ्यस्य कारणेन न मन्येत यत् तत् पदस्थापनं नियुक्तिः, प्रोन्नतिः, अन्तरणं वा उक्तोपबन्धानाम् अनुसारं न अक्रियत।]

२३४. न्यायसम्बन्धिसेवायां मण्डलन्यायाधीशेभ्यः अन्येषां जनानां नियोजनम्- राज्यस्य न्यायसम्बन्धिसेवायां मण्डलन्यायाधीशेभ्यः अन्येषां जनानां नियुक्तयः राज्यस्य लोकसेवायोगेन तद्राज्यस्य सम्बन्धे अधिकारितायाः प्रयोगं कुर्वता उच्चन्यायालयेन च परामर्शात् परं तद्राज्यस्य राज्यपालेन तदर्थं तेन प्रणीतानां नियमानाम् अनुसारं कृताः भवेयुः।

---

1 संविधानस्य (विंशतितमं संशोधनम्) अधिनियमः,१९६६ इत्यस्य २-अनुभागेन अन्तर्वेशितः।

२३५. अधीनस्थन्यायालयानां नियन्त्रणम्- राज्यस्य न्यायसम्बन्धिसेवायां स्थितानां मण्डलन्यायाधीशपदात् अवरं किमपि पदं धारयमाणानां च जनानां पदस्थापनम्, प्रोन्नतिम्, अनुपस्थित्यनुमतिं च अन्तर्भावयन् मण्डलन्यायालयानां तदधीनानां न्यायालयानां च नियन्त्रणम् उच्चन्यायालये निहितं भवेत्, किन्तु एतदनुच्छेदगतं किमपि एतादृशात् जनात्, स जनः स्वास्थ्य सेवायाः प्रतिबन्धानां विनियमयितुम्; अथवा एतादृशस्य विधेः अधीनं विहितानां सेवाप्रतिबन्धानाम् अनुसरणात् अन्यथा उच्चन्यायालयं प्राधिकुर्वाणस्य विधेः अधीनं यम् अधिकारं भोक्तुं क्षमते, तस्य पुनर्विचारप्रार्थनायाः अधिकारम् अपहरति इति अर्थः न ग्राह्यः।

२३६. निर्वचनम्- अस्मिन् अध्याये (क) "मण्डलन्यायाधीशः" इति पदे अन्तर्भवति नगरव्यवहारन्यायालयस्य न्यायाधीशः, अपरमण्डलन्यायाधीशः, संयुक्तमण्डलन्यायाधीशः, सहायकमण्डलन्यायाधीशः, लघुवादन्यायालयस्य मुख्यन्यायाधीशः, मुख्यप्रान्तीयः (प्रेसिडेन्सि) दण्डाधीशः, अपरमुख्यप्रान्तीयदण्डाधीशः; आपराधिकन्यायाधीशः, अपर-आपराधिकन्यायाधीशः, सहायक-आपराधिकन्यायाधीशश्च।

(ख) "न्यायिकसेवा" इति शब्देन सा सेवा अभिधीयते या मण्डलन्यायाधीशपदस्य, मण्डलन्यायाधीशपदात् अवराणां व्यवहारन्यायिकपदानां च पूर्तये उद्दिष्टैः एवं केवलैः जनैः सम्भूता।

२३७. वर्गविशेषस्य वर्गविशेषाणां वा दण्डाधीशानाम् एतद् अध्यायस्थैः उपबन्धैः विषयीकरणम्- राज्यपालः सार्वजनिकाधिसूचनया निदेशं दातुं क्षमते, यत् अस्य अध्यायस्य पूर्वगताः उपबन्धाः तदधीनं प्रणीताः नियमाश्च सः यादृशं दिनाङ्कं तदर्थं नियमयेत् तादृशात् दिनाङ्कात् तद्राज्यस्थानां केषामपि दण्डाधीशानां कस्यापि वर्गस्य वर्गाणां वा सम्बन्धं, यादृशाः अधिसूचनायां विनिर्दिष्टाः भवेयुः तादृशानाम् अपवादानाम्, उपान्तराणां च अधीनं विषयीकुर्युः, यथा ते राज्यस्य न्यायिकसेवासु नियुक्तानां जनानां सम्बन्धं विषयीकुर्वन्ति।

[*]भागः ७

[*प्रथमानुसूचीस्थानि (ख) भागीयराज्यानि*]

[*] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २७-अनुभागेन अधिसूच्या च निरसितः।

भागः ८

[1][सङ्घराज्यक्षेत्राणि]

[2][**२३९. सङ्घस्य राज्यक्षेत्राणां प्रशासनम्-** (१) राष्ट्रपतिः, संसदा विधिना अन्यथा उपबन्धितं व्यतिरिच्य, यावन्मात्रं स उचितं मन्यते तावन्मात्रं कार्यं कुर्वाणस्य, स्वविनिर्दिष्टपदाभिधानेन नियुक्तस्य प्रशासकस्य द्वारा, प्रत्येक-सङ्घराज्यक्षेत्रस्य प्रशासनं कुर्यात्।

(२) षष्ठे भागे किमपि सत्यपि, राष्ट्रपतिः कस्यापि राज्यस्य राज्यपालं संनिकृष्टसङ्घराज्यक्षेत्रस्य प्रशासकरूपेण नियोक्तुं क्षमते तथा च यत्र राज्यपालः एवं नियुक्तः भवेत् तत्र सः एतादृशप्रशासकरूपेण स्वकृत्यानां प्रयोगं स्वमन्त्रिपरिषदम् अनाश्रित्य कुर्यात्।]

[3*][**२३९क. केषांचित् सङ्घराज्यक्षेत्राणां कृते स्थानीयविधानमण्डलानां मन्त्रिपरिषदाम्, उभयोः वा सर्जनम्-** (१) संसद विधिना [4][[5][पुडुचेरी,]] इत्यस्य सङ्घराज्यक्षेत्रस्य कृते-

(क) तत् सङ्घराज्यक्षेत्रस्य विधानमण्डलरूपेण कार्यं कर्तुं निर्वाचितनिकायस्य अथवा भागतः नामनिर्दिष्टस्य भागतः निर्वाचितस्य च निकायस्य,

(ख) मन्त्रिपरिषदः, अथवा

उभयोः वा सर्जनं कर्तुं क्षमते ययोः प्रत्येकस्य घटनं, शक्तयः कृत्यानि च तादृशानि भवेयुः यादृशानि विधिना विनिर्दिष्टानि सन्तिः।

(२) यादृशः (१) खण्डे निर्दिष्टः तादृशः कोऽपि विधिः ३६८-तमानुच्छेदस्य प्रयोजनानां कृते अस्य संविधानस्य संशोधनम् इति न मतं भवेत्; यद्यपि सः तं कमपि उपबन्धम् अन्तर्वेशयति यः एतत् संविधानं संशोधयति अथवा तस्य संशोधनस्य प्रभावं धारयति।]

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः,१९५६ इत्यस्य १७-अनुभागेन "प्रथमानुसुचीस्थ-(ग) भागीयराज्यानि" इति शीर्षकात् प्रति एतत् संनिवेशितम्।

[2] उपर्युक्ताधिनियमस्य १७-अनुभागेन २३९-अनुच्छेदात् प्रति एषः अनुच्छेदः संनिवेशितः।

[3] संविधानस्य (चतुर्दशं संशोधनम्) अधिनियमः, १९६२ इत्यस्य ४-अनुभागेन अन्तर्वेशितः।

[4] गोवा-दमण-दीव-पुनर्घटन-अधिनियमः, १९८७ (१९८७ वर्षस्य १८) इत्यस्य ६३-अनुभागेन (३०-५-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) "गोवा तथा दमण-दीवः तथा पांडिचेरी इति सङ्घराज्यक्षेत्रेषु केषांचित् कृते" शब्दानां स्थाने संनिवेशितः।

[5] पांडिचेरी (नाम-परिवर्तनम्) अधिनियमः, २००६ (२००६ वर्षस्य ४४) इत्यस्य ४-अनुभागेन (१-१०-२००६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "पांडिचेरी" इत्यस्य स्थाने संनिवेशितः।

[*] अनुच्छेदः २३९क जम्मू-कश्मीर-पुनर्घटन-अधिनियमः, २०१९ (२०१९ वर्षस्य ३४) इत्यस्य १३-अनुभागेन (३१-१०-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) जम्मू-कश्मीर-सङ्घराज्यक्षेत्रे प्रवर्तेत।

[1][**२३९कक. दिल्लीसम्बन्धे विशेषोपबन्धाः-** (१) संविधानस्य (एकोनसप्ततितमं संशोधनम्) अधिनियमः, १९९१, इत्यस्य प्रारम्भात् सङ्घराज्यक्षेत्रं दिल्ली राष्ट्रिय-राजधानी-राज्यक्षेत्रं दिल्ली इति बोध्येत (इतः परम् एतस्मिन् भागे राष्ट्रिय-राजधानी-राज्यक्षेत्रम् इति संदर्भितम्) अनुच्छेद २३९ इत्यतः नियुक्तः तस्य प्रशासकः च उपराज्यपालः इति नामनिर्दिष्टः स्यात्।

(२)(क) राष्ट्रिय-राजधानी-राज्यक्षेत्राय एका विधानसभा भवेत्, तस्यां च विधानसभायां आसनानि राष्ट्रिय-राजधानी-राज्यक्षेत्रगतेभ्यः प्रादेशिक-निर्वाचनक्षेत्रेभ्यः प्रत्यक्षनिर्वाचनेन निर्वाचितैः सदस्यैः पूर्येरन्।

(ख) विधानसभायाम् आसनानि, अनुसूचितजातीनां कृते आरक्षितानाम् आसनानां सङ्ख्या, प्रादेशिक-निर्वाचनक्षेत्रेषु राष्ट्रिय-राजधानी-राज्यक्षेत्रस्य विभाजनं (तादृश-विभाजनस्य आधारसहितं), तथा च विधानसभायाः कृत्यैः सम्बन्धिनः अन्ये सर्वे विषयाः संसदा विधिना नियन्त्रिताः भवेयुः।

[2](खक) राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली इत्यस्य विधानमण्डले महिलानां कृते आरक्षणमं राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली इत्यस्य विधानमण्डले महिलानां कृते स्थानानाम् आरक्षणं भवेत्।

(खख) यथाशक्यं, राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-विधानमण्डलम् इत्यत्र यत् अनुसूचितजातीनां कृते स्थानानि आरक्षितानि सन्ति ततः स्थानानां तृतीयांशः महिलानां कृते आरक्षितः भवेत्।

(खग) यथाशक्यं, राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-विधानमण्डलस्य इत्यस्य सकलस्थानानां येषां निर्वाचनं साक्षान्निर्वाचनेन विहितः (यानि च स्थानानि अनुसूचितजातिमहिलानां कृते आरक्षितानि सन्ति तानि सम्मेल्य) अस्ति, तस्य तृतीयांशः महिलानां कृते आरक्षितः भवेत्, यथाविधि संसदा विधिना निर्धारयेत्।

(ग) अनुच्छेदाः ३२४ तः ३२७ तथा च ३२९ इत्येतेषाम् उपबन्धाः राष्ट्रिय-राजधानी-राज्यक्षेत्रस्य सम्बन्धे प्रभाविनः भवेयुः, राष्ट्रिय-राजधानी-राज्यक्षेत्रस्य विधानसभायाः तथा च तस्याः सदस्यानां सम्बन्धे अपि, यथा हि ते कस्यचन राज्यस्य, राज्यस्य च विधानमण्डलस्य तथा च तस्य सदस्यानां सम्बन्धे प्रभाविनः भवेयुः; तथा च अनुच्छेदौ ३२६ तथा च ३२९ इत्यतयोः "समुचितविधानमण्डलम्" इति सन्दर्भः अत्र संसदः सन्दर्भः इति आमान्येत।

---

1 अनुच्छेदः २३९कक २३९कख इत्येतौ संविधानस्य (एकोनसप्ततितमं संशोधनम्) अधिनियमः, १९९१, इत्यस्य २-अनुभागेन (१-२-१९९२ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

2 संविधानस्य (षडधिकैकशततमं संशोधनम्) अधिनियमः, २०२३ वर्षस्य २-अनुभागेन अन्तर्वेशितः (दिनाङ्कं सूचयिष्यते)।

(३)(क) अस्य संविधानस्य अनुबन्धाधीनं विधानमण्डलं राष्ट्रिय-राजधानी-राज्यक्षेत्रस्य सम्पूर्णस्य भागशः वा क्षेत्रस्य विषये राज्यसूच्यां प्रगणितेषु विषयेषु, समवर्तिसूच्या वा प्रगणितानां विषयाणां सम्बन्धे, यावत् सः विषयः सङ्घराज्यक्षेत्रैः सम्बन्धितः स्यात्, प्रथमां, द्वितीयाम्, अष्टादशीं च प्रविष्टिं, चतुःषष्टितमां, पञ्चषष्टितमां, षट्षष्टितमां च प्रविष्टिं विहाय, यावत् एतासां सम्बन्धः प्रथमया, द्वितीयया, अष्टादश्या च प्रविष्टया स्यात्, विधीनां निर्माणं कुर्यात्।

(ख) उपखण्डः (क) इत्यस्य किमपि, सङ्घराज्यक्षेत्रस्य तथा च तस्य कस्यापि भागस्य विषये, संविधानस्य अधीनं विधिनिर्माणस्य संसदः शक्तेः अल्पीकरणं न कारयेत्।

(ग) यदि कस्मिन्नपि विषये विधानसभया निर्मितस्य कस्यापि विधेः कोऽपि उपबन्धः तस्मिन् विषये संसदा निर्मितस्य विधेः, स विधिः विधानसभया निर्मितात् विधेः पूर्वं तत्पश्चाद् वा पारितः स्यात्, अथवा कस्यचित् पूर्वतरस्य विधेः, यः विधानसभया निर्मिताद् विधेः भिन्नः स्यात्, अथवा कस्यापि उपबन्धस्य विरुद्धः स्यात्, तर्हि उभययोः स्थित्योः, यथास्थितिः संसदा निर्मितः विधिः, अथवा तादृशः पूर्वतरः विधिः अभिभवेत्, तथा च विधानसभया निर्मितः विधिः तस्य विरोधस्य मात्रायां शून्यः भवेत्।

परन्तु यदि विधानसभया निर्मितः एतादृशः विधिः राष्ट्रपतेः विचारार्थम् आरक्षितः स्यात्, तथा च तत्र तस्य अनुमतिः प्राप्ता अस्ति, तर्हि एतादृशः विधिः राष्ट्रिय-राजधानी-राज्यक्षेत्रे अभिभवेत्।

परन्तु अस्मिन् उपखण्डे विद्यमानं किमपि संसदं, तस्मिन्न एव विषये कमपि विधिं, यस्य अन्तर्गतम् एतादृशः विधिः स्यात्, यः विधानसभया निर्मितं कमपि विधिं परिवर्धयते, संशोधयति, परिवर्तयते, निरासयति वा, कस्मिन्नपि समये अधिनियमितं कर्तुं न निवारयेत्।

(४) येषु विषयेषु केनापि विधिना तदधीनं वा अपेक्षितं स्यात् यद् उपराज्यपालः स्वविवेकानुसारं कार्यं कुर्यात्, तान् विषयान् अपवार्य, येषु विषयेषु विधीन् निर्मातुं विधानसभा क्षमा अस्ति तेषु विषयेषु उपराज्यपालाय तस्य कार्यस्य निर्वहणे परामर्शं साहाय्यं च दातुं विधानसभायाः पूर्णसङ्ख्यायाः दशप्रतिशतात् अनधिकैः सदस्यैः निर्मिता मन्त्रिपरिषद् स्यात्, यस्याः प्रमुखः मुख्यमन्त्री स्यात्।

परन्तु उपराज्यपाले तस्य च मन्त्रिषु च कस्मिन्नपि विषये मतभेदस्य स्थितौ उपराज्यपालः तं विषयं राष्ट्रपतिं विनिश्चयार्थं निर्दिशेत्, राष्ट्रपतिना तस्मिन् कृतं विनिश्चयम् अनुसार्य च कार्यं कुर्यात्, तथा च एतादृशे विनिश्चये प्रलम्बिते सति, सः विषयः तावान् आवश्यकः, यत्र, तस्य मतानुसारं, तत्कालं कार्यं कर्तुम् आवश्यकं स्यात्, तद्विषये तादृशं कार्यं कर्तुम् अथवा निर्देशं दातुं, यद् आवश्यकं मन्येत तथा कर्तुं श्रमः स्यात्।

(५) मुख्यमन्त्री राष्ट्रपतिना नियुक्तः भवेत्, तथा च अन्ये मन्त्रिणः मुख्यमन्त्रिणः परामर्शेन राष्ट्रपतिना नियुक्ताः भवेयुः, तथा च मन्त्रिणः राष्ट्रपतेः प्रसादपर्यन्तं स्वपदं धारयेयुः।

(६) मन्त्रिपरिषद् सामूहिकरूपेण विधानसभाम् उत्तरदायिनी भवेत्।

[1][(७)(क)] संसद् पूर्वगामिनः खण्डान् प्रभाविनः कर्तुं अथवा तेषु अन्तर्विष्टाणाम् उपबन्धानाम् अनुपूर्तये, तथा च तेषाम् आनुषङ्गिकेषु पारिणामिकेषु च सर्वेषु विषयेषु विधिना उपबन्धान् कर्तुं क्षमेत।

[2][(ख) (क)-उपखण्डे निर्दिष्टः कोऽपि विधिः ३६८-अनुच्छेदस्य प्रयोजनार्थम् अस्य संविधानस्य संशोधनम् इति तादृश्याम् अपि स्थितौ न आमान्येत यत्र तस्मिन् एतादृशः कश्चन उपबन्धः अन्तर्विष्टः यः संविधाने संशोधनं करोति अथवा संशोधनस्य प्रभावं धारयति।]

(८) अनुच्छेदः २३९ख इत्यस्य उपबन्धाः यावच्छक्यं, राष्ट्रिय-राजधानी-राज्यक्षेत्रे उपराज्यपाले तथा च विधानसभायां तथैव प्रभाविनः भवेयुः यथा ते [3][पुडुचेरी]सङ्घराज्यक्षेत्रे, प्रशासके, तस्य च विधानमण्डलसम्बन्धे प्रभाविनः भवेयुः; तस्मिन् अनुच्छेदे "अनुच्छेदः २३९क इत्यस्य (१) खण्डं" प्रति निर्देशस्य विषये एतद् आमान्येत यत् सः यथास्थिति एतं खण्डम् अथवा २३९कख इति अनुच्छेदं निर्दिशति इति।

२३९कख. सांविधानिक-तन्त्रस्य विफलीभवनस्य दशायाम् उपबन्धः- यदि राष्ट्रपतेः, उपराज्यपालात् प्रतिवेदन-प्राप्तौ अथवा अन्यथा, एतत् समाधानं भवति यत्-

(क) एतादृशी स्थितिः उत्पन्ना अस्ति यस्यां राष्ट्रिय-राजधानी-राज्यक्षेत्रस्य प्रशासनम् अनुच्छेदः २३९कक अथवा तस्य अनुच्छेदस्य अनुसरणे निर्मितस्य कस्यचन विधेः उपबन्धानाम् अनुसारेण नैव प्रचालयितुं शक्यते : अथवा

(ख) राष्ट्रिय-राजधानी-राज्यक्षेत्रस्य उचित-प्रशासनार्थम् एवं करणम् आवश्यकम्, समीचीनं वा अस्ति, तर्हि राष्ट्रपतिः, आदेशद्वारा २३९कक इत्यस्य कस्यचन उपबन्धस्य अथवा तस्य अनुच्छेदस्य अनुसरणे निर्मितस्य कस्यचन विधेः केषाञ्चन सर्वेषां वा उपबन्धानां प्रवर्तनम्, एतादृशाय अवधये, तथा च एतादृशानां समयानाम् अधीनस्थः सन्, यत् एतादृशे विधौ विनिर्दिष्टं स्यात्, निलंबयितुं शक्ष्यति, तथा च, एतादृशान् आनुषङ्गिकान् पारिणामिकान्

---

1 संविधानस्य (सप्ततितमं संशोधनम्) अधिनियमः, १९९२, इत्यस्य ३-अनुभागेन (२१-१२-१९९१ दिनाङ्कात् प्रवर्तमानप्रभावेण) "७" इत्यस्य स्थाने प्रतिष्ठापितः।

2 संविधानस्य (सप्ततितमं संशोधनम्) अधिनियमः, १९९२, इत्यस्य ३-अनुभागेन (२१-१२-१९९१ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

3 पांडिचेरी (नामपरिवर्तनम्) अधिनियमः, २००६ (२००६ वर्षस्य ४४) इत्यस्य ४-अनुभागेन (१-१०-२००६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "पाण्डिचेरी" इत्यस्य स्थाने प्रतिष्ठापितः।

उपबन्धान् कर्तुं शक्ष्यति, यः अनुच्छेदः २३९-अनुच्छेदः २३९कक-इत्यनयोः उपबन्धानाम् अनुसारेण राष्ट्रिय-राजधानी-राज्यक्षेत्रस्य प्रशासनार्थं तस्मै आवश्यकं समीचीनं वा प्रतीयेत।]

[1][**२३९ख. विधानमण्डलस्य विश्रान्तिकाले अध्यादेशप्रख्यापने प्रशासकस्य शक्तिः**- (१) यस्मिन् काले [2][[3][पुडुचेरी] सङ्घराज्यक्षेत्रस्य] २३९क-तमानुच्छेदस्य (१) खण्डे विनिर्दिष्टस्य सङ्घराज्यक्षेत्रस्य विधानमण्डलं सत्रे अस्ति, तस्मात् अन्यस्मिन् कस्मिन् अपि काले यदि प्रशासकः समाहितः भवति यत् तम् अचिरकार्ये अवश्यं प्रवर्तयन्त्यः परिस्थितयः विद्यन्ते तर्हि सः तादृशान् अध्यादेशान् प्रख्यापयितुं क्षमते यादृशान् अपेक्षयन्त्यः परिस्थितयः प्रतीयन्ते परन्तु एतस्मिन् सम्बन्धे राष्ट्रपतेः अनुदेशम् अभिप्राप्य एव प्रशासकेन कोऽपि तादृशः अध्यादेशः प्रख्यापितः भवेत्, नान्यथा-

अपरं च यदा उक्त विधानमण्डलस्य विघटनं कृतम् अस्ति अथवा २३९क.-तमानुच्छेदस्य (१) खण्डे निर्दिष्टस्य विधेः अधीनं कृतेन कार्येण एतस्य कार्यप्रवर्तनं निलम्बितम् अस्ति तदा प्रशासकः तादृशस्य विघटनस्य निलम्बनस्य वा कालावधौ कमपि अध्यादेशं न प्रख्यापयेत्।

(२) राष्ट्रपतेः अनुदेशानाम् अनुसरणेन एतदनुच्छेदस्य अधीनं प्रख्यापितः अध्यादेशः, २३९अ.-तमानुच्छेदस्य (१) खण्डे एतदर्थम् अन्तर्विष्टानम् उपबन्धानाम् अनुपालनं कृत्वा सङ्घराज्यक्षेत्रस्य विधानमण्डलेन सम्यग्रूपेण अधिनियमितः अधिनियमः अस्ति इति मतं भवेत्;

किन्तु तादृशः प्रत्येकम् अध्यादेशः-

(क) सङ्घराज्यक्षेत्रस्य विधानमण्डलस्य पुरतः प्रस्थापितः भवेत्; तथा च विधानमण्डलस्य पुनः समागमात् षण्णां सप्ताहानां समाप्तौ अथवा यदि तत् कालावधेः प्राक् विधानमण्डलेन तस्य निरनुमोदनस्य सङ्कल्पः पारितः भवेत् तर्हि तत् सङ्कल्पस्य पारणोत्तरं सः प्रवर्तनात् विरमेत्; तथा च

(ख) राष्ट्रपतेः तदर्थम् अनुदेशस्य अभिप्राप्तेः परं प्रशासकेन कस्मिन् अपि काले प्रत्याहृतः भवितुं शक्यते।

(३) यदि यावन्मात्रं च एतदनुच्छेदस्य अधीनं प्रख्यापितः अध्यादेशः एवं विधं कमपि उपबन्धं करोति यः उपबन्धः यदि २३९-क तमानुच्छेदस्य (१) खण्डे निर्दिष्टे विधौ, एतदर्थम्

---

1 संविधानस्य (सप्तविंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य ३-अनुभागेन एषः अनुच्छेदः अन्तर्वेशितः (३०-१२-१९७१ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 गोवा-दमण-दीव-पुनर्घटन-अधिनियमः, १९८७ (१९८७ वर्षस्य १८) इत्यस्य ६३-अनुभागेन (३०-५-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) "अनुच्छेदः २३९क इत्यस्य खण्डः १ इत्यत्र निर्दिष्टसङ्घ-राज्यक्षेत्राणि" इत्यस्य स्थाने संनिवेशितः।

3 पांडिचेरी (नाम-परिवर्तनम्) अधिनियमः, २००६ (२००६ वर्षस्य ४४) इत्यस्य ४-अनुभागेन (१-१०-२००६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "पांडिचेरी" इत्यस्य स्थाने संनिवेशितः।

अन्तर्विष्टानाम् उपबन्धानाम् अनुपालनं कृत्वा सङ्घराज्यक्षेत्रस्य विधानमण्डलेन प्रणीते अधिनियमे अधिनियमितः भवेत् तर्हि विधिमान्यः न भवति, तदा तावन्मात्रं च स अध्यादेशः शून्यः भवेत्।]

[1](4)* * * *

[2][**२४०.केषांचित् सङ्घराज्यक्षेत्राणां कृते विनियमानां प्रणयने राष्ट्रपतेः शक्तिः** (१) राष्ट्रपतिः –

(क) अण्डमान-निकोबारद्वीपः;

[3](ख) लक्षद्वीपः;

[4][(ग) दादरा तथा नागरहवेली तथा च दमणः तथा दीवः;]

[5][(घ) ****;]

[6][(ङ) [7][पुडुचेरी];]

[8](च) ***

[9](छ) ***

इत्येतेषु सङ्घराज्यक्षेत्रेषु शान्तेः, प्रगतेः, सुशासनस्य च कृते विनियमान् प्रणेतुं क्षमते-

[10][परन्तु यदा [7][पुडुचेरी] इत्यस्य सङ्घराज्यक्षेत्रस्य कृते विधानमण्डलरूपेण कार्यकरणाय २३९क-अनुच्छेदस्य अधीनं कस्यापि निकायस्य सर्जनं कृतं भवति तदा, राष्ट्रपतिः विधानमण्डलस्य प्रथमाधिवेशनस्य कृते नियतात् दिनाङ्कात् एतादृशस्य सङ्घराज्यक्षेत्रस्य शान्तेः, प्रगतेः, सुशासनस्य च कृते विनियमान् न प्रणयेत्-]

---

1 संविधानस्य (अष्टत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य ४-अनुभागेन (४) खण्डः अन्तर्वेशितः आसीत् (भूतलक्षिप्रभावेण); संविधानस्य (चतुश्चचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३२-अनुभागेन लोपितश्च (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६, इत्यस्य १७-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुच्छेदः “२४०” इत्यस्य स्थाने प्रतिष्ठापितः।

3 लक्षयदीव-मिनिकोय्-अमीनदीवि-द्वीपानां (नामान्तरणम्) अधिनियमः, १९७३ (१९७३ वर्षस्य ३४) इत्यस्य ४-अनुभागेन प्रविष्टिः-(ख) ”लक्षदीव-मिनिकोय्-अमीनदीविद्वीपनां” इत्येतस्मात् प्रति संनिवेशितः (१-११-१९७३ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 दादरा तथा नागर-हवेली तथा च दमणः तथा दीवः, (सङ्घराज्यक्षेत्राणां विलयनम्) अधिनियमः, २०१९ (२०१९ वर्षस्य ४४) इत्यस्य (४i) अनुभागेन (२६-१-२०२० दिनाङ्कात् प्रवर्तमानप्रभावेण) इत्यस्य स्थाने संनिवेशितः। संविधानस्य (दशमं संशोधनम्) अधिनियमः, १९६१ वर्षस्य ३-अनुभागेन (२६-०१-२०२० दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टिः (ग) अन्तर्वेशितः।

5 दादरा तथा नागर-हवेली तथा च दमणः तथा दीवः, (सङ्घराज्यक्षेत्राणां विलयनम्) अधिनियमः, २०१९ (२०१९ वर्षस्य ४४) इत्यस्य (४-ii) अनुभागेन लोपितः।

6 संविधानस्य (चतुर्दशं संशोधनम्) अधिनियमः, १९६२ इत्यस्य ५-अनुभागेन अन्तर्वेशितः।

7 पांडिचेरी (नाम-परिवर्तनम्) अधिनियमः, २००६ (२००६ वर्षस्य ४४) इत्यस्य ४-अनुभागेन (१-१०-२००६ दिनाङ्कात् प्रवर्तमानप्रभावेण) “पांडिचेरी” इत्यस्य स्थाने संनिवेशितः।

8 मिजोरमराज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ३४) इत्यस्य ३९-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) मिजोरमेण सम्बन्धिता प्रविष्टिः (च) लोपिता।

9 अरुणाचलप्रदेश-राज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ६९) इत्यस्य ४२-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अरुणाचल-प्रदेशेन सम्बन्धिता प्रविष्टिः (छ) लोपिता।

10 संविधानस्य (चतुर्दशं संशोधनम्) अधिनियमः, १९६२ इत्यस्य ५-अनुभागेन अन्तर्वेशितः।

[1][अपरं च यदा [2][पुडुचेरी] इत्यस्य सङ्घराज्यक्षेत्रस्य विधानमण्डलरूपेण कार्यं कुर्वाणस्य निकायस्य विघटनं कृतं भवेत् अथवा तादृश विधानमण्डलरूपेण कार्यकारणम्, २३९क-तमानुच्छेदस्य (१) खण्डे निर्दिष्टस्य विधेःअधीनं कृतया कार्यप्रवृत्या निलम्बितं भवेत्, तदा राष्ट्रपतिः तादृशस्य विघटनस्य, निलम्बनस्य वा कालावधेः अभ्यन्तरे तादृशस्य सङ्घराज्यक्षेत्रस्य शान्तेः, प्रगतेः, सुशासनस्य च कृते विनियमान् प्रणेतुं क्षमते।]

(२) एवं प्रणीतः कोऽपि विनियमः संसदा प्रणीतस्य कस्यापि विधेः अथवा तदानीं तादृशराज्यक्षेत्रस्य सम्बन्धे अनप्रयुक्तस्य अधिनियमस्य [3][कस्यापि अन्यस्य विधेः वा निरसनं, संशोधनं वा कर्तुं क्षमते; तथा च यदा (विनियमः) राष्ट्रपतिना प्रख्यापितः भवति तदा तस्य तादृग्बलं प्रभावश्च भवेत् यादृक् तस्य क्षेत्रस्य सम्बन्धे अनुप्रयुक्तस्य संसदा प्रणीतस्य अधिनियमस्य भवति।]

२४१. सङ्घराज्यक्षेत्राणां कृते उच्चन्यायालयाः- (१) संसद् विधिना कस्यापि [4][सङ्घराज्यक्षेत्रस्य[5]] कृते उच्चन्यायालयं घटयितुं क्षमते अथवा [तादृशे कस्मिन् अपि राज्यक्षेत्रे] स्थितं कमपि न्यायालयम् अस्य संविधानस्य सर्वेभ्यः प्रयोजनेभ्यः अन्यतमाय प्रयोजनाय वा उच्चन्यायालयं घोषयितुं क्षमते।

(२) षष्ठभागस्य पञ्चमस्य अध्यायस्य उपबन्धाः, संसद् यादृशान् विधिना उपबन्धयितुं क्षमते तादृशानाम् उपान्तरणानाम्, अपवादानां वा अधीनं, (१) खण्डे निर्दिष्टस्य प्रत्येकं न्यायालयस्य सम्बन्धं तथा विषयीकुर्युः यथा ते २१४-तमानुच्छेदे निर्दिष्टस्य कस्यापि उच्चन्यायालयस्य सम्बन्धं विषयीकुर्वन्ति।

[6][(३)अस्य संविधानस्य उपबन्धानाम् अधीनम्, तथा एतत् संविधानेन तदधीनं वा समुचितविधानमण्डलस्य कस्यापि, तद्विधानमण्डलाय प्रदत्तानां शक्तीनाम् आधारेण प्रणीतस्य विधे; उपबन्धानाम् अधीनं प्रत्येकं उच्चन्यायालयः यः संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य प्रारम्भात्, अव्यवहितपूर्वं कस्यापि राज्यक्षेत्रस्य सम्बन्धः अधिकारितायाः प्रयोगं कुर्वन् आसीत् सः तादृशात् प्रारम्भात् परमपि, तस्य राज्यक्षत्रस्य सम्बन्धे तादृश्याः अधिकारितायाः प्रयोगं कुर्वन् अनुवर्तेत।

(४) एतदनुच्छेदगतं किमपि कस्यापि राज्यस्य उच्चन्यायालयस्य अधिकारिता कस्मिन् अपि सङ्घराज्यक्षेत्रे, तस्य भागे वा विस्तारयित्रीम्, तस्मात् अपवर्जयित्रीं वा संसदः शक्तिं न न्यूनीकरोति।]

२४२. [कोड्गु] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च निरसितः।

---

1 संविधानस्य (सप्तविंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य ४-अनुभागेन अन्तर्वेशितः (१५-२-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 पांडिचेरी (नाम-परिवर्तनम्) अधिनियमः, २००६ (२००६ वर्षस्य ४४) इत्यस्य ४-अनुभागेन (१-१०-२००६ दिनाङ्कात् प्रवर्तमानप्रभावेण) “पांडिचेरी” इत्यस्य स्थाने संनिवेशितः।

3 संविधानस्य (सप्तविंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य ४-अनुभागेन (१५-२-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण

4 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च “प्रथमानुसूच्याः ग-भागे विनिर्दिष्टस्य राज्यस्य" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

5 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च “तादृशराज्यस्य” एत्येतस्मात् प्रति एतत् संनिवेशितम्।

6 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च (३)-(४) खण्डाभ्यां प्रति एतौ खण्डौ संनिवेशितौ।

[1][भाग : ९
पञ्चायतानि

२४३. परिभाषाः- अस्मिन् भागे, सन्दर्भेण यावत् अन्यथा अपेक्षितं न स्यात् तावत्-

(क) "मण्डल"शब्देन राज्यस्य मण्डलम् अभिप्रेतम् अस्ति।

(ख) "ग्रामसभा"शब्देन ग्रामस्तरे पञ्चायतानां क्षेत्रे समाविष्टः ग्रामसम्बन्धिन्यां मतदातृसूच्यां पञ्जीकृतानां जनानां निकायः अभिप्रेतः अस्ति।

(ग) "मध्यवर्तिस्तर"शब्देन ग्रामस्तरस्य मण्डलस्तरस्य च मध्ये एतादृशः स्तरः अभिप्रेतः यः राज्यस्य राज्यपालेन अस्य भागस्य प्रयोजनार्थं "मध्यवर्तिस्तरः" इति विनिर्दिष्टः भवेत्।

(घ) "पञ्चायत"शब्देन ग्रामीणक्षेत्रस्य कृते अनुभागः २४३ख इत्यस्य अन्तर्गतं (यया कयापि संज्ञया नामितम्) स्वायत्तशासनस्य संस्थानम् अभिप्रेतम् अस्ति।

(ङ) "पञ्चायतक्षेत्र"शब्देन पञ्चायतस्य प्रादेशिकं क्षेत्रम् अभिप्रेतम् अस्ति।

(च) "जनसङ्ख्याशब्देन" तादृशी अन्तिमजनगणनया अभिनिश्चिता जनसङ्ख्या अभिप्रेता, यस्याः सुसङ्गताः अङ्काः प्रकाशिताः सन्ति।

(छ) "ग्राम"शब्देन राज्यपालेन अस्य अनुभागस्य प्रयोजनार्थं लोकाधिसूचनया ग्रामः इति विनिर्दिष्टः ग्रामः अभिप्रेतः, तथा विनिर्दिष्टः ग्रामगणः च।

२४३क. ग्रामसभा- ग्रामसभा ग्रामस्तरस्याः तादृशीः शक्तीः प्रयुञ्जेत्, तादृशानि च कृत्यानि च पालयेत् यानि राज्यस्य विधानमण्डलेन विधिद्वारा उपबन्धितानि स्युः।

२४३ख. पञ्चायतानां घटनम्- (१) अस्य भागस्य उपबन्धानुसारेण प्रत्येकस्मिन् राज्ये ग्राम-मध्यवर्ति-मण्डलस्तरेषु पञ्चायतानां घटनं भवेत्।

(२) अत्र (१) इति खण्डे किमपि सत्यपि यस्मिन् राज्ये जनसङ्ख्या २०-लक्षतः अधिका न भवेत् तत्र मध्यवर्तिस्तरे पञ्चायतानां घटनं न भवेत्।

२४३ग. पञ्चायतानां संरचना- (१) अस्य भागस्य उपबन्धानाम् अधीनं राज्यस्य विधानमण्डलं पञ्चायतानां घटनविषये उपबन्धान् कुर्यात्।

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "प्रथमानुसूचिस्थ-घ-भागीय राज्यक्षेत्राणि तस्याम् अनुसूच्यां च विनिर्दिष्टानि राज्यक्षेत्राणि च" इति मूलः नवमः भागः (१-११-१९५६ इत्यमात् दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितः। संविधानस्य (त्रिसप्ततितमं संशोधनम्) अधिनियमः, १९९२, इत्यस्य २-अनुभागेन (२४-४-१९९३ इत्यस्मात् दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

परन्तु कस्मिन्नपि स्तरे पञ्चायतस्य प्रादेशिकक्षेत्रस्य जनसङ्ख्या पञ्चायते निर्वाचनद्वारा पूर्यमाणानि आसनानि च इत्येतयोः अनुपातः समग्रे राज्ये यथासाध्यं समानः भवेत्।

(२) पञ्चायतस्य सर्वाणि आसनानि तत्पञ्चायतगतेभ्यः प्रादेशिक-निर्वाचन-क्षेत्रेभ्यः निर्वाचितैः जनैः पूरितानि भवेयुः तथा च एतत्प्रयोजनार्थं प्रत्येकं पञ्चायतक्षेत्रं निर्वाचनक्षेत्रेषु तथा विभाजितं स्यात् येन प्रत्येकं निर्वाचनक्षेत्रस्य जनसङ्ख्या तत्र च आवण्टितानि स्थानानि इत्येतयोः अनुपातः सम्पूर्णे पञ्चायतक्षेत्रे यथासाध्यं समानः भवेत्।

(३) राज्यस्य विधानमण्डलं विधिना-

(क) ग्रामस्तरस्य सञ्चायतानाम् अध्यक्षाणां मध्यवर्ति-स्तर-पञ्चायतेषु, अथवा तादृशे राज्ये यत्र मध्यवर्ति-स्तर-पञ्चायतानि न सन्ति तत्र, मण्डल-स्तर-पञ्चायतेषु,

(ख) मध्यवर्ति-स्तर-पञ्चायतानाम् अध्यक्षाणां मण्डल-स्तर-पञ्चायतेषु,

(ग) लोकसभायाः राज्यस्य विधानसभायाः च तादृशानां सदस्यानां, ये तस्य निर्वाचनक्षेत्रस्य प्रतिनिधित्वं कुर्वन्ति यत्र ग्रामस्तरतः भिन्नस्तरस्य पञ्चायतक्षेत्रं पूर्णतः अंशतः वा समाविष्टं, तादृशे पञ्चायते,

(घ) राज्यसभायाः सदस्यानां तथा च राज्यस्य विधानपरिषदः सदस्यानां-

(i) यत्र ते मध्यवर्ति-स्तरस्य पञ्चायतक्षेत्रस्य कस्मिन् अपि निर्वाचनक्षेत्रे निर्वाचकरूपेण पञ्जीकृताः स्युः, तस्मिन् मध्यवर्तिस्तर-पञ्चायते,

(ii) यत्र ते मण्डल-स्तरस्य पञ्चायतक्षेत्रस्य कस्मिन् अपि निर्वाचनक्षेत्रे निर्वाचकरूपेण पञ्जीकृताः स्युः, तस्मिन् मण्डलस्तर-पञ्चायते, प्रतिनिधित्वाय उपबन्धं कुर्यात्।

(४) पञ्चायतस्य अध्यक्षः, अन्ये सदस्याः च, ये निर्वाचनक्षेत्रेभ्यः प्रत्यक्ष-निर्वाचनेन निर्वाचिताः स्युः, न वा स्युः, पञ्चायतानाम् अधिवेशनेषु मतदाने अधिकारं धारयन्ति।

(५) पञ्चायतस्य अध्यक्षः-

(क) ग्रामस्तरीय-पञ्चायते राज्यस्य विधानमण्डलेन उपबन्धितेन विधिना निर्वाचितः भवेत्।

(ख) मध्यवर्तिस्तरीये मण्डलस्तरीये वा पञ्चायते तासां निर्वाचितैः सदस्यैः तेभ्यः च निर्वाचितः भवेत्।

(भागः ९-पञ्चायतानि)

२४३घ. स्थानानाम् आरक्षणम्- (१) प्रत्येकस्मिन् पञ्चायते-

(क) अनुसूचित-जातयः

(ख) अनुसूचितजनजातयः च

इत्येतेषां कृते स्थानानि आरक्षितानि भवेयुः, तथा च एतादृशानाम् आरक्षितानां स्थानानां सङ्ख्यायाः अनुपातः प्रत्यक्ष-निर्वाचनेन पूर्यमाणानां तस्य पञ्चायतस्य स्थानैः यथाशक्यं तथा भवेत् यथा सः तस्मिन् क्षेत्रे अनुसूचितजातीनाम् अनुसूचितजनजातीनां च जनसङ्ख्यायाः तस्य पञ्चायतक्षेत्रस्य पूर्ण-जनसङ्ख्यया समानः भवेत्, तथा च एतादृशानां स्थानानां पञ्चायते भिन्नभिन्न-निर्वाचनक्षेत्रेषु चक्रानुक्रमेण आवण्टनं शक्यं भवेत्।

(२) खण्ड (१) इत्यस्य अधीनम् आरक्षितेषु स्थानेषु न्यूनातिन्यूनम् एक-तृतीयांशानि स्थानानि यथास्थिति अनुसूचित-जातीनाम् अनुसूचित-जनजातीनां महिलानां कृते आरक्षितानि भवेयुः।

(३) प्रत्येकं पञ्चायते प्रत्यक्ष-निर्वाचनेन पूर्यमाणेषु सर्वेषु स्थानेषु न्यूनातिन्यूनम् एक-तृतीयांशानि स्थानानि (येषु अनुसूचितजातीनाम् अनुसूचितजनजातीनां महिलानां कृते आरक्षितानि स्थानानि अपि अन्तर्भूतानि भवेयुः) महिलानां कृते आरक्षितानि भवेयुः, तथा च एतादृशानां स्थानानां पञ्चायते भिन्नभिन्न-निर्वाचनक्षेत्रेषु चक्रानुक्रमेण आवण्टनं शक्यं भवेत्।

(४) ग्रामस्तरे अथ वा कस्मिन्नपि अन्यस्तरे पञ्चायतेषु अध्यक्षाणां स्थानानि अनुसूचितजातीनाम् अनुसूचितजनजातीनां कृते तथा च महिलानां कृते तथा आरक्षितानि भवेयुः राज्यस्य विधानमण्डलेन विधिद्वारा उपबन्धितानि स्युः

परन्तु कस्मिन्नपि राज्ये प्रत्येकस्मिन् स्तरे पञ्चायतानाम् अध्यक्षाणाम् अनुसूचितजातीनाम् अनुसूचितजनजातीनां कृते आरक्षितानां स्थानानां सङ्ख्यायाः अनुपातः प्रत्यक्ष-निर्वाचनेन पूर्यमाणानां तस्य पञ्चायतस्य स्थानैः यथाशक्यं तथा भवेत् यथा सः तस्मिन् क्षेत्रे अनुसूचितजातीनाम् अनुसूचितजनजातीनां च जनसङ्ख्यायाः तस्य राज्यस्य पूर्ण-जनसंख्यया समानः भवेत्।

परन्तु एतत् अपि यत् प्रत्येकस्मिन् स्तरे पञ्चायतानाम् अध्यक्षाणां स्थानानां पूर्ण-सङ्ख्यायाः न्यूनातिन्यूनम् एक-तृतीयांशानि स्थानानि महिलानां कृते आरक्षितानि भवेयुः।

परन्तु एतत् अपि यत् एतस्य खण्डस्य अधीनम् आरक्षितानां पदानां सङ्ख्या प्रत्येकस्मिन् स्तरे भिन्न-भिन्न-पञ्चायतेषु चक्रानुक्रमेण आवण्टिता भवेत्।

(५) खण्डः (१) अथ च (२) इत्येतयोः अधीनं स्थानानम् आरक्षणं तथा च खण्ड (४) इत्येतस्य अधीनम् अध्यक्षाणां पदानाम् आरक्षणं (महिलानाम् आरक्षणात् यत् भिन्नं तत्) ३३४ तमे अनुभागे निर्दिष्टस्य अवधेः समाप्त्यनन्तरं प्रभावरहितं भवेत्।

(६) पश्चवर्तिनां नागरिकाणां कस्यापि वर्गस्य कृते कस्मिन्नपि स्तरे पञ्चायतानां स्थानानाम् अथवा पञ्चायतानाम् अध्यक्षाणां पदानाम् आरक्षणार्थम् उपबन्धानां करणात् अस्मिन् भागे वर्तमानं किमपि राज्यस्य विधानमण्डलं न निवारयेत्।

(भागः ९-पञ्चायतानि)

२४३ङ. पञ्चायतानाम् अवधिः इत्यादि- (१) प्रत्येकं पञ्चायतं, यदि तत्समये प्रवृत्तस्य कस्यचन विधेः अधीनं पूर्वम् एव न विघटितं न स्यात् तर्हि तस्य प्रथमस्य अधिवेशनस्य कृते नियतात् दिनाङ्कात् पञ्च वर्षाणि यावत् प्रचलेत्, ततः अधिकं न।

(२) तत्समये प्रवृत्तस्य कस्यापि विधेः केनापि संशोधनेन तत्संशोधनात् प्राक् कार्यरतस्य कस्यापि पञ्चायतस्य तावत् विघटनं न भविष्यति यावत् खण्डः (१) इत्यत्र विनिर्दिष्टः तस्य कालावधिः समाप्तः न भवेत्।

(३) कस्यापि पञ्चायतस्य घटनार्थं निर्वाचनम्-

(क) खण्डः (१) इत्यत्र विनिर्दिष्टस्य तस्य कार्यकालस्य समाप्तेः पूर्वम्

(ख) तस्य विघटनात् षट् मासानाम् अवधेः समाप्तेः पूर्वं

पूर्णं भवेत्।

परन्तु यत्र सः शेषः कालावधिः, यस्मिन् तत् पञ्चायतं कार्यरतम् अभविष्यत्, षड्-मासेभ्यः न्यूनः भवेत्, तत्र एतस्य खण्डस्य अधीनं तस्य पञ्चायतस्य घटनार्थं निर्वाचनस्य आवश्यकता न भवेत्।

(४) कस्यापि पञ्चायतस्य कालावधेः समाप्तेः पूर्वं तस्य पञ्चायतस्य विघटने घटितं किमपि पञ्चायतं तस्य कालावधेः केवलं शेषे भागे कार्यरतं भविष्यति यस्मिन् भागे विघटितं पञ्चायतं खण्डः (१) इत्यस्य अधीनं कार्यरतम् अभविष्यत्।

२४३च. सदस्यतार्थं निरर्हता:- (१) कोऽपि जनः पञ्चायतस्य सदस्यत्वेन निर्वाचनार्थं निरर्हः भविष्यति तथा च पञ्चायतस्य सदस्यः भवितुं निरर्हः भविष्यति-

(क) यदि सः तस्य राज्यस्य विधानमण्डलस्य निर्वाचनप्रयोजने तत्समय-प्रवृत्तेन विधिना निरर्हितः भवेत्

परन्तु कोऽपि जनः एतदाधारेण निरर्हः न भविष्यति यत् सः वयसा पञ्चविंशतिवर्षेभ्यः न्यूनः भवेत्, यदि सः एकविंशति-वर्षाणां वयः प्राप्तवान् स्यात्।

(ख) यदि सः राज्यस्य विधानमण्डलेन कृतेन केनापि विधिना अथवा तदधीनं निरर्हः भवेत्।

(२) यदि प्रश्नः उदेति यत् कस्यापि पञ्चायतस्य कोऽपि सदस्यः खण्डः (१) इत्यत्र वर्णितायाः कस्याः अपि निरर्हतायाः अधीनं भवति न वा इति, तर्हि सः प्रश्नः विनिश्चयार्थं तादृशं प्राधिकारिणं तादृश्या रीत्या निर्देशितः भवेत् या राज्यस्य विधानमण्डलेन विधिना उपबन्धिता भवेत्।

२४३छ. पञ्चायतानां शक्तयः, प्राधिकाराः उत्तरदायित्वानि च-

(क) संविधानस्य उपबन्धानाम् अधीनं राज्यस्य विधानमण्डलं विधिना पञ्चायतेभ्यः तादृशीः शक्तीः, प्राधिकारांश्च प्रयच्छेत् यैः तानि स्वायत्त-शासन-संस्थारूपेण कार्यं कर्तुं समर्थानि भविष्यन्ति तथा च तादृश्यां स्थितौ पञ्चायतानां कृते, तादृशानां प्रतिबन्धानान् अधीनं, ये तत्र निर्दिष्टाः भवेयुः, उपयुक्त-स्तरे तादृशीः शक्तीः उत्तरदायित्वानि च प्रयच्छेत्, यैः तानि पञ्चायतानि स्वायत्त-संस्थात्वेन कार्यं कर्तुं समर्थानि भवेयुः, यथा-आर्थिकविकासार्थं सामाजिकन्यायार्थं च नियोजनम्।

(ख) आर्थिकविकासार्थं सामाजिकन्यायार्थं च, याः एकादश्याम् अनुसूच्यां निर्दिष्टाः सन्ति तादृशीभिः योजनाभिः सह, एतादृशीनां योजनानां, कार्यान्वयनं याः तेषु निहिताः भवेयुः।

२४३ज. कराधिरोपणे, निधौ च पञ्चायतानाम् अधिकाराः-राज्यस्य विधानमण्डलं विधिना-

(क) एतादृशान् करान्, पथकरान्, शुल्कानि च उद्ग्रहीतुं, संग्रहीतुं विनियोजयितुं च पञ्चायतान् एतादृश्या प्रक्रियया एतादृशैः निर्बन्धैश्च सह प्राधिकृतं कुर्यात्,

(ख) राज्यशासनेन उद्गृहीतान् संगृहीतांश्च करान् एतादृशानां निर्बन्धानां मर्यादानां च अधीनम् , एतादृशेभ्यः प्रयोजनेभ्यः समनुदिशेत्,

(ग) राज्यस्य संचितनिधितः पञ्चायतानां कृते एतादृशानि सहायतानुदानानि प्रदातुम् उपबन्धान् कुर्यात्,

(घ) पञ्चायतैः तत्पक्षतः च क्रमशः प्राप्तानां धनानां सङ्कलनाय एतादृशानां निधीनां घटनार्थं, तथा च तेभ्यः निधिभ्यः एतादृशानां धनानां प्रत्याहरणार्थं च उपबन्धान् कुर्यात्,

ये विधौ विनिर्दिष्टाः भवेयुः।

२४३झ. वित्तीयस्थितेः पुनर्विलोकनार्थं वित्तायोगस्य घटनम्-

(१) राज्यस्य राज्यपालः संविधानस्य (त्रिसप्ततितमं संशोधनम्) अधिनियमः, १९९२ इत्यस्य प्रारम्भतः एकस्य वर्षस्य कालावधौ यथाशीघ्रं तथा च तत्पश्चात्, प्रत्येकं पञ्चमवर्षस्य समाप्तौ, वित्तायोगस्य घटनं कुर्यात्, यः पञ्चायतानां वित्तीयस्थितेः पुनर्विलोकनं कुर्यात्, तथा च सः-

(क) तेषां तत्त्वानां विषये यानि-

(i) राज्येन उद्गृहीताः कराः शुल्कानि, पथकराः, शुल्कानि च यानि एतस्य भागस्य अधीनं तेषु विभाजितानि स्युः, सर्वस्तराणां पञ्चायतानां मध्ये एतादृशानाम् आगमानां तत्सम्बधस्य भागस्य आवण्टने;

(ii) एतादृशानां कराणां, शुल्कानां पथकराणां, शुल्कानां च विषये यानि पञ्चायतेषु समनुदिष्टानि भवेयुः तैः वा विनियोजितानि भवेयुः, तेषु

(iii) राज्यस्य संचितनिधेः पञ्चायतानां कृते सहायतानुदाने प्रभाविनां सिद्धान्तानां विषये प्रभावीनि भवेयुः,

(ख) पञ्चायतानां वित्तीयस्थितेः सुधारणार्थम् आवश्यकानाम् अध्युपायानां विषये,

(ग) पञ्चायतानां सुदृढवित्तहितार्थं राज्यपालेन वित्तायोगाय निर्दिष्टे कस्मिन्नपि विषये,

राज्यपालाय परामर्शं दद्यात्।

(२) राज्यस्य विधानमण्डलम् आयोगस्य संरचनायाः, तासाम् अर्हतानां याः आयोगस्य सदस्यानां नियुक्तये स्युः, तस्याश्च रीतेः यया तेषां चयनं भवेत्, विधिना उपबन्धं कुर्यात्।

(३) आयोगः स्वप्रक्रियाः अवधारयेत्, स्वकृत्यानां पालने च तादृशीः शक्तीः संधारयेत् याः राज्यस्य विधानमण्डलं तस्मै विधिना प्रदद्यात्।

(४) राज्यपालः एतस्य अनुच्छेदस्य अधीनम् आयोगेन दत्तं प्रत्येकं परामर्शं तस्मिन् कृतस्य कार्यान्वयनस्य स्पष्टीकरणात्मक ज्ञापनेन सह राज्यस्य विधानमण्डलस्य समक्षं स्थापयेत्।

२४३ञ. पञ्चायतानां लेखानां संपरीक्षा- पञ्चायतानां लेखानाम् अनुरक्षणार्थं संपरीक्षार्थं च राज्यस्य विधानमण्डलं विधिना उपबन्धं कुर्यात्।

२४३ट. पञ्चायतानां निर्वाचनम्- (१) पञ्चायतानां सर्वेषां निर्वाचनानां कृते मतदातृसूचिनिर्माणं, निर्वाचनानां संचालनस्य अधीक्षणं, निर्देशनं तथा च नियन्त्रणं राज्यस्य निर्वाचनायोगे निहितं भवेत्, यस्मिन् राज्यपालेन नियुक्तः राज्यनिर्वाचनायुक्तः स्यात्।

(२) राज्यस्य विधानमणडलेन विधिना कृतानाम् उपबन्धानाम् अधीनं राज्यनिर्वाचनायुक्तस्य सेवानियमाः पदावधिः च तथा भवेत् यथा राज्यपालः नियमेन अवधारयेत्।

परन्तु राज्यनिर्वाचनायुक्तः तस्य पदात् तया एव रीत्या तैः एव आधारैः अपसारितः भवेत् यया रीत्या यैः आधारैः च उच्चन्यायालयस्य न्यायाधीशः अपसारितः भवेत्, नान्यथा। तथा च तस्य राज्यनिर्वाचनायुक्तस्य नियुक्तिसमनन्तरं तस्य सेवानियमेषु तस्मै अलाभकारिपरिवर्तनं न भवेत्।

भारतस्य संविधानम्

(भागः ९-पञ्चायतानि)

(३) यदा निर्वाचनायोगः तथा अनुरुन्धेत तदा राज्यस्य राज्यपालः राज्यनिर्वाचनायोगाय तावन्तं कर्मचारिवृन्दम् उपलम्भयेत यावान् खण्डः (१) इत्यनेन राज्यनिर्वाचनायोगे निहितानां कर्तव्यानां निर्वहणाय आवश्यकः भवेत्।

(४) अस्य संविधानस्य उपबन्धानाम् अधीनं राज्यस्य विधानमण्डलं विधिना पञ्चायतानां निर्वाचनैः सम्बद्धेषु सर्वेषु विषयेषु उपबन्धान् कुर्यात्।

२४३ठ. सङ्घराज्यक्षेत्रेषु अनुप्रयोगः- अस्य भागस्य उपबन्धानाम् अनुप्रयोगः सङ्घराज्यक्षेत्रेषु भविष्यति, तथाविधे च अनुप्रयोगे तेषां तथा प्रभावः भवेत् यथा हि कमपि राज्यपालं प्रति सन्दर्भः भवेत्, अनुभागः २३९ इत्यस्य अधीनं सङ्घराज्यक्षेत्रस्य प्रशासकं प्रति सन्दर्भः भवेत्, तथा च कस्यापि राज्यस्य विधानमण्डलं विधानसभां प्रति वा सन्दर्भः भवेत्।

परन्तु राष्ट्रपतिः लोकाधिसूचनया निर्दिशेत् यत् एतस्य भागस्य उपबन्धानां कस्मिन्नपि राज्ये सङ्घराज्यक्षेत्रे, तस्य क्षेत्रे वा तादृशैः अपवादैः उपान्तरणैः च सह अनुप्रयोगः भवेत् ये लोकाधिसूचनायां विनिर्दिष्टाः भवेयुः।

२४३ड. एतस्य भागस्य कतिपयक्षेत्रेषु अननुप्रयोगः- (१) एतस्मिन् भागे वर्तमानस्य कस्यापि अनुप्रयोगः अनुभागः २४४ इत्यस्य (१) इति खण्डे निर्दिष्टेषु अनुसूचितक्षेत्रेषु तथा च (२) इति खण्डे निर्दिष्टेषु जनजातिक्षेत्रेषु न भवेत्।

(२) एतस्मिन् भागे विद्यमानं किमपि-

(क) नागालैण्डं मेघालयं, मिजोरमम् इति राज्येषु,

(ख) मणिपुरराज्यस्य तादृशेषु पर्वतीयक्षेत्रेषु, येषु तत्समयप्रवृत्तस्य कस्यचन विधेः अधीनं मण्डलपरिषदः सन्ति, अनुप्रयुक्तं न भविष्यति।

(३) एतस्मिन् भागे विद्यमानस्य कस्यापि-

(क) अनुप्रयोगः मण्डलस्तरीयपञ्चायतानां सम्बन्धे पश्चिमबङ्गालराज्यस्य दार्जिलिंगमण्डलस्य तादृशेषु पर्वतीयक्षेत्रेषु न भवेत्, यत्र तत्समयप्रवृत्तस्य कस्यचन विधेः अधीनं दार्जिलिंग-गोरखापर्वतीयपरिषदः सन्ति,

(ख) अर्थः तथा न भवेत् यथा तत् कस्यापि विधेः अधीनं दार्जिलिंगगोरखापर्वतीय-परिषदः कृत्येषु शक्तिषु च प्रभावं कुर्यात्।

[1][(३क) अनुसूचितजातीनां कृते स्थानानाम् आरक्षणसम्बन्धी अनुभागः २४३घ इत्यस्य कस्यापि अनुप्रयोगः अरुणाचलप्रदेशराज्ये न भवेत्।

(४) एतस्मिन् संविधाने किमपि विद्यमाने सत्यपि-

(क) खण्डः (२) इत्यस्य उपभागः (क) इत्यत्र निर्दिष्टस्य कस्यापि राज्यस्य विधानमण्डलं विधिद्वारा, एतस्य भागस्य विस्तारः खण्डः (१) इत्यत्र निर्दिष्टानि क्षेत्राणि विहाय, यदि किञ्चित् भवेत्, तस्मिन् राज्ये तस्यां दशायां कुर्यात् यदा तस्य राज्यस्य विधानसभा तथाविधं सङ्कल्पं विधानसभायाः सम्पूर्णसङ्ख्यायाः बहुमतेन, सदने उपस्थितानां मतं यच्छतां सदस्यानां च द्वि-तृतीयांशानां सदस्यानां बहुमतेन पारयेत्।

(ख) एतस्य भागस्य उपबन्धानां विस्तारं खण्डः (१) इत्यत्र निर्दिष्टेषु अनुसूचितक्षेत्रेषु, तथा च जनजातिक्षेत्रेषु, तादृशानाम् अपवादानाम् उपान्तरणानां च अधीनम्, यानि तस्मिन् विधौ विनिर्दिष्टानि स्युः, संसद्, विधिना कुर्यात्, यः विधिः ३६८-तमे अनुभागे संशोधनम् इति न मन्येत।

२४३ढ. विद्यमानविधीनां पञ्चायतानां च प्रवृत्तिः- अस्मिन् भागे किमपि विद्यमाने सत्यपि- संविधानस्य (७३-तमः संशोधनम्)अधिनियमः, १९९२ इत्यस्य प्रारम्भात् पूर्वं कस्मिन्नपि राज्ये प्रवृत्तैः पञ्चायतैः सम्बद्धस्य कस्यापि विधेः कोऽपि उपबन्धः, यः एतस्य भागस्य उपबन्धैः असङ्गतः स्यात्, तावत् प्रवर्तेत यावत् क्षमं विधानमण्डलं अथवा क्षमः प्राधिकारी तं न संशोधयेत् अथवा न निरासयेत्, अथवा एतादृशात् प्रारम्भात् एकस्य वर्षस्य समाप्तिः यावत् न भवति, एतेषु पूर्वं भवति, तावत् प्रवर्तेत।

परन्तु एतादृशात् प्रारम्भात् विद्यमानानि सर्वाणि पञ्चायतानि तस्य राज्यस्य विधानमण्डलस्य प्रत्येकं सदनेन पारितेन तादृशसङ्कल्पेन यदि पूर्वमेव न विघट्यते तर्हि स्वकीयावधेः समाप्तिपर्यन्तं प्रवर्तेत।

२४३ण. निर्वाचनसम्बन्धिप्रकरणेषु न्यायालयानां हस्तक्षेपस्य वर्जनम्- अस्मिन् संविधाने किमपि विद्यमाने सत्यपि-

(क) अनुच्छेदः २४३ (ट) इत्यस्य अधीनं निर्मितस्य अथ वा निर्माणाय तात्पर्यितस्य कस्यापि एतादृशस्य विधेः विधिमान्यता, या निर्वाचनक्षेत्राणां परिसीमनम् अथवा एतादृशनिर्वाचनक्षेत्रेषु स्थानानाम् आवण्टनम् इत्येतैः सम्बद्धाः स्यात्, कस्मिन्नपि न्यायलये प्रश्नगता न भवेत्।

(ख) कस्यापि पञ्चायतस्य किमपि निर्वाचनं, निर्वाचनावेदनं यत् एतादृशं प्राधिकारिणम् एतादृश्या रीत्या प्रस्तूयेत, यस्य राज्यस्य विधानमण्डलेन विधिना तदधीनं वा उपबन्धः कृतः स्यात्, तद्विहाय, न प्रश्नगतं भवेत्।

---

[1] संविधानस्य (त्र्यशीतितमं संशोधनम्) अधिनियमः, २००० इत्यस्य २-अनुभागेन (८-९-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

[1][भाग : ९क

नगरपालिकाः

२४३त. परिभाषाः-

अस्मिन् भाग, यावत् सन्दर्भेण अन्यथा अपेक्षितं न स्यात्, तावत्-

(क) "समितिः" इत्यतः अनुभागः २४३ध इत्यस्य अधीना समितिः अभिप्रेता।

(ख) "मण्डलम्" इत्यतः राज्यस्य मण्डलम् अभिप्रेतम्।

(ग) "महानगरक्षेत्रम्" इत्यतः तत् क्षेत्रं, यत् दशलक्षस्य ततोऽधिकायाः जनसङ्ख्यायाः, यस्याम् एकम् अधिकानि वा मण्डलक्षेत्राणि समाविष्टानि तथा च द्वे अथ वा अधिकाः नगरपालिकाः पञ्चायतानि वा, अन्यानि संलग्नक्षेत्राणि वा सम्मिलितानि स्युः, तथा च यत् राज्यपालेन अस्य भागस्य प्रयोजनार्थं लोकाधिसूचनया महानगरम् इति विनिर्दिष्टम्, अभिप्रेतम्।

(घ) "नगरपालिकाक्षेत्रम्" इत्यतः राज्यपालेन अधिसूचितं नगरपालिकाक्षेत्रम् अभिप्रेतम्।

(ङ) "नगरपालिका" इत्यतः अनुभागः २४३थ इत्यस्य अधीनं घटिता स्वायत्तशासनसंस्था अभिप्रेता।

(च) "पञ्चायतम्" इत्यतः अनुभागः २४३ख इत्यस्य अधीनं घटितं पञ्चायतम् अभिप्रेतम्।

(छ) "जनसङ्ख्या" इत्यतः अन्तिमायां पूर्ववर्तिन्यां जनगणनायाम् अभिनिश्चिता जनसङ्ख्या, यस्याः सुसङ्गताः अङ्काः प्रकाशिताः स्युः सा, अभिप्रेता।

२४३थ. नगरपालिकानां घटनम्- (१) प्रत्येकस्मिन् राज्ये-

(क) ग्रामीणक्षेत्रतः नगरक्षेत्रे सङ्क्रमणशीलक्षेत्राय (केनापि अभिधानेन अभिज्ञातं) नगरपञ्चायतम्,

(ख) कस्यचन लघुतरनगरक्षेत्राय नगरपालिका परिषत्,

(ग) बृहत्तरनगरक्षेत्राय नगरनिगमः,

इति अस्य भागस्य उपबन्धानम् अधीनं घटितं भवेत्।

---

[1] संविधानस्य (चतुःसप्ततितमं संशोधनम्) अधिनियमः, १९९२, इत्यस्य २-अनुभागेन (२४-४-१९९३ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

परन्तु, अस्य खण्डस्य अधीनं नगरपालिका एतादृशे नगरक्षेत्रे अथवा तस्य भागे घटिता न भवेत् यत् क्षेत्रं राज्यपालः तस्य आकारं तथा च तस्मिन् क्षेत्रे केनापि औद्योगिक आस्थापनेन दीयमानाः अथ वा दातुं प्रस्ताविताः नगरपालिकसेवाः, तथा च अन्यानि तादृशानि कारकाणि, यानि सः उचितानि मन्येत, लोकाधिसूचनया औद्योगिकक्षेत्रम् इति विनिर्दिशेत्।

(२) एतस्मिन् भागे "सङ्क्रमणशीलक्षेत्रं", "लघुतरनगरक्षेत्रम्" अथवा "बृहत्तरनगरक्षेत्रम् " इत्यतः एतादृशं क्षेत्रम् अभिप्रेतं यत् तस्य क्षेत्रस्य जनसङ्ख्या, तत्र जनसङ्ख्यायाः सघनता, स्थानीयप्रशासनार्थं जन्यमानं राजस्वं, कृषीतरक्रियापलापेषु नियोजनस्य प्रतिशतता, तस्य क्षेत्रस्य आर्थिकमहत्त्वं, तथा च तादृशाः अन्ये विषयाः, इति अवधार्य राज्यपालः एतस्य भागस्य प्रयोजनार्थं लोकाधिसूचनया विनिर्दिशेत्।

२४३द. नगरपालिकानां संरचना- (१) खण्डः (२) इत्यत्र यथा उपबन्धितं, तद् विहाय नगरपालिकायाः सर्वाणि स्थानानि नगरपालिकाक्षेत्रे प्रादेशिकनिर्वाचनक्षेत्रेभ्यः चितैः जनैः पूरितानि भवेयुः, तथा च एतत्प्रयोजनार्थं प्रत्येकं नगरपालिकाक्षेत्रं प्रादेशिकक्षेत्रेषु विभाजितं भवेत्, ये वॉर्ड इति नाम्ना ज्ञाताः भवेयुः।

(२) राज्यस्य विधानमण्डलं विधिना-

(क) नगरपालिकायां-

(i) नगरपालिकाप्रशासनस्य विशेषं ज्ञानम् अनुभवं वा धारयतां जनानां,

(ii) लोकसभायाः एतादृशानां सदस्यानां तथा च राज्यस्य विधानसभायाः एतादृशानां सदस्यानां ये तेषां निर्वाचनक्षेत्राणां प्रतिनिधित्वं कुर्वन्ति येषु किमपि नगरपालिकाक्षेत्रं पूर्णतः अंशतः वा समाविष्टं, तादृशानां

(iii) राज्यसभायाः एतादृशानां सदस्यानां तथा च राज्यस्य विधानपरिषदः एतादृशानां सदस्यानां, ये नगरपालिकाक्षेत्रे निर्वाचकरूपेण पञ्जीकृताः सन्ति, तादृशानाम्

(iv) अनुभागः २४३ध इत्यस्य खण्डः (५) इत्यस्य अधीनं घटितानां समितीनाम् अध्यक्षाणां प्रतिनिधित्वाय उपबन्धान् कुर्यात्।

परन्तु अनुभागः (i) इत्यत्र निर्दिष्टाः जनाः नगरपालिकायाः अधिवेशनेषु मताधिकारः न भवेत्।

(ख) नगरपालिकायाः अध्यक्षस्य निर्वाचनस्य रीतेः उपबन्धं कुर्यात्।

२४३ध. वॉर्ड-समितीनां घटनं संरचना च- (१) यस्याः प्रादेशिकक्षेत्रस्य जनसङ्ख्या त्रि-लक्षं ततः अधिका वा भवेत्, तत्र नगरपालिकायाः एकस्य अथवा अधिकानां वॉर्ड इत्येषां सङ्गत्या वॉर्डसमितीनां घटनं भवेत्।

(२) राज्यस्य विधानमण्डलं विधिना-

(क) वॉर्डसमितेः संरचनां तथा तस्याः प्रादेशिकक्षेत्रम्, इत्येतयोः

(ख) यया रीत्या वॉर्डसमितेः स्थानानि पूर्येरन् तस्याः च विषये उपबन्धान् कुर्यात्।

(३) वार्डसमितेः प्रादेशिकक्षेत्रस्यान्तर्गतं वॉर्ड इत्यस्य प्रतिनिधित्वं कुर्वन् नगरपालिकायाः सदस्यः तस्याः समितेः सदस्यः भवेत्।

(४) यत्र वॉर्डसमितिः-

(क) एकेन वॉर्डेन सङ्गता भवेत्, तत्र नगरपालिकायां तस्य वॉर्डइत्यस्य प्रतिनिधित्वं कुर्वन् सदस्यः, अथवा

(ख) द्वाभ्याम् अधिकेभ्यः वा वॉर्ड इत्येभ्यः सङ्गता भवेत्, तत्र नगरपालिकायाम् एतादृशानां वॉर्ड इत्येषां प्रतिनिधित्वं कुर्वत्सु एकः सदस्यः यः तस्याः वॉर्डसमितेः सदस्यैः निर्वाचितः भवेत्-

तस्याः वॉर्डसमितेः अध्यक्षः भवेत्।

(५) अस्मिन् अनुभागे वर्तमानं किमपि वॉर्डसमितीः अतिरिच्य समितीनां घटनात् राज्यस्य विधानमण्डलं निवारयति इति न आमान्येत।

२४३न. स्थानानाम् आरक्षणम्-(१) प्रत्येकस्यां नगरपालिकायाम् अनुसूचित-जातिभ्यः, अनुसूचित-जनजातिभ्यः स्थानानि आरक्षितानि भवेयुः, तथा च एतादृशानाम् आरक्षितानां स्थानानां सङ्ख्यायाः अनुपातः प्रत्यक्ष-निर्वाचनेन पूर्यमाणानां तस्याः नगरपालिकायाः स्थानैः यथाशक्यं तथा भवेत् यथा सः तस्मिन् क्षेत्रे अनुसूचितजातीनाम् अनुसूचितजनजातीनां च जनसङ्ख्यायाः तस्य नगरपालिकाक्षेत्रस्य पूर्ण-जनसंख्यया समानः भवेत्, तथा च एतादृशानां स्थानानां नगरपालिकायां भिन्नभिन्न-निर्वाचनक्षेत्रेषु चक्रानुक्रमेण आवण्टनं शक्यं भवेत्।

(२) खण्डः (१) इत्यस्य अधीनम् आरक्षितेषु स्थानेषु न्यूनातिन्यूनम् एक-तृतीयांशानि स्थानानि यथास्थिति अनुसूचित-जातीनाम् अनुसूचित-जनजातीनां महिलानां कृते आरक्षितानि भवेयुः।

(३) प्रत्येकस्यां नगरपालिकायां प्रत्यक्ष-निर्वाचनेन पूर्यमाणेषु सर्वेषु स्थानेषु न्यूनातिन्यूनम् एक-तृतीयांशानि स्थानानि (येषु अनुसूचितजातीनाम् अनुसूचितजनजातीनां महिलानां कृते आरक्षितानि स्थानानि अपि अन्तर्भूतानि भवेयुः) महिलानां कृते आरक्षितानि भवेयुः, तथा च एतादृशानां स्थानानां नगरपालिकायां भिन्नभिन्न-निर्वाचनक्षेत्रेषु चक्रानुक्रमेण आवण्टनं शक्यं भवेत्।

(४) नगरपालिकासु अध्यक्षाणां स्थानानि अनुसूचितजातीनाम् अनुसूचितजनजातीनां कृता तथा च महिलानां कृते तथा आरक्षितानि भवेयुः राज्यस्य विधानमण्डलेन विधिद्वारा उपबन्धितानि स्युः।

(५) खण्डः (१) तथा च (२) इत्येतयोः अधीनं स्थानानाम् आरक्षणं तथा च खण्डः (४) इत्येतस्य अधीनम् अध्यक्षाणां पदानाम् आरक्षणं (महिलानाम् आरक्षणात् यत् भिन्नं तत्) ३३४ तमे अनुभागे निर्दिष्टस्य अवधेः समाप्त्यनन्तरं प्रभावरहितं भवेत्।

(६) पश्चवर्तिनां नागरिकाणां कस्यापि वर्गस्य कृते कस्मिन्नपि स्तरे नगरपालिकानां स्थानानां अथवा नगरपालिकानाम् अध्यक्षाणां पदानाम् आरक्षणार्थम् उपबन्धानां करणात् अस्मिन् भागे वर्तमानं किमपि राज्यस्य विधानमण्डलं न निवारयेत्।

२४३प. नगरपालिकानम् अवधिः इत्यादि- (१) प्रत्येका नगरपालिका यदि तत्समये प्रवृत्तस्य कस्यचन विधेः अधीनं पूर्वम् एव न विघटिता न स्यात्, तर्हि तस्य प्रथमस्य अधिवेशनस्य कृते नियतात् दिनाङ्कात् पञ्च वर्षाणि यावत् प्रचलेत्, ततः अधिकं न।

(२) तत्समये प्रवृत्तस्य कस्यापि विधेः केनापि संशोधनेन तत्संशोधनात् प्राक् कार्यरतयाः कस्याः अपि नगरपालिकायाः तावत् विघटनं न भविष्यति यावत् खण्डः (१) इत्यत्र विनिर्दिष्टः तस्य कालावधिः समाप्तः न भवेत्।

(३) कस्याः अपि नगरपालिकायाः घटनार्थं निर्वाचनम्-

(क) खण्डः (१) इत्यत्र विनिर्दिष्टस्य तस्याः कार्यकालस्य समाप्तेः पूर्वम्,

(ख) तस्याः विघटननात् षण्मासानाम् अवधेः समाप्तेः पूर्वं पूर्णं भवेत्।

परन्तु यत्र सः शेषः कालावधिः, यस्मिन् सा नगरपालिका कार्यरता अभविष्यत्, षट्-मासेभ्यः न्यूनः भवेत्, तत्र एतस्य खण्डस्य अधीनं तस्याः नगरपालिकायाः घटनार्थं निर्वाचनस्य आवश्यकता न भवेत्।

(४) कस्याः अपि नगरपालिकायाः कालावधेः समाप्तेः पूर्वं तस्याः नगरपालिकायाः विघटने घटिता कापि नगरपालिका तस्य कालावधेः केवलं शेषे भागे कार्यरता भविष्यति यस्मिन् भागे विघटिता नगरपालिका खण्डः (१) इत्यस्य अधीनं कार्यरता अभविष्यत्।

२४३फ. सदस्यतार्थं निरर्हताः-

(१) कोऽपि जनः नगरपालिकायाः सदस्यत्वेन निर्वाचनार्थं निरर्हः भविष्यति तथा च नगरपालिकायाः सदस्यः भवितुं निरर्हः भविष्यति, यदि-

(क) यदि सः तस्य राज्यस्य विधानमण्डलस्य निर्वाचनप्रयोजने तत्समय-प्रवृत्तेन विधिना निरर्हितः भवेत्

परन्तु कोऽपि जनः एतदाधारेण निरर्हः न भविष्यति यत् सः वयसा पञ्चविंशतिवर्षेभ्यः न्यूनः भवेत्, यदि सः एकविंशति-वर्षाणां वयः प्राप्तवान् स्यात्।

(ख) यदि सः राज्यस्य विधानमण्डलेन कृतेन केनापि विधिना अथवा तदधीनं निरर्हः भवेत्।

(२) यदि प्रश्नः उदेति यत् कस्यापि नगरपालिकायाः कोऽपि सदस्यः खण्डः (१) इत्यत्र वर्णितायाः कस्या अपि निरर्हतायाः अधीनः भवति न वा इति, तर्हि सः प्रश्नः विनिश्चयार्थं तादृशं प्राधिकारिणं तादृश्या रीत्या निर्देशितः भवेत् या राज्यस्य विधानमण्डलेन विधिना उपबन्धिता भवेत्।

२४३ब. नगरपालिकानां शक्तयः, प्राधिकाराः उत्तरदायित्वानि च।

संविधानस्य उपबन्धानाम् अधीनं राज्यस्य विधानमण्डलं विधिना-

(क) नगरपालिकाभ्यः तादृशीः शक्तीः, प्राधिकारांश्च प्रयच्छेत् यैः तानि स्वायत्त-शासन-संस्थारूपेण कार्यं कर्तुं समर्थानि भविष्यन्ति तथा च तादृश्यां स्थितौ नगरपालिकानां कृते, तादृशानां प्रतिबन्धानाम् अधीनं, ये तत्र निर्दिष्टाः भवेयुः, उपयुक्त-स्तरे तादृशीः शक्तीः उत्तरदायित्वानि च प्रयच्छेत्, यैः तानि नगरपालिकानि स्वायत्त-संस्थात्वेन कार्यं कर्तुं समर्थानि भवेयुः, यथा-

(i) आर्थिकविकासार्थं सामाजिकन्यायार्थं च नियोजनम्।

(ii) आर्थिकविकासार्थं सामाजिकन्यायार्थं च, याः एकादश्याम् अनुसूच्यां निर्दिष्टा सन्ति तादृशीभिः योजनाभिः सह, एतादृशीनां योजनानां, कार्यान्वयनं याः तेषु निहिताः भवेयुः।

(ख) समितिभ्यः तादृशीः शक्तीः, प्राधिकारांश्च प्रयच्छेत् यैः ताः स्वकीयानां प्रदत्तानाम् उत्तरदायित्वानां, यदन्तर्गतं तानि अपि उत्तरदायित्वानि सन्ति यानि द्वादश्याम् अनुसूच्या सूचिबद्धैः विषयैः सम्बद्धानि सन्ति, कार्यान्वयनं कर्तुं समर्थं कर्तुम् आवश्यकानि स्युः।

२४३भ. कराधिरोपणे, निधौ च नगरपालिकानाम् अधिकाराः-

(क) राज्यस्य विधानमण्डलं विधिना एतादृशान् करान्, पथकरान्, शुल्कानि च उद्ग्रहीतुं, संग्रहीतुं विनियोजयितुं च नगरपालिकाः एतादृश्या प्रक्रियया एतादृशैः निर्बन्धैश्च सह प्राधिकृतं कुर्यात्,

(ख) राज्यशासनेन उद्गृहीतान् संगृहीतांश्च करान् एतादृशानां निर्बन्धानां मर्यादानां च अधीनम्, एतादृशेभ्यः प्रयोजनेभ्यः समनुदिशेत्,

(ग) राज्यस्य संचितनिधितः नगरपालिकानां कृते एतादृशानि सहायतानुदानानि प्रदातुम् उपबन्धान् कुर्यात्,

(घ) नगरपालिकाभिः तत्पक्षतः च क्रमशः प्राप्तानां धनानां सङ्कलनाय एतादृशानां निधीनां घटनार्थं, तथा च तेभ्यः निधिभ्यः एतादृशानां धनानां प्रत्याहरणार्थं च उपबन्धान् कुर्यात्,

ये विधौ विनिर्दिष्टाः भवेयुः।

२४३म. वित्तायोगः-

(१) अनुभागः (२४३झ) इत्यस्य अधीनं घटितः वित्तायोगः नगरपालिकानां वित्तीयस्थितेः पुनर्विलोकनं कुर्यात्, तथा च सः

(क) (i) राज्येन उद्गृहीताः कराः शुल्कानि, पथकराः, शुल्कानि च यानि एतस्य भागस्य अधीनं तेषु विभाजितानि स्युः, सर्वस्तराणां नगरपालिकानां मध्ये एतादृशानाम् आगमानां तत्सम्बद्धस्य भागस्य आवण्टने

(ii) एतादृशानां कराणां, शुल्कानां पथकराणां, शुल्कानां च विषये यानि नगरपालिकाषु समनुदिष्टानि भवेयुः तैः वा विनियोजितानि भवेयुः, तेषु

(iii) राज्यस्य संचितनिधेः नगरपालिकानां कृते सहायतानुदाने प्रभाविनां सिद्धान्तानां विषये,

(ख) नगरपालिकानां वित्तीयस्थितेः सुधारणार्थम् आवश्यकानाम् अध्युपायानां विषये,

(ग) नगरपालिकानां सुदृढवित्तहितार्थं राज्यपालेन वितायोगाय निर्दिष्टे कस्मिन्नपि विषये,

-राज्यपालाय परामर्शं दद्यात्।

(२) राज्यपालः एतस्य अनुच्छेदस्य अधीनम् आयोगेन दत्तं प्रत्येकं परामर्शं तस्मिन् कृतस्य कार्यान्वयनस्य स्पष्टीकरणात्मक-ज्ञापनेन सह राज्यस्य विधानमण्डलस्य समक्षं स्थापयेत्।

२४३य. नगरपालिकानां लेखानां सम्परीक्षा- नगरपालिकानां लेखानाम् अनुरक्षणार्थं सम्परीक्षार्थं च राज्यस्य विधानमण्डलं विधिना उपबन्धं कुर्यात्।

(भागः ९क- नगरपालिकाः)

२४३यक. नगरपालिकानां निर्वाचनम्- (१) नगरपालिकानां सर्वेषां निर्वाचनानां कृते मतदातृसूचिनिर्माणं, निर्वाचनानां संचालनस्य अधीक्षणं, निर्देशनं तथा च नियन्त्रणम् अनुभागः २४३ट इत्यत्र निर्दिष्टस्य राज्यस्य निर्वाचनायोगे निहितं भवेत्।

(२) अस्य संविधानस्य उपबन्धानाम् अधीनं राज्यस्य विधानमण्डलं विधिना नगरपालिकानां निर्वाचनैः सम्बद्धेषु सर्वेषु विषयेषु उपबन्धान् कुर्यात्।

२४३यख. सङ्घराज्यक्षेत्रेषु अनुप्रयोगः- अस्य भागस्य उपबन्धानाम् अनुप्रयोगः सङ्घराज्यक्षेत्रेषु भविष्यति, तथा च अनुप्रयोगे तेषां तथा प्रभावः भवेत् यथा हि कमपि राज्यपालं प्रति निर्देशः भवेत्, अनुभागः २३९ इत्यस्य अधीनं सङ्घराज्यक्षेत्रस्य प्रशासकं प्रति निर्देशः स्यात्, तथा च कस्यापि राज्यस्य विधानमण्डलं विधानसभां वा प्रति निर्देशः भवेत्।

परन्तु राष्ट्रपतिः लोकाधिसूचनया निर्दिशेत् यत् एतस्य भागस्य उपबन्धाः कस्मिन्नपि राज्ये सङ्घराज्यक्षेत्रे, तस्य क्षेत्रे वा तादृशैः अपवादैः उपान्तरणैः च सह अनुप्रयोगः भवेत् ये लोकाधिसूचनायां विनिर्दिष्टाः भवेयुः।

२४३यग. एतस्य भागस्य कतिपयक्षेत्रेषु अननुप्रयोगः- (१) एतस्मिन् भागे वर्तमानं कस्यापि अनुप्रयोगः अनुभागः २४४ इत्यस्य (१) इति खण्डे निर्दिष्टेषु अनुसूचितक्षेत्रेषु तथा च (२) इति खण्डे निर्दिष्टेषु जनजातिक्षेत्रेषु न भवेत्। (२) एतस्मिन् भागे विद्यमानं किमपि न तथा निरुक्तं स्यात् यत् तत् पश्चिमबंगाल-राज्यस्य दार्जिलिंगमण्डलस्य तादृशेषु पर्वतीयक्षेत्रेषु, यत्र तत्समयप्रवृत्तस्य कस्यचन विधेः अधीनं दार्जिलिंगगोरखापर्वतीयपरिषदः सन्ति, प्रभावी भवेत्।

(३) एतस्मिन् संविधाने किमपि सत्यपि, संसद् विधिना एतस्य भागस्य उपबन्धानां विस्तारं खण्डः (१) इत्यत्र निर्दिष्टेषु अनुसूचितक्षेत्रेषु जनजातिक्षेत्रेषु च एतादृशानाम् अपवादानां तथा च उपान्तरणानाम् अधीनं कुर्यात् ये एतादृशे विधौ विनिर्दिष्टाः भवेयुः तथा च एतादृशः कोऽपि विधिः अनुभागः ३६८ इत्यस्य प्रयोजनार्थम् एतस्य संविधानस्य संशोधनम् इति न मन्येत।

२४३यघ. मण्डलनियोजनार्थं समितिः- (१) प्रत्येकस्मिन् राज्ये मण्डलस्तरे पञ्चायतैः नगरपालिकाभिः च निर्मितानां योजनानां समेकने सम्पूर्णे मण्डलक्षेत्रे च विकासयोजनाप्रारूपं निर्मातुं प्रतिमण्डलं मण्डलनियोजनसमितिः निर्मीयेत।

(२) राज्यस्य विधानमण्डलं विधिना-

(क) मण्डलनियोजनसमितीनां संरचनायाः विषये,

(ख) तस्याः रीतेः विषये यया एतादृशीषु समितिषु स्थानानि पूर्येरन्,

परन्तु एतादृश्याः कस्याः अपि समितेः न्यूनातिन्यूनं चतुः-पञ्चमांशाः सदस्याः मण्डलस्तरे पञ्चायतानां तथा च मण्डलस्य नगरपालिकानां निर्वाचितैः सदस्यैः तेषां मण्डलानां ग्रामीणानां तथा च नगरीयाणां च क्षेत्राणां जनसङ्ख्यायाः अनुपातानुसारं निर्वाचिताः भविष्यन्ति।

(ग) मण्डलयोजनायाः सम्बद्धानां तादृशानां कृत्यानां विषये यानि एतादृशीः समितीः प्रति समनुदिश्येरन्,

(घ) सा रीतिः यया एतादृशीनां समितीनाम् अध्यक्षाः निर्वाचिताः भवेयुः

(३) प्रत्येकं मण्डलनियोजनसमितिः विकासयोजनाप्रारूपस्य निर्माणे-

(क) अवदध्यात् यत्-

(i) पञ्चायतानां नगरपालिकानां च सामान्यहितविषयाः, येषु स्थानीययोजना, जलं तथा च अन्येषां भौतिकानां प्राकृतिकानां च संसाधनानां स्थानिकं नियोजनम्, अवण्टनम्, अवसंरचनायाः एकीकृतः विकासः, पर्यावरणसंरक्षणं च अन्तर्भूतं स्यात्

(ii) उपलब्धानां वित्तीयानाम् अन्येषां च संसाधनानां मात्रा, प्रकाराश्च

(ख) एतादृशैः संस्थाभिः सङ्घटनैश्च परामर्शं कुर्यात् यानि राज्यपालः आदेशेन निर्दिशेत्।

(४) या एतादृश्या समित्या पुरःप्रशस्येत तां विकासयोजनां प्रत्येकं मण्डलनियोजनसमितेः अध्यक्षः राज्यशासनं प्रेषयेत्। उपबन्धान् कुर्यात्।

२४३यङ. महानगरयोजनायाः कृते समितिः-

(१) प्रत्येकस्मिन् महानगरक्षेत्रे सम्पूर्णमहानगरक्षेत्रार्थं विकासयोजनायाः प्रारूपं प्रकल्पयितुं महानगर-योजनासमितेः सङ्घटनं स्यात्।

(२) राज्यस्य विधानमण्डलं विधिना निम्नलिखित-विषयेषु उपबन्धान् कुर्यात्।

(क) महानगर-योजना-समितीनां संरचना;

(ख) सा रीतिः, यया एतादृशीषु समितिषु पदानि पूरयिष्यन्ते।

परन्तु एतादृशीनां समितीनां न्यूनातिन्यूनं द्वि-तृतीयांशाः सदस्याः, महानगरक्षेत्रे नगरपालिकानां निर्वाचित-सदस्यैः पञ्चायताध्यक्षैः, स्वीयेभ्यः, तत्क्षेत्रस्य नगरपालिकानां पञ्चायतानां च जनसङ्ख्यानुपातस्य अनुसारं निर्वाचयिष्यन्ते;

(ग) एतादृशीषु समितिषु भारतशासनस्य राज्यशासनस्य च, तथा च, एतादृशानां सङ्घटनानां संस्थानां च प्रतिनिधित्वं स्यात् यद् हि एतादृशीनां समितीनां कृते समनुदिष्टानि कृत्यानि क्रियया अन्वेतुम् आवश्यकं स्यात्;

(घ) महानगरक्षेत्रार्थं योजनया समन्वयेन च सम्बद्धानि तानि कृत्यानि यानि एतादृशीनां समितीनां कृते समनुदिष्टानि भवेयुः;

(ङ) सा रीतिः, यया एतादृशीनां समितीनाम् अध्यक्षाः निर्वाचयिष्यन्ते।

(३) प्रत्येकं महानगरयोजनासमितिः, विकासयोजनाप्रारूपस्य सज्जीकरणे,-

(क) निम्नलिखितम् अवदध्यात्, अर्थात् :-

(i) महानगरक्षेत्रे नगरपालिकाभिः पञ्चायतैः च सज्जीकृताः योजनाः;

(ii) नगरपालिकानां पञ्चायतानां च सामान्यहित-विषयाः, यदन्तर्गतं तत्क्षेत्रस्य समिन्वतायाः स्थानिकयोजनायाः, जलस्य अन्येषां च भौतिक-प्राकृतिक-संसाधनानाम् अंशावण्टनम्, अवसंरचनायाः एकीकृतः विकासः पर्यावरण-संरक्षरणं चास्ति;

(iii) भारतशासनेन राज्यशासनेन च, निर्धारिताः सर्वे उद्देश्याः प्राथम्यानि च;

(iv) तेषां विनिधानां मात्रा प्रकृतिः च, या हि भारतशासनस्य राज्यशासनस्य च अभिकरणैः महानगरक्षेत्रे संभाव्यमाना अस्ति, तथा च, अन्यानि उपलब्धानि वित्तीयानि इतराणि च संसाधनानि;

(ख) एतादृशैः संस्था-सङ्घटनैः परामर्शं विधास्यति येषाञ्च कृते राज्यपालः विनिर्दिशेत्।

(४) प्रत्येकं महानगरयोजनासमितेः अध्यक्षः, तां विकासयोजनां, या समितिद्वारा अभिसंस्तुता भवेत् राज्यशासनं प्रेषयेत्।

(भागः ९क- नगरपालिकाः)

२४३यच. विद्यमानानां विधीनां नगरपालिकानां च संधारणम्- अस्मिन् भागे किमपि सत्यपि, संविधानस्य (चतुःसप्ततितमं संशोधनम्) अधिनियमः, १९९२-इत्यस्य प्रारम्भात् सद्यः पूर्वं कस्मिन्नपि राज्ये प्रवृत्ताभिः नगरपालिकाभिः सम्बद्धस्य विधेः कश्चन उपबन्धः, यः अस्य भागस्य उपबन्धेन असङ्गतः स्यात्, यावत्पर्यन्तं शक्त-विधान-मण्डलेन अथवा अन्येन शक्तेन प्राधिकारिणा सः परिष्कृतः अथवा निरसितः न स्यात्, अथवा यावत्पर्यन्तम् एतादृक्-प्रारम्भात् एकवर्षं समाप्तं नैव भवति, अनयोः यत् किमपि पूर्वं भवेत्, तावत्पर्यन्तं प्रवर्तिष्यते।

परन्तु एतादृक्प्रारम्भात् सद्यः पूर्वं विद्यमानाः सर्वाः नगरपालिकाः, यदि तस्य राज्यस्य विधानसभया अथवा तादृशे राज्ये यत् विधानपरिषदं धत्ते, तस्य राज्यस्य विधानमण्डलस्य प्रत्येकं सदनेन अभ्युपगतेन तदाशययुक्तेन सङ्कल्पेन पूर्वमेव नैव विघट्यते चेत्, स्वीयावधेः समाप्ति-पर्यन्तं निरन्तरं स्थास्यति।

२४३यछ. निवार्चन-सम्बद्धविषयेषु न्यायालयानां हस्तक्षेप-वर्जनम्-

अस्मिन् संविधाने किमपि सत्यपि-

(क) अनुच्छेद-२४यक-अधीनं विरचितस्य अथवा विरचनार्थं स्वीकृतस्य कस्यचन एतादृशस्य विधेः विधिमान्यता, या निवार्चन-क्षेत्राणां परिसीमनेन अथवा एतादृशानां निर्वाचन-क्षेत्राणां स्थानानाम् आवण्टनेन च सम्बद्धः अस्ति, कस्मिन्नपि न्यायालये प्रश्नगता कर्तुं नैव शक्ष्यते;

(ख) राज्यस्य विधान-मण्डलेन विधिना उपबन्धितया रीत्या तथा च तादृशम् अधिकारिणं प्रस्तुतम् अस्ति तद् आवेदनम् अपवाद्य कस्यैचित् नगरपालिकायै किमपि निर्वाचनं प्रश्नगतं कर्तुं न शक्ष्यते।]

[1][भागः ९ख

सहकारि-समितयः

२४३यज. परिभाषाः- अस्मिन् भागे, यावत् सन्दर्भेण अन्यथा अपेक्षितं न स्यात्,-

(क) "प्राधिकृत-जन-"तः अनुच्छेद-२४३यथ-इत्यत्र, तस्मिन् रूपे निर्दिष्टः जनः अभिप्रेतः अस्ति;

ख) "मण्डलम्"-इत्यतः कस्याश्चन सहकारि-समितेः निदेशक-मण्डलम् अथवा शासिनिकायः, यः केनापि नाम्ना ज्ञातः स्यात्, यस्मिन् कस्याश्चन समितेः कार्यकलापानां प्रबन्धस्य निदेशनं नियंत्रणञ्च न्यस्ते स्तः, अभिप्रेतः अस्ति;

(ग) "सहकारिसमितिः"-इत्यतः एतादृशी समितिः अभिप्रेतास्ति, या कस्मिंश्चित् राज्ये तत्समये प्रवृत्ताभिः सहकारिसमितिभिः सम्बद्धस्य कस्यचन विधेः अधीनं पञ्जीकृता अस्ति अथवा पञ्जीकृता अस्ति इति आमान्यते;

(घ) "बहुराज्य-सहकारिसमितिः"-इत्यतः एतादृशी समितिः अभिप्रेता, यस्याः उद्देश्याः एकं राज्यं यावत् सीमिताः न सन्ति, तथा च, या एतादृशीभिः सहकारिसमितिभिः सम्बद्धस्य तत्समये प्रवृत्तस्य कस्यचन विधेः अधीनं पञ्जीकृता अस्ति अथवा पञ्जीकृता अस्ति इति आमान्यते;

(ङ) "पदाधिकारी" इत्यतः कस्याश्चन सहकारि-समितेः अध्यक्षः, उपाध्यक्षः, सभापतिः, उपसभापतिः, सचिवः, कोषाध्यक्षः वा अभिप्रेतः अस्ति; यत्र च, कस्याश्चन सहकारि-समितेः मण्डल-द्वारा निर्वाचयिष्यमाणः कोऽपि अन्यः जनः अभिप्रेतः अस्ति;

(च) "पञ्जीकर्ता" इत्यतः बहुराज्य-सहकारिसमितीनां सम्बन्धे केन्द्रीय-शासनेन नियुक्तः केन्द्रीय-पञ्जीकर्ता, तथा च, सहकारिसमितीनां सम्बन्धे राज्यस्य विधानमण्डलेन निर्मित-विधेः अधीनः राज्यशासनद्वारा नियुक्तः सहकारिसमितीनां पञ्जीकर्ता अभिप्रेतः अस्ति;

(छ) "राज्य-अधिनियमः" इत्यतः राज्यस्य विधानमण्डलेन कृतः कश्चन विधिः अभिप्रेतः अस्ति;

(ज) "राज्यस्तरीय-सहकारि-समितिः" इत्यतः एतादृशी समितिः अभिप्रेता अस्ति, यस्याः स्वीयं विस्तारितं प्रचालन-क्षेत्रं सम्पूर्णे अपि राज्ये अस्ति, तथा च, या राज्यस्य विधानमण्डलद्वारा निर्मिते कस्मिन्नपि विधौ तेन रूपेण परिभाषिता अस्ति।

२४३यझ. सहकारिसमितीनां निगमनम्- अस्य भागस्य उपबन्धाधीनं, कस्यचित् राज्यस्य विधान-मण्डलेन, विधिना स्वैच्छिकविरचनायाः, लोकतान्त्रिकसदस्यनियन्त्रणस्य, सदस्यार्थिक-सहभागितायाः, स्वशासि-कार्यान्वयनस्य च सिद्धान्तेषु आधृतानां सहकारिसमितीनां निगमन-विनियमन-परिसमापनस्य सम्बन्धे उपबन्धेत्

---

[1] संविधानस्य (सप्तनवतितमं संशोधनम्) अधिनियमः, २०११-इत्यस्य अनुभाग-४-द्वारा (१५-२-२०१२ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

(भागः ९ख- सहकारि-समितयः)

२४३यञ. मण्डल-सदस्यानां तत्पदाधिकारिणां सङ्ख्या पदावधिः च-

(१) मण्डले तावत्यां सङ्ख्यायां निदेशकाः भवेयुः, यावती सङ्ख्या राज्यस्य विधानमण्डलं विधिना उपबन्धेत्।

परन्तु सहकारिसमितीनां निदेशकानाम् अधिकतमा सङ्ख्या एकविंशतितः अधिका न स्यात्।

परन्तु च राज्यस्य विधानमण्डलं विधिना, एतादृश्याः प्रत्येकं सहकारि-समितेः मण्डले, यत् सदस्यत्वेन व्यष्टिभिः निर्मितं भवेत्, तथा च, यस्मिन् अनुसूचितजातीनाम् अथवा अनुसूचितजनजातीनाम् अथवा महिलानां वर्गाणां वा प्रवर्गाणां सदस्याः भवेयुः, एकं स्थानम् अनुसूचितजातीनाम् अथवा अनुसूचितजनजातीनां कृते, तथा च स्थान-द्वयं महिलानां कृते आरक्षितं कुर्यात्।

(२) मण्डलस्य निर्वाचितानां सदस्यानां, तत्पदाधिकारिणां च पदावधिः, निर्वाचनस्य दिनाङ्कात् पञ्च-वर्षात्मकः भवेत्, तथा च, पदाधिकारिणां पदावधिः मण्डलस्य अवधिना सह विस्तारी स्यात्।

परन्तु, यदि मण्डलस्य पदावधिः, तस्य मूल-पदावधेः अर्धादपि न्यूनः स्यात्, तर्हि, मण्डलम् आकस्मिक-रिक्तिं नामनिर्देशनद्वारा, सदस्यानां तस्माद् एव वर्गात्, यस्मात् आकस्मिक-रिक्तिः संजाता अस्ति, पूरयेत्।

(३) राज्यस्य विधान-मण्डलं, विधिद्वारा, एतादृशीनां समितीनां मण्डलस्य सदस्यरूपेण बैङ्ककार्याणां, प्रबन्धनस्य, वित्तस्य च क्षेत्रे अनुभववताम् अथवा सहकारि-समितीनां उद्देश्यैः तद्द्वारा च अङ्गीक्रियमाणेन कार्येण सम्बद्धे कस्मिंश्चित् अन्यस्मिन् क्षेत्रे विशेषज्ञताधारिणः मण्डलस्य सदस्यत्वेन संयोजयितुम्, उपबन्धयेत् :

परन्तु एतादृशानां सहयोजितानां सदस्यानां सङ्ख्या खण्डः (१) इत्यतः पूर्वं परञ्च 'क'-इत्यत्र विनिर्दिष्टान् एकविंशतिं निदेशकान् अतिरिच्य द्वाभ्याम् अधिकाः न स्यात्।

परन्तु च यत् एतादृशाः सहयोजिताः सदस्याः, तादृक्-सदस्यरूपेण तेषां क्षमतया सहकारिसमितेः निर्वाचने मतदानस्य अथवा मण्डलस्य पदाधिकारिरूपेण निर्वाचनस्य अधिकारं न संधारयतः।

परन्तु एतदपि यत् कस्याश्चन सहकारि-समितेः कार्यकारि-निदेशकाः, मण्डलस्य सदस्याः अपि भवेयुः, तथा च, एतादृशाः सदस्याः खण्डः-(१)-इत्यतः पूर्वं परञ्च ''क'-इत्यत्र विनिर्दिष्टानां समग्र-निदेशकानां सकल-सङ्ख्यायाः गणनातः अपवर्जिताः भवेयुः।

(भागः ९ख- सहकारि-समितयः)

२४३यट. मण्डलस्य सदस्यानां निर्वाचनम्-

(१) राज्यस्य विधानमण्डलेन कृते कस्मिन्नपि विधौ किमपि सत्यपि, मण्डलस्य निर्वाचनम्, मण्डलस्य अवधेः समापनात् प्राक् आचर्येत, येन इदं सुनिश्चितं स्यात् यत् नवनिर्वाचितस्य मण्डलस्य सदस्याः, पदावरोहि-मण्डलस्य सदस्यानां पदावधेः समापतान् समनन्तरं पदं गृह्णीयुः।

(२) सहकारिसमितेः सर्वेषां निर्वाचनानां कृते निर्वाचक-नामावलीनां सज्जीकरणस्य, तथा च, तेषां सर्वेषां निर्वाचनानां संचालनस्य अधीक्षण-निदेशन-नियन्त्रणानि, एतादृशे प्राधिकारिणि निकाये वा निहितः भवेत्, यः राज्यस्य विधानमण्डलेन विधिना उपबन्धितः भवेत्।

परन्तु राज्यस्य विधान-मण्डलं, विधिना, एतादृशानां निर्वाचनानां संचालनार्थं प्रक्रियां मार्गदर्शक-सिद्धान्तान् च उपबन्धयेत्।

२४३यठ. मण्डलस्य अधिक्रमणं निलम्बनम् अन्तरिम-प्रबन्धः च-

(१) तत्समये प्रवृत्ते कस्मिंश्चित् विधौ किमपि सत्यपि, किञ्चित् मण्डलं, षण्मासाधिकावधये अधिक्रमितं नैव विधास्यते अथवा निलम्बनाधीनं नैव स्थापयिष्यते :

परन्तु मण्डलम्-

(i) स्वस्य अनारतं व्यतिक्रम-दशायाम्; अथवा

(ii) स्वीय-कर्तव्यानाम् अनुपालनस्य उपेक्षा-दशायाम्; अथवा

(iii) मण्डलद्वारा सहकारि-समितेः अथवा तस्याः सदस्यानां हित-प्रतिकूल-कार्याचरणस्य दशायाम्; अथवा

(iv) मण्डलस्य घटने अथवा तस्य कार्येषु कस्यचन कार्यावरोधस्य संभाव्यदशायाम्; अथवा

(v) राज्यविधान-मण्डलद्वारा, विधिद्वारा, अनुच्छेद-२४३यट-इत्यस्य खण्डः (२) अधीनं यथोपबन्धितस्य प्राधिकारिणः अथवा निकायस्य राज्याधिनियमस्य उपबन्धानाम् अनुसारेण निर्वाचनानुष्ठाने असफलावस्थायाम्, अधिक्रमितं विधास्यते अथवा निलम्बनाधीनं स्थापयिष्यते।

परन्तु इदम् अन्यदपि यत् यत्र किमपि शासनिकांशधारणम् अथवा शासनद्वारा किञ्चित् ऋणादानम् अथवा वित्तीय-साहाय्यम् अथवा प्रत्याभूतिः नास्ति, तत्र एतादृश्याः सहकारि-समितेः मण्डलम् अधिक्रमितं नैव विधास्यते अथवा निलम्बनाधीनं नैव स्थापयिष्यते;

परन्तु इदमपि यत् बैङ्कीय-कार्यानुष्ठात्र्याः कस्याश्चन सहकारि-समितेः दशायां बैङ्कीय-कार्य-विनियमनाधिनियमः १९४९ इत्यस्य उपबन्धाः अपि प्रवर्तेरन्;

परन्तु इदमपि यत् बहुराज्य-सहकारि-समितितः पृथक् बैङ्कीय-कार्यानुष्ठात्र्याः कस्याश्चन सहकारि-समितेः दशायाम्, अस्य खण्डस्य उपबन्धाः तथैव प्रभाविनः भवेयुः, मन्येत, “षण्मास”-शब्दस्थाने “एकवर्ष”-शब्दः स्थापितः आसीत्।

(२) मण्डलस्य अधिक्रमणदशायाम्, एतादृशीनां सहकारिसमितीनां कार्यकलापस्य प्रबन्धार्थं नियुक्तः प्रशासकः, खण्डः-(१)-इत्यत्र विनिर्दिष्टावधौ निर्वाचनानां संचालनार्थं व्यवस्थापयेत्, तथा च, तस्य प्रबन्धं निर्वाचित-मण्डलाय दद्यात्।

(३) कस्यचित् राज्यस्य विधानमण्डलं, विधिद्वारा, प्रशासकस्य सेवा-समयान् उपबन्धयेत्।

२४३यड. सहकारि-समितीनां लेखानां संपरीक्षा-

(१) कस्यचित् राज्यस्य विधानमण्डलं, विधिद्वारा, सहकारि-समितिभिः लेखा-संधारणस्य कृते, तथा च, एतादृशीनां लेखानां, प्रत्येकं वित्तीय-वर्षे, न्यूनान्न्यूनम् एकवारं संपरीक्षानुष्ठानार्थम् उपबन्धयेत्।

(२) कस्यचित् राज्यस्य विधानमण्डलं, विधिद्वारा,एतादृशानां संपरीक्षकाणां संपरीक्षाकाणां च तादृशानां समवायानां, ये सहकारि-समितीनां लेखानां संपरीक्षानुष्ठानाय अर्हाः सन्ति, न्यूनतमाः अर्हताः अनुभवान् च अधिकथयेत्।

(३) प्रत्येकं सहकारि-समितिः, सहकारि-समितेः साधारणनिकायद्वारा नियुक्ते, खण्डः (२) इत्यत्र निर्दिष्टेन केनचित् संपरीक्षकेण अथवा संपरीक्षाकर्तृभिः समवायैः संपरीक्षाः कारयेत् :

परन्तु एतादृशान् संपरीक्षकान् वा संपरीक्षाकान् च समवायान्, राज्यशासनद्वारा अथवा राज्यशासनद्वारा एतन्निमित्तार्थं प्राधिकृतेन केनचित् अधिकारिणा अनुमोदितसूचीतः एव नियोजयेत्।

(४) प्रत्येकं सहकारि-समितीनां लेखानां संपरीक्षा, तद्वित्त-वर्षस्य, येन एताः लेखाः सम्बद्धाः सन्ति, समाप्तेः षण्मासावधौ विधीयेत।

(५) राज्याधिनियमद्वारा यथा परिभाषितायाः कस्याश्चन सर्वोच्च-सहकारिसमितेः लेखानां संपरीक्षा-प्रतिवेदनम्, राज्यविधान-मण्डलस्य समक्षं यया रीत्या उपस्थापयेत् यत् राज्यविधान-मण्डलद्वारा, विधिद्वारा उपबन्धयेत्।

२४३यढ. साधारणनिकायस्य उपवेशनस्य संयोजनम्- कस्यचित् राज्यस्य विधानमण्डलं, इदम् उपबन्धयेत् यत् प्रत्येकं सहकारि- समितेः साधारणनिकायस्य वार्षिकोपवेशनम्, एतादृक्-कार्यस्य संव्यवहारार्थं, यत् हि एतादृशि विधौ उपबन्धयेत्, वित्तीय-वर्षस्य समाप्तेः षण्मासावधौ, संयोजयेत्।

(भागः ९ख- सहकारि-समितयः)

२४३यण. सदस्यानां सूचनाप्राप्तेः अधिकारः-

(१) कस्यचित् राज्यस्य विधानमण्डलं, विधिद्वारा सहकारि-समितेः प्रत्येकं सदस्यस्य सहकारि-समितेः एतादृक्-पञ्जिका-सूचना-लेखा-पर्यन्तं, यत् हि एतादृशैः सदस्यैः साकं तेषां कार्यव्यवहारस्य नियमितसंव्यवहारार्थं स्थापितं स्यात्, प्राप्त्यर्थम् उपबन्धयेत्।

(२) कस्यचित् राज्यस्य विधानमण्डलं, विधिद्वारा सहकारि-समितेः प्रबन्धने सदस्यानां सहभागित्वं सुनिश्चेतुं, सदस्य-द्वारा उपवेशनेषु उपस्थितेः एतादृशीं न्यूनतमापेक्षाम् उपबन्धयन्, तथा च, सेवानां तादृक्-न्यूनतम-स्तरम् उपयुञ्जन्, यः एतादृशि विधौ उपबन्धयेत्, उपबन्धयितुं शक्ष्यते।

(३) कस्यचित् राज्यस्य विधानमण्डलं, विधिद्वारा स्वीय-सदस्यानां कृते सहकारि-शिक्षां प्रशिक्षणं च उपबन्धयेत्।

२४३यत. विवरण्यः- प्रत्येकं सहकारिसमितिः, प्रत्येकं वित्तीय-वर्षस्य समाप्तेः षण्मासावधौ, राज्यशासनद्वारा अभिहिताय अधिकारिणे, एतादृश्यः विवरण्यः दीयेत, यासु निम्नलिखितानि वृत्तानि सम्मेलयेत्, अर्थात् :-

(क) तस्याः कार्यकलापस्य वार्षिकं प्रतिवेदनम्;

(ख) तस्याः लेखानां संपरीक्षितं विवरणम्;

(ग) अधिशेषस्य व्यय-योजना, या सहकारि-समितेः साधारण-निकायद्वारा यथानुमोदिता भवेत्;

(घ) सहकारि-समितेः उपविधीनां संशोधनानि, यदि कानिचन भवेयुः, तेषां सूची;

(ङ) तस्याः साधारणनिकायस्य उपवेशनस्य आयोजन-तिथिः, तथा च, निवार्चनानां, यदा नियताः भवेयुः, संचालन-सम्बद्धा घोषणा; तथा च,

(च) राज्याधिनियमस्य केषाञ्चन उपबन्धानाम् अनुसरणे पञ्जीयकस्य अपेक्षिता काचिदपरा सूचना।

२४३यथ. अपराधः शास्तयः च-

(१) राज्यस्य विधानमण्डलं, विधिद्वारा सहकारि-समितिभिः सम्बद्धान् अपराधान्, तथा च, एतादृशानाम् अपराधानां शास्ति-सम्बद्धान् उपबन्धान् कुर्यात्।

(२) खण्डः (१) इत्यस्य अधीनं राज्यस्य विधानमण्डलद्वारा निर्मिते विधौ निम्नलिखितानां कार्याणां निर्वहणम् अथवा तेषां विलुप्तीकरणम् अपराधरूपेण समावेशयेत्, अर्थात् :-

(क) सहकारि-समितिः अथवा तस्याः प्राधिकारी अथवा सदस्यः जानन्नपि मिथ्याविवरणीं करोति अथवा मिथ्यासूचनां ददाति, अथवा कश्चन जनः जानन्नपि तादृशीं सूचनां नैव ददाति, या एतन्निमित्तं राज्याधिनियमस्य उपबन्धाधीनेन प्राधिकृतः जनः ततः अपेक्षेत;

(ख) कश्चन जनः जानन्नपि अथवा कञ्चित् युक्तियुक्तं कारणं विना राज्याधिनियमस्य उपबन्धानाम् अधीनं प्रवर्तितस्य आह्वानादेशस्य अध्यपेक्षायाः अथवा विधिपूर्णस्य लिखितादेशस्य अवज्ञां करोति;

(ग) कश्चन नियोजकः, यः पर्याप्तं कारणं विना, तद्द्वारा तस्य कर्मकरस्य व्यवकलित-राशेः, तस्माद् दिनाङ्कात् यस्य एतादृक् व्यवकलनं विहितं, चतुर्दश-दिनावधौ सहकारि-समितये संदातुम् असफलः भवति;

(घ) एतादृशः अधिकारी अथवा अभिरक्षकः, यः एतादृश्याः कस्याश्चित् सहकारिसमितेः, यस्याः सः अधिकारी अथवा अभिरक्षकः अस्ति, पञ्जिका-पुस्तिकानां, लेखानाम्, अभिलेखानां, रोक्कराशेः, प्रतिभूतेः अथवा अन्य-सम्पदः अभिरक्षां कस्मैचित् प्राधिकृतजनाय प्रदातुम् असफलः भवति; तथा च,

(ङ) यः कश्चन मण्डलस्य सदस्यानां पदाधिकारिणां वा निर्वाचनात् प्राक्, तदवधौ वा तत्पश्चात् किञ्चित् भ्रष्टाचरणं करोति।

२४३यद. बहुराज्य-सहकारिसमितीनां प्रवर्तनम्- अस्य भागस्य उपबन्धाः, बहुराज्य-सहकारिसमितीनां कृते एतत्-रूपांतरणाधीनं स्थीयमानत्वेन प्रवर्तेरन यत् “राज्यविधानमण्डलम्”, “राज्याधिनियमम्” अथवा “राज्यशासनं” प्रति कस्यचित् निर्देशस्य सः एव अर्थः अवबुध्येत यः क्रमशः, “संसदः”, “केन्द्रीयाधिनियमस्य” अथवा “केन्द्रीयशासनस्य” अस्ति।

२४३यध. सङ्घ-राज्यक्षेत्राणां प्रवर्तनम्- अस्य भागस्य उपबन्धाः, सङ्घ-राज्यक्षेत्राणां कृते प्रवर्तेरन्, तथा च एतादृशीनि सङ्घ-राज्यक्षेत्राणि, येषां काचित् विधानसभा नास्ति, तथैव प्रवर्तिष्यन्ते, मन्येत, कस्यचित् राज्यस्य विधान-मण्डलस्य प्रतिनिर्देशाः, अनुच्छेद-२३९-इत्यस्य अधीनं नियुक्तं तस्य प्रशासकं प्रति, तथा च, तादृशस्य सङ्घराज्य-क्षेत्रस्य सन्दर्भे, येषां काचित् विधानसभास्ति, तस्याः विधानसभायाः प्रतिनिर्देशाः सन्ति :

परन्तु राष्ट्रपतिः, राजपत्रे, अधिसूचनाद्वारा, इदं निर्दिशेत् यत् अस्य भागस्य उपबन्धाः, तादृशस्य कस्यचित् सङ्घराज्यक्षेत्रस्य अथवा तस्य भागस्य कृते, यं सः अधिसूचनायां विनिर्दिशेत्, नैव प्रवर्तेरन्।

२४३यन. विद्यमानविधीनां प्रवर्तन-सातत्यम्- अस्मिन् भागे कस्मिंश्चित् वृत्ते सत्यपि, संविधानस्य (सप्तनवतितमं संशोधनम्) अधिनियमः, २०११ इत्यस्य आरम्भात् सद्यः पूर्वं कस्मिन्नपि राज्ये प्रवृत्तया सहकारि-समित्या सम्बद्धस्य कस्यचन विधेः कश्चन उपबन्धः, यः अस्य भागस्य उपबन्धैः असङ्गतः स्यात्, तस्य शक्त-विधानमण्डलेन अथवा अन्येन शक्तेन प्राधिकारिणा संशोधनं वा निरसनं यावत् अथवा एतादृक्-प्रारम्भात् वर्षस्य समाप्ति-पर्यन्तम्, एतेषु यद् अपि न्यूनं भवेत्, प्रवर्तेत।]

भागः ९०

अनुसूचितक्षेत्राणि जनजातिक्षेत्राणि च

२४४. अनुसूचितक्षेत्राणां जनजातिक्षेत्राणां च प्रशासनम्- (१) पञ्चमानुसूच्याः उपबन्धाः [1][असमः[2][[3][मेघालयः, त्रिपुरा तथा मिजोरमः]] राज्यानि] विहाय [4]* * * कस्यचित् राज्यस्य अनुसूचितक्षेत्राणां तथा अनुसूचितजनजातीनां च प्रशासनाय तथा नियन्त्रणाय प्रवर्तेरन्।

(२) षष्ठी-अनुसूच्याः उपबन्धाः [1][असमः, [2][[5][मेघालयः, त्रिपुरा] तथा मिजोरमः इति राज्यानां]] जनजातिक्षेत्राणां प्रशासनाय प्रवर्तेरन्।

[6][२४४क. असमराज्यस्य कानिचित् क्षेत्राणि समावेशयतः एकस्य स्वशासिराज्यस्य निर्माणं, तदर्थं, स्थानीयविधानमण्डलस्य वा मन्त्रिपरिषदः वा उभयोः वा सर्जनम्-

(१) अस्मिन् संविधाने किमपि सत्यपि संसद् विधिना असमराज्यस्य अभ्यन्तरे एकं स्वशासि-राज्यं निर्मातुं क्षमते यस्मिन् षष्ठानुसूच्याः २०-प्रच्छेदेन संलग्नसारिण्याः [7][प्रथमे भागे] विनिर्दिष्टानां सर्वेषाम् अथवा तेषां मध्यतः केषांचित् जनजाति क्षेत्राणां पूर्णतः भागतः वा समावेशः भवेत् तदर्थं च-

(क) तस्य स्वशासिराज्यस्य विधानमण्डलरूपेण कार्यं कर्तुं निर्वाचितस्य निकायस्य वा भागतः नामनिर्दिष्टस्य भागतः निर्वाचितस्य च निकायस्य; अथवा

(ख) मन्त्रिपरिषदः, अथवा

उभयोः वा सर्जनं कर्तुं क्षमते, येषां च घटनम्, शक्तयः, कृत्यानि च तादृशानि भवेयुः यादृशानि विधिना विनिर्दिष्टानिः सन्ति।

(२) (१) खण्डे निर्दिष्टः कोऽपि ईदृशः विधिः, विशिष्टतया-

---

1 पूर्वोत्तरक्षेत्र-(पुनर्घटन)-अधिनियमः, १९७१ (१९७१ वर्षस्य ८१) इत्यस्य ७१-अनुभागेन "असमराज्यम्" इत्येतस्मात् प्रति एतत् संनिवेशितम् (२१-१-१९७२ दिनाङ्कात् प्रप्रवर्तमानप्रभावेण)

2 संविधानस्य (एकोनपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८४, वर्षस्य २-अनुभागेन (१-४-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) "तथा मेघालयः" शब्दयोः स्थाने संनिवेशितः।

3 मिजोरमराज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ३४) इत्यस्य ३९-अनुभागेन "मेघालयः तथा त्रिपुरा" शब्दानां स्थाने संनिवेशितः।

4 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ वर्षस्य २९-अनुभागेन प्रथमानुसूचिद्वारा च (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "प्रथमानुसूच्याः (क) भागे तथा (ख) भागे विनिर्दिष्टानां" शब्दानाम् अक्षराणां लोपः कृतः।

5 मिजोरमराज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ३४) इत्यस्य ३९-अनुभागेन (२०-२-१९८६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "मेघालयः तथा त्रिपुरा राज्ये तथा मिजोरमसङ्घराज्यक्षेत्रम्" शब्दानां स्थाने प्रतिष्ठापिताः।

6 संविधानस्य (द्वाविंशतितमं संशोधनम्) अधिनियमः, १९६९ इत्यस्य २-अनुभागेन अन्तर्वेशितः।

7 पूर्वोत्तरक्षेत्र-(पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-इत्यस्य ७१-अनुभागेन "क-भागे" इत्येतस्मात् प्रति एतत् संनिवेशितम् (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(क) राज्यसूच्यां वा समवर्तिसूच्यां वा प्रगणितानि तानि विषयाणि विनिर्देष्टुं क्षमते येषां सम्बन्धे स्वशासिराज्यस्य विधानमण्डलाय अखिलराज्यस्य कृते अथवा तस्य कस्यापि भागस्य कृते विधिप्रणयने शक्तिः, असमराज्यस्य विधानमण्डलम् अपवर्ज्य, अन्यथा वा, भवेत्;

(ख) येषु विषयेषु तस्य स्वशासिराज्यस्य कार्यपालिकाशक्तेः विस्तारः भवेत् तान् विषयान् परिणिश्चितान् कर्तुं क्षमते;

(ग) इमम् उपबन्धं कर्तुं क्षमते यत् असमराज्येन उद्गृहीतः कोऽपि करः स्वशासिराज्याय तावत् समर्पितः भवेत् यावत् तस्य आगमाः तस्मात् स्वशासिराज्यात् प्राप्ताः इति मतं भवति;

(घ) इमम् उपबन्धं कर्तुं क्षमते यत् अस्य संविधानस्य कस्मिन् अपि अनुच्छेदे राज्यस्य सम्बन्धे कस्यापि निर्देशस्य तथा अर्थः ग्राह्यः यथा तादृशः निर्देशः स्वशासिराज्यस्य निर्देशम् अन्तर्भावयति;

(ङ) यादृशान् आवश्यकान् मन्यते तादृशान् अनुपूरकान्, आनुषङ्गिकान्, पारिणामिकान् च उपबन्धान् कर्तुं क्षमते।

(३) पूर्वोक्तप्रकारस्य कस्यापि विधेः किमपि संशोधनम्, यत् (२) खण्डस्य (क) उपखण्डे, (ख) उपखण्डे वा विनिर्दिष्टानां विषयाणां मध्यात् केनापि विषयेण सम्बद्धम् अस्ति तत् तावत् प्रभावकरं न भवेत् यावत् तत् संशोधनं संसदः उभयोः सदनयोः उपस्थितानां मतदातृणां न्यूनात् न्यूनं तृतीयांशद्वयमितैः सदस्यैः पारितं न भवति।

(४) एतस्मिन् अनुच्छेदे निर्दिष्टः कोऽपि विधिः, ३६८-तमानुच्छेदस्य प्रयोजनानां कृते अस्य संविधानस्य संशोधनम् इति न मतं भवेत्, यद्यपि सः तं कमपि उपबन्धम् अन्तर्वेशयति यः एतत् संविधानं संशोधयति अथवा तस्य संशोधनस्य प्रभावं धारयति।]

भागः ११

सङ्घस्य राज्यानां च परस्परं सम्बन्धाः

अध्यायः १ विधायिनः सम्बन्धाः

विधायिनीनां शक्तीनां वितरणम्

२४५. संसदा राज्यविधानमण्डलैश्च प्रणीतानां विधीनां विस्तारः- (१) अस्य संविधानस्य अधीनम्, संसद् सम्पूर्णस्य भारतराज्यक्षेत्रस्य कृते, तस्य कस्यापि भागस्य वा कृते विधीन् प्रणेतुं क्षमते; तथा च राज्यविधानमण्डलं सम्पूर्णस्य तस्य राज्यस्य कृते तस्य कस्यापि भागस्य वा कृते विधीन् प्रणेतुं क्षमते।

(२) संसदा प्रणीतः कोऽपि विधिः, राज्यक्षेत्रातीतम् अस्य प्रवर्तनं भवति इति आधारेण, विधौ अमान्यः न भवेत्।

२४६. संसदा राज्यविधानमण्डलेन च प्रणीतानां विधीनां विषयाः- (१), (२), (३) खण्डयोः किमपि सत्यपि, संसद् सप्तमानुसूच्याः (अस्मिन् संविधाने “सङ्घसूची” इति निर्दिष्टायाम्) प्रथमसूच्यां प्रगणितानां विषयाणाम् अन्यतमं कमपि उद्दिश्य विधीनां प्रणयने अनन्यां शक्तिं भजते।

(२) (३) खण्डे किमपि सत्यपि तथा च (१) खण्डस्य अधीनं [1][* * *] कस्यापि राज्यस्य विधान मण्डलमपि सप्तमानुसूच्याः (अस्मिन् संविधाने “समवर्तिनी सूची” इति निर्दिष्टायाम्) तृतीयसूच्यां प्रगणितानां विषयाणाम् अन्यतमं कमपि उद्दिश्य विधीन् प्रणेतुं शक्तिं भजते।

(३) (१), (२) खण्डयोः अधीनं [1][***] कस्यापि राज्यस्य विधानमण्डलं सप्तमानुसूच्याः (अस्मिन् संविधाने “राज्यसूची" इति निर्दिष्टायाम्) द्वितीयसूच्यां प्रगणितानां विषयाणाम् अन्यतमं कमपि उद्दिश्य तस्य राज्यस्य कृते, तस्य कस्यापि भागस्य वा कृते, विधीन् प्रणेतुम् अनन्यां शक्तिं भजते।

(४) [2][कस्मिन् अपि राज्ये] न अन्तर्भावितस्य कस्यापि भारतराज्यक्षेत्रभागस्य ते विधीन् प्रणेतुं संसद् कमपि विषयम् उद्दिश्य, तद्विषये राज्यसूच्यां प्रगणिते अपि, शक्तिं भजते।

[3][**२४६क. भाण्ड-तथा-सेवा-कर-विषये विशेषः उपबन्धः-** (१) २४६-अनुच्छेदः तथा २५४-अनुच्छेदः इत्यनयोः अनुच्छेदयोः किमपि सत्यपि, संसद्, तथा (२) खण्डः इत्यस्य अधीनं राज्यस्य विधानमण्डलं, सङ्घेन राज्येन वा अधिरोपिते भाण्ड-तथा-सेवा-कर-विषये विधीन् प्रणेतुं शक्तिं भजेते।

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ वर्षस्य २९-अनुभागेन प्रथमानुसूचिद्वारा च (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) ”प्रथमानुसूच्याः (क) भागे तथा (ख) भागे विनिर्दिष्टानां” शब्दानाम् अक्षराणां लोपः कृतः।

[2] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ वर्षस्य २९-अनुभागेन प्रथमानुसूचिद्वारा च (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) ”प्रथमानुसूच्याः (क) भागे तथा (ख) भागे विनिर्दिष्टानां” शब्दानाम् स्थाने प्रतिष्ठापितः।

[3] संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य ३-अनुभागेन एषः खण्डः अन्तर्वेशितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(२) यत्र भाण्डानां तथा सेवानाम् अथवा उभयोः आपूर्त्तिः आन्तरराज्यिक-व्यापारस्य वाणिज्यस्य वा अनुक्रमेण भवति, तत्र भाण्ड-तथा-सेवा-करविषयम् उद्दिश्य विधेः प्रणयने संसद् अनन्यां शक्तिं भजते।

स्पष्टीकरणम्-२७९क इति अनुच्छेदस्य (५) खण्डे निर्दिष्टं भाण्ड-तथा-सेवा-करविषयम् उद्दिश्य एतस्य अनुच्छेदस्य उपबन्धाः भाण्ड-तथा-सेवा-कर-परिषदा पुरःप्रशंसितदिनाङ्कात् प्रभाविनः भवेयुः।

२४७. अपरन्यायालयविशेषाणां स्थापनार्थम् उबन्धयितुं संसदः शक्तिः- एतस्मिन् अध्याये किमपि सत्यपि संसदा प्रणीतानां विधीनाम्, सङ्घसूच्यां प्रगणितं विषयम् उद्दिश्य विद्यमानस्य कस्यापि विधेः वा साधुतरप्रशासनार्थम् अपरन्यायालयानां स्थापनायै संसद् विधिना उपबन्धयितुं क्षमते।

२४८. अवशिष्टाः विधानशक्तयः- (१) समवर्तिसूच्यां राज्यसूच्यां वा न प्रगणितं कमपि विषयम् उद्दिश्य कस्यापि विधेः प्रणयने [1][२४६क- तमानुच्छेदस्य अधीनं, संसद्] अनन्यां शक्तिं भजते।

(२) एतादृशी शक्तिः तयोः सूच्योः अन्यतरस्यां कस्यामपि अवर्णितं करम् अधिरोपयतः कस्यापि विधेः प्रणयनस्य शक्तिम् अन्तर्भावयति।

२४९. राष्ट्रहितार्थं राज्यसूच्याः कमपि विषयम् उद्दिश्य विधेः विधाने संसदः शक्तिः- (१) एतस्मिन् अध्याये पूर्वतनेषु उपबन्धेषु किमपि सत्यपि यदि द्वाभ्यां तृतीयांशानाम् अन्यूनैः उपस्थितैः मतं च ददद्भिः सदस्यैः समर्थितेन सङ्कल्पेन राज्यसभया घोषितं भवति यद् राष्ट्रियहितार्थम् एतद् आवश्यकं प्रसंगोचितं वा अस्ति यद् राज्यसूच्यां प्रगणितं तस्मिन् सङ्कल्पे विनिर्दिष्टं च कमपि विषयम् उद्दिश्य [2][२४६क- अनुच्छेस्य अधीनं भाण्ड-तथा-सेवा-करेण उपबन्धितं वा] संसदा विधयः प्रणेतव्याः इति, तर्हि यावत् सः सङ्कल्पः प्रवृत्तः भवति तावत् तं विषयम् उद्दिश्य सम्पूर्णभारतराज्यस्य कृते कस्यापि तस्य भागस्य वा कृते, संसदा विधीनां प्रणयनं विधिसङ्गतं भवेत्।

(२) (१) खण्डाधीनं पारितः सङ्कल्पः एकस्मात् वर्षात् अन्यूनं तादृशं कालावधिं प्रवृत्तः भवेत् यादृशः तत्र विनिर्दिष्टः भवेत्।

परन्तु यदि यावद्वारं च (१) खण्डे उपबन्धितया रीत्या, एतादृशस्य सङ्कल्पस्य प्रवर्तनस्य अनुवर्तनम् अनुमोदयन् सङ्कल्पः पारितः भवति तर्हि सः तादृशः सङ्कल्पः तस्मात् दिनाङ्कात् एकं वर्षं यावत् अधिकावधि प्रवर्तमानः अनुवर्तेत, यस्मिन् दिनाङ्के एतत् खण्डाधीनं सः प्रवर्तनात् प्रविरतः अभविष्यत्।

(३) (१) खण्डाधीनं सङ्कल्पस्य पारणे न कृते सति संसद् यं प्रणेतुं क्षमा न अभविष्यत् सः संसदा प्रणीतः विधिः, यदा सः सङ्कल्पः प्रवर्तनात् विरतः भवति ततः परं षण्णां मासानां कालावधेः समाप्तौ, उक्तकालावधेः समाप्तेः पूर्वं कृतान् कर्तव्यत्वात् लोपितान् वा विषयान् विहाय यावद् अक्षमता प्रसरति तावन् मात्रं, कार्यक्षमतायाः विरतः भवति।

---

[1] संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य ३-अनुभागेन "संसद्" इत्यस्य स्थाने प्रतिष्ठापितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[2] संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य ३-अनुभागेन अन्तर्वेशितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(भागः ११- सङ्घस्य राज्यानां च परस्परं सम्बन्धाः

२५०. यदि आपात-उद्घोषणा प्रवृत्ता अस्ति तर्हि राज्यसूच्याः कमपि विषयम् उद्दिश्य विधेः विधाने संसदः शक्तिः- (१) एतस्मिन् अध्याये किमपि सत्यपि, यदा आपातस्य उद्घोषणा प्रवृत्ता अस्ति तदा राज्यसूच्यां प्रगणितानां विषयाणाम् अन्यतमं कमपि विषयं [1][२४६क-अनुच्छेस्य अधीनं भाण्ड-तथा-सेवा-करेण उपबन्धितं वा] सम्पूर्णस्य भारतराज्यक्षेत्रस्य कृते, कस्यापि तद्भागस्य वा कृते, विधीन् प्रणेतुं संसद् शक्तिं भजेत।

(२) आपातस्य उद्घोषणायाः प्रचालने अकृते सति संसद् यं प्रणेतुं क्षमा न अभविष्यत्, सः संसदा प्रणीतः विधिः, यदा सा उद्घोषणा प्रवर्तनात् विरता भवति ततः परं षण्णां मासानां कालावधेः समाप्तौ, उक्तकालावधेः समाप्तेः प्राक् कृतान् कर्तव्यत्वात् लोपितान् विषयान् विहाय, यावद् अक्षमता प्रसरति तावन्मात्रं, कार्यक्षमतायाः विरतः भवति।

२५१. २४९-२५० तमानुच्छेदयोः अधीनं संसदा प्रणीतानां विधीनां राज्यविधानमण्डलैः प्रणीतानां विधीनां च मध्ये विसङ्गतिः- - २४९, २५०-तमानुच्छेदगतं किमपि, तस्य कस्यापि विधेः प्रणयने राज्यविधानमण्डलस्य शक्तिं न निर्बन्धयेत् यं विधिं प्रणेतुं तद् विधानमण्डलं संविधानस्य अधीनं शक्तिं भजते किन्तु यदि संसदा प्रणीतः विधिः राज्यविधानमण्डलेन प्रणीतस्य तस्य विधेः केनापि उपबन्धेन सुतरां विरुद्धः अस्ति यं (विधिम्) प्रणेतुम् उक्तानुच्छेदयोः अन्यतरस्य अधीनं संसद् शक्तिं भजते, तर्हि राज्यविधानमण्डलेन प्रणीताद् विधेः प्राक् परं वा पारितः संसदः विधिः अभिभावी भवेत्, तथा च राज्यविधानमण्डलेन प्रणीतः विधिः यावत् तु संसदा प्रणीतः विधिः कार्यक्षमतया अनुवर्तते तावत्, यावद् विरोधमात्रं, प्रवर्तनशून्यः भवेत्।

२५२. द्वयोः अधिकानां वा राज्यानां कृते सहमत्या विधाने संसदः शक्तिः; अन्येन केनापि राज्येन तादृशस्य विधानस्य अङ्गीकरणम्- (१) यदि द्वयोः अधिकानां वा राज्यानां विधानमण्डलानि एतत् वाञ्छनीयं गणयन्ति यत् २४९, २५०-तमानुच्छेदयोः उपबन्धितेभ्यः अन्यत्र येषां विषयाणाम् अन्यतमं कमपि विषयम् उद्दिश्य राज्यानां कृते विधीनां प्रणयने संसद् शक्तिं न भजते तेषाम् अन्यतमः सः विषयः संसदा विधिना विनियमितः कर्तव्यः; यदि च तेषां राज्यानां विधानमण्डलानां सर्वैः सदनैः तदर्थं सङ्कल्पाः पारिताः भवन्ति तर्हि तदनुसारं तस्य विषयस्य विनियमनार्थम् अधिनियमस्य पारणं संसदः कृते विधिसङ्गतं भवेत्; तथा च एवं पारितः कोऽपि अधिनियमः तादृशानि राज्यानि तदन्यत् तादृशं किमपि राज्यं च विषयीकुर्यात् यादृशेन पश्चात् तदर्थं सदनेन, यत्र वा द्वे सदने स्तः तत्र तद्राज्यविधानमण्डलस्य उभाभ्यां सदनाभ्यां, पारितेन सङ्कल्पेन अङ्गीक्रियते।

---

[1] संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य ५-अनुभागेन एषः खण्डः अन्तर्वेशितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(२) संसदा एवं पारितः कोऽपि अधिनियमः सदृशरीत्या पारितेन अङ्गीकृतेन च संसदः अधिनियमेन संशोधितः निरस्तः वा भवितुं क्षमते, किन्तु सः विधिः यत् किमपि राज्यं विषयीकरोति तद्राज्यम् उद्दिश्य तस्य राज्यस्य विधानमण्डलस्य अधिनियमेन सः विधिः संशोधितः निरस्तः वा न भवेत्।

२५३. आन्ताराष्ट्रियसमयानां कार्यक्षमतायै विधानम्- एतदध्यायस्य पूर्वगामिषु उपबन्धेषु किमपि सत्यपि, सम्पूर्णस्य भारतराज्यक्षेत्रस्य कृते केनापि अन्येन देशेन, कैरपि देशैः वा कृतस्य सन्धेः, समयस्य, अभिसमयस्य वा आन्ताराष्ट्रियसम्मेलने, सभायाम्, अन्यस्मिन् वा निकाये कृतस्य कस्यापि विनिश्चयस्य वा परिपालनाय कस्यापि विधेः प्रणयने संसद् शक्तिं भजते।

२५४. संसदा प्रणीतानां विधीनां राज्यविधानमण्डलैः प्रणीतानां विधीनां च मध्ये विसङ्गतिः- (१) यदि राज्यविधानमण्डलेन प्रणीतस्य विधेः कोऽपि उपबन्धः, यं विधिं संसद् अधिनियमितुं क्षमा अस्ति तस्य संसद् प्रणीतस्य विधेः कस्यापि उपबन्धस्य सुतरां विरुद्धः अस्ति; समवर्तिसूच्यां प्रगणितानां विषयाणाम् अन्यतमम् उद्दिश्य विद्यमानस्य वा विधेः कस्यापि उपबन्धस्य सुतरां विरुद्धः अस्ति, तर्हि (२) खण्डस्थानाम् उपबन्धानाम् अधीनं तादृशस्य राज्यस्य विधानमण्डलेन प्रणीतात् विधेः प्राक् परं वा पारितः संसदा प्रणीतः विधिः, विद्यमानः वा विधिः यथायथम् अभिभावी भवेत्; तथा च तद्राज्यविधानमण्डलेन प्रणीतः विधिः यावद् विरोधमात्रं शून्यः भवेत्।

(२) यत्र [1][* * *] राज्यस्य विधानमण्डलेन समवर्तिसूच्यां प्रगणितविषयाणाम् अन्यतमम् एकम् उदिश्य प्रणीतः विधिः संसदा प्रणीतस्य पूर्वतरस्य विधेः तं विषयम् उद्दिश्य विद्यमानस्य वा विधेः उपबन्धैः विरुद्धं कमपि उपबन्धम् अन्तर्वेशयति, तत्र तादृशस्य राज्यस्य विधानमण्डलेन एवं प्रणीतः विधिः, यदि सः राष्ट्रपतेः विचारार्थं रक्षितः तस्य अनुमतिं च प्राप्तवान्, तस्मिन् राज्ये अभिभावी भवेत्-

परन्तु एतत् खण्डगतं किमपि, राज्यविधानमण्डलेन एवं प्रणीतस्य विधेः परिवर्धनं, संशोधनं, परिवर्तनं, निरसनं वा कुर्वन्तं विधिम् अन्तर्भावयतः कस्यापि विधेः अधिनियमनात् संसदं न निवारयेत्।

२५५. पुरःप्रशंसनानां, पूर्वस्वीकृतानां च अपेक्षाः केवलं प्रक्रियायाः विषयाः इति अनुदर्शनम्- यदि संसदः [1][* * *] राज्यविधानमण्डलस्य वा अधिनियमाय-

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "प्रथमानुसूच्याः क-भागे, ख-भागे वा उल्लिखितस्य" इत्येते शब्दाः अक्षराश्च लोपिताः।

(भागः ११- सङ्घस्य राज्यानां च परस्परं सम्बन्धाः

(क) यत्र राज्यपालस्य पुरः प्रशंसनम् अपेक्षितम् आसीत् तत्र राज्यपालेन, राष्ट्रपतिना वा;

(ख) यत्र राज्यप्रमुखस्य पुरः प्रशंसनम् अपेक्षितम् आसीत् तत्र राज्यप्रमुखेन, राष्ट्रपतिना वा;

(ग) यत्र राष्ट्रपतेः पुरः प्रशंसनं, पूर्वस्वीकरणं वा अपेक्षितम् आसीत् तत्र राष्ट्रपतिना,

अनुमतिः प्रदत्ता अभूत् तर्हि तादृशः अधिनियमः तादृशस्य अधिनियमस्य कोऽपि उपबन्धश्च अस्माद् एव हेतोः शून्यः न भवेत् यत् अनेन संविधानेन अपेक्षितं पुरःप्रशंसनं, पूर्वस्वीकरणं वा न कृतम् आसीत् इति।

अध्याय २ प्रशासनसम्बन्धाः

साधारणम्

२५६. राज्यानां सङ्घस्य च आभाराः- प्रत्येकराज्यस्य कार्यपालिका शक्तिः तथा प्रयुक्ता भवेत् यथा संसदा प्रणीतानां विधीनां, तथा ये तद् राज्यं विषयीकुर्वन्ति तेषां केषामपि विद्यमानानां विधीनां च अनुपालनं सुनिश्चितं भवेत्; तथा च सङ्घस्य कार्यपालिका शक्तिः राज्याय तादृशानां निदेशानां प्रदानपर्यन्तं विस्तारम् आप्नुयात् यादृशान् भारतशासनं तदर्थम् आवश्यकान् प्रतीयात्।

२५७. अवस्थाविशेषेषु सङ्घस्य राज्येषु नियन्त्रणम्- (१) प्रत्येकराज्यस्य कार्यपालिका शक्तिः तथा प्रयुक्ता भवेत् यथा सङ्घस्य कार्यपालिकायाः शक्तेः प्रयोगं न प्रतिरुन्ध्यात् न वा तादृशप्रयोगे प्रतिकूलं प्रभावम् आपादयेत्; तथा च सङ्घस्य कार्यपालिकाः शक्तिः राज्याय तादृशानां निदेशानां प्रदानपर्यन्तविस्तारम् आप्नुयात् यादृशान् भारतशासनं तदर्थम् आवश्यकान् प्रतीयात्।

(२) सङ्घस्य कार्यपालिका शक्तिः सञ्चारसाधनानां निर्माणे, धारणे च राज्याय निदेशानां प्रदानपर्यन्तं विस्तारम् आप्नुयात् येषां सञ्चारसाधनानां राष्ट्रियं, सैनिकं वा गौरवं तस्मिन् निदेशे घोषितं भवेत्-

परन्तु एतत् खण्डगतं किमपि राजपथान्, जलपथान् वा राष्ट्रियराजपथरूपेण, राष्ट्रियजलपथरूपेण वा घोषणे सङ्घस्य शक्तेः, एवं घोषितान् राजपथान् जलपथान् वा उद्दिश्य सङ्घस्य शक्तेः वा नौसेना-स्थलसेना-वायुसेना-सङ्कर्माणि उद्दिश्य स्वकृत्यानां भागरूपेण सञ्चारसाधनानां निर्माणे, धारणे च सङ्घस्य शक्तेः वा निर्बन्धकम् अस्ति इति न मन्येत।

(३) सङ्घस्य कार्यपालिका शक्तिः राज्याभ्यन्तरस्थानां लोहमार्गाणां रक्षार्थं ग्रहीतव्यानाम् उपायानां सम्बन्धे राज्याय निदेशानां प्रदानपर्यन्तं विस्तारम् आप्नुयात्।

(४) यत्र (२) खण्डाधीनं सञ्चारसाधनानां निर्माणे धारणे वा, (३) खण्डाधीनं वा कस्यापि लोहमार्गस्य रक्षणाय उपायानाम् अवलम्बने राज्याय प्रदत्तस्य कस्यापि निदेशस्य पालनेन ये व्ययाः, यदि एतादृशः निदेशः न प्रदत्तः अभविष्यत् तर्हि तद्राज्यस्य नित्यप्राप्तकर्तव्यानाम् अनुष्ठाने अभविष्यन् तेभ्यः अधिकतरः परिव्ययाः कृताः सन्ति, तत्र यादृशः समयेन निश्चितः स्यात् तादृशः राशिः भारतशासनेन तस्मै राज्याय सन्दत्तः भवेत्, अथवा समयाभावे, राज्येन एवं कृतानाम् अधिकतराणां परिव्ययानां सम्बन्धे भारतस्य मुख्यन्यायमूर्तिना नियुक्तेन मध्यस्थेन यादृशः राशिः अवधारितः भवेत्।

(भागः ११- सङ्घस्य राज्यानां च परस्परं सम्बन्धाः)

[1]**[२५७क.** *[सङ्घस्य सशस्त्रबलानाम् अन्यबलानां वा अभिनियोजनेन राज्येभ्यः साहाय्यम्] संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३३ अनुभागेन निरसितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)]*

२५८.अवस्थाविशेषेषु राज्येभ्यः शक्त्यादीनां प्रदाने सङ्घस्य शक्तिः-(१) एतस्मिन् संविधाने किमपि सत्यपि राष्ट्रपतिः यत् पर्यन्तं सङ्घस्य कार्यपालिकाः शक्तिः विस्तारम् आप्नोति तानि, कस्यापि विषयस्य सम्बन्धीनि कृत्यानि, राज्यशासनस्य सहमत्या तत् शासने, तत् अधिकारिषु वा सप्रतिबन्धम् अप्रतिबन्धं वा न्यस्तुं क्षमते।

(२) यः सर्वं किमपि राज्यं विषयीकरोति सः संसदा प्रणीतः विधिः, राज्यविधानमण्डलं यस्मिन् विषये विधीनां प्रणयने शक्तिं न भजते तेन विषयेण एषः सम्बध्यते इति अविगणय्य, तस्मै राज्याय तदीयेभ्यः अधिकारिभ्यः,प्राधिकारिभ्यश्च शक्तीः प्रदातुं तेषु कर्तव्यानि च आरोपयितुं शक्तीनां प्रदाने, कर्तव्यानां च आरोपणे तान् प्राधिकारयितुं वा क्षमते।

(३) यत्र एतस्य अनुच्छेदस्य आश्रयेण राज्याय, अधिकारिभ्यः, प्राधिकारिभ्यः वा शक्तयः प्रदत्ताः तेषु कर्तव्यानि वा आरोपितानि सन्ति, तत्र भारतशासनेन तस्मै राज्याय यादृशः समयेन अवधारितः भवेत् तादृशः राशिः सन्दत्तः भवेत्; अथवा समयाभावे तासां शक्तीनां, कर्तव्यानां च प्रयोगसम्बन्धे तेन राज्येन कृतानाम् अतिरिक्तानां प्रशासनस्य परिव्ययानां सम्बन्धे भारतस्य मुख्यन्यायमूर्तिना नियुक्तेन मध्यस्थेन यादृशः अवधारितः भवेत् तादृशः राशिः सन्दत्तः भवेत्।

[2][**२५८क. सङ्घाय कृत्यानाम् अर्पणे राज्यस्य शक्तिः-** एतस्मिन् संविधाने किमपि सत्यपि, कस्यापि राज्यस्य राज्यपालः भारतशासनस्य सहमत्या तद्राज्यस्य शासने, तस्य अधिकारिषु वा, यत् पर्यन्तं तद्राज्यस्य कार्यपालिका शक्तिः विस्तारम् आप्नोति तानि, कस्यापि विषयस्य सम्बन्धीनि कृत्यानि, सप्रतिबन्धम् अप्रतिबन्धं वा न्यस्तुं क्षमते।]

२५९. *[प्रथमानुसूच्याः (ख) भागस्थराज्यानां सशस्त्रबलानि] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च (१-११-९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) निरसितः।*

२६०. भारतात् बहिर्भूतानां राज्यक्षेत्राणां सम्बन्धे सङ्घस्य अधिकारिता- भारतशासनं भारतराज्यक्षेत्रस्य यः न भागः तस्य कस्यापि राज्यक्षेत्रस्य शासनेन समयं कृत्वा तादृशस्य राज्यक्षेत्रस्य शासने निहितानि कार्यपालकानि, विधायीनि, न्यायसम्बन्धीनि वा कृत्यानि स्वीकुर्यात्; किन्तु तादृशः कोऽपि समयः तदानीं प्रवृत्तस्य वैदेशिकाधिकारिता प्रयोगेन सम्बध्यमानस्य कस्यापि विधेः अधीनः तेन शासितश्च भवेत्।

---

1 संविधानस्य (द्विःचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ४३-अनुभागेन अन्तर्वेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य १८-अनुभागेन अन्तर्वेशितः।

(भागः ११- सङ्घस्य राज्यानां च परस्परं सम्बन्धाः

२६१. सार्वजनिक्यः क्रियाः अभिलेखाः न्यायसम्बन्धिकार्यप्रवृत्तयश्च- (१) सर्वत्र भारतराज्यक्षेत्रे, सङ्घस्य प्रत्येकं राज्यस्य च सार्वजनिकीषु क्रियासु, अभिलेखेषु, न्यायसम्बन्धिकार्यप्रवृत्तिषु च पूर्णः विश्वासः विश्रम्भश्च भवेत्।

(२) (१) खण्डे निर्दिष्टाः क्रियाः, अभिलेखाः कार्यप्रवृत्तयश्च यया रीत्या, येषां प्रतिबन्धानाम् अधीनं च सिद्धाः भवेयुः, तदीयः प्रभावश्च अवधारितः भवेत्, ते संसदा प्रणीतस्य विधिना यथा उपबन्धिताः स्युः तथा भवेयुः।

(३) भारतराज्यक्षेत्रस्य कस्मिन् अपि भागे व्यवहारन्यायालये पारिताः, प्रतिपादिताश्च निर्णयाः आदेशाः वा तद्राज्यक्षेत्राभ्यन्तरं विधेः अनुसारं निष्पादनयोग्याः भवेयुः।

जलैः सम्बध्यमानाः विवादाः

२६२. आन्ताराज्यिकानां नदीनां नदीद्रोणीनां वा जलैः सम्बन्धिनां विवादानां न्यायनिर्णयनम्- आन्ताराज्यिकायाः कस्याः अपि नद्याः नदीद्रोण्याः वा, तत्रस्थानां जलानां , वा उपयोगं, वितरणं, नियन्त्रणं वा उद्दिश्य कस्यापि विवादस्य, परिवादस्य वा न्यायनिर्णयनाय विधिना उपबन्धं कर्तुं संसद् क्षमते।

(२) एतस्मिन् संविधाने किमपि सत्यपि, संसद् उपबन्धयितुं क्षमते यत् न, उच्चतमन्यायालयः न वा अन्यः न्यायालयः, यादृशः (१) खण्डे निर्दिष्टः अस्ति तादृशं कमपि विवादं, परिवादं वा उद्दिश्य, अधिकारितां प्रयुञ्जीत।

राज्यानां परस्परं समन्वयः

२६३. आन्ताराज्यिकपरिषदम् उद्दिश्य उपबन्धाः- यदि कस्मिन् अपि काले राष्ट्रपतेः प्रतीतिः भवति यद् एतादृश्याः परिषदः स्थापनया लोकहितानि सिद्धानि भवेयुः यस्याम्-

(क) राज्यानां परस्परं ये विवादाः उत्पन्नाः भवेयुः तेषु विवादेषु परिप्रश्नः, मन्त्रणा च;

(ख) येषु विषयेषु कतिपयानि सर्वाणि वा राज्यानि अथवा सङ्घः एकं राज्यं च, अधिकानि वा राज्यानि च समानं हितं भजन्ते तेषु विषयेषु अन्वेषणं, विचारविमर्शश्च;

(ग) कस्मिन् अपि एतादृशे विषये पुरः प्रशंसनानि, विशेषतः तद्विषयम् उद्दिश्य नीतेः कृतेश्च साधुतर-समन्वयार्थं पुरः प्रशंसनानि, इत्येतस्य कर्तव्यस्य भारः न्यस्तः भवेत्, तर्हि राष्ट्रपतिना आदेशेन तादृश्याः परिषदः स्थापना, तथा तया अनुष्ठेयानां कर्तव्यानां स्वरूपस्य च तस्याः सङ्घटनस्य च प्रक्रियायाः परिणिश्चयनं विधिसङ्गतं भवेत्।

भागः १२

वित्तम्, सम्पत्तिः, संविदः वादाश्च

अध्यायः १- वित्तम्

साधारणम्

[1][**२६४. निर्वचनम्-** अस्मिन् भागे "वित्तायोगः" इत्यनेन संविधानस्य २८०-तमानुच्छेदस्य अधीनं घटितः वित्तायोगः अभिप्रेतः अस्ति।]

२६५. विधिप्राधिकारम् अन्तरेण कराणाम् अनधिरोपणीयत्वम्- विधेः प्राधिकारेण एव कोऽपि करः अध्यारोपितः सङ्गृहीतः वा भवेत्, नान्यथा।

२६६. भारतस्य राज्यानां च सञ्चितनिधयः लोकलेखाश्च- (१) २६७-तमानुच्छेदस्य उपबन्धानां, केषांचित् कराणां शुल्कानां, शुद्धागमानां राज्येभ्यः पूर्णतः अंशतः वा अर्पणविषयकाणाम् अस्य अध्यायस्य उपबन्धानां च अधीनं, भारतशासनेन प्राप्तैः सर्वैः राजस्वैः, तेन शासनेन राजकोषहुण्डिकानाम्, ऋणानाम्, अर्थोपायाग्रिमधनानां च प्रचालनेन गृहीतैः उद्धारैः तथा उद्धाराणां प्रति सन्दाने तेन शासनेन प्राप्तैः सर्वैः धनैः "भारतसञ्चितनिधिः" इत्याख्यः एकः सञ्चितः निधिः निष्पन्नः भवेत्।

(२) भारतशासनेन, राज्यशासनेन वा, तयोः प्रतिनिधित्वेन वा प्राप्तानि अन्यानि सर्वाणि लोकधनानि यथायथं भारतस्य, तद्राज्यस्य वा लोकलेखायाम् आकलितानि भवेयुः।

(३) भारतस्य कस्यापि राज्यस्य वा सञ्चितनिधेः कानि अपि धनानि, विधेः अनुसारम्, अस्मिन् संविधाने उपबन्धितेभ्यः प्रयोजनेभ्यः उपबन्धितया रीत्या एव च विनियुक्तानि भवेयुः, नान्यथा।

२६७. आकस्मिकतानिधिः- (१) संसद् विधिना अग्रदायस्वरूपेण "भारतीयाकस्मिकता निधिः" इति आख्यम् आकस्मिकतानिधिं स्थापयितुं क्षमते, यस्मिन् तद्विधिना अवधारिताः राशयः काले काले निहिताः भवेयुः, तथोक्तः निधिश्च, ११५-तमानुच्छेदस्य, ११६-तमानुच्छेदस्य वा अधीनं संसदा विधिना अतर्कितव्ययस्य प्राधिकरणस्य लम्बनावस्थायां, तस्मात् निधेः तादृशव्ययस्य पूर्तिनिमित्तम् अग्रिमधनं दातुं राष्ट्रपतये सामर्थ्यं प्रदातुं राष्ट्रपतेः वशे स्थाप्येत।

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च २६४ तमानुच्छेदात् प्रति एषः अनुच्छेदः संनिवेशितः।

(२) कस्यापि राज्यस्य विधानमण्डलं विधिना अग्रेदाय स्वरूपेण "तद्राज्यस्य आकस्मिकतानिधिः" इत्याख्यम् आकस्मिकतानिधिं स्थापयितुं क्षमते यस्मिन् तद्विधिना अवधारिताः राशयः काले काले निहिताः भवेयुः, तथोक्तः निधिश्च २०५-तमानुच्छेदस्य २०६-तमानुच्छेदस्य वा अधीनं तद्राज्यविधानमण्डलेन विधिना अतर्कितव्ययस्य प्राधिकरणस्य लम्बनावस्थायां तस्मात् निधेः तादृशव्ययस्य पूर्तिनिमित्तम् अग्रिमधनं दातुं तद्राज्यस्य राज्यपालाय [1]* * * सामर्थ्यं प्रदातुं राज्यपालस्य वशे स्थाप्येत।

सङ्घस्य राज्यानां च मध्ये राजस्वानां विभाजनम्

२६८. सङ्घेन उद्गृहीताः राज्यैः सङ्गृहीताः विनियोजिताश्च शुल्काः- तादृशाः मुद्राङ्कशुल्काः [2]*** यादृशाः सङ्घसूच्यां वर्णिताः सन्ति, भारतशासनेन उद्गृहीताः भवेयुः। किन्तु-

(क) यस्याम् अवस्थायां तादृशाः शुल्काः [3][सङ्घराज्यक्षेत्रस्य] अभ्यन्तरे उद्ग्रहणीयाः स्युः, तस्यां भारतशासनेन;

(ख) अन्यासु अवस्थासु यस्य यस्याभ्यन्तरे तादृशाः शुल्काः उद्ग्रहणीयाः स्युः तेन तेन राज्येन च सङ्गृहीताः भवेयुः।

(२) कस्मिन् अपि वित्तीये वर्षे कस्यचिद् अपि राज्यस्य अभ्यन्तरे उद्ग्राह्यस्य कस्यापि तादृशस्य शुल्कस्य आगमाः भारतसञ्चितनिधेः भागाः न भवेयुः किन्तु तस्मै राज्याय अर्पिता भवेयुः।

[4]**२६८क.** *[भारतशासनेन उद्गृहीतः तथा च केन्द्रेण राज्येन च संगृहीतः सेवाकरः]*- संविधानस्य (*एकाधिक-एकशततमं संशोधनम्*) अधिनियमः, २०१६, ७-अनुभागेन (१६-९-२०१६ *दिनाङ्कात् प्रवर्तमानप्रभावेण*) लोपितः।

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "तथा राजप्रमुखः" इति शब्दौ लोपितौ (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६, इत्यस्य ६-अनुभागेन " तथा औषधीषु प्रसाधननिर्मितिषु च इति उत्पादशुल्काः" इति इमे शब्दाः लोपिताः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "प्रथमानुसूच्याः भागः ग इत्यत्र विनिर्दिष्टानि राज्यानि" इति स्थाने प्रतिष्ठापितः (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 संविधानस्य (अष्टाशीतितमं संशोधनम्) अधिनियमः, २००३ इत्यस्य २-अनुभागेन (दिनाङ्कं नाधिसूचितम्) अन्तर्वेशितः।

(भागः १२- वित्तम्, सम्पत्तिः, संविदः वादाश्च)

२६९. सङ्घेन उद्गृहीताः तथा सङ्गृहीताः किन्तु राज्यान् समर्पिताः कराः- [1][[2][(१) २६९क-अनुच्छेदेन उपबन्धितं वर्जयित्वा] भाण्डानां क्रये तथा विक्रये कराः तथा भाण्डानां परेषणे कराः, भारतशासनेन उद्गृहीताः तथा सङ्गृहीताः स्युः किन्तु खण्डः (२) इत्यत्र उपबन्धितया रीत्या राज्यान् १९९६-इति वर्षस्य अप्रैलमासस्य १-दिनात् अथवा तदनन्तरं समर्पयेयुः अथवा समर्पिताः सञ्जाताः इति मन्येत।

स्पष्टीकरणम्- अस्य खण्डस्य प्रयोजनार्थम्-

(क) "भाण्डानां क्रये अथवा विक्रये कराः" पदात् समाचारपत्रेभ्यः इतरेषां भाण्डानां क्रये विक्रये वा तस्यां दशायां कराः अभिप्रेताः भवन्ति यस्मिन् एतादृशी क्रयं विक्रयं वा आन्ताराज्यिकव्यापारवाणिज्यव्यवहाराभ्यन्तरे भवति;

(ख) "भाण्डानां परेषणे कराः" पदात् भाण्डानां परेषणे (यदि परेषणं क्रियमाणं जनम् अथवा कमपि अन्यव्यक्तिं कृतं) तस्यां दशायां कराः अभेप्रेताः सन्ति यस्मिन् एतादृशी क्रयं विक्रयं वा आन्ताराज्यिकव्यापारवाणिज्यव्यवहाराभ्यन्तरे भवति।

(२) कस्मिन् अपि वित्तीयवर्षे कस्यापि एतादृशस्य करस्य शुद्धागमः यावत् ते सङ्घराज्यक्षेत्रस्य प्राप्ताः आगमाः मन्येरन् तावत् वर्जयित्वा भारतस्य संचितनिधेः भागः न भवेयुः किन्तु तान् राज्यान् अर्पयेयुः, एषु राज्येषु यदन्तर्गते ते कराः तस्मिन् वर्षे उद्गृहीताः सन्ति तथा वितरणस्य एतादृशां सिद्धान्तानाम् अनुसारं भवेत्, यः संसदा विधिना अवधारयेत्, तेषां राज्याणां मध्ये विभजेयुः।]

[3][(३) आन्ताराज्यिकव्यापारवाणिज्यव्यवहाराभ्यन्तरे [4][भाण्डानां क्रयः, विक्रयः, परेषणं वा] कदा भवति एतद् अवधारणाय संसद् विधिना सिद्धान्तविरचनां कर्तुं क्षमते।]

[5]**[२६९क. (१) आन्ताराज्यिकव्यापारवाणिज्यव्यवहाराभ्यन्तरे आपूर्ति-विषयकः** भाण्ड-तथा-सेवा-करः भारतशासनेन उद्गृहीतः संगृहीतश्च भवेत्, तथा च तादृशः करः भाण्ड-तथा-सेवा-कर-परिषदा पुरःप्रशंसिते सति, संसदा विधिना उपबन्धितया रीत्या सङ्घ-राज्ययोः मध्ये विभाजितः भवेत्।

---

1 संविधानस्य (अशीतितमं संशोधनम्) अधिनियमः, २००० वर्षस्य २-अनुभागेन (९-६-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) खण्डः (१) तथा (२) इत्यनयोः स्थाने संनिवेशितः।

2 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य ८-अनुभागेन एषः खण्डः अन्तर्वेशितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (षष्ठसंशोधनम्) अधिनियमः, १९५६ इत्यस्य ३-अनुभागेन अन्तर्वेशितः (११-९-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 संविधानस्य (षट्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९८२ इत्यस्य २-अनुभागेन "वस्तूनां क्रयं विक्रयं वा" इति स्थाने प्रतिष्ठापितः (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

5 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य ९-अनुभागेन अन्तर्वेशितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(भागः १२- वित्तम्, सम्पत्तिः, संविदः वादाश्च)

स्पष्टीकरणम्- अस्य खण्डस्य प्रयोजनस्य कृते, भारतराज्यक्षेत्रे आयातस्य अनुक्रमेण भाण्डापूर्तिः सेवापूर्तिः वा उभयापूर्तिः वा, आन्ताराज्यिकव्यापारवाणिज्यव्यवहाराभ्यन्तरे भाण्डापूर्तिः सेवापूर्तिः वा उभयापूर्तिः वा इति मानितो भवेत्।

(२) १-खण्डस्य अधीनं राज्येभ्यः प्रभाजितं धनं, भारतस्य सञ्चितनिधेः भागो न भवेत्।

(३) १-खण्डस्य अधीनं यः उद्गृहीतः आगमः, यदा २४६क- अनुच्छेदस्य अधीनं राज्येन उद्गृहीतकरस्य सन्देयाय उपयुज्यते, तदा सः आगमः भारतस्य सञ्चितनिधेः भागः न भवेत्।

(४) २४६क- अनुच्छेदस्य अधीनं यादृशः राज्येन उद्गृहीतकरस्य आगमः, १-खण्डस्य अधीनम् उद्गृहीतकरस्य सन्देयाय उपयुज्यते, तादृशः आगमः भारतस्य सञ्चितनिधेः भागः न भवेत्।

(५) आन्ताराज्यिकव्यापारवाणिज्यव्यवहाराभ्यन्तरे आपूर्तेः स्थानस्य, भाण्ड-आपूर्तेः सेवा-आपूर्तेः वा उभयोः वा कालस्य च अवधारणाय सिद्धान्तविरचनां संसद् विधिना कर्तुं क्षमते।]

[1][**२७०. उद्गृहीताः कराः तथा तेषां सङ्घस्य तथा राज्यानां मध्ये वितरणं**- (१) क्रमशः [2][अनुच्छेदः २६८, २६९ तथा २६९क] इत्यत्र निर्दिष्टानां शुल्केभ्यः तथा करेभ्यः व्यतिरिक्तं सङ्घसूच्यां सर्वे कराः तथा शुल्काः अनुच्छेदः२७१ इत्यत्र निर्दिष्टेषु करेषु तथा शुल्केषु अधिभारः तथा संसदा विनिर्मिता कस्यापि विधेः अधीनं विनिर्दिष्टं प्रयोजनार्थम् उद्गृहीतं कोऽपि उपकरः भारतशासनेन उद्गृहीताः भवेयुः तथा खण्डः (२) इत्यत्र उपबन्धितया रीत्या सङ्घस्य राज्याणां मध्ये वितरेयुः।

[3][(१क) २४६क- अनुच्छेदस्य १-खण्डस्य अधीनं सङ्घेन संगृहीतकरस्य अपि, २-खण्डे उपबन्धितया रीत्या सङ्घस्य राज्यानां च मध्ये विभाजितः भवेत्।

(१ख) २४६क- अनुच्छेदस्य २-खण्डस्य अधीनं तथा २६९क-अनुच्छेदस्य अधीनं यादृशः सङ्घेन उद्गृहीतः संगृहीतश्च करः, तादृशस्य २४६क- अनुच्छेदस्य १-खण्डस्य अधीनं सङ्घेन उद्गृहीतकरस्य सन्देयाय उपयुक्तः, तथा च २६९क- अनुच्छेदस्य १-खण्डस्य अधीनं सङ्घाय प्रदत्तः आगमः अपि, २-खण्डे उपबन्धितया रीत्या सङ्घस्य राज्यानां च मध्ये विभाजितः भवेत्।]

---

1 संविधानस्य (अशीतितमं संशोधनम्) अधिनियमः, २००० वर्षस्य ३-अनुभागेन (१-४-१९९६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुच्छेदः २७० इत्यस्य स्थाने संनिवेशितः।

2 संविधानस्य (अष्टाशीतितमं संशोधनम्) अधिनियमः, २००३ वर्षस्य ३-अनुभागेन "अनुच्छेदः २६८ तथा २६९" (दिनाङ्कं नाधिसूचितम्) इत्यनयोः स्थाने संनिवेशितः तथा तदनन्तरं संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ वर्षस्य १०-अनुभागेन (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुच्छेदः २६८, २६८क तथा २६९ इत्येषां स्थाने संनिवेशितः।

3 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य १०-अनुभागेन अन्तर्वेशितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(२) कस्मिन् अपि वित्तीयवर्षे केषाम् अपि करानाम् अथवा शुल्कानां शुद्धागमानाम् एतादृशं प्रतिशतं यद्विहितं भवेत्, भारतस्य संचितनिधेः भागः न भवेत्, किन्तु तानि राज्यानि समर्पयेयुः यदन्तर्गते ते कराः शुल्काः वा तस्मिन् वर्षे उद्ग्रहणीयाः सन्ति तथा एतादृश्या रीत्या एतादृशा समयेन, यः खण्डः (३) इत्यत्र उपबन्धितया रीत्या विहिताः भवेयुः, तेषां राज्याणां मध्ये विभजेयुः।

(३) अस्मिन् अनुच्छेदे "विहितः" इत्युक्ते-

(i) यावत् वित्तायोगस्य घटनं न भवति तावत् राष्ट्रपतिना आदेशेन विहितः; तथा

(ii) वित्तायोगस्य घटनानन्तरं पुरःप्रशंसासु विचारानन्तरं राष्ट्रपतिना आदेशेन विहितः।]

२७१. सङ्घस्य प्रयोजनार्थं केषुचित् शुल्केषु करेषु च अधिभारः- २६९-तमानुच्छेदे २७०-तमानुच्छेदे च किमपि सत्यपि, संसत् [1][२४६क-अनुच्छेस्य अधीनं भाण्ड-तथा-सेवा-करं वर्जयित्वा] तथा अनुच्छेदयोः निर्दिष्टेषु शुल्केषु, करेषु वा अन्यतमं, कस्मिन् अपि काले सङ्घस्य प्रयोजनानाम् अर्थे अधिभारेण वर्धयितुं क्षमते; तादृशस्य कस्यापि अधिभारस्य च समस्ताः आगमाः भारतसञ्चितनिधेः भागाः भवेयुः।

२७२. *सङ्घेन उद्गृहीताः सङ्गृहीताश्च कराः ये सङ्घस्य राज्यानां च मध्ये विभाजनीयाः सन्ति- संविधानस्य (अशीतितमं संशोधनम्) अधिनियमः, २००० इत्यस्य (४) अनुभागेन (९-६-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितः।*

२७३. पट्टशणे, पट्टशणनिर्मितेषु वस्तुषु वा निर्यातशुल्कस्य स्थाने अनुदानानि- (१) पट्टशणे पट्टशणनिर्मितेषु वस्तुषु वा निर्यातशुल्कस्य प्रतिवार्षिकशुद्धागमानां कस्यचिद् भागस्य असम-[2][ओडिशा]-पश्चिमबङ्गाल-बिहारराज्येभ्यः अर्पणस्य स्थाने, तेषां राज्यानां राजस्वे सहायकानुदानरूपेण प्रतिवर्षं भारतसञ्चितनिधौ तादृशाः राशयः भारिताः भवेयुः यादृशाः विहिताः स्युः।

(२) पट्टशणे पट्टशणनिर्मितेषु वस्तुषु वा यावत् भारतशासनं कस्यापि निर्यातशुल्कस्य उद्ग्रहणम् अनुवर्तयति तावत्, एतत्संविधानस्य प्रारम्भात् दशवर्षसमाप्तिः भवति तावत् वा, एतयोः यदपि प्राक्तरं भवति, एवं विहिताः राशयः भारतसञ्चितनिधौ भारितत्वेन अनुवर्तेरन्।

---

1 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य ११-अनुभागेन अन्तर्वेशितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 उडीसा (नामपरिवर्तनम्) अधिनियमः, २०११ (२०११ वर्षस्य १५) इत्यस्य ५-अनुभागेन "उडीसा" इति स्थाने प्रतिष्ठापितः (१-११-२०११ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(३) अस्मिन् अनुच्छेदे "विहित" शब्दस्य स एव अर्थः यः अस्य संविधानस्य २७०-तमानुच्छेदे विद्यते।

२७४. राज्यानां हितैः सम्बध्दं कराधिरोपणं प्रभावयतां विधेयकानां कृते राष्ट्रपतेः पुरः प्रशंसनस्य आवश्यकता- (१) किमपि विधेयकं, संशोधनं वा यद् राज्यानां हितेन सम्बद्धं कमपि करं, शुल्कं वा अधिरोपयति, परिवर्तयति अथवा यत् भारतीयेन आयकरेण सम्बद्धानाम् अधिनियमानां प्रयोजनार्थं परिभाषितस्य 'कृष्यायः' इति शब्दस्य अर्थं परिवर्तयति, अथवा यत् तान् सिद्धान्तान् प्रभावयति यदनुसारेण एतस्य अध्यायस्य पूर्ववर्तिषु उपबन्धितेषु अन्यतमस्य अधीनत्वेन राज्येभ्यः धनानि विभाजनीयानि भवन्ति, भवितुं क्षमन्ते वा, अथवा यत् सङ्घस्य प्रयोजनानाम् अर्थे कमपि तादृशम् अधिभारम् अधिरोपयति यादृशः एतस्य अध्यायस्य पूर्ववर्तिषु उपबन्धेषु वर्णितः विद्यते, राष्ट्रपतेः पुरःप्रशंसनेन एव संसदः कतरस्मिन् अपि सदने पुरः स्थापितं, प्रस्तावितं वा भवेत्, नान्यथा।

(२) अस्मिन् अनुच्छेदे "राज्यानां हितेन सम्बद्धः करः शुल्कः वा" इति शब्दसमूहेन अभिप्रेतम् अस्ति-

(क) कश्चिद् अपि करः, शुल्कः वा यस्य शुद्धागमाः पूर्णतः अंशतः वा कस्मैचिद् अपि राज्याय अर्प्यन्ते, अथवा

(ख) कोऽपि करः शुल्कः वा यस्य शुद्धागमानां निर्देशेन भारतसञ्चितनिधेः तदानीं कस्यचिद् अपि राज्याय राशयः सन्देयाः भवन्ति।

२७५. केभ्यश्चिद् राज्येभ्यः सङ्घाद् अनुदानम्- (१) यादृशान् संसद् विधिना उपबन्धयेत् तादृशाः राशयः तादृशानां राज्यानां राजस्वानां सहायकानुदानरूपेण प्रतिवर्षं भारतसञ्चितनिधौ भारिताः भवेयुः यादृशानां विषये संसद् अवधारयेत् यत् तेषां कृते साहाय्यस्य आवश्यकता विद्यते तथा च विभिन्नराज्येभ्यः विभिन्नाः राशयः नियताः क्रियेरन्-

परन्तु कस्यापि राज्यस्य राजस्वानां सहायकानुदानरूपेण भारतसञ्चितनिधेः तादृशाः मूलराशयः आवर्तकराशयश्च सन्दीयेरन् यादृशाः तद्राज्यं तादृशीनां विकासयोजनानां परिव्ययस्य उद्वहनाय समर्थं विधातुम् आवश्यकाः भवेयुः यादृश्यः (विकासयोजनाः) तद्राज्यान्तर्गतानाम् अनुसूचितानां [जनजातीनां कल्याणस्य संवर्धनार्थं, तद्राज्यान्तर्गतानाम्] अनुसूचितक्षेत्राणां, प्रशासनस्तरस्य, तद्राज्यस्य शेषक्षेत्राणां प्रशासनस्तरं यावत्, समुन्नयनार्थं वा तेन राज्येन भारतशासनस्य अनुमोदनेन अङ्गीकृताः भवेयुः।

अपरं च, असमराज्यस्य राजस्वानां सहायकानुदानरूपेण भारतसञ्चितनिधेः ते मूलराशयः, आवर्तकराशयश्च सन्दीयेरन्-

(क) ये षष्ठानुसूच्याः २०-प्रच्छेदेन संलग्नसारिण्याः [1][प्रथम भागे] विनिर्दिष्टानां जनजातिक्षेत्राणां प्रशासने एतस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वं वर्षद्वयस्य राजस्वेभ्यः मध्यममानात् अधिकव्ययेन समाः भवेयुः; तथा च

(ख) ये तादृशीनां विकासयोजनानां परिव्ययैः समाः भवेयुः यादृश्यः तेन राज्येन भारतशासनस्य अनुमोदनेन उक्तक्षेत्राणां प्रशासनस्तरस्य, तद्राज्यस्य शेषक्षेत्राणां प्रशासनस्तरं यावत्, समुन्नयनार्थम् अङ्गीकृता भवेयुः।

[2][(१क) २४४क-तमनुच्छेदाधीनं स्वशासिराज्यस्य निर्माणकालादेव- (प्रथमः) (१) खण्डस्य द्वितीयपारन्तुकस्य (क) खण्डस्य अधीनं सन्देयाः केचिद् अपि राशयः तदैव स्वशासिराज्याय सन्दत्ता भवेयुः यदि स्वशासिराज्यं तस्मिन् खण्डे निर्दिष्टानि सर्वाणि जनजातिक्षेत्राणि अन्तर्भावयति; तथा च यदि स्वशासिराज्यं तेषां जनजातिक्षेत्राणां केवलं कानिचिद् एव अन्तर्भावयति तर्हि, एते राशयः असमराज्यस्य स्वशासिराज्यस्य च मध्ये एवं प्रभाजिताः भवेयुः यथा राष्ट्रपतिः आदेशेन विनिर्दिशेत;

(द्वितीयः) स्वशासिराज्यस्य राजस्वसहायतानुदानरूपेण तादृशाः मूलराशयः, आवर्तराशयश्च सन्दत्ताः भवेयुः यादृशाः तादृशीनां योजनानां परिव्ययैः समाः स्युः यादृश्यः स्वशासिराज्यस्य प्रशासनस्तरस्य, असमराज्यस्य शेषक्षेत्राणां प्रशासनस्तरं यावत्, समुन्नयनार्थं स्वशासिराज्येन भारतशासनस्य अनुमोदनेन अङ्गीकृताः स्युः।]

(२) यावत् (१) खण्डस्य अनुरोधेन संसदा उपबन्धः न क्रियते तावत् तत्खण्डानुरोधेन संसदे प्रदत्ताः शक्तयः राष्ट्रपतिना आदेशेन प्रयोक्तव्याः भवेयुः; तथा च एतत् खण्डाधीनं राष्ट्रपतिना दत्तः कोऽपि आदेशः संसदा एवं कृतस्य कस्यापि उपबन्धस्य अधीनत्वेन प्रभावी भवेत्-

परन्तु वित्तायोगस्य घटनात् परं वित्तायोगस्य पुरःप्रशंसनेषु विचारं कृत्वा एव एतत् खण्डाधीनं कोऽपि आदेशः राष्ट्रपतिना दीयेत, नान्यथा।

२७६. वृत्तिषु, व्यापारेषु, आजीविकासु, नियोजनासु च कराः- (१) २४६-तमानुच्छेदे किमपि सत्यपि राज्यस्य, तत्रत्यायाः नगरपालिकायाः, मण्डलमण्डल्याः स्थानीय मण्डल्याः तत्रत्यस्य अन्यस्य स्थानीयप्राधिकरणस्य वा हितसाधनार्थं वृत्तीनां, व्यापाराणाम्, आजीविकानां, नियोजनानां वा सम्बन्धिभिः करैः सम्बद्धः कस्यापि राज्यस्य विधानमण्डलस्य कोऽपि विधिः एतद् आधारेण अमान्यः न भवेत् यत् सः आयकरेण सम्बद्धः अस्ति इति।

---

1 पूर्वोत्तरक्षेत्र(पुनर्गठन)अधिनियमः. १९७१ (१९७१ वर्षस्य ८१) इत्यस्य ७१-अनुभागेन "भागः क" इति स्थाने प्रतिष्ठापितः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (द्वाविंशतितमं संशोधनम्) अधिनियमः, १९६९ इत्यस्य ३-अनुभागेन अन्तर्वेशितः (२५-९-१९६९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(२) राज्याय अथवा तत्रत्यायै कस्यैचित् नगरपालिकायै, मण्डलमण्डल्यै, स्थानीयमण्डल्यै अन्यस्मै स्थानीयप्राधिकरणाय वा कस्यापि एकस्य जनस्य विषये वृत्तिषु, व्यापारेषु, आजीविकासु, नियोजनासु च कररूपेण सन्देयः समस्तः राशिः प्रतिवर्षं [1][२,५००] रूप्यकेभ्यः अधिकः न भवेत्-

[2]* * * *

(३) वृत्तिषु, व्यापारेषु, आजीविकासु, नियोजनासु च कराणां विषये यथोक्तप्रकारेण विधीनां निर्माणार्थं राज्यविधानमण्डलस्य शक्तेः न एवम् अर्थः ग्राह्यः यद् वृत्तिभ्यः, व्यापारेभ्यः, आजीविकाभ्यः, नियोजनेभ्यश्च प्रोद्भूते उत्पन्ने वा आये कराणां विषये विधीनां प्रणयने संसदः शक्तिः केनापि प्रकारेण सीमिता इति।

२७७. व्यावृत्तयः- ये कराः, शुल्काः, उपकराः, प्रशुल्काः वा संविधानस्य प्रारम्भात् अव्यवहितपूर्वं कस्यचिद् अपि राज्यस्य शासनेन कयाचित् नगरपालिकया वा केनापि प्राधिकारिणा, निकायेन वा तस्य राज्यस्य नगरपालिकायाः, मण्डलस्य अन्यस्य स्थानीयक्षेत्रस्य वा प्रयोजनार्थं यथाविधि उद्ग्राह्यमाणाः आसन् ते कराः शुल्काः, उपकराः, प्रशुल्काः वा, तेषां सङ्घसूच्यां निर्देशे सत्यपि तावत् उद्ग्राह्यत्वेन तेभ्यः एव प्रयोजनेभ्यः उपयोज्यत्वेन च अनुवर्तितुम् अर्हन्ति, यावत् संसत् तत् प्रतिकूलं विधिना न उपबन्धयति।

२७८. *[एकेषां वित्तीयविषयाणां सम्बन्धे प्रथमसूच्या (ख) भागस्य राज्यैः सहः समयः] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) निरसितः।*

२७९. शुद्धागमानां गणनादिः- (१) अस्य अध्यायस्य पूर्वगामिषु उपबन्धेषु “शुद्धागमाः” इति शब्दस्य, कस्यापि करस्य, शुल्कस्य वा सम्बन्धे तत्सङ्ग्रहपरिव्ययानां व्यवकलनानन्तरम् अवशिष्टाः तदीयाः आगमाः इत्यर्थः भवति; तथा च तेषाम् उपबन्धानां प्रयोजनार्थं कस्मिन् अपि क्षेत्रे प्राप्तस्य, तस्मात् प्राप्यस्य वा कस्यापि करस्य शुल्कस्य वा तदीयस्य कस्यापि भागस्य वा शुद्धाः आगमाः, भारतस्य नियन्त्रकमहालेखा परीक्षकेण अभिनिश्चिताः प्रमाणिताश्च भवेयुः; तस्य प्रमाणपत्रं च अन्तिमं भवेत्।

(२) कस्यामपि अवस्थायां, यस्याम् एतद्भागाधीनं कस्यापि शुल्कस्य, करस्य वा आगमाः कस्मैचित् अपि राज्याय अर्पिताः भवन्ति, भवेयुः वा उपर्युक्तस्य उपबन्धस्य तथा अस्य अध्यायस्य कस्यापि अन्यस्य स्पष्टोपबन्धस्य अधीनत्वे, संसदा निर्मितः कोऽपि विधिः, राष्ट्रपतेः कोऽपि आदेशः वा तस्याः रीतेश्च यया आगमानां गणना करणीया भवति, तस्य कालस्य, यतः यस्मिन् वा, तस्याः रीतेश्च यया कानि अपि सन्दानानि करणीयानि भवन्ति, एकस्य वित्तीय वर्षस्य, अपरवित्तीयवर्षस्य च परस्परं समायोजनस्य, तथा अन्येषां केषांचित् प्रासङ्गिकानां, सहायकानां च विषयाणाम् उपबन्धं कर्तुं क्षमते।

---

1 संविधानस्य (षष्टितमं संशोधनम्) अधिनियमः, १९८८ इत्यस्य २-अनुभागेन “२५०” इति स्थाने प्रतिष्ठापितः (२०-१२-१९८८ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (षष्टितमं संशोधनम्) अधिनियमः, १९८८ इत्यस्य २-अनुभागेन पारन्तुकः लोपितः (२०-१२-१९८८ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[1][**२७९क भाण्ड-तथा-सेवाकरपरिषद्**- (१) राष्ट्रपतिः, संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य प्रारम्भदिनाङ्कात् षष्टिदिनाभ्यन्तरे, भाण्ड-तथा-सेवा-कर-परिषद् इति नाम परिषदः आदेशेन घटनं कुर्यात्।]

(२) भाण्ड-तथा-सेवा-कर-परिषद् एतान् सदस्यैः निर्मिता भवेत्-

(क) सङ्घस्य वित्त-मन्त्री----- अध्यक्षः

(ख) राजस्वस्य वित्तस्य वा प्रभारी सङ्घराज्यमन्त्री---- सदस्यः

(ग) प्रत्येकराज्येन निर्दिष्टः वित्तस्य कराधानस्य वा प्रभारी अथवा अन्यः कश्चन मन्त्री-- सदस्यः

(३) २-खण्डस्य ग-धारायां निर्दिष्टाः भाण्ड-तथा-सेवा-कर-परिषदः सदस्याः यथाशीघ्रं तेभ्यः एकं सदस्यं, तावत् कालपर्यन्तं यथा ते निश्चिनुयुः, उपाध्यक्षं भवितुं चिनुयुः।

(४) भाण्ड-तथा-सेवा-कर-परिषद् सङ्घं राज्यानि च एतेषु विषयेषु पुरःप्रशंसनं कुर्यात्-

(क) सङ्घेन, राज्येन स्थानीयनिकायेन च उद्गृहीताः तादृशाः कराः उपकराः च अधिभाराः च यादृशाः भाण्ड-तथा-सेवाकरे सम्मिलितुं क्षमाः भवेयुः;

(ख) भाण्डाः तथा सेवाः ये भाण्ड-तथा-सेवा-करस्य अध्यधीनाः भवेयुः, अथवा ये भाण्ड-तथा-सेवाकरात् विमुक्ताः भवेयुः;

(ग) आदर्शाः भाण्ड-तथा-सेवाकस्य विधयः, संविधानस्य २६९क-अनुच्छेदस्य अधीनम् आन्ताराज्यिकव्यापारवाणिज्यव्यवहाराभ्यन्तरे आपूर्तौ उद्गृहीतानां भाण्ड-तथा-सेवाकराणाम् उद्ग्रहणस्य प्रभाजनस्य च सिद्धान्ताः, तथा च आपूर्तिस्थानस्य शासनसिद्धान्ताः;

(घ) आवर्तस्य तादृशी सीमा, यस्याः न्यूनाः भाण्डाः, सेवाः च भाण्ड-तथा-सेवा-करात् विमुक्ताः भवेयुः;

(ङ) भाण्ड-तथा-सेवा-करस्य पट्टैः सहिताः दराः येषु न्यूनतमदराः अन्तर्भूताः स्युः;

(च) प्राकृतिक-आपत्सु विपत्सु वा अतिरिक्तसंसाधनस्य संयोजनाय विशिष्टदरः अथवा निर्दिष्टकालस्य कृते दराः;

---

1 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य १२-अनुभागेन (१२-०९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

(छ) अरुणाचलप्रदेश-असम-जम्मूकाश्मीर-मणिपुर-मेघालय-मिजोरम-नागालैण्ड-सिक्किम-त्रिपुरा-हिमाचलप्रदेश-उत्तराखण्ड-राज्याणि उद्दिश्य विशेषः उपबन्धः;

(ज) भाण्ड-तथा-सेवा-करेण सम्बद्ध परिषदा निश्चितः कोऽपि अन्यः विषयः;

(५) भाण्ड-तथा-सेवा-कर-परिषद् अपरिष्कृतपेट्रोलियम्-शीघ्रगतिकारकडीजल्-मोटरस्पिरिट् (सामान्यतः पेट्रोलशब्देन ज्ञातं) प्राकृतिकवाति-विमान-टर्बाइन्-इन्धनम् इति एतेषु भाण्ड-तथा-सेवा-करस्य उद्ग्रहणस्य प्रयोज्यदिनाङ्कं प्रशंसेत्।

(६) अनेन अनुच्छेदेन प्रदत्तानां कृत्यानां निर्वहणे, भाण्ड-तथा-सेवा-कर-परिषद् भाण्ड-तथा-सेवा-करस्य सामंजस्यसंरचनायाः आकाङ्क्षया तथा च भाण्ड-तथा-सेवयोः विकासस्य आकाङ्क्षया प्रणेयो भवेत्।

(७) भाण्ड-तथा-सेवा-कर-परिषदः सर्वसदस्यानाम् अर्धसदस्याः गोष्ठीषु गणपूर्तिं निर्वहेयुः।

(८) भाण्ड-तथा-सेवा-कर-परिषद् स्वकृत्यानां पालनाय प्रक्रियाम् अवधारयेत्।

(९) भाण्ड-तथा-सेवा-कर-परिषदः प्रत्येकविनिश्चयः गोष्ठ्याम् उपस्थितानां तथा मतदातृणां सदस्यानां न्यूनतमं पादोन-अधिमानमतानां बहुमतेन अधोनिर्दिष्टसिद्धान्तानुसारेण स्वीकृतो भवेत्, ते (सिद्धान्ताः) यथा-

तस्यां गोष्ठ्यां-

(क) केन्द्रशासनस्य मतस्य अधिमानं निपतितमतानां त्र्यंशं भवेत्।

(ख) राज्यशासनस्य मतानां संयुक्ताधिमानं निपतितमतानां द्वितृतीयांशं भवेत्।

(१०) भाण्ड-तथा-सेवा-कर-परिषदः विधिः कार्यप्रवृत्तिः वा एतेन कारणमात्रेण शून्यः न भवेत्-

(क) परिषदः घटने काश्चन रिक्तता अथवा वैकल्यमः अथवा

(ख) परिषदः सदस्यनियुक्तौ किमपि वैकल्यम्; अथवा

(ग) परिषदः प्रक्रियायां तादृशी अनियमितता, यादृशी कार्यप्रवृत्तौ अर्हतां न बाधेत;

(११) भाण्ड-तथा-सेवा-कर-परिषद् परिषदः प्रतिशंसनेन कार्यान्वयेन वा उत्थितेषु एतेषु विवादस्थलेषु निर्णयाय कार्यपद्धतिं स्थापयेत्-

(क) केन्द्रशासनस्य राज्यस्य राज्यानां वा मिथः; अथवा

(ख) केन्द्रशासनं तथा च राज्यं राज्यानि वा एकस्मिन् पक्षे, अपि च राज्यं राज्यानि वा अपरस्मिन् पक्षे, इत्येतयोः मिथः; अथवा

(ग) द्वयोः राज्ययोः अधिकराज्येषु वा मिथः।]

२८०. वित्तायोगः- (१) अस्य संविधानस्य प्रारम्भात् वर्षद्वयाभ्यन्तरे ततः परं च प्रति पञ्चमवर्षसमाप्तौ, अथवा ततः पूर्वस्मिन् तादृशे काले यादृशं राष्ट्रपतिः आवश्यकं मन्यते एकं वित्तायोगं राष्ट्रपतिः आदेशेन घटयेत्, यश्च राष्ट्रपतिना नियुक्तेन एकेन अध्यक्षेण चतुर्भिः अन्यैः सदस्यैश्च सम्भूय भवेत्।

(२) संसद् विधिना तासाम् अर्हतानां याः आयोगस्य सदस्यत्वेन नियुक्तये अपेक्षिताः भवेयुः, तस्याः रीतेश्च यया ते (सदस्याः) संवृताः भवेयुः, अवधारणं कर्तुं क्षमते।

(३) आयोगस्य एतत् कर्तव्यं भवेत् यत् सः-

(क) सङ्घस्य राज्यानां च मध्ये करसम्बन्धिशुद्धागमानां, ये एतदध्यायाधीनं तेभ्यः विभाजनीयाः भवन्ति, भवेयुः वा, विभाजनविषये, तथा राज्यानां मध्ये एतादृशागमसम्बन्धिनाम् अंशानाम् आवण्टनविषये;

(ख) भारतस्य सञ्चितनिधितः राज्यसम्बन्धिनां राजस्वानां सहायकानुदाने पालनीयानां सिद्धन्तानां विषये; तथा च

[1][खख- राज्यस्य वित्तायोगेन कृता पुरःप्रशंसायाः आधारेण राज्ये पञ्चायतानां संसाधनानाम् अनुपूर्त्यै कस्यापि राज्यस्य सञ्चितनिधेः संवर्धनाय आवश्यकान् उपायान् विषये;]

[2][ग-राज्यस्य वित्तायोगेन कृता पुरःप्रशंसायाः आधारेण राज्ये नगरपालिकानां संसाधनानाम् अनुपूर्त्यै कस्यापि राज्यस्य सञ्चितनिधेः संवर्धनाय आवश्यकान् उपायान् विषये;]

[3][(घ)] सुदृढवित्तस्य हिते राष्ट्रपतिना आयोगं निर्दिष्टानाम् अन्यविषयाणां सम्बन्धे राष्ट्रपतिं पुरःप्रशंसयेत्।

(४) आयोगः स्वकीयप्रक्रियाम् अवधारयेत्; स्वकीयकृत्यानां च पालने तादृशीभिः शक्तिभिः युक्तः भवेत् यादृशीः संसद् विधिना तस्मै प्रदद्यात्।

---

1 संविधानस्य (त्रिसप्ततितमं संशोधनम्) अधिनियमः,१९९२ इत्यस्य ३-अनुभागेन (२४-४-१९९३ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

2 संविधानस्य (चतुःसप्ततितमं संशोधनम्) अधिनियमः,१९९२ इत्यस्य ३-अनुभागेन (०१-०६-१९९३ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

3 संविधानस्य (चतुःसप्ततितमं संशोधनम्) अधिनियमः,१९९२ इत्यस्य ३-अनुभागेन (०१-०६-१९९३ दिनाङ्कात् प्रवर्तमानप्रभावेण) उपखण्डः-(ग) इतीमं खण्डः(घ) रूपेण पुनरक्षराङ्कितः।

(भागः १२- वित्तम्, सम्पत्तिः, संविदः वादाश्च)

२८१. वित्तायोगस्य पुरः प्रशंसनानि- एतत्संविधानस्य उपबन्धानाम् अधीनं राष्ट्रपतिः, वित्तायोगेन कृतं प्रत्येकं पुरःप्रशंसनं, तद्विषये कृतायाः कार्यप्रवृत्तेः व्याख्यात्मकज्ञापनेन सहितं, संसदः प्रत्येकं सदनयोः पुरतः स्थापयेत्।

प्रकीर्णाः वित्तीयोपबन्धाः

२८२. सङ्घेन केनापि राज्येन वा स्वकीयराजस्वेभ्यः क्रियमाणः व्ययः- सङ्घः, किमपि राज्यं वा, कस्यापि लोकप्रयोजनस्य हेतोः किमपि अनुदानं दातुं क्षमते, यद्यपि तत् प्रयोजनं तादृशं न भवेत् यद्विषये, यथायथं, संसद्, तद्राज्यविधानमण्डलं वा विधिं प्रणेतुं क्षमते।

२८३. सञ्चितनिधीनाम् आकस्मिकतानिधीनां लोकलेखासु आकलितधनानां च अभिरक्षादिः- (१) भारतसञ्चितनिधेः, भारताकस्मिकतानिधेश्च अभिरक्षा, तादृशनिधिषु धनानां निधानं, ततः धनानां प्रत्याहरणं, तादृशनिधिषु आकलितधनात् अतिरिक्तानां भारतशासनेन, तस्य कृते वा प्राप्तानां लोकधनानाम् अभिरक्षा, तेषां भारतस्य लोकलेखासु सन्दानं तथा तादृशलेखाभ्यः धनानां प्रत्याहरणं तथा उपर्युक्तविषयैः संसक्तानाम् आनुषङ्गिकानां वा अन्येषां सर्वेषां विषयाणां विनियमनं संसदा प्रणीतेन विधिना भवेत्; तथा च यावद् एवम् उपबन्धः न क्रियते तावत् राष्ट्रपतिना निर्मितैः नियमैः भवेत्।

(२) राज्यसञ्चितनिधेः, राज्याकस्मिकतानिधेश्च अभिरक्षा, तादृशनिधिषु धनानां निधानं, ततः धनानां प्रत्याहरणं, तादृशनिधिषु आकलितधनात् अतिरिक्तानां, राज्यशासनेन तस्य कृते वा प्राप्तानां लोकधनानाम् अभिरक्षा, तेषां राज्यस्य लोकलेखासु सन्दानं तथा तादृशलेखाभ्यः धनानां प्रत्याहरणं तथा उपर्युक्तविषयैः संसक्तानां, तेषाम् आनुषङ्गिकानां वा अन्येषां सर्वेषां विषयाणां विनियमनं, राज्यविधानमण्डलेन प्रणीतेन विधिना भवेत्, तथा च यावद् एवम् उपबन्धः न क्रियते तावत् तद्राज्यस्य राज्यपालेन [1][* * *] निर्मितैः नियमैः भवेत्।

२८४. लोकसेवकैः न्यायालयैश्च प्राप्तानां वादिनिक्षेपाणाम् अन्यधनानां च अभिरक्षा- सर्वाणि धनानि-

(क) यथायथं भारतशासनेन राज्यशासनेन वा सङ्गृहीतानि, प्राप्तानि वा राजस्वानि लोकधनानि वा वर्जयित्वा, सङ्घस्य, कस्यापि राज्यस्य वा कार्याणां सम्बन्धे नियोजितेन केनापि अधिकारिणा आधिकारित्वरूपेण प्राप्तानि तस्मिन् निक्षिप्तानि वा; अथवा

(ख) कस्यापि वादस्य, विषयस्य, लेखायाः, जनानां वा नाम्नि भारतराज्यक्षेत्रस्यान्तः केनापि न्यायलयेन, प्राप्तानि, तस्मिन् निक्षिप्तानि वा,

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः,१९५६ इत्यस्य २९-अनुभागेन (०१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) “राजप्रमुखेन वा” इत्येतौ शब्दौ लोपितौ।

यथायथं भारतस्य लोकलेखायां तद्राज्यस्य लोकलेखायां वा सन्दत्तानि भवेयुः।

२८५. सङ्घसम्पत्तेः राज्यकरेभ्यः विमुक्तिः- (१) यावत् संसद् विधिना अन्यथा न उपबन्धयति तावत् केनापि राज्येन, राज्यान्तर्गतेन केनापि प्राधिकारिणा वा अधिरोपितेभ्यः सर्वेभ्यः करेभ्यः सङ्घस्य सम्पत्तिः विमुक्ता भवेत्।

(२) यावत् संसद् विधिना, अन्यथा न उपबन्धयति तावत् प्रथमखण्डगतं किमपि कस्यापि राज्यस्यान्तः कमपि प्राधिकारिणं कस्यामपि सङ्घसम्पत्तौ कस्यापि तस्य करस्य उद्ग्रहणात् न निवारयेत् यस्य विषये एतस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वम् एतादृशी सम्पत्तिः दायिनी आसीत्, दायिनी इति मता वा आसीत्, यावत् सः करः तस्मिन् राज्ये उद्ग्राह्यत्वेन अनुवर्तते।

२८६. भाण्डानां क्रये विक्रये वा कराधिरोपणविषये निर्बन्धनानि- (१) राज्यस्य कोऽपि विधिः [1][भाण्डानां सेवानां वा उभयोः वा आपूर्तेः, यत्र एतादृशी आपूर्तिः भवति]

(क) तस्माद् राज्याद् बहिः, अथवा

(ख) भारतराज्यक्षेत्रे [2][भाण्डानां सेवानां वा उभयोः वा आयातस्य] [भाण्डानां सेवानां वा उभयोः वा निर्यातस्य] विषये प्रवर्तते, तत्र कराधिरोपणं न कुर्यात्, न वा कराधिरोपणं प्राधिकृतं कुर्यात्।

[3][* * * *]

[4][(२) संसद् एतद् अवधारितुम् [5][(२) भाण्डानां सेवानां वा उभयोः वा आपूर्तेः] (१) खण्डे निर्दिष्टरीतीनां कया रीत्या भाण्डानां क्रयः विक्रयः वा कदा भवति इति अवधारयितुं सिद्धान्तान् विधिना प्रणेतुं संसद् क्षमते।

[6][(३) * * * *]

२८७. विद्युति करेभ्यः विमुक्तिः- यावत् संसद् विधिना अन्यथा न उपबन्धयति तावत् (शासनेन अन्यजनैः वा उत्पादितायाः) विद्युतः उपभोगे, विक्रये वा, या

---

1 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य १३(i)(क)-अनुभागेन "भाण्डानां क्रये विक्रये वा, यत्र एतादृशः क्रयः विक्रयः वा " इत्यस्य स्थाने प्रतिष्ठापितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य १३(i)(ख)-अनुभागेन "वस्तूनाम् आयातम् अथवा तस्य" इत्यस्य स्थाने प्रतिष्ठापितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (षष्ठं संशोधनम्) अधिनियमः, १९५६ इत्यस्य ४-अनुभागेन (१) खण्डस्य *स्पष्टीकरणं* लोपितम्।

4 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन (२), (३) खण्डयोः प्रति एतौ खण्डौ संनिवेशितौ।

5 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य १३(ii)-अनुभागेन "वस्तूनाम् आयातम् अथवा तस्य" इत्यस्य स्थाने प्रतिष्ठापितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

6 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६ इत्यस्य १३(iii)- अनुभागेन (खण्डः-३) लोपितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(क) भारतशासनेन उपभुज्यते, भारत शासनस्य उपभोगार्थं तस्मै शासनाय विक्रीयते वा; अथवा

(ख) कस्यापि लोहमार्गस्य निर्माणे, सन्धारणे, चालने वा भारतशासनेन, लोहमार्गचालकेन लोहमार्गसमवायेन वा उपभुज्यते, अथवा कस्यापि लोहमार्गस्य निर्माणे, सन्धारणे, चालने वा उपभोगार्थं तस्मै शासनाय, कस्मै अपि तादृशाय लोहमार्गसमवायाय वा विक्रीयते, कस्यापि राज्यस्य कोऽपि विधिः कराधिरोपणं न कुर्यात् न वा कराधिरोपणं प्राधिकृतं कुर्यात् तथा च,

विद्युतः विक्रये करम् अधिरोपयन्, कराधिरोपणं प्राधिकृतं कुर्वन् वा कोऽपि तादृशः विधिः सुनिश्चितं कुर्यात् यत् भारतशासनाय तस्यः शासनस्य उपभोगार्थम् अथवा कस्मैचित् तादृशाय लोहमार्गसमवायाय, यादृशः पूर्वम् उक्तः, कस्यापि लोहमार्गस्य निर्माणे, सन्धारणे, चालने वा उपभोगार्थं विक्रीतायाः विद्युतः मूल्यं विद्युतः प्रचुरमात्रायाः अन्येभ्यः उपभोक्तृभ्यः गृहीतात् मूल्यात् करस्य राशितः न्यूनीभवेत्।

२८८. जलस्य विद्युतः वा विषये राज्येन ग्राह्येभ्यः करेभ्यः कासुचिद् अवस्थासु विमुक्तिः- (१) यावद् राष्ट्रपतिः आदेशेन अन्यथा न उपबन्धयति तावत्, एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं कस्यापि राज्यस्य कोऽपि प्रवृत्तः विधिः, कस्यापि आन्ताराज्यिक्याः नद्याः नदीद्रोण्याः वा विनियमनार्थं विकासार्थं वा केनापि विद्यमानेन विधिना, संसदा निर्मितेन वा केनापि विधिना स्थापितेन केनापि प्राधिकारिणा सञ्चितस्य, जनितस्य, उपभुक्तस्य, विभाजितस्य, विक्रीतस्य वा जलस्य विद्युतः वा विषये कमपि करं न अधिरोपयेत् न वा करस्य अधिरोपणं प्राधिकृतं कुर्यात्।

स्पष्टीकरणम्- अस्मिन् अनुच्छेदे "कस्यापि राज्यस्य कोऽपि प्रवृत्तः विधिः" इति शब्दसमूहे एतत्संविधानस्य प्रारम्भात् पूर्वं पारितः, प्रणीतः वा, न च पूर्वं निरस्तः, कस्यापि राज्यस्य कोऽपि विधिः अन्तर्भवति, यद्यपि स विधिः तस्य भागाः वा तदा सर्वत्र केषुचित् विशिष्टक्षेत्रेषु वा प्रवृत्ताः न स्युः।

(२) कस्यापि राज्यस्य विधानमण्डलं विधिना प्रथमखण्डे वर्णितस्य करस्य अधिरोपणं कर्तुम्, अधिरोपणं प्राधिकृतं वा कर्तुं क्षमते, किन्तु एतादृशः विधिः तावत् कार्यक्षमः न भवेत् यावत् सः राष्ट्रपतेः विचारार्थं रक्षितः सन् तस्य अनुमतिं न लभते; तथा च यदि तादृशः कोऽपि विधिः तादृशस्य करस्य मानानाम्, अन्यापतनानां च केनापि प्राधिकारिणा तस्य विधेः अधीनं निर्मातव्यैः नियमैः आदेशैः वा नियतीकरणार्थम् उपबन्धं करोति, तर्हि सः विधिः तादृशस्य कस्यापि नियमस्य आदेशस्य वा निर्माणार्थं राष्ट्रपतेः पूर्वसम्मतिग्रहणाय उपबन्धं कुर्यात्।

२८९. सङ्घस्य कराधानात् कस्यापि राज्यस्य सम्पत्तेः आयस्य च विमुक्तिः- (१) कस्यापि राज्यस्य सम्पत्तिः आयश्च सङ्घस्य कराधानात् विमुक्तौ भवेताम्।

(२) प्रथमखण्डगतं किमपि, सङ्घं कस्यापि राज्यस्य शासनेन तत् कृते वा क्रियमाणस्य कीदृशस्यापि व्यापारस्य कार्यस्य वा विषये, अथवा तादृशेन व्यापारेण कार्येण वा सम्बद्धानां कासामपि क्रियाणां विषये, अथवा तादृशस्य व्यापारस्य कार्यस्य वा प्रयोजनैः प्रयुक्तायाः अधिकृतायाः वा कस्याः अपि सम्पत्तेः विषये, अथवा ततः प्रोद्भूतस्य उत्पन्नस्य वा कस्यापि आयस्य विषये, कस्यापि करस्य तादृशं विस्तारं यावत्, स चेत् भवति, यादृशं संसद् विधिना उपबन्धयेत् अधिरोपणात् अधिरोपणस्य प्राधिकृतीकरणात् वा, न वारयेत्।

(३) द्वितीयखण्डगतं किमपि, कमपि तं व्यापारं कार्यं वा, अथवा व्यापारस्य कार्यस्य वा कमपि तं प्रकारं न विषयीकुर्यात् यं संसद् विधिना सः (प्रकारः) शासनस्य सामान्यकृत्यानां प्रासङ्गिकः इति घोषयेत्।

२९०. केषांचित् व्ययानां निवृत्तिवेतनानां च विषये समायोजनम्- यत्र एतत्संविधानस्य उपबन्धानाम् अधीनं कस्यापि न्यायालयस्य आयोगस्य वा व्ययाः, अथवा येन जनेन एतत्संविधानस्य प्रारम्भात् पूर्वं भारतस्य सम्राजः अधीनम्, एतादृशात् प्रारम्भात् परं वा सङ्घस्य कस्यापि राज्यस्य वा कार्याणां सम्बन्धेन सेवा कृता भवेत्, तस्मै तत्सम्बन्धेन वा सन्देयं निवृत्तिवेतनं भारतस्य सञ्चितनिधौ, राज्यानां सञ्चितनिधौ वा भारितं भवति तत्र, यदि-

(क) भारतसञ्चितनिधौ भारितत्वावस्थायां स न्यायालयः आयोगः वा कस्यापि राज्यस्य पृथगावश्यकतासु कस्याः अपि पूर्तिं करोति सः जनः वा, पूर्णतः अंशतः वा कस्यापि राज्यस्य कार्याणां सम्बन्धेन सेवां कृतवान् अस्ति; अथवा

(ख) कस्यापि राज्यस्य सञ्चितनिधौ, भारितत्वावस्थायां, स न्यायालयः आयोगः वा सङ्घस्य अन्यस्य वा राज्यस्य पृथगावश्यकतासु कस्याः अपि पूर्तिकरोति, स जनः वा सङ्घस्य अन्यस्य राज्यस्य वा कार्याणां सम्बन्धेन पूर्णतः अंशतः वा सेवां कृतवान् अस्ति, तर्हि, तस्य राज्यस्य सञ्चितनिधौ अथवा यथायथं भारतस्य सञ्चितनिधौ तस्य अन्यस्य वा राज्यस्य सञ्चितनिधौ व्ययविषयकं निवृत्तिवेतनविषयकं वा तादृशम् अंशदानं भारितं भवेत्, तस्मात् निधेश्च दीयेत यादृशस्य समयः भवेत्, समयस्य अभावे वा यादृशम् अंशदानं भारतस्य मुख्यन्यायमूर्तिना नियोज्येन मध्यस्थेन अवधारितं भवेत्।

[1][**२९०क. केभ्यश्चिद् देवस्वं निधिभ्यः वार्षिकः सन्दायः**- प्रतिवर्षं पञ्चाशत्सहस्राधिक-षट्चत्वारिंशत् लक्षमितरूप्यकाणां राशिः केवलं राज्यस्य सञ्चितनिधौ भारितः, तस्मात् तिरुवाङ्कुरदेवस्वकोषाय सन्दत्तश्च भवेत्; तथा प्रतिवर्षं पञ्चाशत्सहस्राधिकत्रयोदशलक्षमित-रूप्यकाणां राशिः [2][तमिलनाडु] राज्यस्य सञ्चितनिधौ भारितः, तस्मात् १९५६-वर्षस्य नवम्बर मासस्य प्रथमदिने तिरुवाङ्कुर-कोच्चिराज्यात् तस्मिन् राज्ये अन्तरितक्षेत्रेषु अन्तर्गतानां हिन्दूमन्दिराणां हिन्दूपूजास्थलानां च अनुरक्षार्थं स्थापिताय देवस्वं कोषाय सन्दत्तश्च भवेत्।]

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य १९-अनुभागेन अन्तर्वेशितः।

2 मद्रासराज्य-(नामपरिवर्तनम्) अधिनियमः, १९६८ (१९६८ वर्षस्य ५३) इत्यस्य ४-अनुभागेन "मद्रास" इति स्थाने प्रतिष्ठापितः (१४-१-१९६९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(भागः १२- वित्तम्, सम्पत्तिः, संविदः वादाश्च)

२९१. *[शासकानां निजकोषस्य राशयः]- संविधानस्य (षड्विंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य २-अनुभागेन (२८-१२-१९७१ दिनाङ्कात् प्रवर्तमानप्रभावेण) निरसितः।*

अध्यायः २- ऋणग्रहणम्

२९२. भारतशासनस्य ऋणग्रहणम्- सङ्घस्य कार्यपालिका शक्तिः भारतस्य सञ्चितनिधेः प्रतिभूत्या ऋणग्रहणं यावत् विस्तृता विद्यते तादृशीनां सीमानाम् अभ्यन्तरे, यदि ताः स्युः चेत् यादृशी संसद् काले काले विधिना नियतीकुर्यात्; तथा प्रत्याभूतिप्रदानं यावत् च विस्तृता विद्यते तादृशीनां सीमानाम् अभ्यन्तरे, यदि ताः स्युः चेत्, यादृश्यः एवं नियतीकृताः भवेयुः।

२९३. राज्यानाम् ऋणग्रहणम्- (१) एतदनुच्छेदस्य उपबन्धानाम् अधीनं, कस्यापि राज्यस्य कार्यपालिका शक्तिः तद्राज्यस्य सञ्चितनिधेः प्रतिभूत्या भारतस्य राज्यक्षेत्रस्य अभ्यन्तरे ऋणग्रहणं यावत् विस्तृता विद्यते तादृशीनां सीमानाम् अभ्यन्तरे, यदि ताः स्युः चेत्, यादृशीः तादृशराज्यस्य विधानमण्डलं काले काले विधिना नियतीकुर्यात्; तथा च प्रत्याभूतिप्रदानं यावत् तादृशीनां सीमानाम् अभ्यन्तरे, यदि ताः स्युः चेत्, यादृश्यः एवं नियतीकृताः भवेयुः।

(२) भारतशासनं, तादृशानां प्रतिबन्धानाम् अधीनं यादृशाः संसदा प्रणीतेन केनापि विधिना तदनुरोधेन वा अधिकथिताः स्युः, कस्मैचिदपि राज्याय ऋणं दातुं क्षमते अथवा यावद् एतस्य संविधानस्य २९२-तमानुच्छेदस्य अधीनं नियतानां कासामपि सीमानाम् अतिक्रमः न भवति, तावत् एतादृशेन केनचिदपि राज्येन गृहीतस्य ऋणस्य विषये प्रत्याभूतिं प्रदातुं क्षमते, तथा एतादृशस्य ऋणस्य दानाय आवश्यकाः केपि राशयः भारतस्य सञ्चितनिधौ भारिताः भवेयुः।

(३) यद् ऋणं भारतशासनेन, तस्य पूर्वाधिकारिशासनेन वा कस्मै अपि राज्याय दत्तं विद्यते अथवा यस्मिन् विषये भारतशासनेन तस्य पूर्वाधिकारिशासनेन वा प्रत्याभूतिः प्रदत्ताः विद्यते, तस्य ऋणस्य यदि कोऽपि भागः अवशिष्यते तर्हि तद् राज्यं भारतशासनस्य सहमतिं विना किमपि ऋणं ग्रहीतुं न क्षमते।

(४) (३) खण्डस्य अधीनं सहमतिः तेषां प्रतिबन्धानाम् अधीनं, यदि ते भवन्ति चेत्, दीयेत येषाम् अधिरोपणं भारतशासनम् उचितं मन्येत।

अध्यायः ३- सम्पत्तिः, संविदः, अधिकाराः, दायित्वानि, आभाराः, वादाश्च

२९४. कासुचिद् अवस्थासु सम्पत्तेः, सर्वस्वस्य, अधिकाराणां, दायित्वानाम्, आभाराणां च उत्तराधिकारः- अस्य संविधानस्य प्रारम्भात् पूर्वं पाकिस्तानाधिनिवेशस्य, अथवा पश्चिमबङ्गाल-पूर्वबङ्गाल-पश्चिमपञ्जाब-पूर्वपञ्जाबप्रान्तानां निर्माणकारणात् कृतस्य कर्तव्यस्य वा समायोजनाधीनं-

अस्य संविधानस्य प्रारम्भात् एव-

(क) सा सर्वा सम्पत्तिः, तानि च सर्वाणि सर्वस्वानि, यानि तादृशात् आरम्भात् अव्यवहितपूर्वं भारताधिनिवेशशासनस्य प्रयोजनार्थं सम्राजि निहितानि आसन्, सा च सर्वा सम्पत्तिः, तानि च सर्वाणि सर्वस्वानि यानि तादृशात् आरम्भात् अव्यवहितपूर्वं प्रत्येकराज्यपालप्रान्तशासनस्य प्रयोजनार्थं सम्राजि निहितानि आसन्, क्रमशः सङ्घे तत्स्थानीयराज्ये च निहितानि भवेयुः; तथा च

(ख) भारताधिनिवेशशासनस्य, प्रत्येकराज्यपालप्रान्तशासनस्य च अधिकाराः दायित्वानि, आभाराश्च तेषां कस्याश्चित् संविदः अन्यथा वा उद्भूतत्वे अपि क्रमशः भारतशासनस्य प्रत्येकस्य तत्स्थानीयराज्यस्य च अधिकाराः दायित्वानि, आभाराश्च भवेयुः।

२९४. अन्यासु अवस्थासु सम्पत्तेः सर्वस्वस्य अधिकाराणां दायित्वानाम् आभाराणां च उत्तराधिकारः- (१) अस्य संविधानस्य प्रारम्भात् एव-

(क) सा सर्वा सम्पत्तिः, तानि च सर्वाणि सर्वस्वानि यानि तादृशात् प्रारम्भात्-अव्यवहितपूर्वं प्रथमानुसूच्याः (ख) भागे उल्लिखितस्य कस्यापि राज्यस्य, स्थानिनि कस्मिंश्चिद् अपि देशीयराज्ये निहितानि आसन्, भारतशासनेन तद्राज्यशासनेन सह तद्विषये कृतस्य समयस्य अधीनं, सङ्घे निहितानि भवेयुः, यदि तानि प्रयोजनानि, यदर्थं तादृशानि सर्वस्वानि, सम्पत्तयश्च तादृशात् प्रारम्भात् अव्यवहितपूर्वं सन्धृतानि आसन् ततः परं सङ्घसूच्यां प्रगणितविषयेषु अन्यतमेन सम्बद्धानि सङ्घस्य प्रयोजनानि स्युः, तथा च

(ख) प्रथमानुसूच्याः (ख) भागे उल्लिखितस्य राज्यस्य स्थानिनः कस्यचिद् अपि देशीयराज्यस्य शासनस्य अधिकाराः, दायित्वानि, आभाराश्च तेषां कस्याश्चित् संविदः अन्यथा वा उद्भूतत्वे अपि भारतशासनेन तद्राज्यशासनेन सह तद्विषये कृतस्य समयस्य अधीनं, भारतशासनस्य अधिकाराः. दायित्वानि आभाराश्च भवेयुः, यदि तानि प्रयोजनानि, यदर्थं तादृशात् प्रारम्भात् अव्यवहितपूर्वं तादृशाः अधिकाराः अर्जिताः आसन्, अथवा दायित्वानि आभाराः वा प्राप्तानि आसन्, ततः परं सङ्घसूच्यां प्रगणितविषयेषु अन्यतमेन सम्बद्धानि सङ्घस्य प्रयोजनानि स्युः।

(२) अस्य संविधानस्य प्रारम्भात् एव, उपरि यद् उक्तम् अस्ति तदधीनं, प्रथमानुसूच्याः (ख) भागे उल्लिखितस्य प्रत्येकराज्यस्य शासनं, प्रथमखण्डे निर्दिष्टेभ्यः इतरेषां सर्वेषां सम्पत्तीनां सर्वस्वानां च तथा संविदः अन्यथा वा उद्भूतानां सर्वेषाम् अधिकाराणां, दायित्वानाम् आभाराणां च विषये, स्वस्थानिनः देशीय राज्यस्य उत्तराधिकारी भवेत्।

२९६. राजगामित्वेन, व्यपगतत्वेन, स्वामिहीनत्वेन वा प्रोद्भूता सम्पत्तिः- एतत् पश्चात् अत्र उपबन्धितम् अस्ति तदधीनं, यदि एतत्संविधानं प्रवृत्तं न अभविष्यत् तर्हि भारतस्य राज्यक्षेत्रे स्थिता कापि सम्पत्तिः राजगामित्वेन, व्यपगतत्वेन; अधिकारयुक्तस्वामिनः अभावे स्वामित्वहीनरिक्थरूपेण वा यथायथं सम्राजे, देशीयराज्यशासकाय वा प्रोद्भूता अभविष्यत्, सा सम्पत्तिः कस्मिन् अपि राज्ये अवस्थिता चेत् तादृशे राज्ये अन्यस्यां कस्यांचित् अवस्थायां च सङ्घे निहिता भवेत्-

परन्तु कापि सम्पत्तिः या- तस्मिन् दिनाङ्के यस्मिन् सा एवं सम्राजे, देशीयराज्यशासकाय वा प्रोद्भूता अभविष्यत्-भारतशासनस्य कस्यचिद् राज्यशासनस्य वा भुक्तौ, नियन्त्रणे वा आसीत् येषां प्रयोजनानाम् अर्थे सा तदा प्रयुक्ता धृता वा आसीत् तानि प्रयोजनानि सङ्घस्य चेत् स्युः तर्हि सङ्घे, कस्यापि राज्यस्य चेत् स्युः तर्हि तस्मिन् राज्ये, निहिता भवेत्।

स्पष्टीकरणम्- अस्मिन् अनुच्छेदे "शासक" "देशीयराज्य" इति शब्दयोः सः एव अर्थः ग्राह्यः यः ३६३-तमानुच्छेदे विद्यते।

[1][२९७ राज्यक्षेत्रीयसागरखण्डे अथवा महाद्वीपीयमग्नतटभूमौ स्थितानां मूल्यवतां वस्तूनाम् अनन्यार्थिकक्षेत्रसाधनानां च सङ्घे निधानम्-

(१) सर्वा भूमयः, सर्वाणि खनिजानि अन्यानि मूल्यवन्ति वस्तूनि च यानि भारतराज्यक्षेत्रीये सागरखण्डे, अथवा महाद्वीपीये जलमग्नतटभूमौ अथवा अनन्यार्थिकक्षेत्रे समुद्रस्य अधः स्थितानि तानि सङ्घे निहितानि सङ्घस्य प्रयोजनानाम् अर्थे धृतानि च भवेयुः।

(२) भारतस्य अनन्यार्थिकक्षेत्रस्य सर्वाणि अन्यानि साधनानि अपि च सङ्घे निहितानि सङ्घस्य प्रयोजनानाम् अर्थे धृतानि च भवेयुः।

(३) भारतस्य राज्यक्षेत्रीयस्य सागरखण्डस्य, महाद्वीपीयमग्नतटभूमेः, अनन्यार्थिकक्षेत्रस्य, अन्येषां समुद्रीयक्षेत्राणां च सीमाः तादृश्यः भवेयुः यादृश्यः काले काले संसदा प्रणीतेन विधिना तदधीनं वा विनिर्दिष्टाः भवेयुः।]

[2][२९८. व्यापारादीनां करणे शक्तिः-

सङ्घस्य, प्रत्येकराज्यस्य च कार्यपालिकाशक्तिः कस्यापि व्यापारस्य, व्यवहारस्य च करणे, तथा च सम्पत्तेः अर्जने, धारणे, व्ययने तथा च कस्यापि प्रयोजनस्य अर्थे संविदां करणे अपि विस्तृता भवेत्-परन्तु-

(क) यावत् एतादृशः व्यापारः, व्यवहारः एतादृशं प्रयोजनं वा तादृशं न भवति यस्य सम्बन्धे संसद् विधिं प्रणेतुं क्षमते, तावत् सङ्घस्य उक्तकार्यपालिकाशक्तिः प्रत्येकराज्ये तद्राज्यस्य विधेः अधीना भवेत्, तथा च

(ख) यावत् तादृशः व्यापारः व्यवहारः तादृशं प्रयोजनं वा तादृशं न भवति यस्य सम्बन्धे राज्यस्य विधानमण्डलं विधि प्रणेतुं क्षमते तावत् प्रत्येकराज्यस्य उक्ता कार्यपालिकाशक्तिः संसदः विधेः अधीना भवेत्।]

---

1 संविधानस्य (चत्वारिंशत्तम् संशोधनम्) अधिनियमः, १९७६ इत्यस्य २-अनुभागेन, २९७-तमानुच्छेदात् प्रति एषः अनुच्छेदः संनिवेशितः (२७-५-१९७६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २०-अनुभागेन २९८-तमानुच्छेदात् प्रति एषः अनुच्छेदः संनिवेशितः।

(भागः १२- वित्तम्, सम्पत्तिः, संविदः वादाश्च)

२९९. संविदः- (१) सङ्घस्य अथवा कस्यापि राज्यस्य कार्यपालिकायाः शक्तेः प्रयोगेण कृताः सर्वाः संविदः यथायथं राष्ट्रपतिना अथवा तस्य राज्यस्य राज्यपालेन [1]* * * कृताः इति अभिहितं भवेत् तथा च तस्या शक्तेः प्रयोगेण कृताः सर्वाः एतादृश्यः संविदः सर्वाणि च सम्पत्तिहस्तान्तरणपत्राणि राष्ट्रपतेः राज्यपालस्य वा [1]* * * कृते एतादृशैः जनैः एतादृश्या च रीत्या लिखितानि भवेयुः यथा तेन निर्दिश्यते प्राधिक्रियते वा।

(२) न हि राष्ट्रपतिः न च कस्यापि राज्यस्य राज्यपालः [2]* * * एतत्संविधानस्य प्रयोजनानां कृते, अथवा भारतशासनसम्बन्धिनः इतः पूर्वं प्रवर्तितस्य कस्यापि अधिनियमस्य प्रयोजनानां कृते कृतायाः, लिखितायाः वा कस्याः अपि संविदः कृतस्य, लिखितस्य वा कस्यापि हस्तान्तरणपत्रस्य वा विषये, वैयक्तिकररूपेण उत्तरदायी भवेत्, न च कश्चित् जनः तेषाम् अन्यतरस्य कृते कामपि तादृशीं संविदं तादृशं हस्तान्तरणपत्रं वा कुर्वन् लिखन् वा तद्विषये वैयक्तिकरूपेण उत्तरदायी भवेत्।

३००. वादाः, कार्यप्रवृत्तयश्च- (१) भारतसङ्घस्य नाम्ना भारतशासनं वादि भवितुं प्रतिवादि वा भवितुं क्षमते, तथा कस्यापि राज्यस्य नाम्ना तद्राज्यशासनं वादि भवितुं प्रतिवादि भवितुं वा क्षमेते; तथा एतत् संविधानेन प्रदत्तानां शक्तीनाम् आश्रयेण संसदा एतादृशराज्यविधानमण्डलेन वा प्रणीतेन अधिनियमेन करणीयोपबन्धानाम् अधीनं ते स्वस्वकार्याणां सम्बन्धे तासु एव अवस्थासु वादिनी भवितुं, प्रतिवादिनी वा भवितुं क्षमते यासु भारताधिनिवेशः तत्स्थानिप्रान्ताश्च तत्स्थानिदेशीयराज्यानि वा वादीनि भवितुं क्षमाणि अभविष्यन्, प्रतिवादीनि भवितुं क्षमाणि वा अभविष्यन् यदि एतस्मै संविधानाय अधिनियमरूपता दत्ता न अभविष्यत्।

(२) यदि एतस्य संविधानस्य प्रारम्भे-

(क) काश्चित् विधिकार्यप्रवृत्तयः लम्बिताः स्युः यत्र भारताधिनिवेशः एकः पक्षः विद्यते तर्हि तासु कार्यप्रवृत्तिषु भारताधिनिवेशस्य स्थाने भारतसङ्घः अवगम्येत; तथा च

(ख) काश्चित् विधिकार्यप्रवृत्तयः लम्बिताः स्युः यत्र कोऽपि प्रान्तः, किमपि देशीयराज्यं वा एकः पक्षः विद्यते तर्हि, तासु कार्यप्रवृत्तिषु तस्य प्रान्तस्य तस्य देशीयराज्यस्य वा स्थाने तत् स्थानीयं राज्यम् अवगम्येत।

[3][अध्यायः ४-सम्पत्तेः अधिकारः

३००क. विधेः प्राधिकारं विना न जनानां सम्पत्या वियोजनम्- कोऽपि जनः विधेः प्राधिकारेण एव स्वसम्पत्या वियोजनीयः, नान्यथा।]

---

1 उपर्युक्ताधिनियमस्य २९-अनुभागेन अनुसुच्या च "राज्यप्रमुखो वा" इत्येतौ शब्दौ लोपितौ।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च "राजप्रमुखस्य वा" इत्येतौ शब्दौ लोपितौ।

3 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य, ३४-अनुभागेन एषः अध्यायः अन्तर्वेशितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

भागः १३

भारतराज्यक्षेत्रस्य अभ्यन्तरे व्यापारः, वाणिज्यं समागमश्च

३०१. व्यापारस्य वाणिज्यस्य समागमस्य च स्वतन्त्रता- अस्य भागस्य अन्येषाम् उपबन्धानाम् अधीनं, भारतराज्यक्षेत्रे व्यापारः, वाणिज्यं, समागमश्च निर्बाधं प्रवर्तेरन्।

३०२. व्यापार-वाणिज्य-समागमेषु निर्बन्धनाधिरोपणार्थं संसदः शक्तिः- संसद् विधिना कस्यापि राज्यस्य अन्यराज्यस्य च मध्ये भारतराज्यक्षेत्रस्य कस्यापि भागस्य अभ्यन्तरे वा व्यापारस्य, वाणिज्यस्य, समागमस्य वा स्वतन्त्रतायां तादृशानि निबर्न्धनानि अधिरोपयितुं क्षमते यादृशानि लोकहिताय अपेक्षितानि भवेयुः।

३०३. व्यापार-वाणिज्य-विषये सङ्घस्य, राज्यानां च विधायिनीषु शक्तिषु निर्बन्धनानि- (१) ३०२-तमानुच्छेदे किमपि सत्यपि, सप्तमानुसूच्याः कस्याम् अपि सूच्यां व्यापारवाणिज्यसम्बन्धिन्याः कस्याः अपि प्रविष्टेः आधारेण न हि संसदः न च कस्यापि राज्यस्य विधानमण्डलस्य, कस्यापि तादृशस्य विधेः निर्माणस्य शक्तिः भवेत्, यः एकस्मै राज्याय इतरराज्यापेक्षया अधिमानं ददाति, तद् दानं या प्राधिकृतं करोति, अथवा द्वयोः राज्ययोः मध्ये विभेदं करोति, तत्करणं वा प्राधिकृतं करोति।

(२) (१) खण्डगतं किमपि संसदं कमपि अधिमानं ददतः, तद्दानं वा प्राधिकृतीकुर्वतः अथवा कमपि विभेदं कुर्वतः, तत्करणं वा प्राधिकृतीकुर्वतः कस्यापि विधेः निर्माणात् न वारयेत् यदि चेत् तादृशेन विधिना एतद् घोष्यते यद् भारतराज्यक्षेत्रस्य कस्मिन् अपि भागे भाण्डानां दुर्लभतावशात् उत्पन्नायाः स्थितेः प्रतीकारार्थम् एवं करणम् आवश्यकं वर्तते।

३०४. राज्यानां पारस्परिकेषु व्यापार-वाणिज्य-समागमेषु निर्बन्धनानि- ३०१-तमानुच्छेदे, ३०३-तमानुच्छेदे वा किमपि सत्यपि, कस्यापि राज्यस्य विधानमण्डलं विधिना-

(क) राज्यान्तरेभ्यः आयातेषु भाण्डेषु कमपि एतादृशं करम् अधिरोपयितुं क्षमते यः तस्मिन् राज्ये [1][सङ्घराज्यक्षेत्रे वा] निर्मितेषु, उत्पादितेषु वा भाण्डेषु आरोप्यते, किन्तु एवं प्रकारेण यथा एवम् आयातानां भाण्डानां एवं निर्मितानाम्, उत्पादितानां वा भाण्डानां च मध्ये विभेदः न भवति; तथा

(ख) तेन राज्येन साकं तद् अभ्यन्तरे वा व्यापारवाणिज्यसमागमानां स्वतन्त्रतायां तादृशानि युक्तियुक्तानि निर्बन्धनानि अधिरोपयितुं क्षमते यादृशानि लोकहितार्थम् अपेक्ष्येरन्-

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च एतौ शब्दौ अन्तर्वेशितौ।

परन्तु (ख) खण्डस्य प्रयोजनार्थं किमपि विधेयकं, संशोधनं वा राष्ट्रपतेः पूर्वस्वीकृतिं विना कस्यापि राज्यस्य विधानमण्डले पुरः स्थापितं, प्रस्तावितं वा न भवेत्।

[1][**३०५. विद्यमानविधीनां, राज्यस्य एकाधिकारिताम् उपबन्धयतां विधीनां च व्यावृत्तिः-** ३०२-तमानुच्छेदगतं, ३०३-तमानुच्छेदगतं च किमपि कस्यापि विद्यमानस्य विधेः उपबन्धान् तावत् न प्रभावयेत् यावत् राष्ट्रपतिः आदेशेन अन्यथा वा निर्देशं न करोति तथा च ३०२-तमानुच्छेदेगतं किमपि संविधानस्य (चतुर्थं संशोधनम्) अधिनियमः, १९५५ इत्यस्य प्रारम्भात् पूर्वम् अधिनियमितस्य कस्यापि विधेः प्रवर्तनं तावत् न प्रभावयेत्, न वा संसदं कस्यापि राज्यस्य विधानमण्डलं वा तादृशस्य विधेः प्रणयनात् वारयेत् यावत् सः विधिः १९-तमानुच्छेदस्य (६) खण्डस्य (द्वितीये) उपखण्डे निर्दिष्टं कमपि विषयं विषयीकरोति।]

३०६. *[वाणिज्ये, व्यापारे च निर्बन्धनानि अधिरोपयितुं प्रथमानुसूच्याः ख-भागे निर्दिष्टानां केषांचित् राज्यानां शक्तिः]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण) निरसितः।*

३०७. ३०२-तमात् आरभ्य ३०४-तमपर्यन्तानाम् अनुच्छेदानां प्रयोजनानि कार्यान्वितानि विधातुं प्राधिकारिणः नियुक्तिः- संसद् विधिना तादृशस्य प्राधिकारिणः नियुक्तिं कर्तुं क्षमते यादृशं सा ३०१, ३०२, ३०२,३०३, ३०४- तमानुच्छेदानां प्रयोजनानि कार्यान्वितानि विधातुं समुचितं मन्यते तथा एवं नियुक्ताय प्राधिकारिणे तादृशीः शक्तीः तादृशानि कर्तव्यानि च समर्पयितुं क्षमते यादृशानि सा आवश्यकानि मन्यते।

---

1 संविधानस्य (चतुर्थसंशोधनम्) अधिनियमः, १९५५ इत्यस्य ४-अनुभागेन ३०५-तमानुच्छेदात् प्रति एषः अनुच्छेदः संनिवेशितः।

भागः १४

सङ्घस्य राज्यानां च अधीनाः सेवाः

अध्यायः १- सेवाः

३०८. निर्वचनम्- अस्मिन् भागे प्रसङ्गेन अन्यथा अपेक्षितं न भवति चेत् "राज्यम्" इति शब्दः [1][जम्मू-कश्मीरराज्यं न अन्तर्भावयति]।

३०९. सङ्घस्य, राज्यस्य वा सेवां कुर्वतां जनानां नियोजनं, सेवायाः प्रतिबन्धाश्च- एतत्संविधानस्य उपबन्धानाम् अधीनं, समुचितविधानमण्डलस्य अधिनियमाः सङ्घस्य या कस्यचित् अपि राज्यस्य वा कार्यैः सम्बद्धानां लोकसेवानां पदानां च कृते नियोजनस्य, नियुक्तजनानां सेवायाः प्रतिबन्धानां च विनियमनं कर्तुं क्षमन्ते-

परन्तु यावद् एतदनुच्छेदस्य अधीनं, समुचितविधानमण्डलस्य अधिनियमेन, तदधीनं वा तदर्थम् उपबन्धः न क्रियते, तावत् यथायथं सङ्घस्य कार्ये सम्बद्धानां सेवानां पदानां च विषये राष्ट्रपतिः, सः जनः वा यं सः निदिशेत्, तथा कस्यापि राज्यस्य कार्यैः सम्बद्धानां सेवानां पदानां च विषये तद्राज्यस्य राज्यपालः, [2][***] सः जनः वा यं सः निदिशेत्, तादृशीनां सेवानां, तादृशानां पदानां च कृते नियोजनस्य, नियुक्तजनानां सेवायाः प्रतिबन्धानां च विनियामकनियमानां निर्माणे क्षमः भवेत्; तथा च एवं निर्मिताः केपि नियमाः कस्यापि तादृशस्य अधिनियमस्य उपबन्धानाम् अधीनं प्रभाविनः भवेयुः।

३१०. सङ्घं, किमपि राज्यं वा सेवयतां जनानां पदावधिः- (१) एतेन संविधानेन स्पष्टतया उपबन्धितम् अस्ति तद् विहाय, प्रत्येकं जनः यः सङ्घस्य रक्षासेवायाः वा, असैनिकसेवायाः वा, अखिलभारतीय सेवायाः वा सदस्यः वर्तते अथवा सङ्घस्य अधीनं रक्षया सम्बद्धं किमपि पदं, किमपि असैनिकपदं वा धारयते, सः राष्ट्रपतेः प्रसादपर्यन्तं पदं धारयते; तथा च प्रत्येकं जनः यः कस्यापि राज्यस्य असैनिकसेवायाः सदस्यः वर्तते, कस्यापि राज्यस्य अधीनं किमपि असैनिकपदं वा धारयते सः तद्राज्यस्य राज्यपालस्य [3][***] प्रसादपर्यन्तं पदं धारयते।

(२) सङ्घस्य कस्यापि राज्यस्य वा अधीनम् असैनिकपदं धारयमाणः कोऽपि जनः यथायथं राष्ट्रपतेः अथवा तद्राज्यस्य राज्यपालस्य [2][* **] वा प्रसादपर्यन्तं पदं धारयते इति एवं सत्यपि, कापि संविद् यस्याः अधीनं कोऽपि जनः यः रक्षासेवायाः वा अखिलभारतीयसेवायाः अथवा, सङ्घस्य कस्यापि राज्यस्य या असैनिकसेवायाः वा सदस्यः न वर्तते, कस्यापि तादृशस्य पदस्य धारणार्थम् एतत्संविधानस्य अधीनं नियुक्तः भवति, इमम् उपबन्धं कर्तुं क्षमते यद् यथायथं राष्ट्रपतिः राज्यपालः वा [2][** *] विशेषार्हतावतः जनस्य सेवानां प्राप्त्यै एतद् आवश्यकं मन्यते,

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियम, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "प्रथमानुसूच्याः (क) भागे, (ख) भागे वा उल्लिखितं किमपि राज्यम् अभिप्रेयते" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च "राजप्रमुखोः वा" इत्येतौ शब्दौ लोपितौ।

3 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च "राजप्रमुखस्य वा" इत्येतौ शब्दौ लोपितौ।

तर्हि समयगतस्य कालावधेः समाप्तेः प्राक् तस्य पदस्य समाप्तिः क्रियते चेत्, अथवा तेन कृतेन केनापि दुराचारेण असम्बद्धैः कारणैः तत्पदं तेन रिक्तीकरणीयम् इति अपेक्ष्यते चेत्, तस्मै प्रतिकरः प्रदातव्यः भवेत्।

३११. सङ्घस्य, कस्यापि राज्यस्य वा अधीनम् असैनिकरूपेण नियुक्तानां जनानां पदात् च्युतिः, पदात् अपसारणं पदपङ्क्तौ अवगमनं वा- (१) कोऽपि जनः, यः सङ्घस्य असैनिकसेवायाः अखिलभारतीयसेवायाः वा, कस्यापि राजस्य असैनिकसेवायाः वा सदस्यः वर्तते, अथवा सङ्घस्य कस्यापि राज्यस्य वा अधीनम् असैनिकपदं धारयते, सः स्वनियोजकस्य प्राधिकारिणः अधीनेन प्राधिकारिणा पदात् च्युतः, पदात् अपसारितः वा न क्रियेत।

[1][(२) उपर्युक्तप्रकारकः कोऽपि जनः तादृशाद् अन्वेषणात् परम् एव यस्मिन् तस्य विरुद्धं कृताः आरोपाः तस्मै सूचिताः भवेयुः, तथा एतेषाम् आरोपाणां सम्बन्धे श्रवणाय तस्मै यथायोग्यः अवसरः प्रदत्तः भवेत् पदात् च्युतः, पदात् अपसारितः पदपङ्क्तौ अवनतः या भवेत्, नान्यथा [2][* * *]-

[3][परन्तु यत्र एतादृशात् अन्वेषणात् परं तस्मै एतादृशी शास्तिम् अधिरोपयितुं प्रस्थापना भवति तत्र एतादृशी शास्तिः अन्वेषणाभ्यन्तरे दत्तसाक्ष्यस्य आधारेण एव अधिरोपिता भवेत् तथा च तस्मै एतादृश्याः शास्तेः अधिरोपणस्य विषये अभ्यावेदनं कर्तुम् अवसरदानस्य आवश्यकता न भवेत्।

अपरं च एषः खण्डः तत्र प्रवृत्तः न भवेत्-]

(क) यत्र कोऽपि जनः तादृशस्य आचरणस्य आधारेण, यद् आचरणम् आपराधिके आरोपे सिद्धदोषत्वेन परिणतम् अस्ति, पदच्युतः पदात् अपसारितः, पदपङ्क्तौ अवनतः वा भवति; अथवा

(ख) यत्र कस्यापि जनस्य पदच्युतिकरणस्य, पदात् अपसारणकरणस्य, पदपङ्क्तौ अवनतिकरणस्य विषये शक्तिमान् प्राधिकारी समाहितः भवति यत् कस्माद् अपि कारणात् यत् तेन लेखबद्धरूपेण अभिलेख्यः भवेत्, युक्तियुक्तरूपेण एतादृशम् अन्वेषणं साध्यं नास्ति;

(ग) यत्र यथायथं राष्ट्रपतिः राज्यपालः वा समाहितः भवति यत् राज्यसुरक्षाहितार्थं तादृशस्य अन्वेषणस्य करणं समीचीनं नास्ति।

(३) यदि उपर्युक्तप्रकारस्य कस्यचित् पदस्य विषये, (२) खण्डे निर्दिष्टस्य अन्वेषणस्य करणं युक्तियुक्तरूपेण साध्यम् अस्ति न वा इति प्रश्नः उत्पद्यते, तर्हि तं जनं यथायथं पदच्युतं कर्तुं, पदात् अपसारितं कर्तुं, पदपङ्क्तौ अवनतं वा कर्तुं शक्तिमतः प्राधिकारिणः विनिश्चयः तत्र अन्तिमः भवेत्।]

---

1 संविधानस्य (पञ्चदशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य १०-अनुभागेन (२) खण्डात् प्रति (३) खण्डात् प्रति च एतौ खण्डौ संनिवेशितौ।

2 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ४४-अनुभागेन केचित् शब्दाः लोपिताः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन केभ्यश्चित् शब्देभ्यः प्रति एतत् संनिवेशतम् (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(भागः १४- सङ्घस्य राज्यानां च अधीनाः सेवाः)

३१२. अखिलभारतीयाः सेवाः- (१) [1][षष्ठभागस्य षष्ठाध्याये, एकादशभागे वा] किमपि सत्यपि, यदि राज्यसभा उपस्थितानां मतदातृणां च सदस्यानां तृतीयांशद्वयात् अन्यूनसङ्ख्यया समर्थितेन सङ्कल्पेन राष्ट्रहिताय एवं करणम् आवश्यकं प्रसङ्गोचितं वा विद्यते इति घोषितं करोति तर्हि संसद् विधिना सङ्घस्य च राज्यानां च कृते साधारण्याः एकस्याः अखिलभारतीयसेवायाः वा [2][अखिलभारतीयन्यायिक सेवाम् अन्तर्भावयतीनाम्] अधिकानां सेवानां सर्जनार्थम् उपबन्धं कर्तुं क्षमते; तथा च एतदध्यायस्य अन्योपबन्धानाम् अधीनं कस्यैचिद् अपि एतादृश सेवायै नियोजनस्य, नियुक्तजनानां सेवायाः प्रतिबन्धानां च विनियमनं कर्तुं क्षमते।

(२) एतस्य संविधानस्य प्रारम्भे "भारतीय-प्रशासनिक-सेवा" "भारतीयारक्षिसेवा" च इत्येवं ज्ञाते सेवे एतदनुच्छेदस्य अधीनं संसदा सृष्टे सेवे मन्येयाताम्।

[2][(३) (१) खण्डे निर्दिष्टा अखिलभारतीयन्यायिकसेवा, २३६-तमानुच्छेदे परिभाषितस्य मण्डलन्यायाधीशपदात् अवरं कमपि पदं न अन्तर्भावयेत्।

(४) उपर्युक्ताखिलभारतीयन्यायिकसेवायाः सर्जनार्थम् उपबन्धं कुर्वन् कोऽपि विधिः षष्ठभागस्य षष्ठाध्यायस्य संशोधनाय एतादृशान् उपबन्धान् अन्तर्भावयितुं क्षमते ये एतादृशस्य विधेः उपबन्धान् कार्यान्वितान् कर्तुम् आवश्यकाः भवेयुः; तथा च एतादृशः कोऽपि विधिः ३६८-तमानुच्छेदस्य प्रयोजनानाम् अर्थे एतत्संविधानस्य संशोधनम् अस्ति इति न मन्येत।]

[3][**३१२क. कासुचित् सेवासु पदधारिणां सेवाप्रतिबन्धानां परिवर्तनाय प्रतिसंहरणाय वा संसदः शक्तिः-** (१) संसद् विधिना-

(क) ये जनाः "सेक्रेटरी-ऑफ-स्टेट" इत्याख्येन, "सेक्रेटरी-ऑफ-स्टेट-इन्-कौंसिल" इत्याख्येन वा, प्राधिकारिणा एतत्संविधानस्य प्रारम्भात् पूर्वं भारतसम्राजः कस्यामपि असैनिकसेवायां नियुक्ताः, तथा च संविधानस्य (अष्टाविंशतितमं संशोधनम्) अधिनियमः, १९७२ इत्यस्य प्रारम्भे ततः परं च भारतप्रशासनस्य वा कस्यचिदपि राज्यस्य प्रशासनस्य वा अधीनं कस्यामपि सेवायां, कस्मिंश्चिदपि पदे वा सेवां कर्तुम् अनुवर्तन्ते तेषां पारिश्रमिकस्य अनुमतानुपस्थितेः, निवृत्तिवेतनस्य वा विषयकानां सेवाप्रतिबन्धानां तथा अनुशासनिकैः विषयैः सम्बद्धानाम् अधिकाराणां भविष्यलक्षिरूपेण, भूतलक्षिरूपेण वा परिवर्तनं कर्तुं क्षमते तथा च तान् प्रतिसंहर्तुमपि क्षमते।

---

1 उपर्युक्ताधिनियमस्य ४५-अनुभागेन "एकादशभागगतम्" इत्येतस्मात् प्रति एते शब्दाः संनिवेशिताः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन एते शब्दाः अन्तर्वेशिताः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (अष्टाविंशतितमं संशोधनम्) अधिनियमः, १९७२ इत्यस्य २-अनुभागेन अन्तर्वेशितः (२६-८-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(ख) ''सेक्रेटरी-ऑफ-स्टेट्'' इत्याख्येन ''सेक्रेटरी-ऑफ-स्टेट-इन्-कौंसिल'' इत्याख्येन वा प्राधिकारिणा भारते सम्राजः सेवायाम् अस्य संविधानस्य प्रारम्भात् पूर्वं नियुक्तानां, संविधानस्य (अष्टाविंशतितमं संशोधनम्) अधिनियमः (१९७२ इत्यस्य प्रारम्भात् पूर्वं कस्मिन् अपि काले सेवातः निवृत्तानाम् अथवा अन्यथा विरतानां जनानां निवृत्तिविषयकप्रतिबन्धानां भविष्यलक्षिरूपेण, भूतलक्षिरूपेण वा परिवर्तनं कर्तुं तान् प्रतिसंहर्तुं वा क्षमते-

परन्तु यः उच्चतमन्यायालस्य वा कस्यापि उच्चन्यायालयस्य वा मुख्यन्यायमूर्तेः अन्यन्यायाधीशस्य वा, भारतस्य नियन्त्रकमहालेखापरीक्षकस्य, सङ्घस्य वा कस्यापि राज्यस्य वा सेवायोगस्य अध्यक्षस्य, अन्यसदस्यस्य वा, मुख्यनिर्वाचनायुक्तस्य वा पदं धारयति, धारितवान् वा, तादृशस्य कस्यापि जनस्य सम्बन्धे (क) उपखण्डगतं (ख) उपखण्डगतं वा किमपि तस्य नियुक्तेः प्रतिबन्धानां तस्मै अलाभकरं स्यात् तथा परिवर्तनं कर्तुम् अथवा तान् प्रतिबन्धान् प्रतिसंहर्तुं शक्तिप्रदानं करोति इति अर्थः न क्रियेत, यावत् तादृशाः सेवाप्रतिबन्धाः सः भारत सम्राजः असैनिकसेवायां ''सेक्रेटरी-ऑफ-स्टेट्'' इत्याख्येन ''सेक्रेटरी-आफ-स्टेट्-इन्-कौंसिल'' इत्याख्येन वा प्राधिकारिणा नियुक्तः भवति इति कारणेन तं प्रभावयन्ति-तद्विहाय।

(२) एतदनुच्छेदस्य अधीनं संसदा विधिना यावत् उपबन्धितं स्यात् तद्विहाय एतदनुच्छेदगतं किमपि, एतत्संविधानस्य अन्योपबन्धानाम् अधीनं (२) खण्डे निर्दिष्टानां जनानां नियुक्तेः, प्रतिबन्धानां विनियमनाय कस्यापि विधानमण्डलस्य अथवा अन्यस्य प्राधिकारिणः शक्तिं न प्रभावयेत्।

(३) न उच्चतमन्यायालयः न वा अन्यः कोऽपि न्यायालयः निम्ननिर्दिष्टविवादानां विषये अधिकारितां भजेत, तद् यथा-

(क) (१) खण्डे निर्दिष्टेन केनापि जनेन कृतायाः, निष्पादितायाः वा प्रसंविदायाः, अथवा तेन कृतस्य, निष्पादितस्य वा समयस्य वा तद्रूपस्य अन्यस्य लेखपत्रस्य कस्मात् अपि उपबन्धात्, पृष्ठाङ्कनात् वा, अथवा तादृशस्य जनस्य भारते सम्राजः कस्यामपि असैनिकसेवायां नियुक्तिसम्बन्धे, अथवा भारताधिनिवेशस्य तस्य प्रान्तस्य वा अधीनसेवायां (तस्य जनस्य) अनुवर्तनसमबन्धे तस्मै प्रचालितपत्रात् उद्भवन् विवादः;

(ख) मूलतः यथाधिनियमितस्य ३१४-तमानुच्छेदस्य अनुरोधानुसारम् उद्भवतः अधिकारस्य, दायित्वस्य, बाध्यतायाः वा सम्बधे विवादः।

(४) मूलतः यथाधिनियमिते ३१४-तमानुच्छेदे अथवा एतत्संविधानस्य अन्येषु उपबन्धेषु किमपि सत्यपि एतदनुच्छेदस्य उपबन्धाः प्रभाविनः भवेयुः।]

(भागः १४- सङ्घस्य राज्यानां च अधीनाः सेवाः)

३१३. सङ्क्रमणकालिकोपबन्धाः- यावत् एतत्संविधानस्य अधीनम् अन्यः उपबन्धः एतदर्थं प्रणीतः न भवति तावत् एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं प्रवृत्ताः, तथा एतत्संविधानस्य प्रारम्भात् परम् अखिलभारतीयसेवायाः अथवा सङ्घस्य, राज्यस्य वा अधीन सेवायाः, अधीनपदस्य रूपेण वा स्थितिम् अनुवर्तमानां कामपि लोकसेवाम् अनुवर्तमानं किमपि पदं वा विषयीकुर्वतः सर्वे विधयः, तावत् प्रवृत्तत्वेन अनुवर्तेरन् यावत् ते अस्य संविधानस्य उपबन्धैः सङ्गताः भवेयुः।

३१४. *[कासांचित् सेवानां वर्तमान पदाधिकारिणां संरक्षणार्थम् उपबन्धः।] संविधानस्य (अष्टाविंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य ३-अनुभागेन निरसितः (२९-८-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।*

अध्याय २- लोकसेवायोगाः

३१५. सङ्घार्थं राज्यार्थं च लोकसेवायोगाः- (१) एतदनुच्छेदस्य उपबन्धानाम् अधीनं सङ्घार्थम् एकः लोकसेवायोगः, प्रत्येकराज्यार्थं च एकः लोकसेवायोगः भवेत्।

(२) द्वे राज्ये, अधिकानि वा राज्यानि समयं कर्तुं क्षमन्ते यत् तद्राज्यवर्गार्थम् एकः लोकसेवायोगः भवेत् तथा यदि तदुद्देश्येन सङ्कल्पः तयोः राज्ययोः तेषां राज्यानां वा प्रत्येकस्य विधानमण्डलसदनेन अथवा यत्र द्वे सदने वर्तेते तत्र विधानमण्डलस्य प्रत्येकसदनेन पारितः भवति तर्हि संसत् तयोः राज्ययोः तेषां राज्यानां वा आवश्यकतानां पूर्त्यै संयुक्तराज्यलोकसेवायोगस्य (अस्मिन् अध्याये यः संयुक्तायोगः इत्येवं निर्दिश्यते) नियुक्तिं कर्तुं क्षमते।

(३) उपर्युक्तविधौ तादृशाः प्रासङ्गिकाः आनुषङ्गिकाश्च उपबन्धाः अन्तर्विष्टाः भवितुम् अर्हन्ति यादृशाः तस्य विधेः प्रयोजनान् प्रभावीकर्तुम् आवश्यकाः वाञ्छनीयाः वा भवेयुः।

(४) कस्यापि राज्यस्य राज्यपालेन [1][***] एवं कर्तुं प्रार्थितश्चेत् सङ्घस्य लोकसेवायोगः राष्ट्रपतेः अनुमोदनेन तस्य राज्यस्य सर्वासां, कासांचित् वा आवश्यकतानां पूर्त्यै कार्यकरणं स्वीकर्तुं क्षमते।

(५) अस्मिन् संविधाने सङ्घलोकसेवायोगं राज्यलोकसेवायोगं प्रति वा निर्देशाः, प्रसङ्गेन अन्यथा अपेक्षितं चेत् न भवति, प्रकृतस्य विशेषविषयस्य सम्बन्धेन यथायथं सङ्घस्य राज्यस्य वा आवश्यकतानां पूर्तिकरम् आयोगं प्रति निर्देशाः इति अर्थः ग्राह्यः।

३१६. सदस्यानां नियुक्तिः, पदावधिश्च- (१) लोकसेवायोगस्य अध्यक्षस्य अन्येषां सदस्यानां च नियुक्तिः, स चेत् सङ्घायोगः संयुक्तयोगः वा भवति राष्ट्रपतिना तथा च स चेत् राज्यायोगः भवति, राज्यस्य राज्यपालेन क्रियेत।

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राजप्रमुखेन वा" इत्येतौ शब्दौ लोपितौ।

परन्तु प्रत्येकलोकसेवायोगस्य यथासम्भवम् उपार्धं सदस्याः ते जनाः भवेयुः ये स्वस्वनियुक्तिदिनाङ्के भारतशासनस्य कस्यचिद् राज्यशासनस्य वा अधीनं न्यूनात् न्यूनं दशवर्षपर्यन्तं पदधारणं कृतवन्तः भवेयुः, तथा दशवर्षाणाम् उक्तकालावधेः सङ्गणनायां स कालावधिः अपि सम्मिलितः भवेत् यस्मिन् एतत्संविधानस्य प्रारम्भात् पूर्वं केनापि जनेन भारतस्य सम्राजः अधीनं कस्यापि देशीयराज्यस्य वा अधीनं पदधारणं कृतम् अभूत्।

[1][(१क) यदि आयोगस्य अध्यक्षस्य पदं रिक्तं भवति, अथवा यदि एतादृशः अध्यक्षः स्वस्य अनुपस्थितेः कारणेन, अन्यकारणेन वा स्वपदस्य कर्तव्यानां पालने असमर्थः भवति तर्हि यथायथं यावत् रिक्तपदे प्रथमखण्डाधीनं नियुक्तः कोऽपि जनः स्वकर्तव्यस्य ग्रहणं न करोति, अथवा यावत् अध्यक्षः स्वपदकर्तव्यानां पुनः ग्रहणं न करोति तावत् आयोगस्य अन्यसदस्येभ्यः एकः सदस्यः यं, यदि सः आयोगः सङ्घायोगः संयुक्तायोगः वा भवति तर्हि राष्ट्रपतिः, अथवा यदि सः राज्यायोगः भवति तर्हि तद्राज्यस्य राज्यपालः एतदर्थं नियुङ्क्ते, तेषां कर्तव्यानां पालनं कुर्यात्।]

(२) लोकसेवायोगस्य सदस्यः स्वपदग्रहणदिनाङ्कात् आरभ्य षड्वर्षावधिं यावत् अथवा यदि सः सङ्घायोगः तर्हि पञ्चषष्टिवर्षवयसः प्राप्तिं यावत्, तथा यदि सः राज्यायोगः संयुक्तायोगः वा भवति तर्हि [2][द्विषष्टिवर्षवयसः] प्राप्तिं यावत्, यदपि एनयोः पूर्वतरं भवति, पदधारणं कुर्यात्-परन्तु-

(क) लोकसेवायोगस्य कोऽपि सदस्यः यदि सः सङ्घायोगः, संयुक्तायोगः वा भवति तर्हि राष्ट्रपतिं, तथा च यदि सः राज्यायोगः भवति तर्हि राज्यस्य राज्यपालं [3][***] सम्बोध्य लिखितेन स्वहस्ताङ्कितेन लेखेन पदं त्यक्तुं क्षमते;

(ख) लोकसेवायोगस्य कोऽपि सदस्यः स्वपदात् ३१७-तमानुच्छेदस्य (१) खण्डे, (३) खण्डे वा उपबन्धितया रीत्या अपसारणम् अर्हति।

(३) कोऽपि जनः यः लोकसेवायोगस्य सदस्यत्वेन पदधारणं करोति, स्वपदावधेः समाप्तौ तस्मिन् पदे पुनर्नियुक्तेः अपात्रं भवेत्।

---

1 संविधानस्य (पञ्चदशं संशोधनम्) अधिनियमः १९६३ इत्यस्य ११-अनुभागेन अन्तर्वेशितः।

2 संविधानस्य (एकचत्वारिंशत्तमं संशोधनम्) अधिनियमः १९७६ इत्यस्य २-अनुभागेन "षष्टिवर्षवयसः वा" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

3 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राजप्रमुखो वा" इति शब्दौ लोपितौ।

(भागः १४- सङ्घस्य राज्यानां च अधीनाः सेवाः)

३१७. लोकसेवायोगस्य कस्यापि सदस्यस्य अपसारणं, निलम्बनं वा- (१) (३) खण्डस्य उपबन्धानाम् अधीनं, लोकसेवायोगस्य अध्यक्षः, कश्चिद् अन्यः सदस्यः वा स्वपदात् केवलं दुराचारस्य आधारेण राष्ट्रपतेः आदेशेन, उच्चन्यायालयेन तं प्रति राष्ट्रपतिना पृच्छायां कृतायां, १४५-तमानुच्छेदस्य अनुरोधेन तदर्थं विहितप्रक्रियानुसारेण परिप्रश्नस्य अनन्तरं, यथायथं सः अध्यक्षः एतादृशः अन्यः सदस्यः वा केनापि एतादृशेन आधारेण पदात् अपसारितव्यः इति एवं कृतस्य प्रतिवेदनस्य पश्चात्, अपसारितः क्रियेत।

(२) सङ्घायोगविषये, संयुक्तायोगविषये वा राष्ट्रपतिः, राज्यायोगविषये राज्यपालः [1][***] आयोगस्य अध्यक्षम् अन्यं कञ्चित् सदस्यं वा यस्य विषये (१) खण्डस्य अनुरोधेन उच्चन्यायालयं प्रति पृच्छा कृता विद्यते, पदात् तावत् निलम्बितुं क्षमते यावद् राष्ट्रपतेः एतादृशपृच्छायाम् उच्चतमन्यायालयस्य प्रतिवेदनस्य प्राप्तेः अनन्तरम् आदेशं न ददाति।

(३) (१) खण्डे किमपि सत्यपि यथायथं लोकसेवायोगस्य अध्यक्षः अन्यः कश्चित् सदस्यः वा यदि-

(क) ऋणशोधनाशक्तः इति न्यायालयेन निर्णीयते; अथवा

(ख) स्वपदावधौ स्वपदकर्तव्येभ्यः बहिः कामपि वैतनिकीं नियोजनां धारयते; अथवा

(ग) राष्ट्रपतेः मतौ मानसस्य, शारीरस्य वा दौर्बल्यस्य हेतोः स्वपदे अनुवर्तनाय अयोग्यः भवति, तर्हि, राष्ट्रपतिः तम् अध्यक्षम् एतादृशम् अन्यं सदस्यं वा आदेशेन स्वपदात् अपसारितं कर्तुं क्षमते।

(४) यदि लोकसेवायोगस्य अध्यक्षः अन्यः वा कश्चित् सदस्यः भारतशासनेन, कस्यापि राज्यस्य शासनेन वा तत्प्रातिनिध्येन कृतायां संविदि, (कृते) समये वा, निगमितसमवायस्य, तस्य अन्यसदस्यैः सह सम्मिलितरूपं सदस्यत्वं स्यात् तदन्तरेण केनापि प्रकारेण सम्पृक्तः हितसम्बद्धः वा वर्तते, जायते वा अथवा केनापि प्रकारेण ततः लाभे, तस्माद् उत्पन्ने हिते, उपलब्धौ वा भागग्रहणं करोति, तर्हि सः (१) खण्डस्य प्रयोजनानाम् अर्थे कदाचारापराधी इति मन्येत।

३१८. आयोगस्य सदस्यानां कर्मचारिवृन्दस्य च सेवायाः प्रतिबन्धानां विषये विनियमनिर्माणस्य शक्तिः- सङ्घायोगस्य, संयुक्तायोगस्य वा विषये राष्ट्रपतिः, राज्यायोगस्य विषये तद्राज्यस्य राज्यपालः [1][***] वा विनियमैः-

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः,१९५६ इत्यस्य २९-अनुभागेन अनुसूच्या ‘‘राजप्रमुखं वा’’ इति शब्दौ लोपितौ।

(क) आयोगस्य सदस्यानां सङ्ख्या तथा तत्सेवायाः प्रतिबन्धान् अवधारयितुं; तथा

(ख) आयोगस्य कर्मचारिवृन्दस्य सदस्यानां सङ्ख्यायाः तथा तत्सेवायाः प्रतिबन्धानां सम्बन्धे उपबन्धान् प्रणेतुं क्षमते-

परन्तु कस्यापि लोकसेवायोगसदस्यस्य सेवाप्रतिबन्धेषु तस्य नियुक्तेः परं तदर्थं लाभस्य न्यूनकारिपरिवर्तनं न क्रियेत।

३१९. आयोगस्य सदस्यानाम् एतादृशसदस्यत्वस्य अवसाने पदधारणसम्बन्धे प्रतिषेधः- पदधारणस्य अवसाने-

(क) सङ्घलोकसेवायोगस्य अध्यक्षः भारतशासनस्य कस्यापि राज्यस्य शासनस्य वा अधीनं कस्याः अपि अन्यस्याः नियोजनायाः अपात्रं भवेत्,

(ख) कस्यापि राज्यस्य लोकसेवायोगस्य अध्यक्षः सङ्घलोकसेवायोगस्य अध्यक्षत्वेन अन्यसदस्यत्वेन वा अन्यथा कस्यापि अन्यस्य राज्यस्य लोकसेवायोगस्य अध्यक्षत्वेन वा नियुक्तेः पात्रं भवेत्, किन्तु भारतशासनस्य कस्यचिद् राज्यस्य शासनस्य वा अधीनं कस्याः अपि अन्यस्याः नियोजनायाः पात्रं न भवेत्;

(ग) सङ्घलोकसेवायोगस्य अध्यक्षं व्यतिरिच्य कोऽपि अन्यः सदस्यः सङ्घलोकसेवायोगस्य अध्यक्षत्वेन अथवा राज्यलोकसेवायोगस्य अध्यक्षत्वेन नियुक्तेः पात्रं भवेत्; किन्तु भारतशासनस्य, कस्यापि राज्यस्य शासनस्य वा अधीनं कस्याः अपि अन्यस्याः नियोजनायाः पात्रं न भवेत्;

(घ) कस्यापि राज्यस्य लोकसेवायोगस्य अध्यक्षं व्यतिरिच्य कोऽपि अन्यः सदस्यः सङ्घलोकसेवायोगस्य अध्यक्षत्वेन, अन्यसदस्यत्वेन वा, अथवा तस्य एव अन्यस्य वा राज्यलोकसेवायोगस्य अध्यक्षत्वेन नियुक्तेः पात्रं भवेत् किन्तु भारतशासनस्य, कस्यापि राज्यस्य शासनस्य वा अधीनं कस्याः अपि अन्यस्याः नियोजनायाः पात्रं न भवेत्।

३२०. लोकसेवायोगानां कृत्यानि- (१) सङ्घस्य सेवासु राज्यस्य सेवासु च नियुक्तीनां प्रयोजनाय परीक्षाणां सञ्चालनं क्रमशः सङ्घस्य, राज्यस्य च लोकसेवायोगस्य कर्तव्यं भवेत्।

(२) काभ्याम् अपि द्वाभ्यां राज्याभ्याम् अधिकैः वा राज्यैः एवं करणाय प्रार्थितश्चेत्, सङ्घलोकसेवायोगस्य एतद् अपि कर्तव्यं भवेत् यत् सः कासांचित् सेवानां कृते, यदर्थं विशेषार्हतावन्तः अभ्यर्थिनः अपेक्ष्यन्ते, संयुक्त-नियोजन-योजनानां निर्माणे प्रवर्तने च तयोः राज्ययोः तेषां राज्यानां या साहाय्यं कुर्यात्।

(३) यथायथं सङ्घलोकसेवायोगेन राज्यलोकसेवायोगेन वा साकम्-

(क) असैनिकसेवासु तथा असैनिकपदानां प्रयोजनेन नियोजनस्य रीतिभिः सम्बद्धेषु समस्तविषयेषु;

(ख) असैनिकसेवासु, असैनिकपदेषु च नियुक्तौ, तथा एकसेवातः अन्यस्यां सेवायां पदोन्नतौ स्थानान्तरणे च अनुस्रियमाणेषु सिद्धान्तेषु, तथा एतादृशीभ्यः नियुक्तिभ्यः पदोन्नतिभ्यः स्थानान्तरणेभ्यः वा अभ्यर्थिनाम् उपयुक्तताविषये;

(ग) भारतशासनस्य, कस्यापि राज्यस्य शासनस्य वा असैनिकरूपेण सेवा कुर्वन्तं जनं प्रभावयत्सु समस्तेषु अनुशासनविषयेषु येषु एतादृशविषयसम्बद्धानि अभ्यावेदनानि याचिकाः वा अन्तर्भूतानि,

(घ) स्वकर्तव्यपालने कृतानां, करणाय तात्पर्यितानां वा, कार्याणां सम्बन्धे तं प्रतिवादिनं कृत्वा प्रचालितासु विधिसम्बन्धिनीषु कार्यप्रवृत्तिषु स्वप्रतिरक्षार्थं तेन कृतः परिव्ययः यथायथं भारतसञ्चितनिधेः राज्यसञ्चितनिधेः वा दातव्यः इति, भारतशासनस्य, कस्यापि राज्यस्य शासनस्य वा अधीनं, भारतस्य सम्राजः वा अधीनं कस्यापि देशीयराज्यस्य शासनस्य वा अधीनम् असैनिकरूपेण सेवां कुर्वता कृतवता वा जनेन कृतायां, तत्सम्बन्धे वा कृतायाम् अध्यर्थनायाम्;

(ङ) भारतशासनस्य कस्यापि राज्यस्य वा शासनस्य अधीनं भारतसम्राजः वा अधीनं, कस्यापि देशीयराज्यस्य शासनस्य वा अधीनम् असैनिकरूपेण सेवां कुर्वता केनापि जनेन अधिगतायाः क्षतेः विषये निवृत्तिवेतनप्रदानार्थं तेन, तस्य सम्बन्धे वा कृतायां कस्यामपि अध्यर्थनायां तथा एतादृशप्रदानस्य कियान् राशिः भवेत् इति प्रश्ने च, परामर्शः क्रियेत, तथा एतस्मै एवं निर्दिष्टे कस्मिन् अपि अन्यस्मिन् विषये चापि यथायथं राष्ट्रपतिना तद्राज्यपालेन [1][***] निर्दिष्टे कस्मिन् अपि विषये परामर्शदानं लोकसेवायोगस्य कर्तव्यं भवेत्-

परन्तु अखिलभारतीयसेवानां विषये तथा सङ्घकार्यैः संसक्तानाम् अन्यसेवानां पदानां च विषये, राष्ट्रपतिः तथा कस्यापि राज्यस्य कार्यैः संसक्तानां सेवानां पदानां च विषये [2][***] राज्यपालः [3][***] तान् विषवान् विनिर्दिशतः विनियमान् निर्मातुं क्षमते येषु साधारणतया, केनापिविशेषवर्गेण वा सम्बन्धे अर्थे, कासुचित् विशेषपरिस्थितिषु वा लोकसेवायोगेन सह परामर्शः आवश्यकः न भवेत्।

(४) (३) खण्डगतं किमपि, यया १६-तमानुच्छेदस्य (४) खण्डे निर्दिष्टः कोऽपि उपबन्धः निर्मितः भवेत् तस्याः रीतेः विषये, यया ३३५- तमानुच्छेदस्य उपबन्धाः प्रभाविनः भवितुम् अर्हन्ति तस्या रीतेः विषये वा लोकसेवायोगेन सह परामर्शं न अपेक्षेत।

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राजप्रमुखेन वा" इत्येतौ शब्दौ लोपितौ।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च, "यथायथम्" इति शब्दः लोपितः।

3 उपर्युक्तस्याधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च "राजप्रमुखो वा" इत्येतौ शब्दौ लोपितौ।

(५) (३) खण्डस्य पारन्तुकस्य अधीनं, राष्ट्रपतिना अथवा कस्यापि राज्यस्य राज्यपालेन [1][***] निर्मिताः सर्वे विनियमाः तेषां निर्माणस्य पश्चात् यथासम्भवं शीघ्रं यथायथं संसदः प्रत्येकसदनस्य पुरतः अथवा तद्राज्यविधानमण्डलस्य सदनस्य प्रत्येकसदनस्य वा पुरतः, चतुर्दशभ्यः दिनेभ्यः अन्यूनकालं यावत् स्थाप्येरन्, तथा निरसनेन, संशोधनेन वा ते तादृशानाम् उपान्तरणानाम् अधीनाः भवेयुः यादृशानि, यस्मिन् ते एवं स्थाप्यन्ते तस्मिन् सत्रे संसदः उभे सदने अथवा तद्राज्यस्य विधानमण्डलस्य सदनम् उभे वा सदने कुर्युः ।

३२१. लोकसेवायोगानां कृत्यानां विस्तारस्य शक्तिः- यथायथं संसदा, कस्यापि राज्यस्य विधानमण्डलेन वा प्रणीतः कोऽपि अधिनियमः सङ्घलोकसेवायोगेन, तद्राज्यलोकसेवायोगेन वा सङ्घस्य, तद्राज्यस्य वा सेवानां विषये, तथा कस्यापि स्थानीयप्राधिकारिणः अथवा विधिना घटितस्य अन्यस्य निगमनिकायस्य अथवा कस्याः अपि सार्वजनिकसंस्थायाः सेवानां विषये अपि अतिरिक्तकृत्यानां प्रयोगार्थम् उपबन्धं निर्मातुं क्षमते ।

३२२. लोकसेवायोगानां व्ययाः- सङ्घस्य कस्यापि राज्यस्य वा लोकसेवायोगस्य व्ययाः आयोगस्य सदस्येभ्यः कर्मचारिवृन्देभ्यः वा, तेषां सम्बन्धेन वा सन्दीयमानैः कैश्चित् वेतनैः, भक्तैः, निवृत्तिवेतनैश्च सह एव यथायथं भारतसञ्चितनिधौ तद्राज्यसञ्चितनिधौ वा भारिताः भवेयुः ।

३२३. लोकसेवायोगानां प्रतिवेदनानि- (१) सङ्घायोगस्य इदं कर्तव्यं भवेत् यत् सः तेन आयोगेन कृतस्य कार्यस्य विषये प्रतिवर्षं प्रतिवेदनं राष्ट्रपतिम् उपस्थापयेत्; तादृशस्य प्रतिवेदनस्य प्राप्तौ च राष्ट्रपतिः तेषां विषयाणां सम्बन्धे, ते चेद् भवन्ति, येषु आयोगस्य परामर्शः न स्वीकृतः आसीत् तादृश्याः अस्वीकृतेः कारणानि स्पष्टतया ज्ञापनेन सहितां तस्य प्रतिवेदनस्य प्रतिलिपिं संसदः प्रत्येकसदनस्य पुरतः स्थापयेत् ।

(२) राज्यायोगस्य कर्तव्यं भवेद् यत् सः तेन आयोगेन कृतस्य कार्यस्य विषये प्रतिवर्षं प्रतिवेदनं राज्यस्य राज्यपालम् [1][***] उपस्थापयेत्, तथा संयुक्तायोगस्य कर्तव्यं भवेत् यत् सः तेषां राज्यानां प्रत्येकं राज्यस्य येषाम् आवश्यकतानां पूर्तिः संयुक्तायोगेन क्रियते, राज्यपालं [1][***] तद्राज्यसम्बन्धे आयोगेन कृतस्य कार्यस्य विषये प्रतिवर्षं प्रतिवेदनम् उपस्थापयेत् तथा एनयोः प्रत्येकावस्थायां तादृशस्य प्रतिवेदनस्य प्राप्तौ [2][***] राज्यपालः [3][***] तेषां विषयाणां सम्बन्धे, ते चेत् भवन्ति, येषु आयोगस्य परामर्शः न स्वीकृतः आसीत्, तादृश्याः अस्वीकृतेः कारणानि स्पष्टतया ज्ञापनेन सहितां तस्य प्रतिवेदनस्य प्रतिलिपिं राज्यस्य विधानमण्डलस्य पुरतः स्थापयेत् ।

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राजप्रमुखेन वा" इत्येतौ शब्दौ लोपितौ ।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च, "यथायथम्" इति शब्दः लोपितः ।

3 उपर्युक्तस्याधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च "राजप्रमुखो वा" इत्येतौ शब्दौ लोपितौ ।

[1][भागः १४क
अधिकरणानि

३२३क. प्रशासनाधिकरणानि- (१) संसद् विधिना सङ्घस्य, कस्यापि राज्यस्य, अथवा राज्यक्षेत्राभ्यन्तरे भारतशासनस्य नियन्त्रणाधीनस्य कस्यापि स्थानीयस्य अन्यस्य वा प्राधिकरणरस्य अथवा भारतशासनस्य स्वामित्वस्य नियन्त्रणस्य वा अधीनस्थस्य कस्यापि निगमस्य कार्यैः सम्बद्धासु लोकसेवासु, सम्बद्धेषु पदेषु वा नियुक्तानां जनानां नियोजनस्य, सेवाप्रतिबन्धानां च सम्बन्धे विवादानां परिवादनां च प्रशासनाधिकरणैः न्यायनिर्णयनाय विचारणायै च उपबन्धयितुं क्षमते।

(२) (१) खण्डाधीनं निर्मितः विधिः-

(क) सङ्घार्थम् एकस्य प्रशासनाधिकरणस्य स्थापनाय, तथा प्रत्येकराज्यार्थम् अथवा द्वयोः राज्ययोः अर्थम्, अधिकानां राज्यानां वा अर्थं पृथक् पृथक् प्रशासनाधिकरणस्य स्थापनाय उपबन्धयितुम्;

(ख) उक्ताधिकरणानां प्रत्येकम् अधिकरणं याः अधिकारितां याः शक्तीश्च (यासु अवमाने दण्डप्रदानस्य शक्तिः अन्तर्भूता) यं प्राधिकारं प्रयोक्तुं क्षमते तं विनिर्देष्टुम्;

(ग) उक्ताधिकरणैः अनुसरणीयप्रक्रियायाः कृते उपबन्धान् (येषु परिसीमाविषयकाः उपबन्धाः साक्ष्यनियमाश्च अन्तर्भूताः) विधातुं;

(घ) (१) खण्डे निर्दिष्टानां विवादानां परिवादानां च सम्बन्धे १३६-तमनुच्छेदाधीनम् उच्चतम-न्यायालयस्य अधिकारितां विहाय, अन्येषां समस्तानां न्यायालयानाम् अधिकारिताम् अपवर्जयितुम्;

(ङ) तादृशाय प्रत्येकं प्रशासनाधिकरणाय, तादृशस्य अधिकरणस्य स्थापनायाः अव्यवहितपूर्वं कस्यापि न्यायालयस्य अन्यस्य प्राधिकरणस्य वा पुरतः लम्बितानां केषामपि विवादविषयाणाम् अन्तरणाय उपबन्धयितुं यदि येषु हेतुकेषु तादृशाः विवादविषयाः आधारिताः सन्ति ते हेतुकाः तदधिकरणस्य स्थापनायाः पश्चात् समुद्भूताः अभविष्यन् तर्हि ते तादृशस्य अधिकरणस्य अधिकारितान्तर्गताः अभविष्यन्;

(च) राष्ट्रपतिना ३७१घ अनुच्छेदस्य (३) खण्डाधीन प्रदत्तानाम् आदेशानां निरसनं, संशोधनं च कर्तुं क्षमेत;

(छ) तादृशान् अनुपूरकान्, आनुषङ्गिकान्, पारिणामिकान् वा उपबन्धान् (येषु प्रशुल्कविषयकोपबन्धाः अन्तर्भूताः सन्ति) अन्तर्वेष्टुम् यादृशान् संसद् तादृशानाम् अधिकरणानां प्रभाविरूपेण कार्यकरणाय अथवा तेभिः विवादेषु शीघ्रं व्यवस्थादानाय अथवा तेषाम् आदेशानां प्रवर्तनाय आवश्यकान् मन्यते, क्षमते।

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ४५-अनुभागेन अन्तर्वेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(३) एतदनुच्छेदस्य उपबन्धाः अस्य संविधानस्य केषुचित् अन्येषु उपबन्धेषु तथा तदानीं प्रवर्तमानेषु अन्येषु विधिषु किमपि सत्यपि प्रभाविनः भवेयुः।

३२३ख. अन्यविषयाणां कृते अधिकरणानि-

(१) समुचितविधानमण्डलं विधिना तादृशानां विवादानां परिवादानाम्, अपराधानां वा अधिकरणैः न्यायनिर्णयनाय विचारणाय वा उपबन्धयितुं क्षमते ये (२) खण्डे विनिर्दिष्टैः विषयैः तेषाम् अन्यतमैः वा सम्बद्धाः सन्ति, येषां च सम्बन्धे तादृशं विधानमण्डलं विधिं प्रणेतुं शक्तिं भजते।

(२) (१) खण्डे निर्दिष्टाः विषयाः निम्नलिखिताः सन्ति; तद्यथा-

(क) कस्यापि करस्य उद्ग्रहणं, निर्धारणं, संङ्ग्रहणं, प्रवर्तनं च;

(ख) विदेशीयमुद्राः, सीमाशुल्काः, सीमान्तपारम् आयाताः निर्याताश्च;

(ग) ओद्यौगिकविवादाः, श्रमविवादाश्च;

(घ) ३१क अनुच्छेदे परिभाषितायाः कस्याः अपि सम्पदः अथवा तत्सम्बन्धिनाम् अधिकाराणां राज्यद्वारा अर्जनेन, तादृशानाम् अधिकाराणां समाप्त्या, उपान्तरेण वा, कृषिभूमौ अधिकतमसीमानिर्धारणेन अथवा अन्येन केनापि प्रकारेण भूमिसुधारणा;

(ङ) नगरसम्पत्तौ अधिकतमसीमानिर्धारणम्;

(च) संसदः प्रत्येक सदनस्य, कस्यापि राज्यस्य विधानमण्डलस्य सदनस्य सदनयोः वा निर्वाचनम्, किन्तु ३२९-तमानुच्छेदे ३२९अ-तमानुच्छेदे वा निर्दिष्टविषयान् विहाय;

(छ) खाद्यपदार्थानां (येषु खाद्यतैलबीजानि, खाद्यतैलानि च अन्तर्भूतानि) तथा तादृशानाम् अन्य-भाण्डानाम् उत्पादनम्, उपाप्तिः, प्रदायः वितरणं च यानि राष्ट्रपतिः लोकाधिसूचनया एतदनुच्छेदस्य प्रयोजनानां कृते आवश्यकभाण्डानि इति घोषयेत्; तादृशानां, भाण्डानां मूल्यनियन्त्रणं च;

[1][(ज) भाटकं, तस्य विनियमनं तथा नियन्त्रणं तथा च भाटकिताविषयकविवादाः यदन्तर्गते गृहस्वामीनां भाटकानां च अधिकारः स्वामित्वं हितं च सन्ति;]

[2][(झ)] उपखण्डः (क) इत्यतः उपखण्ड [3][(ज)] इत्यत्र कस्मिन् अपि उपखण्डे विनिर्दिष्टविषयैः सम्बद्धानां विधीनां विरुद्धम् अपराधाः तेषां विषयाणां कस्यापि विषयस्य सम्बन्धे प्रशुल्काश्च;

---

1 संविधानस्य (पञ्चसप्ततितमं संशोधनम्) अधिनियमः, १९९३ वर्षस्य २-अनुभागेन (१५-५-१९९४ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

2 संविधानस्य (पञ्चसप्ततितमं संशोधनम्) अधिनियमः, १९९३ वर्षस्य २-अनुभागेन (१५-५-१९९४ दिनाङ्कात् प्रवर्तमानप्रभावेण) उपखण्डः (झ) इत्यमुम् उपखण्डः (ञ) इत्यस्मिन् रूपे पुनः-अक्षराङ्कितः।

3 संविधानस्य (पञ्चसप्ततितमं संशोधनम्) अधिनियमः, १९९३ वर्षस्य २-अनुभागेन (१५-५-१९९४ दिनाङ्कात् प्रवर्तमानप्रभावेण) (छ) स्थाने संनिवेशितः।

[1][(ञ)] उपखण्डः (क) इत्यतः उपखण्डः [2][(झ)] इत्यत्र कस्मिन् अपि उपखण्डे विनिर्दिष्टविषयेभ्यः केषाम् अपि विषयाणाम् आनुषङ्गिकः कोऽपि विषयः;

(३) (१) खण्डाधीनं प्रणीतः विधिः-

(क) अधिकरणानां पदानुक्रमस्थापनाम् उपबन्धयितुम्;

(ख) उक्ताधिकरणानां प्रत्येकम् अधिकरणं याम् अधिकारितां, याः शक्तीः (यासु अवमाने दण्ड प्रदानस्य शक्तिः अन्तर्भूता), यं प्राधिकारं च प्रयोक्तुं क्षमते तान् विनिर्देष्टुम्;

(ग) उक्ताधिकरणैः अनुसरणीयप्रक्रियायाः कृते उपबन्धान् (येषु परिसीमाविषयकोपबन्धाः, साक्ष्यनियमाश्च अन्तर्भूताः) विधातुम्;

(घ) उक्ताधिकरणानाम् अधिकारितान्तर्भूतानां विषयाणां सम्बन्धे, १३६-तमानुच्छेदाधीनम् उच्चतमन्यायालयस्य अधिकारितां विहाय, अन्येषां समस्तानां न्यायालयानाम् अधिकारिताम् अपवर्जयितुम्;

(ङ) तादृशाय प्रत्येकम् अधिकरणाय, तादृशाधिकरणस्य स्थापनायाः अव्यवहितपूर्वं कस्यापि, न्यायालयस्य, अन्यस्य प्राधिकरणस्य वा पुरतः लम्बितानां केषामपि विवादविषयाणाम् अन्तरणाय उपबन्धयितुं, यदि येषु हेतुकेषु तादृशाः विवादविषयाः आधारिताः सन्ति ते हेतुकाः तदधिकरणस्य स्थापनायाः पश्चात् समुद्भूताः अभविष्यन् तर्हि ते तादृशस्य अधिकरणस्य अधिकारितान्तर्गताः अभविष्यन्;

(च) तादृशान् अनुपूरकान्, आनुषङ्गिकान्, पारिणामिकान् वा उपबन्धान् (येषु प्रशुल्कविषयकोपबन्धाः अन्तर्भूताः) अन्तर्वेष्टुम्, यादृशान् संसत् तादृशानाम् अधिकरणानां प्रभाविरूपेण कार्यकरणाय, अथवा तेऽपि विवादेषु शीघ्रं व्यवस्थादानाय अथवा तेषाम् आदेशानां प्रवर्तनाय आवश्यकान् मन्यते, क्षमते।

(४) एतदनुच्छेदस्य उपबन्धाः अस्य संविधानस्य केषुचित् अन्येषु उपबन्धेषु, तथा तदानीं प्रवर्तमानेषु अन्येषु विधिषु किमपि सत्यपि प्रभाविनः भवेयुः।

स्पष्टीकरणम्-अस्मिन् अनुच्छेदे "समुचितविधानमण्डलम्" इत्येतेन संसद्, यथायथं वा एतादृशानां विषयाणां सम्बन्धे एकादशभागस्य उपबन्धानाम् अनुसारं विधिप्रणयनक्षमं राज्यविधानमण्डलं च अभिप्रेयते।

---

[1] संविधानस्य (पञ्चसप्ततितमं संशोधनम्) अधिनियमः, १९९३ वर्षस्य २-अनुभागेन (१५-५-१९९४ दिनाङ्कात् प्रवर्तमानप्रभावेण) उपखण्डः (ज) तथा (झ) इत्यमू उपखण्डः (झ) तथा उपखण्डः (ञ) इत्यनयोः रूपयोः पुनः-अक्षराङ्कितौ।

[2] संविधानस्य (पञ्चसप्ततितमं संशोधनम्) अधिनियमः, १९९३ वर्षस्य २-अनुभागेन (१५-५-१९९४ दिनाङ्कात् प्रवर्तमानप्रभावेण) (ज) स्थाने संनिवेशितः।

भागः १५

निर्वाचनानि

३२४. निर्वाचनानाम् अधीक्षणं, निदेशनं, नियन्त्रणं च निर्वाचनायोगे निधेयम्- (१) संसदि प्रत्येकराज्यस्य विधानमण्डलाय च समस्तानां निर्वाचनानां कृते निर्वाचकनामावलीनां परिकल्पनस्य, तथा तेषां निर्वाचनानां सञ्चालनस्य तथा राष्ट्रपतेः, उपराष्ट्रपतेश्च पदयोः कृते एतत्संविधानस्य अनुरोधेन जातयोः निर्वाचनयोः अधीक्षणं, निदेशनं, नियन्त्रणं च, [1][***] एकस्मिन् आयोगे निहितानि भवेयुः (यश्च अस्मिन् संविधाने निर्वाचनायोगः इत्येवं निर्दिश्यते)।

(२) निर्वाचनायोगः मुख्यनिर्वाचनायुक्तेन, तथा यदि ते भवन्ति, अन्य निर्वाचनायुक्तानां तादृश्या सङ्ख्यया यादृशीं राष्ट्रपतिः काले काले नियतीकुर्यात्, भवेत्; तथा च मुख्यनिर्वाचनायुक्तस्य, अन्येषां निर्वाचनायुक्तानां च नियुक्तिः संसदा तदर्थं प्रणीतस्य कस्यापि विधेः उपबन्धानाम् अधीनं राष्ट्रपतिना क्रियेत।

(३) कोऽपि अन्यः निर्वाचनायुक्तः यदि एवं नियुज्यते तर्हि मुख्यनिर्वाचनायुक्तः तस्य निर्वाचनायोगस्य अध्यक्षत्वेन कार्यं कुर्यात्।

(४) लोकसभायाः तथा प्रत्येकराज्यस्य विधानसभायाः कृते प्रत्येकसाधारणनिर्वाचनात् पूर्वं, तथा विधानपरिषद्वतः प्रत्येकराज्यस्य विधानपरिषदः कृते प्रथमसाधारणनिर्वाचनात् पूर्वं तदुत्तरं च प्रत्येकद्वैवार्षिकनिर्वाचनात् पूर्वं, राष्ट्रपतिः निर्वाचनायोगेन सह परामर्शं कृत्वा (१) खण्डेन निर्वाचनायोगाय प्रदत्तानां कृत्यानां पालने आयोगस्य साहाय्यार्थं, तादृशान् प्रादेशिकान् आयुक्तान् नियोक्तुं क्षमते, यादृशान् सः आवश्यकान् मन्येत।

(५) संसदा प्रणीतस्य कस्यापि विधेः उपबन्धानाम् अधीनं, निर्वाचनायुक्तानां, प्रादेशिकायुक्तानां च सेवायाः प्रतिबन्धाः पदावधिश्च तादृशाः भवेयुः यादृशान् राष्ट्रपतिः नियमद्वारा अवधारयेत्-

परन्तु मुख्यनिर्वाचनायुक्तः स्वपदात् तादृशैः कारणैः तादृश्या रीत्या च विना न अपसारितः भवेत् यादृशैः कारणैः यादृश्या रीत्या च उच्चतमन्यायालयस्य न्यायाधीशः अपसारयितुं शक्यते, तथा मुख्यनिर्वाचनायुक्तस्य नियुक्तेः परं तस्य सेवायाः प्रतिबन्धेषु तस्य लाभस्य न्यूनीकारकं किमपि परिवर्तनं न क्रियेत;

---

[1] संविधानस्य (एकोनविंशतितमं संशोधनम्) अधिनियमः, १९६६ इत्यस्य २-अनुभागेन “संसदः राज्यानां विधानमण्डलानां च कृते निर्वाचनेभ्यः उद्भूतानां तैः सम्बद्धानां वा सन्देहानां विवादानां च निर्णयार्थं निर्वाचनन्यायाधिकरणस्य नियुक्त्या सहैव” इत्येते शब्दाः लोपिताः।

अपरं च अन्यः कोऽपि निर्वाचनायुक्तः प्रादेशिकायुक्तः वा मुख्यनिर्वाचनायुक्तस्य पुरःप्रशंसनेन एव पदात् अपसारितः भवेत्, नान्यथा।

(६) निर्वाचनायोगेन यदा एवं प्रार्थितः भवति तदा राष्ट्रपतिः, कस्यापिराज्यस्य राज्यपालः वा [1][***] निर्वाचनायोगाय, प्रादेशिकायुक्ताय वा तादृशं कर्मचारिवृन्दं प्राप्यं कारयेत् यादृशं (१) खण्डेन निर्वाचनायोगाय प्रदत्तानां कृत्यानां निर्वहणार्थम् आवश्यकं भवेत्।

३२५. धर्मस्य, मूलवंशस्य, जातेः, लिङ्गस्य वा आधारेण कस्यापि जनस्य निर्वाचननामावल्याम् अन्तर्भावार्थम् अपात्रत्वस्य अभावः, अथवा विशेषनिर्वाचकनामावल्याम् अन्तर्भावार्थम् अध्यर्थनायाः निषेधः - संसदः अन्यतरसदनार्थम्, अथवा कस्यापि राज्यस्य विधानमण्डलस्य सदनार्थम्, अन्यतरसदनार्थं वा, निर्वाचनस्य हेतोः कृते प्रत्येकप्रादेशिकनिर्वाचनक्षेत्राय एका साधारणनिर्वाचकनामावलिः भवेत्, तथा केवलं धर्मस्य, मूलवंशस्य जाते, लिङ्गस्य आधारेण वा एतेषाम् अन्यतमस्य वा आधारेण, कोऽपि जनः एतादृश्यां कस्यामपि नामावल्याम् अन्तर्भावस्य अपात्रं न भवेत्, अथवा एतादृशाय कस्मै अपि निर्वाचनक्षेत्राय, कस्यामपि विशेषनिर्वाचकनामावल्याम् अन्तर्भावार्थम् अध्यर्थनां न कुर्यात्।

३२६. लोकसभायै, राज्यानां विधानसभाभ्यश्च निर्वाचनानां प्राप्तवयस्कमताधिकाराधारत्वम्- लोकसभायै, प्रत्येकराज्यस्य विधानसभायै च निर्वाचनानि प्राप्तवयस्कमताधिकारस्य आधारेण भवेयुः, अर्थात् प्रत्येकजनः यः भारतस्य नागरिकः वर्तते, यश्च तादृशे दिनाङ्के, यादृशः समुचितविधानमण्डलेन प्रणीतेन केनापि विधिना तदधीनं वा एतदर्थं नियतः क्रियेत, [2][अष्टादशवर्षवयसः] अन्यूनः वर्तते, तथा अन्यथा एतत्संविधानस्य, समुचितविधानमण्डलेन प्रणीतस्य कस्यापि विधेः वा अधीनम्, अनिवासस्य, चित्तविकृतेः, अपराधस्य, भ्रष्टस्य या अवैधस्य वा आचरणस्य आधारेण निरर्हीकृतः न विद्यते, एतादृशे कस्मिन् अपि निर्वाचने मतदातृरूपेण पञ्जीबद्धः भवितुं स्वत्ववान् भवेत्।

३२७. विधानमण्डलेभ्यः निर्वाचनानां विषये उपबन्धनिर्माणार्थं संसदः शक्तिः- एतत्संविधानस्य उपबन्धानाम् अधीनं संसद्, काले काले, विधिना संसदः अन्यतरसदनाय, अथवा कस्यापि राज्यस्य विधानमण्डलस्य सदनाय, अन्यतरसदनाय वा निर्वाचनैः संसक्तानां सम्बद्धानां वा सर्वेषां विषयाणां सम्बन्धे, येषु निर्वाचननामावलीनां परिकल्पनं, निर्वाचनक्षेत्राणां परिसीमनं, तथा तादृशस्य सदनस्य, तादृशानां सदनानां वा सम्यग् घटनस्य सम्पादनार्थम् आवश्यकाः अन्ये च सर्वे विषयाः अन्तर्भवन्ति, उपबन्धं निर्मातुं क्षमते।

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या "राजप्रमुखो वा" इत्येतौ शब्दौ लोपितौ।

2 संविधानस्य (एकषष्टितमं संशोधनम्) अधिनियमः, १९८८ वर्षस्य २-अनुभागेन (२८-३-१९८९ दिनाङ्कात् प्रवर्तमानप्रभावेण) "एकविंशतिवर्षवयसः" इत्यस्य स्थाने संनिवेशितम्।

३२८. कस्यचिद् राज्यविधानमण्डलस्य तद्विधानमण्डलाय निर्वाचनानां सम्बन्धे उपबन्धनिर्माणस्य शक्तिः - एतत्संविधानस्य उपबन्धानाम् अधीनं तथा यावत् संसदा तदर्थम् उपबन्धः न निर्मितः भवति तावत्, कस्यापिराज्यस्य विधानमण्डलं काले काले, विधिना तद्राज्यविधानमण्डलस्य सदनार्थम्, अन्यतरसदनार्थं वा निर्वाचनैः संसक्तानां सम्बद्धानां वा सर्वेषां विषयाणां सम्बन्धे, यस्मिन् निर्वाचननामावलीनां परिकल्पनं, तथा तादृशसदनस्य तादृशानां सदनानां वा सम्यग् घटनस्य सम्पादनार्थम् आवश्यकाः अन्ये च सर्वे विषयाः अन्तर्भवन्ति, उपबन्धं निर्मातुं क्षमते।

३२९. निर्वाचनविषयेषु न्यायालयानां हस्तक्षेपस्य निषेधः- [1][एतस्मिन् संविधाने किमपि सत्यपि [2][***]

(क) ३२७-तमानुच्छेदस्य, ३२८-तमानुच्छेदस्य वा अधीनं निर्मितस्य, निर्मातुम् अभिप्रेतस्य वा, निर्वाचनक्षेत्राणां परिसीमनेन, अथवा एतादृशेषु निर्वाचनक्षेत्रेषु स्थानानां भागकल्पनया सम्बद्धस्य कस्यापि विधेः मान्यता कस्मिन् अपि न्यायालये प्रश्नगता न क्रियेत;

(ख) एतादृशं प्राधिकारिणं प्रति एतादृश्या रीत्या च यथा समुचितविधानमण्डलेन निर्मितेन विधिना तदधीनं वा उपबन्धितं भवेत्, उपस्थापितया निर्वाचनयाचिकया एव संसदः अन्यतरसदनस्य कृते अथवा कस्यापि राज्यस्य विधानमण्डलस्य सदनस्य अन्यतरसदनस्य वा कृते किमपि निर्वाचनं प्रश्नगतं क्रियेत, नान्यथा।

[3]**३२९क.** *[प्रधानमन्त्रिणः अध्यक्षस्य च सम्बन्धे संसदे निर्वाचनानां विषये विशेषोपबन्धः] संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३६-अनुभागेन निरसितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।*

---

1 संविधानस्य (नवत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य ३-अनुभागेन केभ्यश्चित् शब्देभ्यः प्रति एते शब्दाः संनिवेशिताः।

2 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३५-अनुभागेन "किन्तु ३२९अ अनुच्छेदस्य उपबन्धानाम् अधीनम्" इत्येते शब्दाः लोपिताः (२०-०६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (नवत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य ४-अनुभागेन अन्तर्वेशितः।

भागः १६

कतिपयैः वर्गैः सम्बद्धाः विशेषोपबन्धाः

३३०. अनुसूचितजातीनाम्, अनुसूचितजनजातीनां च कृते लोकसभायां स्थानानाम् आरक्षणम्- (१) लोकसभायाम्-

(क) अनुसूचितजातीनां कृते;

[1][(ख) असमस्य स्वशासि-मण्डलानाम् अनुसूचित-जनजातीः वर्जयित्वा अन्य अनुसूचित-जनजातिभ्यः, तथा]

(ग) असमस्य स्वशासिमण्डलानाम् अनुसूचितजनजातीनां कृते च, स्थानानि आरक्षितानि भवेयुः।

(२) (१) खण्डस्य अधीनम् अनुसूचितजातीनां कृते, अनुसूचितजनजातीनां वा कृते कस्मिंश्चिद् अपि राज्ये, [2][सङ्घराज्यक्षेत्रे वा] आरक्षितानां स्थानानां सङ्ख्या लोकसभायां तस्मै राज्याय, [2][सङ्घराज्यक्षेत्राय वा] भागकल्पनायां दत्तानां स्थानानां समस्तसङ्ख्यापेक्षया यथाशक्यं सः एव अनुपातः भवेत्, यः यथायथं तस्य राज्यस्य [2][सङ्घराज्यक्षेत्रस्य वा] अनुसूचितजातीनाम् अथवा तस्य राज्यस्य [2][सङ्घराज्यक्षेत्रस्य वा] तद्राज्यभागस्य, [2][तत्सङ्घराज्यक्षेत्रभागस्य वा] अनुसूचितजनजातीनां, यासां सम्बन्धे स्थानानि एवम् आरक्षितानि भवन्ति, जनसङ्ख्यायाः अनुपात: तद्राज्यस्य [2][तत्सङ्घराज्यक्षेत्रस्य वा] समस्तजनसङ्ख्यापेक्षया वर्तते।

[3][(३) (२) खण्डे किमपि सत्यपि लोकसभायाम् असमस्य स्वशासिमण्डलानाम् अनुसूचितजनजातीनां कृते आरक्षितानां स्थानानां सङ्ख्यायाः अनुपातः तस्मै राज्याय भागकल्पनया प्रदत्तानां स्थानानां समस्तसङ्ख्यायाः अनुपातात् न्यूनः न भवेत्, यः अनुपातः उक्तानां स्वशासिमण्डलानाम् अनुसूचितजनजातीनां जनसङ्ख्यायाः तद्राज्यस्य समस्तजनसङ्ख्यापेक्षया वर्तते।]

[4][*स्पष्टीकरणम्*- अस्मिन् अनुच्छेदे, ३३२-तमानुच्छेदे च "जनसङ्ख्या" शब्दस्य अर्थे सा जनसङ्ख्या ग्राह्या या अभिनिश्चिता तस्याम् अन्तिमायां पूर्ववृत्तायां जनगणनायां यस्याः सुसम्बद्धाः अङ्काः प्रकाशिताः-

परन्तु एतस्मिन् *स्पष्टीकरणे* अन्तिमायां पूर्ववृत्तायां जनगणनायां यस्याः सुसम्बद्धाः अङ्काः प्रकाशिताः इति कथनं प्रति निर्देशस्य तावत् [5][२००१ इति]-वर्षस्य जनगणनां प्रति निर्देशः अस्ति इति अर्थः ग्राह्यः यावत् [6][२०२६ इति]-वर्षानन्तरं कृतायाः प्रथमायाः जनगणनायाः सुसम्बद्धाः अङ्काः प्रकाशिताः न भवेयुः।]

---

1 संविधानस्य (एकपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८४, वर्षस्य २-अनुभागेन (१६-६-१९८६ दिनाङ्कात् प्रवर्तमानप्रभावेण) उपखण्डः (ख) इत्यस्य स्थाने संनिवेशितः।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च अन्तर्वेशितः।

3 संविधानस्य (एकत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७३ इत्यस्य ३-अनुभागेन अन्तर्वेशितः।

4 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ४७-अनुभागेन अन्तर्वेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण।)

5 संविधानस्य (सप्ताशीतितमं संशोधनम्) अधिनियमः, २००३ वर्षस्य ५-अनुभागेन (२२-६-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) "१९९१" इत्यस्य स्थाने संनिवेशितः।

6 संविधानस्य (चतुरशीतितमं संशोधनम्) अधिनियमः, २००१ वर्षस्य ६-अनुभागेन (२१-२-२००२ दिनाङ्कात् प्रवर्तमानप्रभावेण) केषाञ्चित् शब्दानां स्थाने संनिवेशितः।

(भागः १६-कतिपयैः वर्गैः सम्बद्धाः विशेषोपबन्धाः)

[1][**३३०क. लोकसभायां महिलानां कृते स्थानानाम् आरक्षणम्-**

(१) लोकसभायां महिलानां कृते स्थानानि आरक्षितानि भवेयुः।

(२) यथाशक्यम्, अनुच्छेदः ३३० इत्यस्य खण्डः (२) इत्यस्य अधीने सति यत् अनुसूचितजाति-जनजातीनां कृते स्थानानि आरक्षितानि सन्ति ततः स्थानानां तृतीयांशः महिलानां कृते आरक्षितः भवेत्।

यथाशक्यम्, लोकसभायाः सकलस्थानानां येषां निर्वाचनं साक्षान्निर्वाचनेन विहितः (यानि च स्थानानि अनुसूचितजाति-जनजातिमहिलानां कृते आरक्षितानि सन्ति तानि सम्मेल्य) अस्ति, तस्य तृतीयांशः महिलानां कृते आरक्षितः भवेत्।]

३३१. लोकसभायम् आङ्ग्लभारतीयसमुदायस्य प्रतिनिधित्वम्- ८१-तमानुच्छेदे किमपि सत्यपि, लोकसभायाम् आङ्ग्लभारतीयसमुदायस्य प्रतिनिधित्वं पर्याप्तं न अस्ति इति राष्ट्रपतिः मन्यते चेत् तर्हि सः लोकसभायां तस्य समुदायस्य जनद्वयात् अनधिकं नामनिर्देशितं कर्तुं क्षमते।

३३२. राज्यानां विधानसभासु अनुसूचितजातीनाम्, अनुसूचितजनजातीनां च कृते स्थानानाम् आरक्षणम्- (१) [2][***] प्रत्येकराज्यस्य विधानसभायाम् अनुसूचितजातीनां कृते तथा च [3][असमस्य स्वशासि-मण्डलानाम् अनुसूचित-जनजातीः वर्जयित्वा अन्य अनुसूचितजनजातिभ्यः], तथा अन्यासां जनजातीनां कृते स्थानानि आरक्षितानि भवेयुः।

(२) असमराज्यस्य विधानसभायां स्वशासिमण्डलानां कृते अपि स्थानानि आरक्षितानि भवेयुः।

(३) (१) खण्डस्य अधीनं कस्यचिद् अपि राज्यस्य विधानसभायाम् अनुसूचितजातीनां कृते वा अनुसूचितजनजातीनां कृते वा आरक्षितस्थानानां सङ्ख्यायाः तस्यां सभायां स्थानानां समस्त-सङ्ख्यापेक्षया यथाशक्यं सः एव अनुपातः भवेत् यः यथायथं तस्य राज्यस्य अनुसूचितजातीनाम् अथवा तस्य राज्यस्य तद्राज्यभागस्य वा अनुसूचितजनजातीनां यासां सम्बन्धे स्थानानि एवम् आरक्षितानि विद्यन्ते, जनसङ्ख्यायाः अनुपातः तस्य राज्यस्य समस्तजन-सङ्ख्यापेक्षया वर्तते।

[4][(३क) (३) इति खण्डे किमपि सत्यपि, [5][२०२६ ख्रिष्टाब्दात्] परं प्रथमजनगणनाधारेण, १७० इत्यस्य अनुच्छेस्य अधीनम्, अरुणाचलप्रदेश-मेघालय-मिजोरम-नागालैण्डराज्यानां विधानसभासु स्थानानां सङ्ख्यायाः पुनः समायोजने प्रभाविते यानि स्थानानि कस्यचित् राज्यस्य विधानसभायाम् अनुसूचितजनजातिभ्यः आरक्षितानि भवेयुः, तानि-

---

1 संविधानस्य (षडधिकैकशततमं संशोधनम्) अधिनियमः, २०२३ वर्षस्य ३-अनुभागेन (दिनाङ्कः सूच्यिष्यते) अन्तर्वेशितः।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च प्रथमानुसूच्याः (क) भागे, (ख) भागे वा उल्लिखितस्य इत्येते" शब्दाः लोपिताः।

3 संविधानस्य (एकपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८४, वर्षस्य २-अनुभागेन (१६-६-१९८६ दिनाङ्कात् प्रवर्तमानप्रभावेण) उपखण्डः (ख) इत्यस्य स्थाने संनिवेशितः।

4 संविधानस्य (सप्तपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८७ वर्षस्य ३-अनुभागेन (२१-९-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितम्।

5 संविधानस्य (चतुरशीतितमं संशोधनम्) अधिनियमः, २००१ वर्षस्य ७-अनुभागेन (२१-२-२००२ दिनाङ्कात् प्रवर्तमानप्रभावेण) "२०००"इत्यस्य स्थाने संनिवेशितम्।

(क) यदि संविधानस्य (सप्तपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८७ इत्यस्य प्रवर्तमाने दिनाङ्के एतादृशस्य राज्यस्य विद्यमानविधानसभायां (या अस्मिन् खण्डे इतः परं विद्यमानविधानसभा इति उक्ता) सर्वाणि स्थानानि अनुसूचितजनजातीनां सदस्यैः धार्यन्ते चेत्, एकं स्थानं विहाय सर्वाणि स्थानानि भवेयुः; तथा

(ख) अवस्थान्तरे, तावन्ति स्थानानि भवेयुः, येषां सङ्ख्यायाः अनुपातः, स्थानानां सकलसङ्ख्यायाः तदनुपातात् न्यूनः न भवेत्, यः विद्यमानविधानसभायाम् अनुसूचितजनजातीनां सदस्यानाम् (उक्तदिनाङ्के यथाविद्यमानं) सङ्ख्यायाः अनुपातः विद्यमानविधानसभायां स्थानानां सकलसङ्ख्यया स्यात्।]

[1][(३ख) (३) इति खण्डे किमपि सत्यपि, [2][२०२६] ख्रिष्टाब्दात् परं प्रथमजनगणनाधारेण, १७० इत्यस्य अनुच्छेस्य अधीनम्, त्रिपुराराज्यस्य विधानसभायां स्थानानां सङ्ख्यायाः पुनः समायोजने प्रभाविते सति यानि स्थानानि तस्यां विधानसभायाम् अनुसूचितजनजातिभ्यः आरक्षितानि भवेयुः, तानि तावन्ति स्थानानि भवेयुः यस्याः सङ्ख्यायाः अनुपातः स्थानानां सकलसङ्ख्यायाः तेन अनुपातेन न्यूनं न भवेत् यत् विद्यमानविधानसभायाम् अनुसूचितजनजातीनां सदस्यानां, संविधानस्य (द्विसप्ततितमं संशोधनम्) अधिनियमः, १९९२ इत्यस्य प्रवर्तमाने दिने यथाविद्यमानसङ्ख्यायाः अनुपातः उक्ते दिने तस्यां विधानसभायां स्थानानां सकलसङ्ख्यया अस्ति।]

(४) असमराज्यस्य विधानसभायां कस्यापि स्वशासिमण्डलस्य कृते आरक्षितानां स्थानानां सङ्ख्यायाः तस्यां सभायां स्थानानां समस्त सङ्ख्यापेक्षया अनुपातः तस्मात् अनुपातात् न्यूनः न भवेत् यः अनुपात: मण्डलस्य जनसङ्ख्यायाः तस्य राज्यस्य समस्तजनसङ्ख्यापेक्षया वर्तते।

(५) [3][***] असमराज्यस्य कस्यापि स्वशासिमण्डलस्य कृते आरक्षितस्थानानां निर्वाचनक्षेत्रेषु तन्मण्डलबहिर्वर्ति किमपि क्षेत्रं समाविष्टं न भवेत्।

(६) कोऽपि जन: य: असमराज्यस्य कस्यचित् स्वशासिमण्डलस्य अनुसूचितजनजातेः जनः न वर्तते सः तद्राज्यस्य विधानसभायै [3][* * *] तस्य मण्डलस्य कस्माद् अपि निर्वाचनक्षेत्रात् निर्वाचनस्य पात्रं न भवेत्;

[4][परन्तु असमराज्यस्य विधानसभायाः निर्वाचनाय बोडोलैण्ड-प्रादेशिक-परिषद्-क्षेत्रमण्डलेषु सम्मिलितेषु निर्वाचनक्षेत्रेषु अनुसूचितजनजातीनां तथा अननुसूचितजातीनां प्रतिनिधित्वं यः तेन

---

1 संविधानस्य (द्विसप्ततितमं संशोधनम्) अधिनियमः, १९९२ इत्यस्य २-अनुभागेन (५-१२-१९९२ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितम्।

2 संविधानस्य (चतुरशीतितमं संशोधनम्) अधिनियमः, २००१ इत्यस्य ७-अनुभागेन (२१-२-२००२ दिनाङ्कात् प्रवर्तमानप्रभावेण) “२०००” इत्यस्य स्थाने संनिवेशितम्।

3 उत्तरपूर्वक्षेत्राणाम् (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१) इत्यस्य ७२-अनुभागेन कतिपयशब्दा: लोपिताः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 संविधानस्य (नवतितमं संशोधनम्) अधिनियमः, २००३ वर्षस्य २-अनुभागेन (२८-९-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

प्रकारेण अधिसूचितः तथा बोडोलैण्ड-प्रादेशिक-क्षेत्रमण्डलानां घटनात् पूर्वं विद्यमानः आसीत् तथैव भवेत्।]

[1][**३३२क. राज्यस्य विधानमण्डले महिलानां कृते स्थानानाम् आरक्षणम्-** (१) प्रत्येकं राज्यस्य विधानमण्डले महिलानां कृते स्थानानि आरक्षितानि भवेयुः।

(२) यथाशक्यम्, अनुच्छेदः ३३२ इत्यस्य खण्डः (३) इत्यस्य अधीने सति यत् अनुसूचितजातिजनजातीनां कृते स्थानानि आरक्षितानि सन्ति ततः स्थानानां तृतीयांशः महिलानां कृते आरक्षितः भवेत्।

(३) यथाशक्यं, प्रत्येकं राज्यस्य विधानमण्डले सकलस्थानानां येषां निर्वाचनं साक्षान्निर्वाचनेन विहितः (यानि च स्थानानि अनुसूचितजातिजनजातिमहिलानां कृते आरक्षितानि सन्ति तानि सम्मेल्य) अस्ति, तस्य तृतीयांशः महिलानां कृते आरक्षितः भवेत्।]

३३३. राज्यानां विधानसभासु आङ्ग्ल-भारतीयसमुदायस्य प्रतिनिधित्वम्- १७०-तमानुच्छेदे किमपि सत्यपि, यदि कस्यापि राज्यस्य राज्यपालः [2][* * *] मन्यते यत् तद्राज्यस्य विधानसभायाम् आङ्ग्लभारतीयसमुदायस्य प्रतिनिधित्वम् आवश्यकं वर्तते, तत् च पर्याप्तं नास्ति, तर्हि सः [3][तस्यां विधानसभायां तस्य समुदायस्य एकं जनं नामनिर्देशितं कर्तुं] क्षमते।

[4][**३३४. स्थानानाम् आरक्षणस्य तथा विशेषप्रतिनिधित्वस्य कतिपयावधेः अनन्तरं प्रतिबन्धनार्थम्**]- अस्य भागस्य पूर्ववर्तिषु उपबन्धेषु किमपि सत्यपि-

(क) लोकसभायां, राज्यानां विधानसभासु च अनुसूचितजातीनां कृते, अनुसूचितजनजातीनां च कृते स्थानानाम् आरक्षणेन सम्बद्धाः; तथा

(ख) लोकसभायां राज्यानां विधानसभासु च नामनिर्देशेन आङ्ग्ल-भारतीयसमुदायस्य प्रतिनिधित्वेन सम्बद्धाः, एतत्संविधानस्य उपबन्धाः एतद् संविधानस्य प्रारम्भात्

---

1 संविधानस्य (षडधिकैकशततमं संशोधनम्) अधिनियमः, २०२३ वर्षस्य ४-अनुभागेन (दिनाङ्कः सूच्यिष्यते) अन्तर्वेशितः।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः,१९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राजप्रमुखो वा" इत्येतौ शब्दौ लोपितौ।

3 संविधानस्य (त्रयोविंशतितमं संशोधनम्) अधिनियमः, १९६९ इत्यस्य ४-अनुभागेन "तस्यां विधानसभायां तस्य समाजस्य तावतः जनान् यावतः स समुचितान् मन्यते, नामनिर्देशितान् कर्तुम्" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

4 संविधानस्य (चतुरधिकैकशततमं संशोधनम्) अधिनियमः, २०१९ वर्षस्य २-अनुभागेन (२५-१-२०२० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

(भागः १६-कतिपयैः वर्गैः सम्बद्धाः विशेषोपबन्धाः)

[1][खण्डः (क) इत्यस्य सम्बन्धे अशीतिः वर्षाणि तथा खण्डः (ख) इत्यस्य सम्बन्धे सप्ततिः वर्षाणि] कालावधेः समाप्तौ प्रभाववन्तः न भवेयुः।

परन्तु एतदनुच्छेदगतं लोकसभायां कस्यापि राज्यस्य विधानसभायां वा किमपि प्रतिनिधित्वं तावत् न प्रभावयेत् यावत् तदानीं विद्यमानायाः यथायथं लोकसभायाः विधानसभायाः वा विघटनं न जायते।

[2]**[३३४क. महिलानां कृते स्थानानाम् आरक्षणम् (१)** अस्मिन् भागे अथवा अष्टमभागस्य पूर्वगामिप्रावधाने किमपि सत्यपि, महिलानां कृते स्थानानाम् आरक्षणेन सम्बन्धितसंविधानस्य उपबन्धाः लोकसभायां, राज्यविधानसभायां तथा राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-विधानमण्डले, संविधानस्य (षडधिकैकशततमं संशोधनम्) अधिनियमः, २०२३ इत्यस्य प्रवर्तनान्तरं या प्रथमा जनगणना भवेत् तस्याः प्रासङ्गिकपरिणामप्रकाशनानन्तरं यदा एतस्मै प्रयोजनाय परिसीमन-प्रक्रिया भवेत् तदनन्तरम् अयम् अधिनियमः आपञ्चदशवर्षाणि प्रवर्तिष्यते।

(२) अनुच्छेदः २३९कक, ३३०क तथा ३३२क इत्येतेषाम् उपबन्धानाम् अधीने सति महिलानां कृते स्थानानाम् आरक्षणं लोकसभायां, राज्यविधानसभासु तथा राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-विधानमण्डले तावत् पर्यन्तं भवेत् यावत् पर्यन्तं संसद् विधिना निर्धारयेत्।

(३) प्रत्येक-परिसीमन-प्रक्रियानन्तरं महिलानां कृते स्थानानाम् आरक्षणं लोकसभायां, राज्यविधानसभासु तथा राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-विधानमण्डले चङ्क्रमणेन भवेत्।

(४) अस्मिन् अनुच्छेदे लोकसभायां, राज्यविधानसभासु तथा राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-विधानमण्डले कस्यापि प्रतिनिधित्वं न प्रभावितं स्यात् यावत् पर्यन्तं लोकसभायाः, राज्यविधानसभानां तथा राष्ट्रिय-राजधानी-क्षेत्र-दिल्ली-विधानमण्डलस्य विघटनं न भवेत्।

३३५. सेवानां पदानां च कृते अनुसूचितजातीनां च अध्यर्थनाः- सङ्घस्य, कस्यापि राज्यस्य वा कार्यैः संसक्तानां सेवानां पदानां च कृते नियुक्तीनां करणे, प्रशासनकार्यदक्षताधारणस्य अविरोधेन, अनुसूचितजातीनाम्, अनुसूचितजनजातीनां च जनानाम् अध्यर्थनानां विचारः क्रियेत।

---

1 संविधानस्य (चतुरधिकैकशततमं संशोधनम्) अधिनियमः, २०१९ वर्षस्य २-अनुभागेन (२५-१-२०२० दिनाङ्कात् प्रवर्तमानप्रभावेण) "सप्ततिः वर्षाणि" इत्यस्य स्थाने संनिवेशितः। संविधानस्य (पञ्चनवतितमं संशोधनम्) अधिनियमः, २००९ वर्षस्य २-अनुभागेन (२५-१-२०१० दिनाङ्कात् प्रवर्तमानप्रभावेण) "षष्टिः वर्षाणि" इत्यस्य स्थाने "सप्ततिः वर्षाणि" संनिवेशितः। संविधानस्य (नवाशीतितमं संशोधनम्) अधिनियमः, २००४ वर्षस्य २-अनुभागेन (२५-१-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) "पञ्चाशत् वर्षाणि" इत्यस्य स्थाने "षष्टिः वर्षाणि" संनिवेशितः। संविधानस्य (द्विषष्टितमं संशोधनम्) अधिनियमः, १९८९ वर्षस्य २-अनुभागेन (२०-१२-१९८९ दिनाङ्कात् प्रवर्तमानप्रभावेण) "चत्वारिंशत् वर्षाणि" इत्यस्य स्थाने "पञ्चाशत् वर्षाणि" संनिवेशितः। संविधानस्य (पञ्चचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९८० वर्षस्य २-अनुभागेन (२५-१-१९८० दिनाङ्कात् प्रवर्तमानप्रभावेण) "त्रिंशत् वर्षाणि" इत्यस्य स्थाने "चत्वारिंशत् वर्षाणि" संनिवेशितः।

2 संविधानस्य (षडधिकैकशततमं संशोधनम्) अधिनियमः, २०२३ वर्षस्य ५-अनुभागेन (दिनाङ्कः सूचयिष्यते) अन्तर्वेशितः।

[1][परन्तु अस्य अनुच्छेदस्य कोऽपि विषयः अनुसूचितजातीनां तथा अनुसूचितजनजातीनां सदस्यानां पक्षे, सङ्घस्य अथवा केषाम् अपि राज्यानां कार्यकलापात् सम्बद्धानां सेवानां, केषु अपि वर्गे अथवा वर्गेषु तथा स्थानेषु प्रोन्नतेः प्रकरणेषु आरक्षणार्थं, कस्यामपि परीक्षायम् अर्हकाङ्क्षेषु अपकर्षार्थम् अथवा मूल्याङ्कनस्य स्तरापकर्षार्थम् उपबन्धनात् न अवरोधयेत्।]

३३६. कासुचित् सेवासु आङ्ग्लभारतीयसमुदायस्य कृते विशेषोपबन्धाः- (१) एतत्संविधानस्य प्रारम्भाद् अनन्तरं प्रथमवर्षद्वये सङ्घस्य लोहमार्ग-सीमाशुल्क-डाक(प्रेषणी)-तार(तन्त्रिसन्देशि)-सम्बन्धि सेवानां पदेषु आङ्ग्लभारतीयसमुदायस्य जनानां नियुक्तयः १९४७ वर्षस्य अगस्तमासस्य पञ्चदशदिवसात् अव्यहितं पूर्ववर्तिना आधारेण क्रियेरन्।

प्रत्येकस्मिन् अनुवर्तिनि वर्षद्वयस्य कालावधौ उक्तसमुदायस्य जनानां कृते उक्तसेवासु आरक्षितपदानां सङ्ख्या अव्यवहितपूर्ववर्तिनि वर्षद्वयस्य कालावधौ, एवम् आरक्षितायाः सङ्ख्यायां प्रतिशतं दशभिः न्यूना भवितुम् अर्हति-

परन्तु एतत्संविधानस्य प्रारम्भात् दशानां वर्षाणाम् अन्ते तादृशानां सर्वेषाम् आरक्षणानां समाप्तिः जायेत।

(२) यदि अन्यसमुदायस्य जनैः तुलनायाम् आङ्ग्लभारतीयसमुदायस्य जनाः कुशलतया नियुक्तेः अर्हाः अधिगम्येरन्, तर्हि (१) खण्डस्य अधीनं तत्समुदायार्थम् आरक्षितपदेभ्यः अन्येषु अधिकेषु वा पदेषु आङ्ग्लभारतीयसमुदायस्य जनानां नियुक्तौ तत्खण्डगतं कमपि बाधकं न भवेत्।

३३७. आङ्ग्लभारतीयसमुदायस्य हिताय शिक्षणानुदानार्थं विशेषोपबन्धाः- एतत्संविधानस्य प्रारम्भाद् अनन्तरं प्रथमे वित्तीयवर्षत्रये आङ्ग्लभारतीयसमुदायस्य हिताय शिक्षायाः सम्बन्धे, कानिचिद् विद्यन्ते चेत्, तानि एव अनुदानानि सङ्घेन तथा [2][***] प्रत्येकराज्येन दीयेरन् यानि १९४८-वर्षस्य मार्चमासस्य ३१-तमे दिने समाप्तिं गते वित्तीयवर्षे अदीयन्त।

प्रत्येकस्मिन् अनुवर्तिनि वर्षत्रयस्य कालावधौ अनुदानानि अव्यवहितपूर्ववर्तिनः वर्षत्रयस्य कालावधेः अपेक्षया प्रतिशतं दशभिः न्यूनानि भवितुम् अर्हन्ति-

परन्तु एतत्संविधानस्य प्रारम्भात् दशानां वर्षाणाम् अन्ते एतादृशानि अनुदानानि, यावत् आङ्ग्लभारतीयसमुदायार्थं विशेषानुग्रहरूपेण वर्तन्ते तावत्, समाप्तिं गच्छेयुः-

अपरं च एतदनुच्छेदाधीनं कस्याः अपि शिक्षासंस्थायाः किमपि अनुदानं प्राप्तुं तावत् स्वत्वं न भवेत् यावत् तस्याः वार्षिकप्रवेशानां न्यूनात् न्यूनं प्रतिशतं चत्वारिंशत् प्रवेशाः आङ्ग्लभारतीयसमुदायाद् भिन्नसमाजानां जनैः लभ्याः न क्रियन्ते।

---

[1] संविधानस्य (द्व्यशीतितमं संशोधनम्) अधिनियमः, २००० वर्षस्य २-अनुभागेन (९-६-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

[2] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च “प्रथमानुसूच्याः क-भागे ख-भागे वा उल्लिखितेन” इत्येते शब्दाः लोपिताः।

[1][**३३८. राष्ट्रिय-अनुसूचितजाति-आयोगः**]- [2][[3][(१) अनुसूचितजातिभ्यः एकः आयोगः भवेत् यः राष्ट्रिय-अनुसूचितजाति-आयोगः इति ज्ञायेत।

(२) संसदा एतदर्थं विनिर्मितस्य कस्यचित् विध्युपबन्धस्य अधीनम्, आयोगस्य एकः अध्यक्षः, एकः उपाध्यक्षः तथा अन्ये त्रयः सदस्याः स्युः तथा नियुक्तानाम् अध्यक्ष-उपाध्यक्ष-सदस्यानां सेवायाः प्रतिबन्धाः, अथ च पदावधिः एतादृशो भवेत् यः राष्ट्रपतिः, नियमेन अवधारयेत्।]

(३) राष्ट्रपतिः समुद्रया हस्ताक्षरेण च सहिताभ्याम् अधिपत्रद्वारा आयोगस्य अध्यक्षम्, उपाध्यक्षं, सदस्यान् च विनियोजयेत्।

(४) आयोगः स्वप्रक्रियायाः विनियमितार्थं शक्तः स्यात्।

(५) आयोगस्य एतत् कर्तव्यं भवेत् यत् सः-

(क) अनुसूचितजातिभ्यः [4]*** अस्य संविधानस्य वा तत्काले प्रवर्तमानस्य कस्यचित् अन्यविधेः उत सर्वकारस्य कस्यचित् आदेशस्य अधीनम् उपबन्धितान् रक्षोपायसम्बन्धितसमस्तविषयान् अन्विष्येत तथा च निरीक्षेत, तथा एतादृशानां रक्षोपायाणां कार्यान्वयनस्य मूल्याङ्कनं कुर्यात्।

(ख) अनुसूचितजातीनां [4]*** सम्बन्धे तदधिकाराणां रक्षोपायाणाञ्च वञ्चनविशिष्ट-आक्षेपनिवेदनानि सम्प्रेष्टव्यानि।

(ग) अनुसूचितजातीनां [1]*** सामाजिक-आर्थिकविकासस्य योजनाप्रक्रियायां सम्भजेत् तथा च तस्याम् उपदिशेत् तथा सङ्घस्य कस्यचित् राज्यस्य च अधीनं तेषां विकासस्य प्रगतेः मूल्याङ्कनं कुर्यात्।

(घ) तेषां रक्षोपायाणां कार्यान्वयनविषये प्रतिवर्षं, तथा च अन्यकालेषु आयोगः यद् उचितं चिन्तयेत् राष्ट्रपतिं प्रतिवेदनं निवेदयेत्।

(ङ) एतादृशेषु प्रतिवेदनेषु तेषाम् उपायानां सम्बन्धे, ये तेषां रक्षोपायाणां प्रभावपूर्णकार्यान्वयनार्थं सङ्घेन केनचित् राज्येन वा करणीयं,

---

1 संविधानस्य (नवाशीतितमं संशोधनम्) अधिनियमः,२००३ वर्षस्य २-अनुभागेन (१९-२-२००४ दिनाङ्कात् प्रवर्तमानप्रभावेण) पार्श्वशीर्षस्थाने संनिवेशितम्।

2 संविधानस्य (पञ्चषष्टितमं संशोधनम्) अधिनियमः, १९९० वर्षस्य २-अनुभागेन (१२-३-१९९२ दिनाङ्कात् प्रवर्तमानप्रभावेण) खण्डः (१) तथा खण्डः (२) इत्यनयोः स्थाने संनिवेशितम्।

3 संविधानस्य (नवाशीतितमं संशोधनम्) अधिनियमः, २००३ वर्षस्य २-अनुभागेन (१९-२-२००४ दिनाङ्कात् प्रवर्तमानप्रभावेण) खण्डः (१) तथा खण्डः (२) इत्यनयोः स्थाने संनिवेशितम्।

4 संविधानस्य (नवाशीतितमं संशोधनम्) अधिनियमः, २००३ वर्षस्य २-अनुभागेन (१९-२-२००४ दिनाङ्कात् प्रवर्तमानप्रभावेण) "तथा अनुसूचितजनजातीः" शब्दाः लोपिताः।

तथा अनुसूचितजातीनां [1]*** संरक्षणाय, कल्याणाय सामाजिक-आर्थिकविकासाय अन्योपायान् पुरःप्रशंसयेत्।

(च) अनुसूचितजातीनां [1]*** संरक्षणस्य, कल्याणस्य, विकासस्य तथा उन्नयनस्य सम्बन्धे एतादृशानाम् अन्यकृत्यानां निर्वहणं कुर्यात्, यान् राष्ट्रपतिः तथा संसदा विनिर्मितस्य कस्यचित् विधेः उपबन्धानाम् अधीने भवति सति, नियमेन विनिर्दिशेत्।

(६) राष्ट्रपतिः एतादृशानि समस्तप्रतिवेदनानि संसदः प्रत्येकं सदनस्य समक्षम् उपस्थापयेत् तथा च तेन सह सङ्घेन प्रतिपादिता पुरःप्रशंसासु कृता करणीयं वा विधेयं विधानं तथा च यदि कोऽपि एतादृशी पुरःप्रशंसा अस्वीकृता कृता तर्हि अस्वीकृतेः कारणं, भवेत् चेत्, स्पष्टार्थं ज्ञापनं भवेत्।

(७) यत्र कोऽपि एतादृशं प्रतिवेदनम्, अथवा तस्य कोऽपि भागः केनचित् विषयेण सम्बद्धः अस्ति यस्य केनापि राज्यसर्वकारेण सम्बन्धः अस्ति चेत् एतादृशस्य प्रतिवेदनस्य एका प्रतिः तस्य राज्यस्य राज्यपालं प्रति प्रेषयेत् यः तां राज्यस्य विधानमण्डलस्य समक्षम् उपस्थापनम् उपबन्धयेत् तथा तेन सह राज्येन सम्बद्धः पुरःप्रशंसासु कृता करणीयं वा विधेयं विधानं तथा च यदि कोऽपि एतादृशी पुरःप्रशंसा अस्वीकृता कृता तर्हि अस्वीकृतेः कारणं, भवेत् चेत्, स्पष्टार्थं ज्ञापनं भवेत्।

(८) आयोगः खण्डः (५) इत्यस्य उपखण्डः (क) इत्यत्र निर्दिष्टस्य कस्यचित् विषयस्य अन्वेषणं क्रियमाणसमये अथवा उपखण्डः (ख) इत्यत्र निर्दिष्टस्य कस्यचित् परिवादस्य विषये अन्वेषणं क्रियमाणसमये विशेषतया निम्नलिखितानां विषयाणां सम्बन्धे, ताः सर्वाः शक्तयः भविष्यन्ति, यः वादविचारणासमये व्यवहारन्यायालयस्य भवन्ति, अर्थात्;

(क) भारतस्य कस्मात् अपि भागात् कमपि जनम् आह्वानम् उपस्थापनं च शपथे तं परीक्षणीयम्;

(ख) कमपि लेख्यं प्रकटनस्य तथा प्रस्तुतिकरणस्य अपेक्षयेत्;

(ग) शपथपत्रेषु साक्ष्यग्रहणं कुर्यात्;

(घ) कस्मात् अपि न्यायालयात् अथवा कार्यालयात् कस्यापि लोकलेखस्य तस्य प्रतेः वा अपेक्षयेत्;

(ङ) साक्षिणां लोकलेख्यानां च परीक्षणार्थम् आयोगस्य निर्गमनम्;

(च) कोऽपि अन्यविषयः यः राष्ट्रपतिः नियमेन अवधारयेत्।

(९) सङ्घः तथा प्रत्येकं राज्यसर्वकारः अनुसूचितजातीः [1]**** प्रभावितारः सर्वेषु महत्वपूर्णेषु नीतिगतेषु विषयेषु आयोगेन सह परामर्शयेत्।]

[2][(१०)] अस्मिन् अनुच्छेदे, अनुसूचितजातिभिः [1]*** प्रतिनिर्देशस्य अयम् अर्थं प्रवर्तयेत् यत् एतदन्तर्गतम् [3]*** आङ्ग्लभारतीयसमुदायं प्रति निर्देशः अपि अस्ति।

[4][**३३८क. राष्ट्रिय-अनुसूचित-जनजाति-आयोगः**- (१) अनुसूचितजनजातिभ्यः एकः आयोगः भवेत् यः राष्ट्रिय-अनुसूचित-जनजाति-आयोगः इति नाम्ना ज्ञायेत।

---

1 संविधानस्य (नवाशीतितमं संशोधनम्) अधिनियमः, २००३ वर्षस्य २-अनुभागेन (१९-२-२००४ दिनाङ्कात् प्रवर्तमानप्रभावेण) "तथा अनुसूचितजनजातीः" शब्दाः लोपिताः।

2 संविधानस्य (पञ्चषष्टितमं संशोधनम्) अधिनियमः, १९९० वर्षस्य २-अनुभागेन (१२-३-१९९२ दिनाङ्कात् प्रवर्तमानप्रभावेण) (खण्डः ३ इतीमं) खण्डः (१०) इत्यनेन रूपेण पुनर्सङ्ख्यायिता।

3 संविधानस्य (द्व्यधिकैकशतं संशोधनम्) अधिनियमः, २०१८ इत्यस्य २-अनुभागेन (१५-८-२०१८ दिनाङ्कात् प्रवर्तमानप्रभावेण) "एतादृशान् अन्यपश्चवर्त्तिवर्गान् प्रति निर्देशः, यान् राष्ट्रपतिः अनुच्छेदः ३४० इत्यस्य खण्डः (१) इत्यस्य अधीननियुक्तस्य आयोगस्य प्रतिवेदनस्य प्राप्त्यनन्तरम् आदेशेन विनिर्दिशेत्, तथा आङ्ग्लभारतीयसमुदायं प्रति निर्देशः अपि अस्ति" शब्दानाम्, अङ्कानां, कोष्ठकानां स्थाने प्रतिष्ठापितः।

4 संविधानस्य (नवाशीतितमं संशोधनम्) अधिनियमः, २००३ वर्षस्य ३-अनुभागेन अनुच्छेदः ३३८क इति (१९-२-२००४ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः;

(भागः १६-कतिपयैः वर्गैः सम्बद्धाः विशेषोपबन्धाः)

(२) संसदा एतदर्थं विनिर्मितस्य कस्यचित् विध्युपबन्धस्य अधीनम्, आयोगस्य एकः अध्यक्षः, एकः उपाध्यक्षः तथा अन्ये त्रयः सदस्याः स्युः तथा नियुक्तानाम् अध्यक्ष-उपाध्यक्ष-सदस्यानां सेवायाः प्रतिबन्धाः, अथ च पदावधिः एतादृशो भवेत् यः राष्ट्रपतिः, नियमेन अवधारयेत्।

(३) राष्ट्रपतिः समुद्रया हस्ताक्षरेण च सहिताभ्याम् अधिपत्रद्वारा आयोगस्य अध्यक्षम्, उपाध्यक्षं, सदस्यान् च विनियोजयेत्।

(४) आयोगः स्वप्रक्रियायाः विनियमितार्थं शक्तः स्यात्।

(५) आयोगस्य एतत् कर्तव्यं भवेत् यत् सः-

(क) अनुसूचितजनजातिभ्यः अस्य संविधानस्य वा तत्काले प्रवर्तमानस्य कस्यचित् अन्यविधेः उत सर्वकारस्य कस्यचित् आदेशस्य अधीनम् उपबन्धितान् रक्षोपायसम्बन्धितसमस्तविषयान् अन्विष्येत तथा च निरीक्षेत, तथा एतादृशानां रक्षोपायाणां कार्यान्वयनस्य मूल्याकनं कुर्यात्;

(ख) अनुसूचितजनजातीनां सम्बन्धे तदधिकाराणां रक्षोपायाणाञ्च वञ्चनविशिष्ट-आक्षेपनिवेदनानि सम्प्रेष्टव्यः;

(ग) अनुसूचितजनजातीनां सामाजिक-आर्थिकविकासस्य योजनाप्रक्रियायां सम्भजेत् तथा च तस्याम् उपदिशेत् तथा सङ्घस्य कस्यचित् राज्यस्य च अधीनं तेषां विकासस्य प्रगतेः मूल्याङ्कनं कुर्यात्;

(घ) तेषां रक्षोपायाणां कार्यान्वयनविषये प्रतिवर्षं, तथा च अन्यकालेषु आयोगः यद् उचितं चिन्तयेत् राष्ट्रपतिं प्रतिवेदनं निवेदयेत्;

(ङ) एतादृशेषु प्रतिवेदनेषु तेषाम् उपायानां सम्बन्धे, ये तेषां रक्षोपायाणां प्रभावपूर्णकार्यान्वयनार्थं सङ्घेन केनचित् राज्येन वा करणीयं, तथा अनुसूचितजनजातीनां संरक्षणाय, कल्याणाय सामाजिक-आर्थिकविकासाय अन्योपायान् पुरःप्रशंसयेत्;

(च) अनुसूचितजनजातीनां संरक्षणस्य, कल्याणस्य, विकासस्य तथा उन्नयनस्य सम्बन्धे एतादृशानाम् अन्यकृत्यानां निर्वहणं कुर्यात्, यान् राष्ट्रपतिः तथा संसदा विनिर्मितस्य कस्यचित् विधेः उपबन्धानाम् अधीने भवति सति, नियमेन विनिर्दिशेत्;

(६) राष्ट्रपतिः एतादृशानि समस्तप्रतिवेदनानि संसदः प्रत्येकं सदनस्य समक्षम् उपस्थापयेत् तथा च तेन सह सङ्घेन प्रतिपादिता पुरःप्रशंसासु कृता करणीयं वा विधेयं विधानं तथा च यदि कोऽपि एतादृशी पुरःप्रशंसा अस्वीकृता कृता तर्हि अस्वीकृतेः कारणं, भवेत् चेत्, स्पष्टार्थं ज्ञापनं भवेत्।

(७) यत्र कोऽपि एतादृशं प्रतिवेदनम्, अथवा तस्य कोऽपि भागः केनचित् विषयेण सम्बद्धः अस्ति यस्य केनापि राज्यसर्वकारेण सम्बन्धः अस्ति चेत् एतादृशस्य प्रतिवेदनस्य एका प्रतिः तस्य राज्यस्य राज्यपालं प्रति प्रेषयेत् यः तां राज्यस्य विधानमण्डलस्य समक्षम् उपस्थापनम् उपबन्धयेत् तथा तेन सह राज्येन सम्बद्धः पुरःप्रशंसासु कृता करणीयं वा विधेयं विधानं तथा च यदि कोऽपि एतादृशी पुरःप्रशंसा अस्वीकृता कृता तर्हि अस्वीकृतेः कारणं, भवेत् चेत्, स्पष्टार्थं ज्ञापनं भवेत्।

(८) आयोगः खण्डः (५) इत्यस्य उपखण्डः (क) इत्यत्र निर्दिष्टस्य कस्यचित् विषयस्य अन्वेषणं क्रियमाणसमये अथवा उपखण्डः (ख) इत्यत्र निर्दिष्टस्य कस्यचित् परिवादस्य विषये अन्वेषणं क्रियमाणसमये विशेषतया निम्नलिखितानां विषयाणां सम्बन्धे, ताः सर्वाः शक्तयः भविष्यन्ति, यः वादविचारणासमये व्यवहारन्यायालस्य भवन्ति, अर्थात् :-

(क) भारतस्य कस्मात् अपि भागात् कमपि जनम् आवाहनम् उपस्थापनं च शपथे तं परीक्षणीयम्;

(ख) किमपि लेख्यं प्रकटनस्य तथा प्रस्तुतिकरणस्य अपेक्षेत;

(ग) शपथपत्रेषु साक्ष्यग्रहणं कुर्यात्;

(घ) कस्मात् अपि न्यायालयात् अथवा कार्यालयात् कस्यापि लोकलेखस्य तस्य प्रतेः वा अपेक्षेत;

(ङ) साक्षिणां लोकलेख्यानां च परीक्षणार्थम् आयोगस्य निर्गमनम्;

(च) कोऽपि अन्य विषयः यः राष्ट्रपतिः नियमेन अवधारयेत्।

(९) सङ्घः तथा प्रत्येकं राज्यसर्वकारः अनुसूचितजनजातीः प्रभावितारः सर्वेषु महत्त्वपूर्णेषु नीतिगतेषु विषयेषु आयोगेन सह परामर्शयेत्।]

[1][**३३८ख. राष्ट्रिय-पश्चवर्ति-वर्ग-आयोगः-** (१) सामाजिक-शैक्षणिकदृष्ट्या च पश्चवर्ति-वर्गार्थम् एकः आयोगः भवेत् यः राष्ट्रिय-पश्चवर्ति-वर्ग-आयोगः इति नाम्ना ज्ञायेत।

(२) संसदा एतदर्थं विनिर्मितस्य कस्यचित् विध्युपबन्धस्य अधीनम्, आयोगस्य एकः अध्यक्षः, एकः उपाध्यक्षः तथा अन्ये त्रयः सदस्याः स्युः तथा नियुक्तानाम् अध्यक्ष-उपाध्यक्ष-सदस्यानां सेवायाः प्रतिबन्धाः, अथ च पदावधिः एतादृशो भवेत् यः राष्ट्रपतिः, नियमेन अवधारयेत्।

(३) राष्ट्रपतिः समुद्रया हस्ताक्षरेण च सहिताभ्याम् अधिपत्रद्वारा आयोगस्य अध्यक्षम्, उपाध्यक्षं, सदस्यान् च विनियोजयेत्।

(४) आयोगः स्वप्रक्रियायाः विनियमितार्थं शक्तः स्यात्।

(५) आयोगस्य एतत् कर्तव्यं भवेत् यत् सः-

(क) सामाजिक-शैक्षणिकदृष्ट्या च पश्चवर्ति-वर्गार्थम् अस्य संविधानस्य वा तत्काले प्रवर्तमानस्य कस्यचित् अन्यविधेः उत सर्वकारस्य कस्यचित् आदेशस्य अधीनम् उपबन्धितान् रक्षोपायसम्बन्धितसमस्तविषयान् अन्विष्येत तथा च निरीक्षेत, तथा एतादृशानां रक्षोपायाणां कार्यान्वयनस्य मूल्याङ्कनं कुर्यात्।

(ख) सामाजिकया शैक्षिकदृष्ट्या च पश्चवर्ति-वर्गान् तेषाम् अधिकाराणां रक्षोपायाणाञ्च वञ्चनाविशिष्ट-आक्षेपनिवेदनानि सम्प्रेष्टव्यानि।

(ग) सामाजिक-शैक्षणिकदृष्ट्या च पश्चवर्ति-वर्गाणां सामाजिक-आर्थिकविकासस्य योजनाप्रक्रियां सम्भजेत् तथा च तस्याम् उपदिशेत् तथा सङ्घस्य कस्यचित् राज्यस्य च अधीनं तेषां विकासस्य प्रगतेः मूल्याङ्कनं कुर्यात्।

---

1 संविधानस्य (द्व्यधिकैकशतं संशोधनम्) अधिनियमः, २०१८ इत्यस्य ३-अनुभागेन अनुच्छेदः ३३८ख इति (१५-८-२०१८ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

(घ) तेषां रक्षोपायाणां कार्यान्वयनविषये प्रतिवर्षं, तथा च अन्यकालेषु आयोगः यद् उचितं चिन्तयेत् राष्ट्रपतिं प्रतिवेदनं निवेदयेत्।

(ङ) एतादृशेषु प्रतिवेदनेषु तेषाम् उपायानां सम्बन्धे, ये तेषां रक्षोपायाणां प्रभावपूर्णकार्यान्वियनार्थं सङ्घेन केनचित् राज्येन वा करणीयं, तथा सामाजिक-शैक्षणिकदृष्ट्या च पश्चवर्ति-वर्गाणां संरक्षणाय, कल्याणाय सामाजिक-आर्थिकविकासाय अन्योपायान् पुरःप्रशंसयेत्।

(च) सामाजिक-शैक्षणिकदृष्ट्या च पश्चवर्ति-वर्गाणां संरक्षणस्य, कल्याणस्य, विकासस्य तथा उन्नयनस्य सम्बन्धे एतादृशानाम् अन्यकृत्यानां निर्वहणं कुर्यात्, यान् राष्ट्रपतिः तथा संसदा विनिर्मितस्य कस्यचित् विधेः उपबन्धानाम् अधीने भवति सति, नियमेन विनिर्दिशेत्।

(६) राष्ट्रपतिः एतादृशानि समस्तप्रतिवेदनानि संसदः प्रत्येकं सदनस्य समक्षम् उपस्थापयेत् तथा च तेन सह सङ्घेन प्रतिपादिता पुरःप्रशंसासु कृता करणीयं वा विधेयं विधानं तथा च यदि कोऽपि एतादृशी पुरःप्रशंसा अस्वीकृता कृता तर्हि अस्वीकृतेः कारणं, भवेत् चेत्, स्पष्टार्थं ज्ञापनं भवेत्।

(७) यत्र कोऽपि एतादृशं प्रतिवेदनम्, अथवा तस्य कोऽपि भागः केनचित् विषयेण सम्बद्धः अस्ति यस्य केनापि राज्यसर्वकारेण सम्बन्धः अस्ति चेत् एतादृशस्य प्रतिवेदनस्य एका प्रतिः तस्य राज्यस्य राज्यपालं प्रति प्रेषयेत् यः तां राज्यस्य विधानमण्डलस्य समक्षम् उपस्थापनम् उपबन्धयेत् तथा तेन सह राज्येन सम्बद्धः पुरःप्रशंसासु कृता करणीयं वा विधेयं विधानं तथा च यदि कोऽपि एतादृशी पुरःप्रशंसा अस्वीकृता कृता तर्हि अस्वीकृतेः कारणं, भवेत् चेत्, स्पष्टार्थं ज्ञापनं भवेत्।

(८) आयोगः खण्डः (५) इत्यस्य उपखण्डः (क) इत्यत्र निर्दिष्टस्य कस्यचित् विषयस्य अन्वेषणं क्रियमाणसमये अथवा उपखण्डः (ख) इत्यत्र निर्दिष्टस्य कस्यचित् परिवादस्य विषये अन्वेषणं क्रियमाणसमये विशेषतया निम्नलिखितानां विषयाणां सम्बन्धे, ताः सर्वाः शक्तयः भविष्यन्ति, यः वादविचारणासमये व्यवहारन्यायालस्य भवन्ति, अर्थात्;

(क) भारतस्य कस्मात् अपि भागात् कमपि जनम् आवाहनम् उपस्थापनं च शपथे तं परीक्षणीयम्;

(ख) किमपि लेख्यं प्रकटनस्य तथा प्रस्तुतिकरणस्य अपेक्षेत;

(ग) शपथपत्रेषु साक्ष्यग्रहणं कुर्यात्;

(घ) कस्मात् अपि न्यायालयात् अथवा कार्यालयात् कस्यापि लोकलेखस्य तस्य प्रतेः वा अपेक्षेत;

(ङ) साक्षिणां लोकलेख्यानां च परीक्षणार्थम् आयोगस्य निर्गमनम्;

(च) कोऽपि अन्य विषयः यः राष्ट्रपतिः नियमेन अवधारयेत्।

(९) सङ्घः तथा प्रत्येकं राज्यसर्वकारः सामाजिकया शैक्षिकदृष्ट्या च पश्चवर्ति-वर्गान् प्रभावितारः सर्वेषु महत्वपूर्णेषु नीतिगतेषु विषयेषु आयोगेन सह परामर्शयेत्।]

[1][परन्तु अस्य खण्डस्य किमपि तथ्यम् अनुच्छेदः ३४२क-इत्यस्य खण्डः (३) इत्यस्य प्रयोजनार्थं न प्रवर्तेत ।]

३३९. अनुसूचितक्षेत्राणां प्रशासने तथा अनुसूचितजनजातीनां कल्याणस्य विषये सङ्घस्य नियन्त्रणम्-

(१) [2][***] राष्ट्रपतिः राज्येषु अनुसूचितक्षेत्राणां प्रशासनविषये, तथा अनुसूचितजनजातीनां कल्याणस्य विषये प्रतिवेदनस्य अर्पणाय आयोगस्य नियुक्तिम् आदेशेन कस्मिन् अपि काले कर्तुं क्षमते, तथा च एतत्संविधानस्य प्रारम्भाद् दशानां वर्षाणां समाप्तौ कुर्यात् ।

आदेशः आयोगस्य रचनायाः, शक्तीनां, प्रक्रियायाश्च परिणिश्चयं कर्तुम् अर्हतिः तथा तस्मिन् ते प्रासङ्गिकाः सहायकाश्च उपबन्धाः समाविष्टाः भवितुम् अर्हन्ति यान् राष्ट्रपतिः आवश्यकान् वाञ्छनीयान् वा मन्येत ।

(२) सङ्घस्य कार्यपालिकायाः शक्तेः विस्तारः,[3][राज्याय] तद्राज्यस्य अनुसूचितजनजातीनां कल्याणार्थं, निदेशे आवश्यकत्वेन उल्लिखितयोजनानां निर्माणेन निष्पादनेन च सम्बद्धानां निदेशानां प्रदानं यावत्, भवेत् ।

३४०. अप्रगतवर्गाणां दशानाम् अन्वेषणार्थम् आयोगस्य नियुक्तिः- (१) भारतराज्यक्षेत्रे सामाजिकदृष्ट्या शिक्षादृष्ट्या च अप्रगतानां वर्गाणां दशानां तथा तैः अनुभूयमानानाम् असौकर्याणाम् अन्वेषणार्थं, तथा सङ्घेन, केनचित् अपि राज्येन वा तेषाम् असौकर्याणाम् अपसारणाय, तेषां दशायाः सुधारणायै च अवलम्बनीयानाम् उपायानां विषये तत्प्रयोजनार्थं सङ्घेन केनचिद् अपि राज्येन वा दातव्यानाम् अनुदानानां विषये, येषां प्रतिबन्धानाम् अधीनं तानि अनुदानानि दातव्यानि, तेषां प्रतिबन्धानां च विषये पुरःप्रशंसनकरणार्थं, राष्ट्रपतिः आदेशेन तादृशैः जनैः, यादृशान् सः समुचितान् मन्यते, आयोगं निर्मातुं क्षमते; आयोगस्य नियोजकेन आदेशेन च आयोगेन अनुसरणीया प्रक्रिया अपि परिणिश्चिता भवेत् ।

(२) एवं नियुक्तः आयोगः स्वस्मै निर्दिष्टविषयाणाम् अन्वेषणं कुर्यात् तथा च राष्ट्रपतये प्रतिवेदनम् अर्पयेत् यस्मिन् तेन स्वयम् अधिगतानि तथ्यानि उपवर्णितानि भवेयुः तथा च तेन उचितत्वेन मतानां पुरः प्रशंसनानामपि समावेशः स्यात् ।

(३) राष्ट्रपतिः एवम् अर्पितस्य प्रतिवेदनस्य प्रतिलिपिं तदाधारेण कृतां क्रियां स्पष्टतया ज्ञापनेन सहितां संसदः प्रत्येकसदनस्य पुरतः स्थापयेत् ।

३४१. अनुसूचिताः जातयः- (१) राष्ट्रपतिः [4][कस्यापि राज्यस्य [5][सङ्घराज्यक्षेत्रस्य वा] सम्बन्धे, यत्र [2][***] राज्यं भवेत्

---

[1] संविधानस्य (पञ्चाधिकैकशतं संशोधनम्) अधिनियमः, २०२१ इत्यस्य २-अनुभागेन (१५-९-२०२१ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः ।

[2] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "प्रथमानुसूच्याः क-भागे ख-भागे वा उल्लिखितेषु" इत्येते शब्दाः लोपिताः ।

[3] उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च "कस्मैचिदपि" इति लोपितः ।

[4] संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य १०-अनुभागेन "कस्यापि राज्यस्य राज्यपालेन राजप्रमुखेन वा परामर्शस्य अनन्तरम्" इति एतेभ्यः प्रति संनिवेशितम् ।

[5] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च एतौ शब्दौ अन्तर्वेशितौ ।

तत्र तस्य राज्यपालेन [1][***] परामर्शस्य अनन्तरं] लोकाधिसूचनया[2] ताः जातीः, मूलवंशान्, जनजातीः वा, अथवा जातीनां, मूलवंशानां, जनजातीनां वा भागान् तदन्तर्गतान् उपवर्गान् वा विनिर्देष्टुं क्षमते ये च एतत्संविधानस्य प्रयोजनानाम् अर्थे [3][यथास्थितिः] तद्राज्यसम्बन्धे [3]तत्सङ्घराज्यक्षेत्रसम्बन्धे च अनुसूचितजातयः मन्येरन्।]

(२) संसद् विधिना कामपि जातिं मूलवंशं, जनजातिं वा अथवा कस्याः अपि जातेः, मूलवंशस्य जनजातेः वा भागं तदन्तर्गतम् उपवर्गं वा (१) खण्डस्य अधीनं प्रवर्तितायाम् अधिसूचनायां विनिर्दिष्टानाम् अनुसूचितजनजातीनां सूच्यां समावेष्टुं बहिर्गतं वा कर्तुं क्षमते, किन्तु उपर्युक्तां रीतिं विहाय, अन्यथा उक्तखण्डस्य अधीनं प्रवर्तिता अधिसूचना कयापि उत्तरवर्तिन्या अधिसूचनया परिवर्तिता न भवेत्।

३४२. अनुसूचितजनजातयः- (१) राष्ट्रपतिः [4][कस्यचित् अपि राज्यस्य [3][सङ्घराज्यक्षेत्रस्य] वा सम्बन्धे यत्र तत् [5]*** राज्यं भवेत् तत् [1]*** राज्यपालेन परामर्श्य अनन्तरम्] लोकाधिसूचनया[6] ताः जनजातीः तान् जनजाति-समुदायान् वा अथवा जनजातीनां, जनसमुदायानां वा भागान् तदन्तर्गतान् उपवर्गान् च विनिर्देष्टुं क्षमते ये च एतत्संविधानस्य प्रयोजनानाम् अर्थे तद्राज्यसम्बन्धे [3][अथवा यथायथं सङ्घराज्यक्षेत्रस्य सम्बन्धे] अनुसूचितजनजातयः मन्येरन्।]

(२) संसद् विधिना कामपि जनजातिं कमपि जनजातिसमुदायं वा, अथवा कस्याः अपि जनजातेः कस्यापि जनजातिसमुदायस्य वा भागं, तदन्तर्गतम् उपवर्गं वा (१) खण्डस्य अधीनं प्रवर्तितायाम् अधिसूचनायां विनिर्दिष्टानाम् अनुसूचितजनजातीनां सूच्यां समावेष्टुं बहिर्गतं वा कर्तुं क्षमते; किन्तु उपर्युक्तां रीतिं विहाय अन्यथा उक्तखण्डस्य अधीना प्रवर्तिता अधिसूचना कयापि उत्तरवर्तिन्या अधिसूचनया परिवर्तिता न भवेत्।

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः,१९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राजप्रमुखो वा" इत्येतौ शब्दौ लोपितौ।

2 निम्ननिर्दिष्टाः आदेशाः द्रष्टव्याः - सांविधानिकः (अनुसूचितजातीनां सम्बन्धे) आदेशः १९५० (सां०आ०१९), सांविधानिकः (सङ्घराज्यक्षेत्राणां कृते), (अनुसूचितजातीनां सम्बन्धे) आदेशः, १९५१, (सां०आ०३२), सांविधानिकः (जम्मू-कश्मीरकृते) अनुसूचितजनजातीनाम् आदेशः, १९५६ (सां० आ० ५२), सांविधानिकः (दादरा नगरहवेलीकृते) अनुसूचितजातीनां सम्बन्धे आदेशः, १९६२, (सां० आ० ६४), सांविधानिकः (पाण्डिचेरिकृते) अनुसूचितजातीनां सम्बन्धे आदेशः, १९६४ (सां० आ० ६८), सांविधानिकः (गोवा-दमण-दीवकृते) अनुसूचितजातीनां सम्बन्धे आदेशः, १९६८ (सां० आ० ८१) सांविधानिकः (सिक्किमकृते) अनुसूचितजातीनां सम्बन्धे आदेशः, १९७८ (सां० आ० ११०)।

3 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च एतौ शब्दौ अन्तर्वेशितौ।

4 संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य ११-अनुभागेन "कस्यापि राज्यस्य राज्यपालेन राजप्रमुखेन वा परामर्शस्य अनन्तरम्" इत्येतेभ्यः शब्देभ्यः प्रति एतत् संनिवेशितम्।

5 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च (०१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितः।

6 निम्ननिर्दिष्टाः आदेशाः द्रष्टव्याः - सांविधानिकः (अनुसूचितजनजातीनां सम्बन्धे) आदेशः, १९५० (सां० आ० २२), सांविधानिकः (अनुसूचितजनजातीनां सम्बन्धे) (सङ्घराज्यक्षेत्राणां कृते) आदेशः, १९७१ (सां०आ० ३३), सांविधानिकः (अन्दमान-निकोबारद्वीपानां कृते) अनुसूचितजनजातीनां सम्बन्धे आदेशः, १९५६ (सां० आ० ५८) सांविधानिकः (दादरा-नगरहवेलीकृते) जनजातीनां सम्बन्धे आदेशः १९६२ (सां० आ० ६५), सांविधानिकः (अनुसूचितजनजातीनां सम्बन्धे) (उत्तरप्रदेशस्य कृते) आदेशः, १९६७ (सां० आ० ७८) सांविधानिकः (गोवा-दमण-दीवकृते) अनुसूचितजनजातीनां सम्बन्धे आदेशः, १९६८ (सां० आ० ८२), सांविधानिकः (नागालैण्डकृते) अनुसूचितजनजातीनां सम्बन्धे आदेशः, १९७० (सां० आ० ८८); तथा च सांविधानिकः (सिक्किम-कृते) अनुसूचितजनजातीनां सम्बन्धेः आदेशः, १९७८ (सां० आ० १११)।

[1][**३४२क. सामाजिक-शैक्षणिकदृष्ट्या पश्चवर्ति-वर्गः-** (१) राष्ट्रपतिः, कस्यापि राज्यस्य अथवा सङ्घराज्यक्षेत्रस्य सम्बन्धे तथा यत्र तत् राज्यम् अस्ति, तत्र तस्य राज्यपालेन परामर्शात् परं लोकाधिसूचनया, [2][केन्द्रीय-सूच्यां सामाजिक-शैक्षणिकदृष्ट्या एतादृशान् पश्चवर्त्तिनः वर्गान् विनिर्दिष्टुं शक्नुयात्, यान् केन्द्रीय-सर्वकारस्य प्रयोजनेभ्यः,] यथास्थिति, तस्य राज्यस्य अथवा सङ्घराज्यक्षेत्रस्य सम्बन्धे सामाजिक-शैक्षणिकदृष्ट्या पश्चवर्ति-वर्गः बोधयेत्।

(२) संसदा, विधिना कमपि सामाजिक-शैक्षणिकदृष्ट्या पश्चवर्तिवर्गं खण्डः (१) इत्यस्य अधीनायां निर्गतायाम् अधिसूचनायां विनिर्दिष्टं सामाजिक-शैक्षणिकदृष्ट्या पश्चवर्त्तिनः वर्गस्य केन्द्रीय-सूच्यां सम्मेलितुं शक्नुयात् अथवा तेभ्यः अपवारितुं शक्नुयात्, किन्तु यथोक्तं तेन विना उक्त-खण्डस्य अधीनायां निर्गतायाम् अधिसूचनायां कयापि पश्चवर्त्ति-अधिसूचनया न विरूपयेत्।

[3][*स्पष्टीकरणम्-* खण्डः (१) तथा (२) इत्यस्य प्रयोजनेभ्यः "केन्द्रीय-सूची" अभिव्यक्त्या केन्द्रीय-सर्वकारेण तथा तदर्थं सामाजिक-शैक्षणिकदृष्ट्या पश्चवर्त्ति-वर्गाणां सज्जीकृता तथा पोषिता सूची अभिप्रेता अस्ति।

(३) खण्डः (१) तथा (२) इत्यस्मिन् किमपि सत्यपि, प्रत्येकं राज्येन अथवा सङ्घराज्यक्षेत्रेण विधिना, स्वप्रयोजनार्थं, सामाजिक-शैक्षणिकदृष्ट्या पश्चवर्त्ति-वर्गाणाम् एका सूची सज्जितुं तथा पोषितुं शक्नुयात् यस्मिन् प्रविष्टयः केन्द्रीय-सूचिभ्यः पृथग् भवितुं शक्नुयात्।

---

1 संविधानस्य (द्व्याधिकैकशतम् संशोधनम्) अधिनियमः, २०१८ वर्षस्य ४-अनुभागेन (१५-८-२०१८ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितम्।

2 संविधानस्य (पञ्चाधिकैकशतम् संशोधनम्) अधिनियमः, २०२१ वर्षस्य ३-अनुभागेन (१५-९-२०२१ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितम्।

3 संविधानस्य (पञ्चाधिकैकशतम् संशोधनम्) अधिनियमः, २०२१ वर्षस्य ३-अनुभागेन (१५-९-२०२१ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितम्।

भागः १७

राजभाषा

अध्यायः १ - सङ्घस्य भाषा

३४३. सङ्घस्य राजभाषा- (१) सङ्घस्य राजभाषा देवनागर्यां लिप्यां (लिखिता) हिन्दी भवेत्। सङ्घस्य राजकीयप्रयोजनानां कृते प्रयोक्तव्यानाम् अङ्कानां रूपं भारतीयानाम् अङ्कानाम् आन्ताराष्ट्रियं रूपं भवेत्।

(२) (१) खण्डे किमपि सत्यपि, एतत्संविधानस्य प्रारम्भात् पञ्चदशवर्षाणां कालावधिं यावत्, सङ्घस्य, तेषां सर्वेषां राजकीयप्रयोजनानां कृते आङ्ग्लभाषा प्रयोक्तव्यत्वेन अनुवर्तेत येषां कृते एतादृशप्रारम्भात् प्राक् अव्यवहितपूर्वं सा प्रयुज्यमाना आसीत्-

परन्तु राष्ट्रपतिः उक्तकालावधौ आदेशेन[1] सङ्घस्य राजकीयप्रयोजनेषु कस्यचित्कृते आङ्ग्लभाषया सह एव हिन्दीभाषायाः तथा भारतीयाङ्कानाम् आन्ताराष्ट्रियरूपेण सह एव देवनागरीरूपस्य प्रयोगं प्राधिकृतं कर्तुं क्षमते।

(३) एतदनुच्छेदे किमपि सत्यपि, संसद् उक्तस्य पञ्चदशानां वर्षाणां कालावधेः पश्चात् विधिना-

(क) आङ्ग्लभाषायाः, अथवा

(ख) अङ्कानां देवनागरीरूपस्य,

तादृशेभ्यः प्रयोजनेभ्यः प्रयोगम् उपबन्धितुं कर्तुं क्षमते यादृशानि एतादृशे विधौ विनिर्दिष्टानि भवेयुः।

३४४. राजभाषार्थम् आयोगः, संसदः समितिश्च- (१) राष्ट्रपतिः एतत्संविधानस्य प्रारम्भात् पञ्चानां वर्षाणां समाप्तौ, तत्पश्चात् च, तादृशात् प्रारम्भात् दशवर्षाणां समाप्तौ आदेशेन एकम् आयोगं घटयेत् यश्च एकेन अध्यक्षेण अष्टमानुसूच्यां विनिर्दिष्टानां विभिन्नानां भाषाणां प्रतिनिधिभूतैः तादृशैः अन्यैश्च सदस्यैः सम्भूय भवेत् यादृशान् राष्ट्रपतिः नियुञ्जीत; आदेशे च आयोगेन अनुसरणीया प्रक्रिया परिणिश्चिता भवेत्।

(२) आयोगस्य अयं कर्तव्यः भवेत् यत् आयोगः राष्ट्रपतिं प्रति स्वानुशंसां प्रस्तुयात्-

(क) सङ्घस्य शासकीयप्रयोजनानां कृते हिन्दीभाषायाः उत्तरोत्तरम् अधिकप्रयोगस्य

(ख) सङ्घस्य शासकीयप्रयोजनेषु कस्यापि वा कृते आङ्ग्लभाषायाः प्रयोगे निर्बन्धनानाम्;

(ग) ३४८-तमानुच्छेदे उल्लिखितानां सर्वेषाम् अथवा केषांचित् प्रयोजनानां कृते प्रयोक्तव्यायाः भाषायाः;

---

[1] सं० आ० ४१ द्रष्टव्यः।

(घ) सङ्घस्य कस्यचित् केषांचित् वा विनिर्दिष्टानां प्रयोजनानां कृते प्रयोक्तव्यानाम् अङ्कानां रूपस्य;

(ङ) सङ्घस्य राजभाषायाः, तथा सङ्घस्य कस्यापि राज्यस्य च मध्ये अथवा एकस्य राज्यस्य अन्यद्राज्यस्य च मध्ये संव्यवहारस्य भाषायाः, तथा तयोः प्रयोगस्य विषये राष्ट्रपतिना आयोगं प्रति विनिर्दिष्टस्य कस्यापि अन्यस्य विषयस्य, सम्बन्धे पुरः प्रशंसनम् आयोगस्य कर्तव्यं भवेत्।

(३) द्वितीयखण्डस्य अधीनं स्वकीयपुरःप्रशंसनानां प्रतिपादने, आयोगः भारतस्य औद्योगिक-सांस्कृतिक-वैज्ञानिकोन्नतौ तथा च लोकसेवानां विषये हिन्दीतरभाषिक्षेत्रीयजनानां न्याय्यासु अभ्यर्थनासु, हितेषु च सम्यक् अवधानं दद्यात्।

(४) त्रिंशतः सदस्यानाम् एका समितिः घटिता भवेत्, येषु विंशतिः लोकसभायाः सदस्याः भवेयुः, दश च राज्यसभायाः सदस्याः भवेयुः ये च क्रमशः लोकसभायाः सदस्यैः तथा राज्यसभायाः सदस्यैः अनुपातिप्रतिनिधित्वपद्धतिम् अनुसृत्य एकलसङ्क्रमणीयमतेन निर्वाचिताः भवेयुः।

(५) (१) खण्डस्य अधीनं घटितस्य आयोगस्य पुरः प्रशंसनानां परीक्षणं तथा तद्विषये स्वमतेः राष्ट्रपतये प्रतिवेदनं समितेः कर्तव्यं भवेत्।

(६) ३४३-तमानुच्छेदे किमपि सत्यपि, राष्ट्रपतिः पञ्चमखण्डे निर्दिष्टस्य प्रतिवेदनस्य विचारानन्तरं तस्य सम्पूर्णस्य प्रतिवेदनस्य कस्यापि तद्भागस्य वा अनुसारेण निदेशान् प्रदातुं क्षमते।

अध्यायः २-प्रादेशिकभाषाः

३४५. कस्यापि राज्यस्य राजभाषा अथवा राजभाषाः- ३४६-तमानुच्छेदस्य ३४७-तमानुच्छेदस्य च अधीनं कस्यापि राज्यस्य विधानमण्डलं विधिना तस्मिन् राज्ये प्रयुज्यमानासु भाषासु एकाम्, अनेकां वा हिन्दीं वा तद्राज्यस्य शासकीयप्रयोजनेषु सर्वेषां कस्यापि वा कृते प्रयोक्तव्यभाषारूपेण, अङ्गीकर्तुं क्षमते-

परन्तु यावत् तद्राज्यस्य विधानमण्डलं विधिना, अन्यथा उपबन्धं न करोति तावत् तद्राज्यस्य अभ्यन्तरे तेषां शासकीयप्रयोजनानां कृते, येषां कृते एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं सा प्रयुज्यमाना आसीत्, आङ्ग्लभाषा प्रयोक्तव्यभाषारूपेण अनुवर्तेत।

३४६. एकराज्यस्य राज्यान्तरस्य च मध्ये अथवा कस्यापि राज्यस्य सङ्घस्य च मध्ये संव्यवहारार्थं राजभाषा- सङ्घे शासकीयप्रयोजनानां कृते प्रयोगार्थं तदानीं प्राधिकृता भाषा एकराज्यस्य राज्यान्तरस्य च मध्ये तथा कस्यापि राज्यस्य सङ्घस्य च मध्ये संव्यवहारार्थं राजभाषा भवेत्-

परन्तु द्वे राज्ये, अधिकानि वा समयं चेत् कुरुतः कुर्वन्ति वा, यद् एतादृशराज्ययोः एतादृशराज्यानां वा मध्ये परस्परं संव्यवहारार्थं हिन्दीभाषा राजभाषा भवेत् तर्हि एतादृश संव्यवहारार्थं सा भाषा प्रयोज्या भवितुम् अर्हति।

३४७. कस्यापि राज्यस्य जनसङ्ख्यायाः केनापि विभागेन भाष्यमाणायाः भाषायाः सम्बन्धे विशेषाः उपबन्धाः- तद्विषये अभियाचनायां कृतायां राष्ट्रपतेः समाधानं जायते चेत् यत् कस्यापि राज्यस्य जनसङ्ख्यायाः पर्याप्तः अनुपातः इच्छति यत् तैः भाषामाणा कापि भाषा तद्राज्यस्य अवाप्तमान्यता भाषा भवेत्, तर्हि सः निदेशं कर्तुं क्षमते यत् तादृशीं भाषामपि तस्मिन् राज्ये सर्वत्र, तस्य कस्मिंश्चिद् भागे वा तादृशस्य प्रयोजनस्य कृते यादृशं सः विनिर्दिशेत्, शासकीयमान्यता दत्ता भवेत्।

अध्यायः ३-उच्चतमन्यायालयस्य उच्चन्यायालयादीनां च भाषा

३४८. उच्चतमन्यायालये उच्चन्यायालयेषु तथा च अधिनियमविधेयकादिषु प्रयोक्तव्या भाषा- (१) एतद्भागस्य पूर्ववर्तिषु उपबन्धेषु किमपि सत्यपि, यावत् संसद् विधिना अन्यथा न उपबन्धयति तावत्-

(क) उच्चतमन्यायालये, तथा प्रत्येकस्मिन् उच्चन्यायालये सर्वाः कार्यप्रवृत्तयः;

(ख) (प्रथमः) संसदः अन्यतरस्मिन् सदने अथवा कस्यापि राज्यस्य विधानमण्डलस्य सदने, अन्यतरस्मिन् सदने वा, पुरःस्थापनीयानां विधेयकानाम्, अथवा तेषां सम्बन्धे प्रस्तावनीयानां संशोधनानां प्राधिकृताः पाठाः;

(द्वितीयः) संसदा अथवा कस्यापि राज्यस्य विधानमण्डलेन पारितानाम् अधिनियमानां तथा राष्ट्रपतिना, कस्यापि राज्यस्य राज्यपालेन [1][***] प्रख्यापितानाम् अध्यादेशानां प्राधिकृताः पाठाः; तथा च

(तृतीयः) एतत्संविधानस्य अधीनम्, अथवा संसदा, कस्यापि राज्यस्य विधानमण्डलेन वा निर्मितस्य कस्यापि विधेः अधीनं वा, प्रदत्तानां सर्वेषां आदेशानाम्, नियमानां, विनियामानाम्, उपविधीनां च प्राधिकृताः पाठाश्च, आङ्ग्लभाषायां भवेयुः।

(२) (१) खण्डस्य (क) उपखण्डे किमपि सत्यपि, कस्यापि राज्यस्य राज्यपालः [1][***] राष्ट्रपतेः पूर्वसहमत्या हिन्दीभाषायाः तस्मिन् राज्ये केषामपि शासकीयप्रयोजनानाम् अर्थे प्रयुज्यमानायाः कस्यापि अन्यस्याः भाषायाः वा प्रयोगं, तस्मिन् राज्ये यस्य मुख्यं स्थानं विद्यते तस्य उच्चन्यायालयस्य कार्यप्रवृत्तिषु प्राधिकृतं कर्तुं क्षमते-

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९–अनुभागेन अनुसूच्या च "राजप्रमुखेन वा" इत्येतौ शब्दौ लोपितौ।

परन्तु एतत्खण्डगतं किमपि एतादृशेन उच्चन्यायालयेन पारिते, कृते वा निर्णये, आज्ञप्तौ, आदेशे वा न प्रवर्तेत।

(३) (१) खण्डस्य (ख) उपखण्डे किमपि सत्यपि, यत्र कस्यापि राज्यस्य विधानमण्डलेन, तस्मिन् विधानमण्डले पुरःस्थापितेषु विधेयकेषु, अथवा तेन पारितेषु अधिनियमेषु अथवा तद्राज्यस्य राज्यपालेन [1][***] प्रख्यापितेषु अध्यादेशेषु, अथवा तस्य उपखण्डस्य तृतीयप्रच्छेदे निर्दिष्टे कस्मिन् अपि आदेशे, नियमे, विनियमे, उपविधौ वा प्रयोगार्थम् आङ्ग्लभाषातः भिन्ना कापि भाषा विहिता भवेत् तत्र तद्राज्यस्य राजपत्रे तद्राज्यस्य राज्यपालस्य [1][***] प्राधिकारेण प्रकाशितः तस्य आङ्ग्लभाषायाम् अनुवादः एतदनुच्छेदानुसारम् आङ्ग्लभाषायां प्राधिकृतः पाठः मन्येत।

३४९. भाषासम्बन्धिनः कतिचिद् विधीन् अधिनियमितुं विशेषप्रक्रिया- अस्य संविधानस्य प्रारम्भात् पञ्चदशानां वर्षाणां कालावधिं यावत् ३४८-तमानुच्छेदस्य (१) खण्डे उल्लिखितानां प्रयोजनानां कस्यापि कृते प्रयोक्तव्यभाषार्थम् उपबन्धं कुर्वत् किमपि विधेयकं, संशोधनं वा, संसदः अन्यतरस्मिन् सदने राष्ट्रपतेः पूर्वस्वीकृतिं विना न हि पुरःस्थाप्येत, नापि प्रस्तूयेत; तथा एतादृशस्य कस्यापि विधेयकस्य पुरःस्थापनाय अथवा एतादृशस्य कस्यापि संशोधनस्य प्रस्तावनाय स्वीकृतिः ३४४-तमानुच्छेदस्य (१) खण्डस्य अधीनं घटितस्य आयोगस्य पुरःप्रशंसनानां, तथा तदनुच्छेदस्य (४) खण्डस्य अधीनं घटितायाः समितेः प्रतिवेदनस्य विचारानन्तरम् एव, राष्ट्रपतिना दीयेत।

अध्यायः ५- विशेषनिदेशाः

३५०. व्यथानां निवारणार्थम् अभिवेदनेषु प्रयोक्तव्या भाषा- कस्याः अपि व्यथायाः निवारणार्थं सङ्घस्य कस्यापि राज्यस्य वा कस्मै अपि अधिकारिणे प्राधिकारिणे वा यथायथं सङ्घे वा तद्राज्ये वा प्रयुज्यमानायां कस्यामपि भाषायाम् अभ्यावेदनं दातुं प्रत्येकजनस्य स्वत्वं भवेत्।

[2][**३५०क. प्राथमिकस्तरे मातृभाषायां शिक्षार्थं सुविधाः-** प्रत्येकराज्यस्य, तद्राज्याभ्यन्तर्गतस्य प्रत्येकस्थानीयप्राधिकारिणश्च प्रयासः भवेत् यद् भाषकीयाल्पसङ्ख्यकवर्गाणां बालकानां शिक्षायाः प्राथमिकस्तरे मातृभाषायां शिक्षाप्रदानाय पर्याप्ता व्यवस्था क्रियते; तथा च राष्ट्रपतिः कस्मै अपि राज्याय एतादृशान् निदेशान् प्रदातुं क्षमते यान् सः तादृशीनां व्यवस्थानां कृते उपबन्धान् सुनिश्चेतुम् आवश्यकान् उचितान् वा मन्यते।

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९–अनुभागेन अनुसूच्या च "राजप्रमुखेन वा" इत्येतौ शब्दौ लोपितौ।

2 उपर्युक्ताधिनियमस्य २१–अनुभागेन एतौ अनुच्छेदौ अन्तर्वेशितौ।

(भागः १७- राजभाषा)

३५०ख. भाषकीयाल्पसङ्ख्यकवर्गाणां कृते विशेषाधिकारी- (१) भाषकीयाल्पसङ्ख्यकवर्गाणां कृते एकः विशेषाधिकारः भवेत्, सः च राष्ट्रपतिना नियुक्तः भवेत्।

(२) विशेषाधिकारिणः कर्तव्यं भवेत् यत् सः भाषकीयाल्पसङ्ख्यकवर्गाणां कृते उपबन्धितैः रक्षोपायैः सम्बद्धेषु सर्वेषु विषयेषु अन्वेषणं कुर्यात्, तथा च एतेषां विषयाणां सम्बन्धे राष्ट्रपतये तेन निर्दिष्टेषु अन्तरालेषु प्रतिवेदनानि अर्पयेत्; राष्ट्रपतिश्च एतादृशानि सर्वाणि प्रतिवेदनानि संसदः प्रत्येकसदने पुरःस्थापयेत् तथा तैः सम्बद्धेभ्यः राज्येभ्यः तानि प्रेषयेत्।]

३५१. हिन्दीभाषायाः विकासार्थं निदेशः- हिन्दीभाषायाः प्रसारस्य वृद्धिः तस्याः विकासः यथा सा भारतस्य सामासिकसंस्कृतेः, सर्वेषां तत्त्वानाम् अभिव्यक्तेः साधनं सम्पद्यते, तथा तस्याः प्रकृत्यां हस्तक्षेपमन्तरेण हिन्दुस्थान्याः, अष्टमानुसूच्यां विनिर्दिष्टानाम् अन्यासां भारतीयभाषाणां च रूपाणां शैल्याः पदानां च आत्मसात्कारेण तथा यत्र आवश्यकं वाञ्छनीयं च भवेत् तत्र तस्याः शब्दभाण्डाराय मुख्यतया संस्कृतात्, गौणतया च अन्यभाषाभ्यः शब्दग्रहणेन तस्याः समृद्धेः सम्पादनं सङ्घस्य कर्तव्यं भवेत्।

भागः १८
आपातीयाः उपबन्धाः

३५२. आपातस्य उद्घोषणा- (१) यदि राष्ट्रपतिः समाहितः भवति यद् घोरः आपातः विद्यते यतः हि युद्धेन बाह्याक्रमणेन वा [1][सशस्त्रविद्रोहेण वा] भारतस्य, तस्य राज्यक्षेत्रस्य कस्यापि भागस्य वा सुरक्षा सङ्कटापन्ना अस्ति, तर्हि सः उद्घोषणाद्वारा [2][सम्पूर्णस्य भारतस्य सम्बन्धे अथवा तस्य तादृशस्य भागस्य सम्बन्धे, यः भागः उद्घोषणायां विनिर्दिष्टः भवितुम् अर्हति] तदाशयस्य घोषणां कर्तुं क्षमते।

[3][*स्पष्टीकरणम्-* यदि राष्ट्रपतिः समाहितः भवति यद् युद्धस्य, बाह्याक्रमणस्य सशस्त्रविद्रोहस्य वा सङ्कटं सन्निहितं वर्तते, तर्हि युद्धस्य, बाह्याक्रमणस्य, सशस्त्रविद्रोहस्य वास्तविक्याः घटनायाः पूर्वमपि भारतस्य अथवा भारतराज्यक्षेत्रस्य कस्यापि भागस्य सुरक्षा एवं सङ्कटापन्ना वर्तते इति घोषयन्तीम् आपातस्य उद्घोषणा कर्तुं क्षमते।]

[4][(२) (१) खण्डस्य अधीनं कृता उद्घोषणाम् उत्तरवर्तिन्या उद्घोषणया परिवर्तिता, प्रतिसंहृता वा भवितुं क्षमते।

(३) राष्ट्रपतिः (१) खण्डस्य अधीनम् उद्घोषणाम् अथवा तादृश्याम् उद्घोषणायां परिवर्तनकर्त्रीम् उद्घोषणां तावत् न कुर्यात् यावत् सङ्घस्य मन्त्रिमण्डलस्य (अर्थात् ७५-तमानुच्छेदस्य अधीनं या परिषत् प्रधानमन्त्रिणा तथा मन्त्रिमण्डलस्तरीयैः अन्यैः मन्त्रिभिः सम्भूय भवति तस्याः) एतादृशः विनिश्चयः, यत् एतादृशी, उद्घोषणा कृता भवितुम् अर्हति इति तस्मै संसूचितः न भवति;

(४) एतद् अनुच्छेदस्य अधीनं कृता प्रत्येकम् उद्घोषणा संसदः उभयोः सदनयोः समक्षं स्थापिता भवेत्, यत्र च सा पूर्ववर्तिनीम् उद्घोषणां प्रतिसंहरन्ती उद्घोषणा नास्ति तत्र सा एकमासावधेः समाप्तौ, यदि उक्तावधेः सामाप्त्याः पूर्वम् एवं संसदः उभाभ्यां सदनाभ्यां पारिताभ्यां सङ्कल्पाभ्याम् अनुमोदिता न भवति, तर्हि प्रवर्तनात् प्रविरमेत्-

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३७- अनुभागेन “आभ्यन्तर्या अशान्त्या” इत्येताभ्यां शब्दाभ्यां प्रति संनिवेशितौ (२०-०६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ४८- अनुभागेन एतत् अन्तर्वेशितम् (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण))।

3 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३७- अनुभागेन अन्तर्वेशितः (२०-०६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन (२), (२क), (३) खण्डेभ्यः प्रति एते खण्डाः संनिवेशिताः।

परन्तु एतादृशी कापि उद्घोषणा (या पूर्ववर्तिनीम् उद्घोषणां प्रतिसंहरन्ती उद्घोषणा नास्ति), यदि तस्मिन् काले क्रियते, यदा लोकसभा विघटिता वर्तते, अथवा लोकसभायाः विघटनम् अस्मिन् खण्डे निर्दिष्टे एकमासावधौ भवति तथा यदि उद्घोषणायाः अनुमोदकः सङ्कल्पः राज्यसभया पारितः अस्ति किन्तु एतादृश्याः उद्घोषणायाः सम्बन्धे कोऽपि सङ्कल्पः लोकसभया एतादृशस्य कालावधेः समाप्तेः प्राक् पारितः न भवति, तर्हि सा उद्घोषणा एतादृशात् दिनाङ्कात्, यस्मिन् दिनाङ्के लोकसभा तस्याः पुनर्घटनानन्तरं प्रथमवारम् उपविशति, त्रिंशद् दिनानां समाप्तौ प्रवर्तनात् प्रविरमेत्। यदि तादृशस्य त्रिंशद्दिनावधेः समाप्तेः प्राक् तदुद्घोषणायाः अनुमोदकः सङ्कल्पः पारितः न भवति।

(५) एवम् अनुमोदिता उद्घोषणा, यदि प्रतिसंहृता न भवति, तर्हि (४) खण्डस्य अधीनम् उद्घोषणायाः अनुमोदकयोः सङ्कल्पयोः द्वितीयस्य सङ्कल्पस्य पारणस्य दिनाङ्कात् षण्णां मासानाम् अवधेः समाप्तौ प्रवर्तनाद् प्रविरमेत्-

परन्तु यदि, यावद्वारं च, एतादृश्याः उद्घोषणायाः प्रवृत्तेः अनुवर्तनार्थम् अनुमोदकः सङ्कल्पः संसदः उभाभ्यां सदनाभ्यां पारितः भवति तर्हि तावद्वारं प्रतिसंहरणादृते, सा यस्मिन् दिनाङ्के अस्य खण्डस्य अधीनम् अन्यथा विरता अभविष्यत्, तस्मात् दिनाङ्कात् षण्मासानां कालावधौ अविरतं प्रवर्तमाना अनुवर्तेत-

अपरं च यदि लोकसभायाः विघटनम् एतादृशस्य षण्णां मासानाम् अवधेः अभ्यन्तरे भवति, तथा एतादृश्याः उद्घोषणायाः प्रवर्तनस्य अनुवर्तनाय अनुमोदनं कुर्वन् सङ्कल्पः राज्यसभया पारितः भवति किन्तु एतस्याः उद्घोषणायाः प्रवर्तनस्य अनुवर्तनाय सम्बन्धे कोऽपि सङ्कल्पः तदवधेः अभ्यन्तरे लोकसभया पारितः न भवति, तर्हि सा उद्घोषणा यस्मिन् दिनाङ्के लोकसभा तस्याः पुनर्घटनान्तरं प्रथमवारम् उपविशति तस्मात् दिनाङ्कात् त्रिंशद् दिनावधेः समाप्तौ प्रवर्तनात् प्रविरमेत्, यदि एतादृशस्य त्रिंशद्दिनावधेः समाप्तेः प्राक्, उद्घोषणायाः प्रवृत्तेः अनुवर्तनाय अनुमोदनं कुर्वन् सङ्कल्पः लोकसभयापि पारितः न भवति।

(६) (४) खण्डस्य, (५) खण्डस्य च प्रयोजनानाम् अर्थे सङ्कल्पः संसदः अन्यतरेण सदनेन तत्सदनस्य समस्तसदस्यसङ्ख्यायाः मध्ये बहुमतेन, तथा च तस्य सदनस्य उपस्थितानां मतं च ददतां सदस्यानां तृतीयांशद्वयाद् अन्यूनेन बहुमतेन एव पारितः भवितुम् अर्हति।

(७) पूर्वगामिषु खण्डेषु किमपि सत्यपि, यदि लोकसभा (१) खण्डस्य अधीनं कृतायाः उद्घोषणायाः, अथवा एतादृश्याम् उद्घोषणायां परिवर्तनं कुर्वन्त्याः उद्घोषणायाः अननुमोदनं कुर्वन्तम्, अथवा यथायथम् एतस्याः प्रवर्तनस्य अननुमोदनं कुर्वन्तं सङ्कल्पं पारयति, तर्हि राष्ट्रपतिः एतादृशीम् उद्घोषणां प्रतिसंहरेत्।

(८) यत्र (१) खण्डस्य अधीनं कृतायाः उद्घोषणायाः अथवा एतादृश्याम् उद्घोषणां परिवर्तनं कुर्वन्त्याः उद्घोषणायाः यथायथम् अननुमोदनं कुर्वन्तम्, अथवा एतस्याः प्रवृत्तेः अनुवर्तनस्य अनुमोदनं कुर्वन्तं सङ्कल्पं प्रस्तावितं कर्तुं स्वीयाशयस्य सूचना लोकसभायाः समस्तसदस्यसङ्ख्यायाः दशमभागसङ्ख्याकैः सदस्यैः स्वहस्ताङ्किता लिखितरूपेण-

(क) यदि लोकसभा सत्रस्थिता अस्ति तर्हि अध्यक्षं प्रति; अथवा

(ख) यदि लोकसभा सत्रस्थिता न अस्ति तर्हि राष्ट्रपतिं प्रति, दत्ता भवति, तत्र एतादृशस्य सङ्कल्पस्य विचारणायाः प्रयोजनार्थं यथायथम् अध्यक्षेण राष्ट्रपतिना वा, एतादृशी सूचना प्राप्ता भवति तद्दिनाङ्कात् चतुर्दशदिनानाम् अभ्यन्तरे, लोकसभायाः विशेषोपवेशनं कृतं भवेत्।]

[1][(९)] एतदनुच्छेदेन राष्ट्रपतये प्रदत्ता शक्तिः युद्धस्य, बाह्याक्रमणस्य, [2][सशस्त्रविद्रोहस्य वा अथवा युद्धस्य, बाह्याक्रमणस्य, [2][सशस्त्रविद्रोहस्य वा] सन्निहितसङ्कटस्य वा इत्येतैः विभिन्नैः आधारैः विभिन्नाः उद्घोषणाः कर्तुं शक्तिम् अन्तर्भावयति, यद्यपि राष्ट्रपतिना (१) खण्डस्य अधीनं कापि उद्घोषणा पूर्वं कृता स्यात् न वा, अथवा एतादृशी उद्घोषणा प्रवर्तमाना विद्यते न वा।

[1][* * * * * * * *]

३५३. आपातस्य-उद्घोषणायाः प्रभावः- यदा आपातस्य उद्घोषणा प्रवर्तते तदा-

(क) एतत्संविधाने किमपि सत्यपि, सङ्घस्य कार्यपालिका शक्तिः कस्मैचिदपि राज्याय तेन स्वकार्यपालिका शक्तिः कया रीत्या प्रयोक्तव्या इति विषये निदेशदानपर्यन्तं विस्तृता भवेत्;

(ख) कस्यापि विषयस्य सम्बन्धे, तद्विषयस्य सङ्घसूच्यां प्रगणिते न सत्यपि, विधिनिर्माणस्य संसदः शक्तौ एतादृशानां विधीनां निर्माणस्य शक्तिः अपि अन्तर्भवेत् ये (विधयः) तद्विषयस्य सम्बन्धे सङ्घाय अथवा सङ्घस्य अधिकारिभ्यः प्राधिकारिभ्यश्च शक्तीः ददति तेषु कर्तव्यानां च अधिरोपणं प्राधिकृतं कुर्वन्ति-

---

1 संविधानस्य (अष्टत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य ५-अनुभागेन (भूतलक्षिप्रभावेण) खण्डः (४) तथा खण्डः (५) अन्तर्वेशितं तथा तदनन्तरं खण्डः (४) तथा खण्डः (५), खण्डः (९) रूपेण पुनर्सङ्ख्यायिताः तथा संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३७-अनुभागेन (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) खण्डः (५) लोपितः।

2 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३७-अनुभागेन "आभ्यन्तर्याः अशान्त्याः" इत्येताभ्यां शब्दाभ्यां प्रति एतौ शब्दौ संनिवेशितौ (२०-६-१९७९ दिनाङ्कात् प्रवतेमानप्रभावेण)।

[1][परन्तु यत्र आपातस्य उद्घोषणा भारतस्य राज्यक्षेत्रस्य कस्मिंश्चिद् भागे एव प्रवृत्ता अस्ति तत्र

(प्रथमः) (क) खण्डाधीनं निदेशान् दातुं सङ्घस्य कार्यपालिका शक्तिः,

(द्वितीयः) (ख) खण्डाधीनं विधि निर्माणे संसदः शक्तिश्च,

यस्मिन् राज्ये अथवा तस्य कस्मिन् अपि भागे आपातस्य उद्घोषणा प्रवृत्ता अस्ति तस्मात् अन्यतमस्मिन् कस्मिन् अपि राज्ये अपि विस्तृता भवेत् यदि यावत् पर्यन्तञ्च भारतस्य राज्यक्षेत्रस्य तस्य कस्यापि भागस्य वा सुरक्षा, भारतस्य राज्यक्षेत्रस्य एतादृशे भागे यत्र आपातस्य उद्घोषणा प्रवृत्ता अस्ति तस्मिन् तत्सम्बन्धे वा प्रवृत्तैः कार्यकलापैः सङ्कटापन्ना भवति।]

३५४. यदा आपातस्य उद्घोषणा प्रवर्तते तदा राजस्वविभाजनसम्बन्धिनाम् उपबन्धानाम् अनुप्रयोगः- (१) यदा आपातस्य उद्घोषणा प्रवर्तते तदा राष्ट्रपतिः आदेशेन निदेष्टुं क्षमते यद् एतस्य संविधानस्य २६८-तमानुच्छेदात् २७९-तमानुच्छेदपर्यन्तानां सर्वेषाम् अनुच्छेदानां सर्वे अथवा केपि उपबन्धाः, एतादृशे कस्मिन् अपि कालावधौ, यादृशः कालावधिः तस्मिन् आदेशे विनिर्दिष्टः भवितुम् अर्हति, यः (कालावधिः) च कस्यामपि दशायां तस्य वित्तीयवर्षस्य समाप्तेः अनन्तरं विस्तृतः न भवेत् यस्मिन् एतादृशी उद्घोषणा प्रवर्तनात् प्रविरमति, तादृशानाम् अपवादानाम् उपान्तरणानां च अधीनं प्रभाविनः भवेयुः यादृशान् सः उचितान् मन्यते।

(२) (१) खण्डस्य अधीनः कृतः प्रत्येकम् आदेशः तस्य करणात् अनन्तरं यथासम्भवं शीघ्रं संसदः प्रत्येकसदनस्य पुरतः स्थाप्येत।

३५५. बाह्याक्रमणात्, आभ्यान्तर्याः अशान्तेश्च, राज्यानां संरक्षणस्य सम्बन्धे सङ्घस्य कर्तव्यता- बाह्याक्रमणात्, आाभ्यन्तर्याः अशान्तेश्च प्रत्येकराज्यस्य संरक्षणं, तथा प्रत्येकराज्यस्य शासनं एतस्य संविधानस्य उपबन्धानाम् अनुसारं प्रवर्त्यते इति सुनिश्चितीकरणं सङ्घस्य कर्तव्यं भवेत्।

३५६. राज्येषु संवैधानिकतन्त्रस्य विफलदशायाम् उपबन्धाः- (१) यदि कस्यापि राज्यस्य राज्यपालात् [2][***] प्रतिवेदनस्य प्राप्तौ अन्यथा वा राष्ट्रपतिः समाहितः भवति यद् एतादृशी स्थितिः समुत्पन्ना विद्यते यस्यां तस्य राज्यस्य शासनं एतत्संविधानस्य उपबन्धानाम् अनुसारेण प्रवर्तयितुं न शक्यते, तर्हि राष्ट्रपतिः उद्घोषणा द्वारा-

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ४९-अनुभागेन अन्तर्वेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राजप्रमुखाद् वा" इत्येतौ शब्दौ लोपितौ।

(क) तद्राज्यशासनस्य सर्वाणि कृत्यानि किमपि कृत्यं वा, तथा च राज्यपाले [1][***], अथवा राज्यस्य विधानमण्डलं वर्जयित्वा राज्यस्य कस्मिन् अपि निकाये, प्राधिकारिणि वा निहिताः, तेन तेन वा प्रयोक्तव्याः सर्वाः शक्तीः कांचित् वा शक्तिं, स्वायत्तीकर्तुं क्षमते;

(ख) एवं घोषयितुं क्षमते यद् राज्यविधानमण्डलस्य शक्तयः संसदः प्राधिकारेण, तदधीनं वा प्रयोक्तव्याः भवेयुः;

(ग) राज्ये केनापि निकायेन, प्राधिकारिणा वा सम्बद्धानाम् एतत्संविधानस्य केषामपि उपबन्धानां प्रवर्तनं पूर्णतः अंशतः वा निलम्बितं कर्तुम् उपबन्धैः सहितान् तादृशान् प्रासङ्गिकान्, आनुषङ्गिकान् च उपबन्धान् निर्मातुं क्षमते, यादृशान् राष्ट्रपतिः उद्घोषणायाः उद्देश्यानि प्रभाववन्ति सम्पादयितुम् आवश्यकान् वाञ्छनीयान् च प्रत्येति-

परन्तु एतत् खण्डगतं किमपि राष्ट्रपतिम्, उच्चन्यायालये निहतानां, तेन वा प्रयोक्तव्यानां शक्तीनां कामपि स्वायत्तीकर्तुम्, अथवा एतत्संविधानस्य उच्चन्यायालयैः सम्बद्धानां केषामपि उपबन्धानां प्रवर्तनं पूर्णतः अंशतः वा निलम्बितं विधातुं प्राधिकृतं न कुर्यात्।

(२) एतादृशी कापि उद्घोषणा कयापि उत्तरवर्तिन्या उद्घोषणया प्रतिसंहृता परिवर्तिता वा भवितुं शक्यते।

(३) एतदनुच्छेदस्य अधीना कृता प्रत्येका उद्घोषणा संसदः प्रत्येकसदनस्य समक्षं स्थाप्येत, तथा यत्र सा पूर्ववर्तिन्याः उद्घोषणायाः प्रतिसंहर्त्री उद्घोषणा न भवति, तत्र सा मासद्वयस्य समाप्तौ, यदि सा तत्कालावधेः समाप्तेः प्राक् संसदः उभाभ्यां सदनाभ्यां सङ्कल्पेन अनुमोदितः न जायते प्रवर्तनात् विरमेत्-

परन्तु यदि एतादृशी कापि उद्घोषणा (या पूर्ववर्तिन्याः उद्घोषणायाः प्रतिसंहर्त्री उद्घोषणा न भवति) तस्मिन् काले कृता भवति यदा लोकसभा विघटिता वर्तते, अथवा लोकसभायाः विघटनं एतत्खण्डे निर्दिष्टस्य मासद्वयकालावधेः अभ्यन्तरे सम्पद्यते, तथा च यदि उद्घोषणायाः अनुमोदकः सङ्कल्पः राज्यसभया पारितः अस्ति, किन्तु एतादृश्याः उद्घोषणायाः सम्बन्धे लोकसभया तत्कालावधेः समाप्तेः प्राक् कोऽपि सङ्कल्पः पारितः न भवति, तर्हि सा उद्घोषणा यस्मिन् लोकसभा स्वकीयपुनर्घटनस्य अनन्तरं प्रथमवारम् उपविशति तस्मात् दिनाङ्कात्, त्रिंशद् दिनानां समाप्तौ प्रवर्तनात् विरमेत्, यदि उक्तस्य त्रिंशद्दिनावधेः समाप्तेः प्राक् तदुद्घोषणायाः अनुमोदकः संङ्कल्पः लोकसभयापि पारितः न भवति।

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च , "यथायथं राज्यपाले राजप्रमुखे वा" इत्येतेभ्यः शब्देभ्यः प्रति एतत् संनिवेशितम्।

(४) एवम् अनुमोदिता उद्घोषणा, यदि प्रतिसंहृता न भवति तर्हि [1][उद्घोषणायाः करणदिनाङ्कात् षण्णां मासानां कालावधेः समाप्तौ] प्रवर्तनात् विरमेत्-

परन्तु यदि, यावद्वारं च एतादृश्याः उद्घोषणायाः प्रवर्तनस्य अनुवर्तनार्थम् अनुमोदकः सङ्कल्पः संसदः उभाभ्यां सदनाभ्यां पारितः भवति तर्हि, तावद्वारं च सा उद्घोषणा, यदि प्रतिसंहृता न चेत्, तस्माद् दिनाङ्कात् यस्मिन् सा एतत्खण्डस्य अधीनम् अन्यथा प्रवर्तनात् प्रविरमेत्, [2][षण्णां मासानां] अपरं कालावधिं यावत् प्रवर्तेत, किन्तु कापि एतादृशी उद्घोषणा कस्यामपि दशायां वर्षत्रयादधिकं प्रवर्तमाना न भवेत्-

अपरं च, यदि लोकसभायाः विघटनं [2][षण्णां मासानां] कस्यापि एतादृशस्य कालावधेः अभ्यन्तरे भवति, तथा च एतादृश्याः उद्घोषणायाः प्रवर्तनस्य अनुवर्तनार्थम् अनुमोदकः सङ्कल्पः राज्यसभया पारितः अस्ति किन्तु एतादृश्याः उद्घोषणायाः प्रवर्तनस्य अनुवर्तनविषये कोऽपि सङ्कल्पः लोकसभया उक्तकालावधौ पारितः न भवति, तर्हि सा उद्घोषणा यस्मिन् दिने लोकसभा तस्य पुनर्घटनस्य अनन्तरं प्रथमवारम् उपविशति, तस्मात् दिनाङ्कात्, त्रिंशद्दिनानां समाप्तौ प्रवर्तनात् प्रविरमेत्; यदि उक्तस्य त्रिंशद्दिन कालावधेः समाप्तेः प्राक् तदुद्घोषणायाः प्रवर्तनस्य अनुवर्तनार्थम् अनुमोदनं कुर्वन् सङ्कल्पः लोकसभया अपि पारितः न भवति।

[3][परञ्च अस्य खण्डस्य कोऽपि विषयः पंजाबराज्यस्य सम्बन्धे, १९८७ वर्षस्य मई-मासस्य ११-दिने खण्डः (१) इत्यस्य अधीना कृता या उद्घोषणायाः दशायाम्, अस्य खण्डस्य पूर्व-पारन्तुके “त्रिवर्षाणि” इतीमं प्रति निर्देशस्य अनेन प्रकारेण अर्थयेत्, मन्ये तत् [4][पञ्चवर्षाणि] इतीमं प्रतिनिर्देशं भवेत्।]

---

[1] संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३८-अनुभागेन (३) खण्डस्य अधीनम्, उद्घोषणायाः “अनुमोदकयोः सङ्कल्पयोः द्वितीयस्य सङ्कल्पस्य पारणस्य दिनाङ्कात् वर्षस्य“ इत्येतस्मात् प्रति एतत् संनिवेशितं (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)। संविधानस्य (द्विचत्वारिशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५०-अनुभागेनः “षण्णां मासानाम्” इत्येताभ्यां मूलपाठस्थिताभ्यां शब्दाभ्यां प्रति “एकवर्षस्य” इत्येतत् पदं संनिवेशितम् आसीत् (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[2] संविधानस्य (चतुश्चत्वारिंशत्तमं सशोधनम्) अधिनियमः, १९७८ इत्यस्य ३८-अनुभागेन “एकवर्षस्य” इत्येतस्मात् प्रति एतौ शब्दौ संनिवेशितौ (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)। संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५०-अनुभागेन “षण्णां मासानाम्” इत्येताभ्यां मूलपाठस्थिताभ्यां शब्दाभ्यां प्रति “एकवर्षस्य” इत्येतत् पदं संनिवेशितम् आसीत् (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[3] संविधानस्य (चतुष्षष्टितमं संशोधनम्) अधिनियमः, १९९० वर्षस्य २-अनुभागेन (१६-४-१९९० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

[4] संविधानस्य (सप्तषष्टितमं संशोधनम्) अधिनियमः, १९९० वर्षस्य २-अनुभागेन (४-१०-१९९० दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रतिष्ठापितः ततः परञ्च संविधानस्य (अष्टषष्टितमं संशोधनम्) अधिनियमः, १९९१ वर्षस्य २-अनुभागेन (१२-३-१९९१ दिनाङ्कात् प्रवर्तमानप्रभावेण) पुनःसंनिवेशितः।

[1][(५) (४) खण्डे किमपि सत्यपि, (३) खण्डस्य अधीनम् अनुमोदितायाः उद्घोषणायाः प्रवृत्तेः अनुवर्तनस्य सम्बन्धे एतादृश्याः उद्घोषणायाः करणस्य दिनाङ्कात् एकवर्षस्य समाप्तेः परं कस्मिन् अपि अवधौ तस्याः प्रवृत्तेः अनुवर्तनसम्बन्धे सङ्कल्पः संसदः कतरेण अपि सदनेन पारितः केवलं तदा भवेत् यदा;

(क) एतादृशस्य सङ्कल्पस्य पारणसमये समस्तभारते, अथवा यथायथं समस्तराज्ये, राज्यस्य कस्मिंश्चिद् अपि भागे वा आपातस्य उद्घोषणा प्रवृत्ता वर्तते, तथा

(ख) निर्वाचनायोगः प्रमाणयति यद् (३) खण्डानुसारम् अनुमोदितायाः उद्घोषणायाः प्रवृत्तेः एतादृशे सङ्कल्पे विनिर्दिष्टकालावधौ अनुवर्तनं, सम्बन्धितराज्यस्य विधानसभायै सामान्यनिर्वाचनकरणे प्राप्तानां बाधानां कारणेन, आवश्यकं विद्यते।]

[2][परन्तु अस्य खण्डस्य कोऽपि विषयः पंजाबराज्यस्य सम्बन्धे, १९८७ वर्षस्य मईमासस्य ११-दिने खण्डः (१) इत्यस्य अधीना कृता या उद्घोषणा तस्यां न प्रवर्तेत।]

३५७. ३५६-तमानुच्छेदस्य अधीनं कृतायाः उद्घोषणाया अधीनं विधायिनीनां शक्तीनां प्रयोगः- (१) यत्र ३५६-तमानुच्छेदस्य (१) खण्डस्य अधीनं कृतया उद्घोषणया घोषितं वर्तते यद् राज्यस्य विधानमण्डलस्य शक्तयः संसदा, तस्याः प्राधिकारस्य अधीनं वा प्रयोक्तव्याः भवेयुः, तत्र

(क) राज्यविधानमण्डलस्य विधिनिर्माणशक्तेः राष्ट्रपतये प्रदानार्थं तथा एवं प्रदत्तायाः शक्तेः अन्यस्मै कस्मैचिद् अपि प्राधिकारिणे, यं राष्ट्रपतिः तदर्थं विनिर्दिशेत्, एतादृशानां प्रतिबन्धानाम् अधीनं येषाम् अधिरोपणं सः उचितं मन्यते, प्रत्यायोजनार्थं राष्ट्रपतिं प्राधिकृतं कर्तुं संसदः;

(ख) सङ्घाय तस्य अधिकारिभ्यः,प्राधिकारिभ्यश्च शक्तीः प्रददतां, तेषु कर्तव्यानि वा अधिरोपयताम् अथवा शक्तीनां प्रदानं, कर्तव्यानां च अधिरोपणं प्राधिकृतं कुर्वतां विधीनां निर्माणस्य संसदः, अथवा राष्ट्रपतेः अथवा यस्मिन् (क) उपखण्डस्य अधीनं तादृशानां विधीनां निर्माणस्य शक्तिः निहिता वर्तते तादृशस्य अन्यस्य प्राधिकारिणः;

(ग) यदा लोकसभा सत्रस्थिता न विद्यते तदा एतादृशस्य व्ययस्य संसदः स्वीकृतेः लम्बनपर्यन्तं राज्यस्य सञ्चितनिधेः व्ययं प्राधिकृतं कर्तुं च राष्ट्रपतेः,क्षमता भवेत्।

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३८-अनुभागेन (५) खण्डात् प्रति एषः खण्डः संनिवेशितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण) (५) खण्डश्च, संविधानस्य (अष्टत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य ६-अनुभागेन अन्तर्वेशितः आसीत् (भूतलक्षिप्रभावेण)।

2 संविधानस्य (त्रिषष्टितमं संशोधनम्) अधिनियमः, १९८९ वर्षस्य २-अनुभागेन (६-१-१९९० दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपितः, ततः परं संविधानस्य (चतुष्षष्टितमं संशोधनम्) अधिनियमः, १९९० वर्षस्य २-अनुभागेन (१६-४-१९९० दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितः।

[1][(२) राज्यविधानमण्डलस्य शक्तेः प्रयोगे संसदा, राष्ट्रपतिना वा (१) खण्डस्य (क) उपखण्डे निर्दिष्टे प्राधिकारिणा वा निर्मितः कोऽपि विधिः, यं ३५६-तमानुच्छेदस्य अधीनं कृतायाः उद्घोषणायाः अभावे, संसद्, राष्ट्रपतिः वा, तादृशः अन्यः प्राधिकारी वा निर्मातुं क्षमः न भवेत्, उद्घोषणायाः प्रवर्तनात् प्रविरामस्य अनन्तरं, यावत् क्षमेण विधानमण्डलेन, अन्येन प्राधिकारिणा वा परिवर्तितः, निरसितः, संशोधितः वा न भवति, तावत् पर्यन्तं प्रवर्तने अनुवर्तेत।]

३५८. आपातकाले १९-तमानुच्छेदस्य उपबन्धानां निलम्बनम्- [2][(१) [3][भारतस्य अथवा तस्य राज्यक्षेत्रस्य कस्यापि भागस्य सुरक्षा, युद्धेन बाह्याक्रमणेन वा सङ्कटापन्ना अस्ति इति घोषयन्ती उद्घोषणा यावत् प्रवर्तमाना भवति तावत्] १९-तमानुच्छेदगतं किमपि तृतीये (३) भागे यथा परिभाषितस्य कस्यापि विधेः प्रणयनाय, कस्यापि कार्यपालिककृत्यस्य करणाय च शक्तिं न निर्बन्धयेत् यं निर्मातुं, कर्तुं वा तद्राज्यं तत्खण्डगतानाम् उपबन्धानाम् अभावे अक्षमम् अभविष्यत्, न निर्बन्धयेत्; किन्तु एवं प्रणीतः कोऽपि विधिः, उद्घोषणायाः प्रवर्तनस्य विरामे तस्य अक्षमतायाः मात्रां यावत् शीघ्रः प्रभावात् विरमेत् तानि कृतानि अकृतानि च विहाय यानि विधेः एवं प्रभावविरामात् प्राक् कृतानि अकृतानि वा। [4][परन्तु [5][यदि एतादृशी आपातस्य उद्घोषणा] भारतराज्यक्षेत्रस्य कस्मिंश्चित् भागे एव प्रवर्तमाना अस्ति तदा तावत् च यस्मिन् यस्य कस्मिंश्चित् भागे वा आपातस्य उद्घोषणा, प्रवृत्ता न वर्तते तस्य कस्यापि राज्यस्य सङ्घराज्यक्षेत्रस्य वा सम्बन्धे, तस्मिन् राज्ये, सङ्घराज्यक्षेत्रे वा एतदनुच्छेदाधीनम् एतादृशः कोऽपि विधिः प्रणीतः भवितुम्, अथवा किमपि कार्यपालिककार्यं कृतं भवितुं शक्यते, यदि यावत् च यस्मिन् आपातस्य उद्घोषणां प्रवर्तमाना अस्ति तस्य भारतराज्यक्षेत्रभागस्य तेन सम्बद्धैः कार्यकलापैः भारतस्य तस्य राज्यक्षेत्रस्य कस्यचिद् भागस्य वा सुरक्षा सङ्कटापन्ना विद्यते।]

[6][(२) (१) खण्डगतं किमपि-

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५१-अनुभागेन (२) खण्डात् प्रति एषः खण्डः संनिवेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३९-अनुभागेन ३५८-तमानुच्छेदं (१) खण्डरूपेण क्रमाङ्कितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन "यावत् आपातस्य उद्घोषणा प्रवर्तमाना भवति तावत्" इत्येतस्मात् प्रति एतत् संन्निवेशितम् (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५२-अनुभागेन अन्तर्वेशितः, (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

5 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ३९-अनुभागेन "यत्र आपातोद्घोषणा" इत्येतस्मात् प्रति एतत् संनिवेशितम् (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

6 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अन्तर्वेशितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(क) तादृशे कस्मिन् अपि विधौ यस्मिन् एषः आशयः उल्लिखितः न भवति यत् सः विधिः तदानीं प्रवर्तमानया आपातोद्घोषणया सम्बद्धः अस्ति, अथवा

(ख) तादृशम् आशयम् अन्तर्वेशयतः विधेः अधीनत्वात् अन्यथा कृते कस्मिन् अपि कार्यपालिका कृत्येनानुप्रयुज्यते ।]

३५९. आपातकाले तृतीयभागेन प्रदत्ताधिकाराणां प्रवर्तनस्य निलम्बनम्- (१) यत्र आपातस्य उद्घोषणा प्रवर्तते तत्र राष्ट्रपतिः आदेशेन घोषयितुं क्षमते यत् [1][(२०-तमं, २१-तमं च अनुच्छेदं विहाय) तृतीयभागेन प्रदत्तेषु अधिकारेषु] तादृशानां प्रवर्तनार्थं यादृशा; तस्मिन् आदेशे उल्लिखिताः भवेयुः, कस्मिन् अपि न्यायालये समावेदनस्य अधिकारः तथा एवं उल्लिखितान् अधिकारान् प्रवर्तयितुं कस्मिन् अपि न्यायालये लम्बिताः सर्वाः कार्यप्रवृत्तयः तं कालावधिं यावत् यस्मिन् उद्घोषणा प्रवर्तते अथवा; ततः अल्पतरं तादृशं कालावधिं यावत् यादृशः आदेशे विनिर्दिष्टः भवेत् निलम्बिताः तिष्ठेयुः ।

[2][(१क) यावत् [1](२०तमम्, २१तमम्, अनुच्छेदं विहाय) [तृतीयभागेन प्रदत्तान् कान् अपि अधिकारान्] उल्लेखयन् प्रथमखण्डाधीनं (१) कृतः आदेशः प्रवृत्तः अस्ति तावत् तादृशान् अधिकारान् प्रददत् एतस्मिन् भागे गतं किमपि एतस्मिन् भागे यथापरिभाषितस्य राज्यस्य कस्यापि विधेः प्रणयनाय, कस्यापि कार्यपालिककृत्यस्य करणाय च शक्तिं न निर्बन्धयेत् यत् प्रणेतुं कर्तुं वा राज्यं तस्मिन् भागे अन्तर्विष्टानाम् उपबन्धानाम् अभावे क्षमम् अभविष्यत् किन्तु एवं प्रणीतः कोऽपि विधिः, उपर्युक्तस्य आदेशस्य विरामे तस्य अक्षमतायाः मात्रां यावत् शीघ्रम् एव प्रभावात् विरतः भवेत् तानि कृतानि अकृतानि वा विहाय यानि तद् विधेः प्रवर्तनस्य विरमात् प्राक् कृतानि अकृतानि वा ।

[3][परन्तु यत्र एतादृशी आपातोद्घोषणा भारतराज्यक्षेत्रस्य कस्मिंश्चित् भागे एव प्रवर्तमाना अस्ति, तदा तावत् च यस्मिन्, यस्य कस्मिंश्चित् भागे वा आपातस्य उद्घोषणा प्रवृत्ता न वर्तते तस्य कस्यापि राज्यस्य, सङ्घराज्यक्षेत्रस्य वा सम्बन्धे, तस्मिन् राज्ये, सङ्घराज्यक्षेत्रे वा एतादृशः कोऽपि विधिः प्रणीतः भवितुम्, अथवा किमपि कार्यपालिकं कृत्यं कृतं भवितुं शक्यते यदि यावत् च यस्मिन् आपातस्य उद्घोषणा प्रवर्तमाना अस्ति तस्य भारतराजक्षेत्रभागस्य तेन सम्बद्धैः कार्यकलापैः भारतस्य तस्य राज्यक्षेत्रस्य कस्यचित् भागस्य वा, सुरक्षा सङ्कटापन्ना विद्यते ।]

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४०-अनुभागेन “तृतीयभागेन प्रदत्तेषु अधिकारेषु” इत्येतस्मात् प्रति एतत् संनिवेशितम् (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (अष्टत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य ७-अनुभागेन अन्तर्वेशितः (भूतलक्षिप्रभावेण)।

3 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५३-अनुभागेन अन्तर्वेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[1][१ख (१क) खण्डगतं किमपि-

(क) तादृशे कस्मिन् अपि विधौ यस्मिन् एषः आशयः उल्लिखितः न भवति यत् सः विधिः तदानीं प्रवर्तमानया उद्घोषणया सम्बद्धः अस्ति; अथवा

(ख) तादृशम् आशयम् अन्तर्वेशयतः विधेः अधीनत्वात् अन्यथा कृते कस्मिन् अपि कार्यपालिकायाः कृत्ये नानुप्रयुज्यते।]

(२) पूर्वोक्तप्रकारेण कृतस्य आदेशस्य विस्तारः समस्तभारतराज्यक्षेत्रे, तस्य कस्मिंश्चित् भागे वा भवेत्-

[2][परन्तु यत्र आपातोद्घोषणा भारतराज्यक्षेत्रस्य कस्मिंश्चिद् भागे एव प्रवर्तमाना अस्ति तत्र एतादृशस्य आदेशस्य विस्तारः भारतराज्यक्षेत्रस्य कतमस्मिन् अन्यस्मिन् भागे केवलं तदा भवेत्; यदा राष्ट्रपतिः समाहितः अस्ति, विस्तारम् आवश्यकं मन्यते च यतः यस्मिन् आपातस्य उद्घोषणा प्रवृत्ता अस्ति तस्मिन् भारतराज्यक्षेत्रभागे प्रवृतैः तेन सम्बद्धैः वा कार्यकलापैः भारतस्य अथवा तस्य कस्यचिद् अपि भागस्य सुरक्षा सङ्कटापन्ना विद्यते।]

(३) (१) खण्डस्य अधीनं कृतः प्रत्येकम् आदेशः तस्य करणात् अनन्तरं शीघ्रं संसदः प्रत्येकसदनस्य समक्षं स्थाप्येत।

[3]**३५९.क**. *इमं भागं पञ्जाबराज्यं प्रवर्तेत- संविधानस्य (त्रिषष्टितमं संशोधनम्) अधिनियमः, १९८९ इत्यस्य (३) अनुभागेन (६-१-१९९० इत्यतः) लोपितः।*

३६०. वित्तीयस्यापातस्य विषये उपबन्धाः- (१) यदि राष्ट्रपतिः समाहितः भवति यद् एतादृशी स्थित्तिः उत्पन्ना विद्यते यतः भारतस्य विषये तद्राज्यक्षेत्रस्य कस्यापि भागस्य वा वित्तीयं स्थायित्वं प्रत्ययः वा सङ्कटापन्ने वर्तेते, तर्हि सः उद्घोषणया तदाशयस्य घोषणां कर्तुं क्षमते।

[4][(२) (१) खण्डस्य अधीनं कृता उद्घोषणा-

(क) पश्चाद्वर्तिन्या उद्घोषणया प्रतिसंहृता परिवर्तिता वा भवितुं क्षमते;

(ख) संसदः प्रत्येकसदनस्य समक्षं स्थापयेत;

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४०-अनुभागेन अन्तर्वेशितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (द्विचत्वारिशत्तमं संशोधनम्) अधिनियमः, १६७६ इत्यस्य ५३-अनुभागेन अन्तर्वेशितः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण।

3 संविधानस्य (नवपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८८ वर्षस्य ३-अनुभागेन (३०-३-१९८८ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितम्। एतत्, तदधिनियमस्य प्रारम्भात्, अर्थात् १९८८ वर्षस्य मार्चमासस्य ३-दिनात् वर्षद्वयस्य समाप्तिपर्यन्तं न प्रवर्तेत।

4 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, ९९७८ इत्यस्य ४१-अनुभागेन (२) खण्डात् प्रति संनिवेशितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(ग) मासद्वयस्य समाप्तौ प्रवर्तनात् प्रविरमेत् यदि एतत् कालावधेः समाप्तेः प्राक् सा संसदः उभयोः सदनयोः सङ्कल्पाभ्याम् अनुमोदिता न जायते-

परन्तु यदि एतादृशी उद्घोषणा तस्मिन् काले कृता अस्ति यदा लोकसभा विघटिता वर्तते, अथवा (क) खण्डे निर्दिष्टमासद्वयकालावधौ लोकसभायाः विघटनं जायते तथा च उद्घोषणायाः अनुमोदकः सङ्कल्पः राज्यसभया पारितः अस्ति किन्तु एतादृश्याः उद्घोषणायाः सम्बन्धे तदवधेः समाप्तेः प्राक् कोऽपि सङ्कल्पः लोकसभया पारितः न भवति, तर्हि सा उद्घोषणा यस्मिन् दिने लोकसभा तस्याः पुनर्घटनायाः अनन्तरं प्रथमवारम् उपविशति तस्मात् दिनाङ्कात् त्रिंशद् दिनावधेः समाप्तौ प्रवर्तनात् प्रविरमेत्; यदि उक्तस्य त्रिंशद्दिनावधेः समाप्तेः प्राक् तदुद्घोषणायाः अनुमोदकः सङ्कल्पः लोकसभयापि पारितः न भवति।]

(३) (१) खण्डे उल्लिखिता उद्घोषणा यस्मिन् प्रवर्तते तस्मिन् कालावधौ सङ्घस्य कार्यपालिका शक्तिः कस्मैचित् अपि राज्याय वित्तीयौचित्यसम्बन्धिनः तादृशान् सिद्धातान् पालयितुं, यादृशाः निदेशेषु विनिर्दिष्टाः भवेयुः निदेशदानपर्यन्तं तथा तादृशानाम् अन्येषां निदेशानां, यादृशान् राष्ट्रपतिः तत्प्रयोजनार्थम् आवश्यकान् उचितान् च मन्येत, दानपर्यन्तं विस्तृता भवेत्।

एतत्संविधाने किमपि सत्यपि-

(क) एतादृशे कस्मिन् अपि निदेशे-

(प्रथमः) कस्यापि राज्यस्य कार्याणां सम्बन्धे सेवां कुर्वतां सर्वेषां जनानाम्, अथवा तेषां कस्यापि वर्गस्य वा वेतनेषु, भक्तेषु च ह्रासम् अपेक्षमाणाः उपबन्धाः;

(द्वितीयः) धनविषयकानाम् अन्यविधेयकानां च यानि २०७-तमानुच्छेदस्य उपबन्धाः विषयीकुर्वन्ति, राज्यविधानमण्डलेन तेषां पारणानन्तरं राष्ट्रपतेः विचारार्थं रक्षणम् अपेक्षमाणाः उपबन्धाः, अन्तर्भवेयुः।

(ख) यस्मिन् एतदनुच्छेदस्य अधीनं कृताः उद्घोषणा प्रवर्तते तस्मिन् कालावधौ उच्चतमन्यायालयस्य, उच्चन्यायालयानां च न्यायाधीशैः सहितानां सङ्घस्य कार्याणां सम्बन्धे सेवां कुर्वतां सर्वेषां जनानां, तेषां कस्यापि वर्गस्य वा वेतनेषु भक्तेषु च ह्रासाय निदेशान् दातुं राष्ट्रपतिः क्षमः भवेत्।

[1][(५)* * * * *]

---

1 संविधानस्य (अष्टत्रिंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य ८-अनुभागेन (५) खण्डः अन्तर्वेशितः आसीत् (भूतलक्षिप्रभावेण) ; संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४१-अनुभागेन लोपितश्च, (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

भागः १९
प्रकीर्णकम्

३६१. राष्ट्रपतेः, राज्यपालानां राजप्रमुखानां च संरक्षणम्- (१) राष्ट्रपतिः, कस्यापि राज्यस्य राज्यपालः राजप्रमुखः वा स्वपदस्य शक्तीनां प्रयोगार्थं, कर्तव्यानां च पालनार्थम् अथवा तासां शक्तीनां प्रयोगे, कर्तव्यानां पालने च स्वयं कृतस्य, कृतम् इति अभिप्रेतस्य वा कस्यापि कार्यस्य हेतोः कमपि न्यायालयं प्रति उत्तरदायी न भवेत्-

परन्तु ६१-तमानुच्छेदस्य अधीनं दोषारोपस्य अन्वेषणार्थं संसदः अन्यतरेण सदनेन नियुक्तेन अभिहितेन वा केनापि न्यायालयेन, न्यायाधिकरणेन निकायेन वा राष्ट्रपतेः आचरणस्य पुनर्विलोकनं कर्तुं शक्येत-

अपरं च, एतत् खण्डगतस्य कस्यापि एवम् अर्थः ग्राह्यः न भवेत् यत् तद् भारतशासनस्य कस्यापि राज्यस्य शासनस्य वा विरुद्धं समुचितकार्यप्रवृत्तेः चालनस्य कस्यापि जनस्य अधिकारं निर्बन्धितं करोति इति।

(२) राष्ट्रपतेः अथवा कस्यापि राज्यस्य राज्यपालस्य [1][* * *] विरुद्धं तस्य पदावधौ कीदृशी अपि दाण्डिककार्यप्रवृत्तिः कस्मिन् अपि न्यायालये संस्थापिता न भवेत् न च अनुवर्त्येत।

(३) राष्ट्रपतेः अथवा कस्यापि राज्यस्य राज्यपालस्य [1][***] वा पदावधौ तं बन्दीकर्तुं, कारागारे निरोद्धुं वा कस्मात् अपि न्यायालयात् कापि आदेशिका न प्रचालिता भवेत।

(४) राष्ट्रपतेः कस्यापि राज्यस्य राज्यपालस्य [1][* * *] वा रूपेण स्वपदस्य ग्रहणात् पूर्वं, तत् पश्चाद् वा वैयक्तिकरूपेण कृतस्य कृतम् इति अभिप्रेतस्य वा कस्यापि कार्यस्य विषये, राष्ट्रपतेः अथवा एतादृशराज्यस्य राज्यपालस्य [1][* * *] विरुद्धम् अनुतोषस्य अध्यर्थनां कुर्वत्यः काः अपि कार्यप्रवृत्तयः तस्य पदावधौ कस्मिन् अपि न्यायालये तावत् संस्थापिताः न क्रियेरन्, यावत् कार्यप्रवृत्तीनां स्वरूपं, तदर्थं वादस्य कारणम् एतादृशकार्यप्रवृत्तीनां संस्थापनं कुर्वतः विवादिनः नाम, वर्णनं, निवासस्थानं, तथा तेन अध्यर्थितम् अनुतोषं च वर्णयन्त्याः लिखितसूचनायाः यथायथं राष्ट्रपतेः, अथवा राज्यपालाय [1][***] दानस्य तस्य कार्यालये उत्सर्जनस्य वा अनन्तरं मासद्वयं व्यतीतं न भवेत्।

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च ““राजप्रमुखस्य वा” इत्येतौ शब्दौ लोपितौ।

[1][**३६१क. संसदः राज्यानां विधानमण्डलानां च कार्यप्रवृत्तीनां प्रकाशनस्य संरक्षणम्-** (१) कोऽपि जनः संसदः कतरस्यचित् सदनस्य, अथवा यथायथं कस्यापि राज्यस्य विधानसभायाः अथवा कस्यापि राज्यस्य विधानमण्डलस्य कतरस्यचित् सदनस्य कासामपि कार्यविवरणानां सारतः सत्यस्य प्रतिवेदनस्य कस्मिन् अपि समाचारपत्रे प्रकाशनस्य सम्बन्धे कस्मिन् अपि न्यायालये केनापि प्रकारेण व्यावहारिक्यां दाण्डिक्यां वा कार्यप्रवृत्यां तावद् भागी न भवेत् यावत् तत् प्रकाशनं दुर्भावेन कृतम् अस्ति इति प्रमाणितं न भवति-

परन्तु एतत् खण्डगतं किमपि संसदः कतरस्यचित् सदनस्य, यथायथं कस्यापि राज्यस्य विधानसभायाः वा कस्यापि राज्यस्य विधानमण्डलस्य कतरस्यचित् सदनस्य गुप्तोपवेशनस्य कार्यं प्रवृत्तीनां प्रतिवेदनस्य प्रकाशनं न विषयीकरोति।

(२) (१) खण्डः प्रसारणकेन्द्रद्वारा वितरितस्य कस्यापि कार्यक्रमस्य, सेवायाः वा भागरूपेण वितन्त्रिदूरसञ्चारणद्वारा प्रसारितानां प्रतिवेदनानां सामग्रीणां वा सम्बन्धे तथा अनुप्रयुज्यते यथा सः समाचारपत्रे प्रकाशितानां प्रतिवेदनानां, सामग्रीणां वा सम्बन्धे अनुप्रयुज्यते।

स्पष्टीकरणम्- एतस्मिन् अनुच्छेदे "समाचारपत्रं" समाचारपत्रे प्रकाशनार्थं सामग्रीम् अन्तर्भावयत् समाचाराभिकरणस्य प्रतिवेदनम् अन्तर्भावयति।]

[2][**३६१ख. लाभप्रदराजनीतिकपदेषु नियुक्त्यै निरर्हता-** संसदः अन्यतरसदनस्य सदस्यः यः केनचन राजनीतिकदलेन सम्बद्धः कश्चित् सदस्यः, यः दशमानुसूच्याः द्वितीयप्रच्छेदस्य अधीनं तस्य सदनस्य सदस्यतायै निरर्हितः, तस्य निरर्हताकालप्रभृतिः तस्य कार्यालयीयपदावधेः समाप्तिपर्यन्तम्, अथवा यदा सः कस्यचित् सदनस्य कृते निर्वचने प्रतिभागी भवति तदा तस्य निर्वाचनस्य कालपर्यन्तम्, एतयोः यत्पूर्वतनं, सः लाभप्रदराजनीतिकपदाय अपि निरर्हितो भवेत्।

स्पष्टीकरणम्- अस्य अनुच्छेदस्य कृते-

(क) "सदन" इति पदस्य अर्थः, यथा दशमानुसूच्याः प्रथमप्रच्छेदस्य क-खण्डे निर्धारितः तथा भवेत्;

(ख) "लाभप्रदराजनीतिकपद" अभिव्यक्तिः इत्यस्य अभिप्रायः यथा-

(i) भारतशासनस्य राज्यशासनस्य च अधीनं किंचित् पदं, यत्र तस्य पदाय वेतनस्य पारिश्रमिकस्य वा संदायः, भारतशासनस्य राज्यशासनस्य वा लोकराजस्वेन यथास्थिति भवेत्; अथवा

---

1 संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४२-अनुभागेन एषः खण्डः अन्तर्वेशितः (२०-६-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (एकनवतितमं संशोधनम्) अधिनियमः, २००३ इत्यस्य ४-अनुभागेन एषः खण्डः अन्तर्वेशितः (१-१-२००४ दिनाङ्कात् प्रवर्तमानप्रभावेण)

(ii) कस्यचित् निगमितस्य अनिगमितस्य वा निकायस्य अधीनं, यत् भारतशासनस्य राज्यशासनस्य वा पूर्णतः अंशतश्च अधीनं पदम् अस्ति, तस्मै पदाय वेतनस्य पारिश्रमिकस्य वा संदायः निकायेन दत्तम्,

तादृशं संदायं वर्जयित्वा यादृशः वेतनस्य पारिश्रमिकस्य वा संदायः प्रतिकरात्मकः भवति ।]

३६२. *[देशीयराज्यानां शासकानाम् अधिकाराः विशेषाधिकाराश्च ।] संविधानस्य (षड्विंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य २-अनुभागेन निरसितः ।*

३६३. कतिपयसन्धिसमयादिभ्यः उद्भूतेषु विवादेषु न्यायालयानां हस्तक्षेपस्य निषेधः- (१) एतत्संविधाने किमपि सत्यपि, किन्तु १४३-तमानुच्छेदस्य उपबन्धानाम् अधीनं, न हि उच्चतमन्यायालयस्य नापि अन्यस्य कस्यापि न्यायालयस्य, कस्यापि संधेः, समयस्य, प्रसंविदः, वचनबन्धस्य, "सनदः", एतादृशस्य अन्यस्य लिखितस्य वा, यद् एतस्य संविधानस्य प्रारम्भात् पूर्वं कस्यापि देशीयराज्यस्य शासकेन कृतं, निष्पादितं वा अभूत् तथा यस्मिन् भारताधिनिवेशस्य शासनं तत्पूर्वाधिकारी किमपि शासनं वा एकः पक्षः अभूत् तथा यद् एतादृशस्य प्रारम्भस्य पश्चात् प्रवर्तने वर्तते, अनुवर्त्येत वा, कस्माद् अपि उपबन्धात् उद्भूते कस्मिन् अपि विवादे अथवा एतादृशेन संधिना, समयेन, प्रसंविदा, वचनबन्धेन, सनदाख्येन लेखेन एतादृशेन अन्येन लिखितेन वा सम्बद्धानाम् एतस्य संविधानस्य उपबन्धानां कस्मादपि प्रोद्भूतस्य कस्यापि अधिकारस्य उद्भूतस्य वा कस्यापि दायित्वस्य, आभारस्य वा विषये कस्मिन् अपि विवादे अधिकारिता भवेत् ।

(२) एतस्मिन् अनुच्छेदे-

(क) "देशीयराज्यम्" इत्यनेन किमपि राज्यक्षेत्रम् अभिप्रेतं भवति यद् एतस्य संविधानस्य प्रारम्भात् पूर्वं सम्राजा, भारताधिनिवेशस्य शासनेन वा एतादृशराज्यरूपेण अभिमतम् आसीत्; तथा

(ख) "शासकः" इत्येतस्मिन् राजा, मुख्यः अन्यः वा कश्चित् जनः, यः एतादृशात् प्रारम्भात् पूर्वं सम्राजा, भारताधिनिवेशस्य शासनेन वा कस्यचिद् अपि देशीयराज्यस्य शासकत्वेन अभिमतः आसीत्, अन्तर्भवति ।

[1]**[३६३क. देशीराज्यानां शासकेभ्यः प्रदत्तायाः मान्यतायाः समाप्तिः, तेषां निजकोशानां समापनं च-** एतस्मिन् संविधाने अथवा तदानीं प्रवृत्ते कस्मिन् अपि विधौ किमपि सत्यपि-

(क) राजा, प्रमुखः, अन्यः वा कश्चित् जनः यः कस्मिन् अपि समये संविधानस्य (षड्विंशत्तितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य प्रारम्भात् पूर्वं राष्ट्रपतिना देशीयराज्यस्य शासकत्वेन अभिमतः अभूत् अथवा यः कश्चित् जनः एतादृशात् प्रारम्भात् पूर्वं कस्मिन् अपि काले राष्ट्रपतिना एतादृशस्य शासकस्य उत्तराधिकारित्वेन अभिमतः अभूत्, सः एतादृशे प्रारम्भे तदनन्तरं च एतादृशशासकत्वेन, एतादृशशासकस्य उत्तराधिकारित्वेन वा मान्यतां न भजेत;

---

[1] संविधानस्य (षड्विंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य ३-अनुभागेन ३६३क इति अन्तर्वेशितः ।

(ख) संविधानस्य (षड्विंशत्तितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य प्रारम्भतः तदनन्तरं च निजकोशः समाप्यते; *निजकोशेन* सम्बद्धाः सर्वे अपि अधिकाराः, दायित्वानि, आभाराश्च निर्वाप्यन्ते तदनुसारं च (क) खण्डे निर्दिष्टशासकाय, अथवा यथायथं शासकस्य उत्तराधिकारिणे, अथवा अन्यस्मै कस्मैचिद् अपि जनाय *निजकोश*रूपेण कोऽपि राशिः न सन्दीयेत ।]

३६४. महावेलापत्तनानां विमानक्षेत्राणां च कृते विशिषोपबन्धाः- (१) एतस्मिन् संविधाने किमपि सत्यपि, राष्ट्रपतिः लोकाधिसूचनया निदेष्टुं क्षमते यद् अधिसूचनायां विनिर्दिष्टात् दिनाङ्कात् आरभ्य-

(क) संसदा, कस्यापि राज्यस्य विधानमण्डलेन वा निर्मितः कोऽपि विधिः किमपि महावेलापत्तनं, विमानक्षेत्रं वा न विषयीकुर्यात्, अथवा तादृशानाम् अपवादानाम् उपान्तरणानां वा अधीनं विषयीकुर्यात् यादृशाः लोकाधिसूचनायां विनिर्दिष्टाः भवेयुः; अथवा

(ख) कोऽपि वर्तमानः विधिः कस्मिन् अपि महावेलापत्तने, विमानक्षेत्रे वा उक्तदिनाङ्कात् पूर्वं कृतानाम् अथवा न कृतानाम् अर्थानां सम्बन्धं विहाय कार्यकरः न भवेत्; अथवा एतादृशे महावेलापत्तने विमानक्षेत्रे वा तादृशानाम् अपवादानाम् उपान्तरणानां वा अधीनं यादृशाः लोकाधिसूचनायां विनिर्दिष्टाः भवेयुः कार्यकरः भवेत् ।

(२) अस्मिन् अनुच्छेदे-

(क) "महावेलापत्तनम्" इत्येतेन किमपि वेलापतनम् अभिप्रेयते यत् संसदा प्रणीतेन केनापि विधिना केनापि विद्यमानविधिना वा तदधीनं वा महावेलापत्तनत्वेन घोषितं विद्यते, तथा तेन तानि सर्वाणि क्षेत्राणि अन्तर्भाव्यन्ते यानि तस्मिन् काले एतादृशस्य वेलापत्तनस्य सीमानाम् अन्तर्गतानि भवन्ति;

(ख) "विमानक्षेत्रम्" इत्येतेन वायुपथैः. वायुयानैः विमानपरिवहणेन च सम्बद्धानाम् अधिनियमानां प्रयोजनार्थं परिभाषितं विमानक्षेत्रम् अभिप्रेयते ।

३६५. सङ्घेन दत्तानां निदेशानाम् अनुवर्तने प्रभावित्वापादने वा असफलतायाः प्रभावः- यत्र एतत्संविधानस्य उपबन्धेषु कस्यापि अधीनं सङ्घस्य कार्यपालिकाशक्तेः प्रयोगेण दत्तानां केषांचित् निदेशानाम् अनुवर्तने तेषां प्रभावित्वापादने वा किंचिद् अपि राज्यम् असफलं भवति तत्र राष्ट्रपतेः एषा मतिः विधियुक्ता भवेत् यद् एतादृशी स्थितिः उत्पन्ना वर्तते यस्यां राज्यस्य शासनम् एतत्संविधानस्य उपबन्धानाम् अनुसारेण चालयितुं न हि शक्यते ।

३६६. परिभाषाः- अस्मिन् संविधाने प्रसङ्गेन अन्यथा अपेक्षितं चेत् न भवति, निम्नलिखितानां पदानां ते अर्थाः ग्राह्याः ये क्रमशः अत्र तेभ्यः अर्पिताः विद्यन्ते; तद्यथा-

(१) "कृष्यायः" इत्येतेन भारतीयायकरेण सम्बद्धानाम् अधिनियमानां प्रयोजनार्थं परिभाषितः कृष्यायः अभिप्रेयते;

(२) “आङ्ग्लभारतीयः” इत्येतेन स जनः अभिप्रेयते यस्य पिता, पितृपरम्परायाम् अन्यः कश्चित् पूर्वजः वा योरोपीयसमुद्भववान् आसीत्, अस्ति वा किन्तु यः भारतराज्यक्षेत्रस्य अधिवासी अस्ति यश्च एतादृशे राज्यक्षेत्रे तत्र सामान्यतया निवसद्भ्यां, न च केवलम् अस्थायिप्रयोजनैः स्थिताभ्यां, पितृभ्यां जातः अस्ति, आसीद् वा;

(३) “अनुच्छेदः” इत्येतेन एतत्संविधानस्य अनुच्छेदः अभिप्रेयते;

(४) “उद्धारः” इत्येतेन वार्षिकीणां दानेन धनादानम् अन्तर्भाव्यते, “ऋणग्रहणस्य” चापि तदनुसारम् अर्थः ग्राह्यः।

[1][(४क)* * * *]

(५) “खण्डः” इत्येतेन तस्य अनुच्छेदस्य खण्डः अभिप्रेयते यस्मिन् एषः वर्तते;

(६) “निगमकरः” इत्येतेन कोऽपि आयकरः अभिप्रेयते यावत् हि सः करः समवायैः सन्देयः भवति, एतादृशश्च स करः विद्यते यस्य सम्बन्धे निम्नलिखिताः प्रतिबन्धाः पूर्यन्ते-

(क) यत् सः कृष्यायस्य सम्बन्धे प्रभार्यः नास्ति;

(ख) यत् तस्मिन् करे प्रवर्तमाने कैः अपि अधिनियमनैः समवायैः प्रदातव्यस्य करस्य सम्बन्धे किमपि व्यवकलनं समवायः व्यक्तिभ्यः सन्देयेभ्यः लाभांशेभ्यः प्राधिकृतं न भवति;

(ग) यद् भारतीयस्य आयकरस्य प्रयोजनार्थम् एतादृशान् लाभांशान् प्राप्नुवतां जनानां पूर्णस्य आयस्य गणनायाम्, अथवा एतादृशैः जनैः सन्देयस्य अथवा तेभ्यः प्रतिदेयस्य भारतीयस्य आयकरस्य गणनायाम् एवं सन्दत्तस्य करस्य समाकलनाय कोऽपि उपबन्धः न विद्यते;

(७) “तत्स्थानिप्रान्तः” “तत्स्थानिदेशीयराज्यम्” अथवा “तत्स्थानीयराज्यम्” इत्येतैः संशयावस्थासु तादृशः प्रान्तः, तादृशं देशीयराज्यं, राज्यं वा अभिप्रेयते यं यद् वा प्रकृतविशिष्ट प्रयोजनार्थं राष्ट्रपतिः यथायथं तत् स्थानिप्रान्तं, तत् स्थानिदेशीयराज्यं, तत्स्थानीयराज्यं वा अवधारितं कुर्यात्;

---

[1] संविधानस्य (द्विचत्वारिशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५४-अनुभगेन (४-क) खण्डः अन्तर्वेशितः आसीत् (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण); संविधानस्य (त्रिचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७७ इत्यस्य ११-अनुभागेन लोपितश्च (१३-४-१९७८ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(८) "ऋणम्" इत्येतस्मिन् वार्षिकीणां रूपेण मूलधनराशीनां प्रतिदानार्थं कस्यापि आभारस्य विषये किमपि दायित्वं, तथा कस्याः अपि प्रत्याभूतेः अधीनं किमपि दायित्वम् अन्तर्भवति, तथा "ऋणभाराः" इत्येतस्य तदनुसारम् अर्थः क्रियेत;

(९) "सम्पच्छुल्कः" इत्येतेन कोऽपि शुल्कः अभिप्रेयते यः मृत्यौ सङ्क्रामन्त्याः अथवा संसदा कस्यापि राज्यस्य विधानमण्डलेन तच्छुल्कसम्बन्धे प्रणीतानां विधीनाम् उपबन्धानाम् अधीनं तथा सङ्क्रामती इति रूपेण अवगतायाः सर्वस्याः सम्पत्तेः उक्तविधिभिः तदधीनं वा विहितानां नियमानाम् अनुसारेण अभिनिश्चिते मूलभूतमूल्ये तन्निर्देशेन वा निर्धारितः भवेत्।

(१०) "विद्यमानः विधिः" इत्येतेन कोऽपि विधिः, अध्यादेशः, आदेशः, उपविधिः, नियमः, विनियमः वा अभिप्रेयते यः एतत्संविधानस्य प्रारम्भात् पूर्वम् एतादृशस्य विधेः, अध्यादेशस्य, आदेशस्य, उपविधेः, नियमस्य, विनियम्य वा प्रणयनस्य शक्तिमता केनापि विधानमण्डलेन, प्राधिकारिणा, जनेन वा पारितः निर्मितः वा भवति;

(११) "फेडरल-न्यायालयः" इत्येतेन १९३५-वर्षस्य भारतशासनाधिनियमस्य अधीनं घटितः "फेडरल-न्यायालयः" अभिप्रेयते;

(१२) "भाण्डानि" इत्येतस्मिन् सर्वाणि सामग्र्याः, पण्यानि, वस्तूनि च अन्तर्भवन्ति;

[1][१२(क) "भाण्ड-तथा-सेवाकरः" इत्यस्य तात्पर्यं यथा-मानवीयोपभोगार्थं माद्यसारिकपानेषु (अल्कोहोलिक-लिकर इत्येतेषु) करान् वर्जयित्वा, अन्यः कश्चन भाण्डानां सेवानां वा उभयोः वा आपूर्तेः करः;]

(१३) "प्रत्याभूतिः" इत्येतस्मिन् कोऽपि आभार; अन्तर्भवति यः एतस्य संविधानस्य प्रारम्भात् पूर्वं कस्यापि उपक्रमस्य लाभानां कस्मादपि विनिर्दिष्टराशेः न्यूनत्वदशायां सन्दानार्थम् अङ्गीकृतः भवेत्;

(१४) "उच्चन्यायालयः" इत्येतेन कोऽपि न्यायालयः अभिप्रेयते यः एतस्य संविधानस्य प्रयोजनानाम् अर्थे कस्यचित् अपि राज्यस्य कृते उच्चन्यायालयः मन्यते तथा च एतस्मिन् अन्तर्भवति-

(क) एतत्संविधानस्य अधीनम् उच्चन्यायालयरूपेण घटितः, पुनर्घटितः वा भारतराज्यक्षेत्रे कोऽपि न्यायालयः; तथा च

(ख) भारतराज्यक्षेत्रे कोऽपि अन्यः न्यायालयः यः एतत्-संविधानस्य प्रयोजनानां कस्यापि वा प्रयोजनस्य कृते संसदा विधिना उच्चन्यायालयत्वेन घोषितः भवेत्;

(१५) "देशीयराज्यम्" इत्येतेन किमपि राज्यक्षेत्रम् अभिप्रेयते यत् भारताधिनिवेशशासनेन एतादृश राज्यत्वेन अभ्यमन्यत;

---

1 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६, १४(i)-अनुभागेन एषः खण्डः अन्तर्वेशितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(१६) “भागः” इत्येतेन एतस्य संविधानस्य भागः अभिप्रेयते;

(१७) “निवृत्तिवेतनम्” इत्येतेन कस्मै अपि जनाय तस्य सम्बन्धे वा सन्देयं कीदृशमपि, अभिदानमूलम् अन्यथा वा, निवृत्तिवेतनम् अभिप्रेयते तथा तस्मिन् अन्तर्भवन्ति एवं सन्देयं सेवानिवृत्तिवेतनम्, एवं सन्देयम् उपदानं, तथा कस्यापि भविष्यनिधेः अभिदानानां तद्वृद्धया तदतिरिक्तपरिवर्धनेन सहितं, रहितं वा प्रतिदानरूपेण सन्देयः कोऽपि राशिः राशयः वा;

(१८) “आपातस्य उद्घोषणा” इत्येतेन ३५२-तमानुच्छेदस्य प्रथमखण्डस्य अधीनं कृता उद्घोषणा अभिप्रेयते;

(१९) “लोकाधिसूचना” इत्येतेन भारतस्य राजपत्रे अथवा यथायथं राज्यस्य राजपत्रस्य कृता अधिसूचना अभिप्रेयते;

(२०) “लोहमार्गः” इत्येतस्मिन् न अन्तर्भवति-

(क) कस्मिन् अपि नगरक्षेत्रे पूर्णतया स्थितः रथ्यालोहमार्गः (ट्रामवे); अथवा

(ख) सञ्चारस्य कोऽपि मार्गः यः पूर्णतया एकस्मिन् राज्ये स्थितः भवेत् यश्च संसदा विधिना लोहमार्गः न अस्ति इति घोषितः भवेत्;

[1][(२१)* * * *]

[2][(२२) “शासकः” इत्येतेन एतादृशः राजाः, प्रमुखः वा अन्यः जनः अभिप्रेयते यः संविधानस्य (षड्विंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य प्रारम्भात् पूर्वं कस्मिन् अपि काले कस्यापि देशीयराज्यस्य शासकत्वेन मान्यताप्राप्तः अभूत् अथवा यः कश्चित् जनः एतादृशात् प्रारम्भात् पूर्वं कस्मिन् अपि काले राष्ट्रपतिना एतादृशस्य शासकस्य उत्तराधिकारित्वेन मान्यताप्राप्तः अभूत्;]

(२३) “अनुसूची” इत्येतेन एतत्संविधानस्य अनुसूची अभिप्रेयते;

(२४) “अनुसूचितजातयः” इत्येतेन एतादृश्यः जातयः, मूलवंशाः, जनजातयः वा अथवा तादृशीनां जातीनां, मूलवंशानां, जनजातीनां वा भागाः तदन्तर्गताः उपवर्गाः वा अभिप्रेयन्ते ये ३४१-तमानुच्छेदस्य अधीनम् एतत्संविधानस्य प्रयोजनार्थम् अनुसूचितजनजातयः मन्यन्ते;

(२५) “अनुसूचितजनजातयः" इत्येतेन एतादृश्यः जनजातयः जनजातिसमुदायाः वा, अथवा एतादृशानां जनजातीनां जनजातिसमुदायानां वा भागाः तदन्तर्गताः उपवर्गाः वा अभिप्रेयन्ते ये ३४२-तमानुच्छेदस्य अधीनम् एतत्संविधानस्य प्रयोजनार्थम् अनुसूचित जनजातयः मन्यन्ते;

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च (२१) खण्डः लोपितः।

2 संविधानस्य (षड्विंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य ४-अनुभागेन (२२) खण्डात् प्रति संनिवेशितः।

(२६) "प्रतिभूतयः" इत्येतस्मिन् निधिपत्राणि अपि अन्तर्भवन्ति;

[1]***

[2][(२६क) "सेवाः" इत्यस्य अर्थः यथा भाण्डानि वर्जयित्वा अन्यत् यत् किमपि ।]

२६(ख) २४६क-अनुच्छेदः २६८-अनुच्छेदः २६९-अनुच्छेदः २६९क-अनुच्छेदः २७९-अनुच्छेदः च एतेषाम् अनुच्छेदानां सन्दर्भे "राज्यम्" इत्यत्र विधानमण्डलयुक्तं सङ्घराज्यक्षेत्रम् अपि अन्तर्भवति ।

[3][(२६ग) "सामाजिक-शैक्षणिकदृष्ट्या पश्चवर्त्ति-वर्गः" इत्यतः एतादृशाः पश्चवर्ति-वर्गाः अभिप्रेताः सन्ति, यान्, यथास्थिति केन्द्रीय-शासनस्य अथवा राज्यस्य उत सङ्घराज्यक्षेत्रस्य प्रयोजनेभ्यः अनुच्छेदः २४२-इत्यस्य अधीनम् एवं बोधयेत् ।]

(२७) "उपखण्डः" इत्येतेन तस्य खण्डस्य उपखण्डः अभिप्रेयते यस्मिन् एषः शब्दः वर्तते;

(२८) "कराधानम्" इत्येतस्मिन् कस्यापि साधारणस्य स्थानीयस्य, विशिष्टस्य वा करस्य प्रवेशकरस्य अधिरोपणम् अन्तर्भवति, करस्य च तदनुसारम् अर्थः ग्राह्यः;

(२९) "आये करः" इत्येतस्मिन् अतिरिक्तलाभकरप्रकारकः करः अन्तर्भवति;

[4][(२९क) "भाण्डानां विक्रये क्रये वा करः" इत्येतस्मिन् अन्तर्भवति-

(क) मुद्रादानात्, विलम्बितमूल्यदानात् अन्यमूल्यवत् प्रतिफलात् वा केषु अपि भाण्डेषु धृतस्य सम्पत्तिस्वत्वस्य अन्तरणे (संविदः अनुसरणे कृतात् व्यतिरिक्ते) करः;

(ख) कस्यापि कर्म संविदः निष्पादने (भाण्डरूपेण केनापि अन्यरूपेण वा) अन्तर्भूतेषु भाण्डेषु,धृतस्य सम्पत्तिस्वत्वस्य अन्तरणे करः;

(ग) भाटकदान-क्रय-पद्धत्या अंशदानस्य कयाचित् पद्धत्या वा भाण्डेषु धृतस्य सम्पत्तिस्वत्वस्य अन्तरणे करः;

(घ) कस्यापि प्रयोजनस्य अर्थं कस्यापि भाण्डस्य (विनिर्दिष्टकालावधिपर्यन्तम् अन्यथा वा) उपयोगाधिकारस्य मुद्राप्रदानात् विलिम्बितमूल्य प्रदानात् अथवा अन्यमूल्यवत् प्रतिफलात् अन्तरणकरणे करः ।

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५४-अनुभागेन (२६क) खण्डः अन्तर्वेशितः आसीत् (१-२-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण); संविधानस्य (त्रिचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७७ इत्यस्य ११-अनुभागेन लोपितश्च (१३-४-१९७८ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

2 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६, १४(ii)-अनुभागेन एषः खण्डः अन्तर्वेशितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

3 संविधानस्य (द्व्याधिकैकशतं संशोधनम्) अधिनियमः, २०१८ वर्षस्य ५-अनुभागेन (१४-८-२०१८ दिनाङ्कात् प्रवर्तमानप्रभावेण) (२६ग) संनिवेशितम् । संविधानस्य (पञ्चाधिकैकशतं संशोधनम्) अधिनियमः, २०२१ वर्षस्य ४-अनुभागेन (१५-९-२०२१ दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रतिष्ठापितः ।

4 संविधानस्य (षड्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९८२ (१९८२ वर्षस्य २९क) इत्यस्य ४-अनुभागेन एषः (२-२-१९८३ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः ।

(ङ) केनापि अनिगमितेन जनसंस्थया जननिकायेन वा स्वसदस्याय मुद्राप्रदानित्, विलिम्बतमूल्यदानात्, अन्यमूल्यवत् प्रतिफलात् च कृते भाण्डानाम् आपूरणे करः;

(च) कयापि सेवया, सेवांशरूपेण वा अन्येन केनापि प्रकारेण वा भाण्डानाम् आपूरणे करः, तद् भाण्डं खाद्यरूपं, मानवीयभोगार्हः अन्यवस्तुरूपं किमपि पेयं (मादकपेयरूपं वा स्यात् अमादकपेयरूपं वा स्यात्), यत्र एतादृशम् आपूरणं मुद्रादानात्, विलम्बितमूल्यदानात्, अन्यमूल्यवत् प्रतिफलात् वा भवतिः;

केषामपि भाण्डानाम् एतादृशम् अन्तरणं, वितरणम्, आपूरणं वा तेषां भाण्डानाम् अन्तरणं, वितरणम्, आपूरणं वा कुर्वता जनेन कृतः विक्रयः, तथा यस्मै जनाय एतादृशम् अन्तरणं, वितरणम्, आपूरणं वा कृतं भवति तेन कृतः क्रयः मन्येत;]

[1][(३०) "सङ्घराज्यक्षेत्रम्" इत्येतेन प्रथमानुसूच्यां विनिर्दिष्टं सङ्घराज्यक्षेत्रम् अभिप्रेयते भारतान्तर्गतं, किन्तु एतस्याम् अनुसूच्यां न विनिर्दिष्टं किमपि अन्यद्राज्यक्षेत्रम् एतस्मिन् अन्तर्भवति ।]

३६७. निर्वचनम्- (१) यावत् प्रसङ्गेन अन्यथा अपेक्षितं न भवति तावत् एतत्संविधानस्य निर्वचनार्थं साधारणखण्डाधिनियमः, १८९७ इत्यस्य कैः अपि तादृशैः अनुकूलनैः, उपान्तरणैः सह एव यादृशाः ३७२-तमानुच्छेदस्य अधीनं तस्मै क्रियेरन्, तथा एव प्रवृत्तः भवेत् यथा सः भारताधिनिवेशस्य विधानमण्डलस्य, निर्वचनार्थं प्रवर्तते ।

(२) अस्मिन् संविधाने संसदः, संसदा निर्मितानां वा अधिनियमानां, विधीनां वा कस्मिन् अधिनियमस्य [2][***] कस्यापि राज्यस्य विधानमण्डलस्य, विधानमण्डलेन निर्मितानां वा अधिनियमानां, विधिं प्रति कस्मिन् अपि निर्देशे यथायथं राष्ट्रपतिना राज्यपालेन वा [3][***] प्रवर्तितस्य आदेशसस्यापि निर्देशः अन्तर्भवति इति अर्थः ग्राह्यः ।

(३) एतत्संविधानस्य प्रयोजनार्थं "वैदेशिकराज्यम्" इत्येतेन भारतात् भिन्नं किंचिदपि राज्यम् अभिप्रेयते-

परन्तु संसदा निर्मितस्य कस्यापि विधेः उपबन्धानाम् अधीनं, राष्ट्रपतिः आदेशेन[4] कस्यचिद् अपि राज्यस्य वैदेशिकराज्यत्वस्य अभावम्, एतादृशानां प्रयोजनानां कृते, यादृशाः आदेशे विनिर्दिष्टाः भवेयुः, घोषयितुं क्षमते ।

[5][(४)* * * *]

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च (३०) खण्डस्य स्थाने प्रति एषः खण्डः संनिवेशितः ।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अनुसूच्या च "प्रथमानुसूच्याः 'क'-भागे "ख –भागे वा इत्येते शब्दाः लोपिताः ।

3 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राजप्रमुखेन वा", इत्येतौ शब्दौ लोपितौ ।

4 संविधानीयः (विदेशीय राज्यानां सम्बन्धे घोषणा) आदेशः, १९५० (सं० आ० २) इत्येषः द्रष्टव्यः ।

5 संविधानस्य (जम्मू-कश्मीरे प्रवर्तमानः) आदेशः, २०१९ (सं. आ. २७२) अस्य संविधानादेशस्य पठनाय परिशिष्टम् २ द्रष्टव्यम् ।

भागः २०

संविधानस्य संशोधनम्

३६८. [1][**संविधानस्य संशोधनाय संसदः शक्तिः, तदर्थं प्रक्रिया च-** [2][(१) एतत्संविधाने किमपि सत्यपि, संसद् स्वीयसंविधायि-शक्तेः प्रयोगेन एतस्य संविधानस्य केषामपि उपबन्धानां परिवर्धनरूपेण, निरसनरूपेण वा संशोधनं कर्तुं क्षमते।]

[3][(२)] एतत् संविधनास्य संशोधनाय आरम्भः तत्प्रयोजनार्थं संसदः अन्यतरस्मिन् सदने विधेयकस्य पुरःस्थापनेन एव कर्तुं शक्यते, यदा च प्रत्येकसदने तस्य सदनस्य समस्तसदस्यसङ्ख्यायाः मध्ये बहुमतेन तथा तस्य सदनस्य उपस्थितानां मतदातृणां च सदस्यानां तृतीयांशद्वयात् अन्यूनेन बहुमतेन तद्विधेयकं पारितं भवति तदा [4][तद् राष्ट्रपतेः समक्षम् उपस्थाप्येत, यः विधेयकाय स्वीयाम् अनुमतिं दद्यात्; एवं सति च] विधेयकस्य निबन्धनानाम् अनुसारेण संविधानं संशोधितं तिष्ठेत्-

परन्तु यदि एतादृशं संशोधनम्-

(क) ५४-अनुच्छेदः, ५५-अनुच्छेदः, ७३-अनुच्छेदः [5][१६२-अनुच्छेदः, २४१-अनुच्छेदः, २७९क-अनुच्छेदः वा]; इत्येषु, अथवा

(ख) पञ्चमभागस्य चतुर्थाध्याये, षष्ठभागस्य पञ्चमाध्याये, एकादशभागस्य प्रथमाध्याये वा; अथवा।

(ग) सप्तमानुसूच्या कस्यामपि सूच्याम्; अथवा

(घ) संसदि राज्यानां प्रतिनिधित्वे; अथवा

(ङ) एतस्य अनुच्छेदस्य उपबन्धेषु,

---

1 संविधानस्य (चतुर्विंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य ३-अनुभागेन "संविधानस्य संशोधनार्थं प्रक्रिया" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन अन्तर्वेशितः।

3 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन ३६८-अनुच्छेदः (२) खण्डरूपेण पुनरङ्कितः।

4 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन "तद् राष्ट्रपतेः समक्षं तस्य अनुमत्यै स्थाप्येत; विधेयके च एव अनुमते सति" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

5 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६, १५-अनुभागेन "१६२-अनुच्छेदः २४१-अनुच्छेदः वा" इत्यस्य स्थाने प्रतिष्ठापितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

किमपि परिवर्तनं कर्तुम् ईहते तर्हि एतादृशसंशोधनार्थम् उपबन्धं कुर्वतः विधेयकस्य राष्ट्रपतेः समक्षम् अनुमत्यर्थम् उपस्थापनात् पूर्वं तत् संशोधनार्थं [1][* * *] एकस्मात् अर्थात् अन्यूनानां राज्यानां विधानमण्डलानां तस्प्रयोजनार्थं, तैः विधानमण्डलैः पारितः सङ्कल्पैः अनुसमर्थनमपि अपेक्षेत]

[2][(३) १३-तमानुच्छेदगतं किमपि अस्य अनुच्छेदस्य अधीनं कृते संशोधने न अनुप्रयुज्येत।]

[3][(४) एतदेनुच्छेदस्य अधीनम् अस्य संविधानस्य (यस्मिन् तृतीयभागस्य उपबन्धाः) अन्तर्भवन्ति [संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५५-अनुभागस्य प्रारम्भात् पूर्वं तदनन्तरं वा] कृतं, कृतम् इति अभिप्रेतं वा किमपि संशोधनं, कस्मिन् अपि न्यायालये, केनापि आधारेण प्रश्नगतं न क्रियेत।

(५) शङ्कानां निवारणार्थम् एतेन एव घोष्यते यत् एतदनुच्छेदाधीनं परिवर्धनरूपेण, परिवर्तनरूपेण, निरसनरूपेण, वा अस्य संविधानस्य संशोधनाय संसदः संविधानीयशक्तौ किंचित् अपि निर्बन्धनं न भवेत्।]

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन "प्रथमानुसूच्याः (क)-(ख) भागयोरुल्लिखितराज्येषु" इत्येते शब्दाः लोपिताः।

2 संविधानस्य (चतुर्विंशतितमं संशोधनम्) अधिनियमः, १९७१ इत्यस्य ३-अनुभागेन अन्तर्वेशितः।

3 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः; १९७६. इत्यस्य ५५-अनुभागेन अन्तर्वेशितौ (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)। उच्चतमन्यायालयेन *"मिनर्वामिल्सलिमिटेड" तथान्येषां परं भारतसङ्घः तथा च अन्य ए.आई.आर वादेन* (१९८०) इयं धाराम् अविधिमान्यं घोषितम्।

भागः २१

[1][अस्थायिनः, सङ्क्रमणकालिकाः, विशेषाश्च उपबन्धाः]

३६९. राज्यसूच्याः केषांचिद् विषयाणां सम्बन्धे ते विषयाः समवर्तिसूच्याः इव इति विधिनिर्माणस्य संसदः अस्थायिनी शक्तिः- एतस्मिन् संविधाने किमपि सत्यपि, एतत्संविधानस्यः प्रारम्भात् पञ्चानां वर्षाणां कालावधौ निम्नलिखितविषयाणां सम्बम्धे, ते विषयाः समवर्तिसूच्यां प्रगणिताः इव इति, विधिनिर्माणस्य संसदः शक्तिः भवेत्, तद्यथा-

(क) कार्पासानि, और्णानि च वस्त्राणि, असिद्धं तूलं (धूतं तूलम्, अधूतं च तूलं, कार्पासं वा यस्य अन्तर्गतं भवति) कार्पासबीजानि, कागदं (समाचारपत्रार्थं कागदं यस्य अन्तर्गतं भवति), खाद्यपदार्थाः (खाद्यानि, तैलबीजानि, तैलं च येषाम् अन्तर्गतानि भवन्ति), पशूनां यवसं (खलिः अन्यानि च घनीभूतानि यवसानि यस्य अन्तर्गतानि भवन्ति), खनिजाङ्गाराः (‘कोकः’ खनिजाङ्गारमयाः पदार्थाश्च येषाम् अन्तर्गताः भवन्ति), लोहम्, सारलोहम्, अभ्रकं च एतेषां कस्यापि राज्यस्य अभ्यन्तरे व्यापारः वाणिज्यं च, तथा तेषाम् उत्पादनं, सम्भरणं, वितरणं च;

(ख) (क) खण्डे वर्णितविषयेषु केनापि सम्बद्धानां विधीनां विरुद्धम् अपराधाः, उच्चतमन्यायालयम् अन्तरेण, सर्वेषां न्यायालयानां तेषुं विषयेषु कस्यापि सम्बन्धे अधिकारिता, शक्तयश्च तथा तेषु विषयेषु कस्यापि सम्बन्धे कस्मिन् अपि न्यायालये गृह्यमाणप्रशुल्केभ्यः अन्ये प्रशुल्काः,

किन्तु संसदा प्रणीतः कोऽपि विधिः, यम् एतदनुच्छेदस्य उपबन्धानाम् अभावे प्रणेतुं संसत् क्षमा न भवेत्, उक्तकालावधेः समाप्तौ, अक्षमतायाः मात्रां यावत्, तत्समाप्तेः पूर्वं कृतेभ्यः अकृतेभ्यः वा विषयेभ्यः अन्येषां विषयाणां सम्बन्धे प्रभावात् विरमेत्।

---

1 संविधानस्य (त्रयोदशं संशोधनम्) अधिनियमः, १९६२ इत्यस्य २-अनुभागेन “अस्थायिनस्तथा सङ्क्रमणकालिका उपबन्धाः” इत्येतस्मात् प्रति एतत् संनिवेशितम् (१-१२-१९६३ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[1][३७०. जम्मू-कश्मीरराज्यस्य सम्बन्धे अस्थायिनः उपबन्धाः**- (१) एतस्मिन् संविधाने किमपि सत्यपि-

(क) २३८-तमानुच्छेदस्य, उपबन्धाः जम्मूकश्मीरराज्यस्य सम्बन्धे नानुप्रयुज्येरन्;

(ख) उक्तराज्यस्य-सम्बन्धे विधिनिर्माणस्य संसदः शक्ति;-

(प्रथमः) सङ्घसूच्याः समवर्तिसूच्याश्च विषयान् यावद्, यान् विषयान् राज्यशासनेन परामर्शं कृत्वा राष्ट्रपतिः घोषयेत् यत् ते भारताधिनिवेशे तस्य राज्यस्य प्रवेशं शासति प्रवेशलिखिते विनिर्दिष्टानां तादृशानां विषयाणां तत्स्थानिविषयाः सन्ति येषां विषये अधिनिवेशविधानमण्डलं विधिं प्रणेतुं क्षमते; तथा च

** राष्ट्रपतिः संसदः पुरःप्रशंसाम् अधिकृत्य भारतस्य संविधानस्य अनुच्छेदः ३७० इत्यस्य खण्डः (१) इत्यनेन साकं पठितः अनुच्छेदः ३७० इत्यस्य खण्डः (३) इत्यनेन प्रदत्तशक्तीनां प्रयुञ्जन् इमां घोषणां करोति यत् २०१९वर्षस्य अगस्तमासस्य ६-दिनात् उक्तानुच्छेदः ३७० इत्यस्य सर्वान् खण्डान्, अतिरिच्य निम्नलिखितं, यदधोलिखितानुसारम् अस्ति, प्रचालने न स्यात्, अर्थात् :-

"३७० अस्य संविधानस्य यथाकालं यथासंशोधितं, सर्वे उपबन्धाः कानि अपि उपान्तरणानि विना अथवा अपवादान् अनुच्छेदः १५२ उत अनुच्छेदः ३०८ अथवा अस्य संविधानस्य कस्यचित् अन्यानुच्छेदस्य, अथवा जम्मू-कश्मीरस्य संविधाने कोऽपि अन्यः उपबन्धः अथवा कापि विधिः, अभिलेखः, निर्णयः, अध्यादेशः, आदेशः, उपविधिः, नियमः, विनियमः, अधिसूचना अथवा भारतस्य राज्यक्षेत्रे विधेः बलवती कापि रूढ़िः अथवा प्रथा अथवा कोऽपि अन्य-लिखितः, सन्धिः अथवा सम्मतिः यदनुच्छेदः ३६३ इत्यस्य अधीनं यथाकल्पितम् अथवा अन्यथा अस्ति, इति तत्प्रतिकूलं कस्यचित् विषयस्य अन्तर्विष्टे सत्यपि, जम्मू-कश्मीरराज्ये प्रवर्तेरन्।"

(परिशिष्टम् ३ इति द्रष्टव्यम्) (सं. आ. २७३)

[1] एतदनुच्छेदेन प्रदत्तानां शक्तीनां प्रयोगं कुर्वन् "राष्ट्रपतिः जम्मू-कश्मीर राज्यस्य संविधानसभायाः पुरः प्रशंसानानां समनन्तम् अघोषयत् यत् १९५२-वर्षस्य नवम्बरमासस्य १७-दिनाङ्कात् ३७०-तमानुच्छेदः एतदुपान्तरणेन सहितं प्रवर्तेत यत् तस्य (१) खण्डगतात् स्पष्टीकरणात् प्रति निम्नलिखितं स्पष्टीकरणं संनिवेशितं भवेत् –

स्पष्टीकरणम्- एतदनुच्छेदस्य प्रयोजनार्थं "राज्यस्य शासनम्" इत्येतेन अभिप्रेयते सः जनः यः तदानीं पदस्थायाः राज्यमन्त्रिपरिषदः मन्त्रणायाः अनुसारं कार्यं कुर्वन् जम्मू-कश्मीरस्य *"सदर-इ-रियासत" (अधुना राज्यपालः) इति राष्ट्रपतिना अभिमतः।

(१९५२ वर्षस्य नवम्बरमासस्य; २५-दिनाङ्कितः ८०-तमः विधिमन्त्रालयस्य आदेशः, सं०.आं० ४४)।

*अधुना "राज्यपालः

(द्वितीयः) उक्तसूच्यः तान् अन्यान् विषयान् यान्, तद्राज्यशासनस्य सहमत्या राष्ट्रपतिः आदेशेन विनिर्दिशेत, सीमिता भवेत्।

स्पष्टीकरणम्- एतदनुच्छेदस्य प्रयोजनार्थं 'राज्यशासनम्' इत्येतेन सः जनः अभिप्रेयते यं राष्ट्रपतिः १९४८-वर्षस्य मार्चमासस्य पञ्चमदिने कृतायाः महाराजस्य उद्घोषणायाः अधीनं तत्काले पदस्थमन्त्रिपरिषदः मन्त्रणायाः अनुसारेण कार्यकारी जम्मू-कश्मीरयोः महाराजः इति तदानीम् अभिमन्यते स्म।

(ग) प्रथमानुच्छेदस्य, एतदनुच्छेदस्य च उपबन्धाः तद्राज्यस्य सम्बन्धे अनुप्रयुज्येरन्;

(घ) एतत्संविधानस्य उपबन्धेषु तादृशाः अन्ये उपबन्धाः तादृशैः अपवादैः उपान्तरणैश्च सह यादृशान् राष्ट्रपतिः आदेशेन* विनिर्दिशेत्, तद्राज्यस्य सम्बन्धे अनुप्रयुज्येरन्-

परन्तु एतादृशः कोऽपि आदेशः यः (ख) उपखण्डस्य प्रथमप्रच्छेदे निर्दिष्टे राज्यस्य प्रवेशलिखिते विनिर्दिष्टैः विषयैः सम्बद्धः भवेत् राज्यशासनेन सह परामर्शं विना न प्रवर्त्येत-

अपरं च एतादृशः कोऽपि आदेशः, यः अन्तिमे पूर्ववर्तिनि पारन्तुके निर्दिष्टविषयेभ्यः भिन्नैः विषयैः सम्बद्धः भवेत्, तत् शासनस्य सहमत्या एव प्रवर्त्येत, नान्यथा।

(२) यदि तद्राज्यशासनेन प्रथमखण्डस्य (ख) उपखण्डस्य द्वितीयप्रच्छेदे, अथवा तत्खण्डस्य (घ) उपखण्डस्य द्वितीयपारन्तुके निर्दिष्टा सहमतिः, तद्राज्यार्थं संविधाननिर्माणप्रयोजनवत्याः संविधानसभायाः आमन्त्रणात् पूर्वं, दीयेत तर्हि सः एतादृश्याः सभायाः समक्षं तादृशस्य विनिश्चयस्य कृते स्थाप्येत यादृशं सा तद्विषये कुर्यात्।

(३) एतदनुच्छेदस्य पूर्ववर्तिषु उपबन्धेषु किमपि सत्यपि, राष्ट्रपतिः लोकाधिसूचनया घोषयितुं क्षमते यद् एषः अनुच्छेदः एतादृशात् दिनाङ्कात् प्रवर्तनात् विरतः, अथत्रा एतादृशैः अपवादैः उपान्तरणैश्च सह प्रवर्तितः भवेत् यथा हि सः विनिर्दिशेत्-

परन्तु राष्ट्रपतिना एतादृश्याः अधिसूचनायाः प्रकाशनात् पूर्वं [1][खण्डः (२) इत्यत्र निर्दिष्टायाः तस्य राज्यस्य संविधानसभायाः] पुरः प्रशंसनम् आवश्यकं भवेत्।

---

* (परिशिष्टम् २ इति द्रष्टव्यम्)

[1] संविधानस्य (जम्मू-कश्मीरे प्रवर्त्तमानः) आदेशः, २०१९ वर्षस्य संविधानस्य आदेशे "खण्डः (२) इत्यत्र (५-८-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) उल्लिखितस्य राज्यस्य संविधानसभा" इति अभिव्यक्तिः "राज्यस्य विधानसभा" इति पठितव्या।" परिशिष्टं २ इति द्रष्टव्यम्।

(भागः २१-अस्थायिनः, सङ्क्रमणकालिकाः, विशेषाश्च उपबन्धाः)

[1][**३७१.** [2][***] **महाराष्ट्रराज्यस्य, गुजरातराज्यस्य च सम्बन्धे विशेषोपबन्धाः-** [3][(१) * * * * *]

(२) एतस्मिन् संविधाने किमपि सत्यपि, राष्ट्रपतिः [4][महाराष्ट्रराज्यस्य, गुजरातराज्यस्य च] सम्बन्धे कृतेन आदेशेन उपबन्धयितुं क्षमते यत्-

(क) विदर्भ-मराठावाडा [5][अवशिष्टं महाराष्ट्रम् इत्येतेषां कृते वा यथायथम्] सौराष्ट्र-कच्छ-अवशिष्ट-गुजरातक्षेत्रम् इत्येतेषां कृते वा विकासमण्डलीनां स्थापनं यासां प्रत्येकमण्डल्याः कार्यकरणसम्बन्धे प्रतिवेदनं राज्यस्य विधानसभायाः समक्षं प्रतिवर्षं स्थापितं भविष्यति इति उपबन्धेन सहितं;

(ख) सम्पूर्णराज्यस्य आवश्यकताः संलक्ष्य उक्तक्षेत्राणां सम्बन्धे विकासव्ययाय राशीणां साम्यापूर्णम् आवण्टनम्;

(ग) सम्पूर्णराज्यस्य आवश्यकताः संलक्ष्य सर्वेषाम् उक्तक्षेत्राणां सम्बन्धे शिल्पीयशिक्षार्थं व्यावसायिकप्रशिक्षणार्थं च पर्याप्तानां सुविधानां, तथा राज्यशासनस्य नियन्त्रणाधीनासु सेवासु पर्याप्तावसाराणाम् उपबन्धनार्थं साम्यापूर्णा व्यवस्था,

राज्यपालस्य विशेषोत्तरदायित्वं भवेत्।]

[6][**३७१क. नागालैण्डराज्यस्य सम्बन्धे विशेषोपबन्धाः-** (१) एतस्मिन् संविधाने किमपि सत्यपि-संसदः कोऽपि अधिनियमः-

(प्रथमः) नागजनानां धार्मिकप्रथानां, सामाजिकप्रथानां वा विषये;

(द्वितीयः) नागजनानां रूढिजन्यविधेः प्रक्रियायाश्च विषये;

(तृतीयः) नागजनानां रूढिजन्यविधेः अनुसारं विनिश्चेयेषु व्यवहारिकन्यायविषयेषु, दाण्डिकन्यायविषयेषु वा न्यायप्रशासने;

(चतुर्थः) भूमेः, तस्याः सम्पदां स्वामित्वस्य अन्तरणस्य विषये; नागालैण्डराज्यस्य तावत् नानुप्रयुज्येत यावत् नागालैण्डराज्यस्य विधानसभा सङ्कल्पेन एवं करणाय विनिश्चयं न करोति;

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः,१९५६ इत्यस्य २२-अनुभागेन ३७१-तमानुच्छेदात् प्रति एषः संनिवेशितः।

2 संविधानस्य (द्वात्रिंशत्तमं संशोधनम्) अधिनियमः, १९७३ इत्यस्य २-अनुभागेन "आन्ध्रप्रदेश" शब्दः लोपितः (१-७-१९७४ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (द्वात्रिंशत्तमं संशोधनम्) अधिनियमः, १९७३ इत्यस्य २-अनुभागेन (१) खण्डः लोपितः (१-७-१९७४ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 मुम्बई (पुनर्घटनम्) अधिनियमः, १९६० (१९६० वर्षस्य ११) इत्यस्य ८५-अनुभागेन "मुम्बईराज्यस्य" इत्येतस्मात् प्रति एतत् संनिवेशितं (१-५-१९६० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

5 मुम्बई-पुनर्घटनम् अधिनियमः, १९६० (१९६० वर्षस्य ११) इत्यस्य ८५- "अवशिष्टं महाराष्ट्रम्" इत्येतस्मात् प्रति एतत् संनिवेशितम् (१-५-१९६० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

6 संविधानस्य (त्रयोदशं संशोधनम्) अधिनियमः, १९६२ इत्यस्य २-अनुभागेन एषः अनुच्छेदः अन्तर्वेशितः, (१-१२-१९६३ दिनाङ्कात् प्रवर्तमानप्रभवेण)।

(ख) नागालैण्डराज्यस्य राज्यपालस्य नागालैण्डराज्ये विधेः अथवा व्यवस्थायाः सम्बन्धे तावत् विशेषोत्तरदायित्वं भवेत् यावत् तस्य मत्यनुसारं तद्राज्यस्य निर्माणात् अव्यवहितपूर्वं नागपर्वतीये 'त्युएन्' साङक्षेत्रे उद्भूताः आन्तरिक्यः अशान्तयः एतस्मिन् क्षेत्रे, तस्य कस्मिन् अपि भागे वा अनुप्रवृत्ताः वर्तन्ते, तथा राज्यपालः एतत्सम्बन्धे स्वीयकृत्यानां निर्वहणाय कर्तव्यायाः कार्यावल्याः सम्बन्धे मन्त्रिपरिषदा सह परामर्शानन्तरं स्वस्य व्यक्तिगतनिर्णयस्य प्रयोगं कुर्यात्-

परन्तु यदि एतादृशः प्रश्नः उद्भवति यत् तादृशं किमपि विद्यते न वा यत्सम्बन्धे राज्यपालः स्वस्य व्यक्तिगतनिर्णयस्य प्रयोगद्वारा कार्यं कुर्यात् इति एतत्खण्डानुसारम् अपेक्ष्यते, तर्हि तत्र राज्यपालेन स्वविवेकम् अधिष्ठाय कृतः विनिश्चयः अन्तिमः भवेत् तथा राज्यपालेन यत् किमपि कृतं स्यात् तस्य विधिमान्यता एतदाधारेण प्रश्नगता न क्रियेत यत् तेन व्यक्तिगतरूपेण निर्णयं कृत्वा कार्यं करणीयम् आसीत् न वा-

अपरं च, यदि राज्यपालात् प्रतिवेदनस्य प्राप्तौ, अन्यथा वा, राष्ट्रपतिः समाहितः. भवति यत् नागालैण्डराज्ये विधेः अथवा व्यवस्थायाः सम्बन्धे राज्यपालस्य विशेषोत्तरदायित्वं भवेत् इति ततः परम् आवश्यकं न वर्तते, तर्हि सः आदेशेन निर्देष्टुं मते यत् राज्यपालः एतादृशात् उत्तरदायित्वात् विरतः भवेत् तादृशात् दिनाङ्कात् यः आदेशे विनिर्दिष्टः भवेत्;

(ग) अनुदानस्य कस्याः अपि अध्यर्थनायाः सम्बन्धे स्वीये पुरःप्रशंसने नागालैण्डराज्यस्य राज्यपालः एतत् सुनिश्चितं कुर्यात् यत् कस्याः अपि विनिर्दिष्टसेवायाः अर्थे विनिर्दिष्टप्रयोजनस्य अर्थे वा भारतसञ्चितनिधेः भारतशासनेन प्रदत्तं धनं तादृश्या सेवया तादृशेन प्रयोजनेन वा सम्बद्धस्य अनुदानस्य अभ्यर्थनायाम् एव समावेशितं भवेत्, न च अन्यस्याम्;

(घ) तादृशात् दिनाङ्कात् यम् एतदर्थं नागालैण्डस्य राज्यपालः लोकाधिसूचनया विनिर्दिशेत् पञ्चत्रिंशत् सदस्यैः सम्भूता एका प्रादेशिकपरिषद् 'त्युएन्साङ्गण्डलस्य' अर्थे स्थापिता भवेत्; तथा च राज्यपालः स्वविवेकम् अधिष्ठाय निम्नलिखितविषयेषु उपबन्धं कुर्वाणान् नियमान् प्रणयेत्-

(प्रथमः) प्रादेशिकपरिषदः संरचना, सा रीतिश्च यया प्रादेशिकपरिषदः सदस्याः वृताः भवेयुः-

परन्तु 'त्युएन्साङ्मण्डलस्य' उपायुक्तः *पदेन* प्रादेशिकपरिषदः अध्यक्षः भवेत्; प्रादेशिकपरिषदः उपाध्यक्षश्च एतस्याः सदस्यैः आत्मभ्यः निर्वाचितः भवेत्;

(द्वितीयः) प्रादेशिकपरिषदः सदस्याः भवितुं, सदस्यत्वेन वृताः भवितुं च अर्हता;

(तृतीयः) प्रादेशिकपरिषदः सदस्यानां पदावधिः तथा च तेभ्यः सन्देयानि वेतनानि अथवा भक्तानि, यदि चेत् स्युः;

(चतुर्थः) प्रादेशिकपरिषदः कार्यप्रक्रिया, कार्यसञ्चालनं च;

(पञ्चमः) प्रादेशिकपरिषदः अधिकारिणां कर्मचारिवृन्दस्य च नियुक्तिः, तेषां सेवानिर्बन्धनानि च; तथा च

(षष्ठः) अन्यः कोऽपि विषयः; यस्य सम्बन्धे प्रादेशिकपरिषदः संरचनार्थं, तस्याः समुचितप्रवृत्यर्थं च नियमानां प्रणयनम् आवश्यकं भवति।

(२) अस्मिन् संविधाने किमपि सत्यपि, नागलैण्डराज्यस्य निर्माणदिनाङ्कात् दशानां वर्षाणाम् अवधौ अथवा तादृशे अधिकतरे अवधौ यं राज्यपालः एतत् सम्बन्धे प्रादेशिकपरिषदः पुरःप्रशंसनायाः समनन्तरम् अधिसूचनया तदर्थं विनिर्दिशेत्-

(क) 'त्युएन्साङ्गण्डलस्य' प्रशासनं राज्यपालेन सञ्चालितं भवेत्;

(ख) यत्र नागालैण्डराज्याय सम्पूर्णराज्यस्य आवश्यकतानां पूर्तये भारतशासनेन किमपि धनं प्रदत्तं भवति, तत्र राज्यपालः स्वविवेकम् अधिष्ठाय एतादृशस्य धनस्य 'त्युएन्साङमण्डलस्य' तदवशिष्टस्य राज्यस्य च मध्ये साम्यापूर्णां वितरणव्यवस्थां कुर्यात्;

(ग) नागालैण्डराज्यस्य कोऽपि अधिनियमः 'त्युएन्साङ्गण्डलं' तावत् न विषयीकुर्यात्, यावत् राज्यपालः प्रादेशिकपरिषदः पुरःप्रशंसनानां समनन्तरं लोकाधिसूचनया एवं न निदिशति; तथा च एतादृशस्य कस्यापि अधिनियमस्य सम्बन्धे एतादृशं निदेशं कुर्वन् राज्यपालः निदेष्टुं क्षमते यत् स विधिः 'त्युएन्साङ्गण्डले' अथवा एतस्य कस्मिन् अपि भागे अनुप्रयोगे तादृशानाम् अपवादानाम् उपान्तरणानां च अधीनः प्रभावी भवेत् यान् राज्यपालः प्रादेशिकपरिषदः पुरः प्रशंसनानां समनन्तरं विनिर्दिशेत्-

परन्तु एतदुपखण्डाधीनं प्रदत्तः निदेशः यथा भूतलक्षिप्रभावेण प्रवृत्तः भवेत्; तथा प्रदत्तः भवितुं क्षमते;

(घ) राज्यपालः 'त्युएन्साङ्गण्डले' शान्त्यर्थं, प्रगत्यर्थं, सुशासनार्थं च विनियमान् निर्मातुं क्षमते; तथा एवं निर्मिताः केपि विनियमाः तदानीं तस्मिन् मण्डले प्रवृतं संसदः कमपि अधिनियमम् अथवा कमपि अन्यं विधिं, यदि आवश्यकता चेत्, भूतलक्षिप्रभावेण निरसितुं, संशोधयितुं, वा क्षमन्ते;

(ङ) (प्रथमः) नागालैण्डराज्यस्य विधानसभायां त्युएन्साङ्गण्डलस्य प्रतिनिधित्वं धारयद्भ्यः सदस्येभ्यः एकः सदस्यः राज्यपालेन मुख्यमन्त्रिणा सह मन्त्रणायाः समनन्तरं त्युएन्साङ्गण्डलकार्यमन्त्रिरूपेण नियुक्तः भवेत्, तादृश्याः मन्त्रणायाः प्रदाने च मुख्यमन्त्री उक्तानां सदस्यानां मध्ये बहुसङ्ख्यकानां पुरः प्रशंसनानाम् अनुसारं वर्तेत;[1]

---

[1] संविधानीयः (दुष्करत्वानां निवारणम्) आदेशः १०-तमः, इत्यस्य द्वितीयः प्रच्छेदः उपबन्धयति (१-१२-१९६३ दिनाङ्कात् प्रवर्तमानप्रभावेण) यत् भारतस्य संविधानस्य ३७१अ-तमस्य अनुच्छेदस्य सः एव प्रभावः स्यात् यस्तदा भवति यदा तस्य (२) खण्डस्य (ङ) उपखण्डस्य (द्वितीये) प्रच्छेदे निम्नलिखितः पारन्तुकः अपि समाविष्टः स्यात्, तद् यथा—

"परन्तु यावत् नागालैण्डराज्यस्य विधानसभायां त्यूएन्साङ्गण्डलस्य कृते नियतीकृते स्थाने विधिना निर्वाचितः जनः सदस्यः न भवति, तावत् राज्यपालः मुख्यमन्त्रिणा परामृश्य कञ्चित् जनं त्युएन्साङ् विषयकाणां कार्याणां मन्त्रिपदे नियोजयेत्।"

(द्वितीयः) त्युएन्साङ्गण्डलकार्यमन्त्री त्युएन्साङ्गण्डलेन सहं सम्बद्धेषु सर्वेषु विषयेषु कार्यं कुर्यात् तथा च तेषु विषयेषु तस्य राज्यपालस्य समक्षं साक्षात् प्रवेशः भवेत् किन्तु एतत्सम्बन्धे तेन मुख्यमन्त्री सदा ज्ञापितः भवेत्।

(च) एतत्खण्डस्य पूर्वगामिषु उपबन्धेषु किमपि सत्यपि, त्युएन्साङ्गण्डलेन सह सम्बद्धेषु सर्वेषु विषयेषु अन्तिमं विनिश्चयं राज्यपालः स्वविवेकम् अधिष्ठाय कुर्यात्।

(छ) ५४-तमानुच्छेदे, ५५-तमानुच्छेदे, ८०-तमानुच्छेदे (४) खण्डे च राज्यस्य विधानसभायैः निर्वाचितान् सदस्यान् प्रति, अथवा एतादृशं प्रत्येकं सदस्यं प्रति निर्देशेषु एतदनुच्छेदाधीनं स्थापितया प्रादेशिकपरिषदा निर्वाचितान् निर्वाचितं वा नागालैण्डविधानसभायाः सदस्यान् सदस्यं वा प्रति निर्देशः अन्तर्भवेत्।

(ज) १७०-तमानुच्छेदे-

(प्रथमः) नागालैण्डविधानसभायाः सम्बन्धे (१) खण्डः तथा प्रभावी भवेत् यथा तस्मिन् "षष्टितः" इति पदात् प्रति "षट्चत्वारिंशत्तः" इति शब्दः संनिवेशितः स्यात्;

(द्वितीयः) एतस्मिन् खण्डे राज्यस्य निर्वाचनक्षेत्रेभ्यः प्रत्यक्षनिर्वाचनं प्रति निर्देशे, अस्य अनुच्छेदस्य अधीनं स्थापितायाः प्रादेशिकपरिषदः सदस्यैः कृतं निर्वाचनं प्रति निर्देशः अपि अन्तर्भवेत्;

(तृतीयः) (२) खण्डे (३) खण्डे च निर्वाचनक्षेत्राणि प्रति निर्देशस्य, कोहिमामण्डलस्य मोकोकचुङ्गण्डलस्य च निर्वाचनक्षेत्राणि प्रति सः निर्देशः अस्ति इति अर्थः ग्राह्यः।

(३) यदि एतदनुच्छेदस्य पूर्वगामिनः उपबन्धानां प्रभावीकरणे कापि बाधा उद्भवति तर्हि राष्ट्रपतिः आदेशेन तत् किमपि (यस्मिन् अन्यस्य कस्यचिद् अपि अनुच्छेदस्य अनुकूलनम्, उपान्तरणं वा अन्तर्भवति), कर्तुं क्षमते यत् सः एतादृशीं बाधां निवारयितुम् आवश्यकं प्रत्येति-

परन्तु एतादृशः कोऽपि आदेशः नागालैण्डराज्यस्य निर्माणस्य दिनाङ्कात् वर्षत्रयस्य समाप्तेः अनन्तरं न कृतः भवेत्।

स्पष्टीकरणम्- एतस्मिन् अनुच्छेदे कोहिमामण्डलं, मोकोचुङ्गण्डलं, त्युएन्साङ्मण्डलं च इत्येतेषां स एव अर्थः ग्राह्यः यः १९६२ वर्षस्य नागालैण्ड राज्याधिनियमे अस्ति।]

[1][**३७१ख. असमराज्यस्य सम्बन्धे विशेषोपबन्धाः-** एतस्मिन् संविधाने किमपि सत्यपि, राष्ट्रपतिः असमराज्यसम्बन्धे कृतेन आदेशेन, षष्ठानुसूच्याः २०-तमे प्रच्छेदे संलग्नसारण्याः

---

1 संविधानस्य (द्वाविंशतितमं संशोधनम्) अधिनियमः, १९६९ इत्यस्य ४-अनुमागेन एषः अनुच्छेदः अन्तर्वेशितः।

[1][प्रथमे] भागे विनिर्दिष्टेभ्यः जनजातिक्षेत्रेभ्यः, तद्राज्यस्य विधानसभायैः निर्वाचितैः सदस्यैः तथा आदेशे निर्देशाङ्कसङ्ख्याकैः तादृशैः अन्यैः सदस्यैः सम्भूतायाः तद्राज्यस्य विधानसभासमितेः संरचनार्थं तथा तादृश्याः समित्याः योग्यतया कार्यकरणार्थं तत्सभायाः कार्यप्रक्रियानियमेषु उपान्तरणानि कर्तुम् उपबन्धयितुं क्षमते।]

[2][**३७१ग. मणिपुरराज्यस्य सम्बन्धे विशेषोपबन्धाः-** (१) एतस्मिन् संविधाने किमपि सत्यपि, राष्ट्रपतिः मणिपुरराज्यस्य सम्बन्धे कृतेन आदेशेन तद्राज्यस्य पर्वतीयक्षेत्रेभ्यः तद्राज्यस्य विधानसभायैः निर्वाचितसदस्यैः सम्भूतायाः तद्राज्यविधानमण्डलसमित्याः संरचनार्थं; तथा एतादृश्याः समित्याः योग्यतया कार्यकरणं सुनिश्चितं कर्तुं, शासनस्य कार्यनियमेषु, तद्राज्यस्य विधानसभायाः प्रक्रियानियमेषु च उपान्तरणानि कर्तुं राज्यपालाय किंचित् विशेषोत्तरदायित्वं प्रदातुम् उपबन्धयितुं क्षमते।

(२) राज्यपालः प्रतिवर्षम् अथवा यदा यदा राष्ट्रपतिना एवम् अपेक्ष्यते तदा तदा मणिपुरराज्यस्य पर्वतीयक्षेत्राणां प्रशासनसम्बन्धे राष्ट्रपतये प्रतिवेदनं कुर्यात् तथा सङ्घस्य कार्यपालिकाशक्तिः उक्तप्रदेशानां प्रशासनविषये निदेशदानपर्यन्तं विस्तृता भवेत्।

स्पष्टीकरणम्- अस्मिन् अनुच्छेदे "पर्वतीयक्षेत्राणि" इत्येतेन तानि क्षेत्राणि अभिप्रेयन्ते यानि राष्ट्रपतिः आदेशेन पर्वतीयक्षेत्राणि इति घोषयति।]

[3][**३७१घ. [4][आन्ध्रप्रदेशराज्यस्य अथवा तेलङ्गानाराज्यस्य] सम्बन्धे विशेषोपबन्धाः-** [5][(१) राष्ट्रपतिः, आन्ध्रप्रदेशराज्यस्य तथा तेलङ्गाना-राज्यस्य इत्यनयोः सम्बन्धे कृतादेशेन, प्रत्येकं राज्यस्य आवश्यकतां संलक्ष्य उभयोः राज्ययोः अनेकभागस्थजनानां कृते लोकनियोजनविषये तथा शिक्षा-विषये साम्यापूर्णानाम् अवसराणां सुविधानां च उपबन्धनं कर्तुं शक्नुयात् तथा उभयोः राज्ययोः अनेक-भागस्थजनानां कृते भिन्न-भिन्नाः उपबन्धाः कर्तुं शक्नुयात्।]

---

1 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य, ८१) इत्यस्य ७१-अनुभागेन "क-भाग" इत्येतस्मात् प्रति एतत् संनिवेशितम् (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (सप्तविंशतितमं संशोधनम्) अधिनियमः; १९७१ इत्यस्य ५-अनुभागेन (३७१ग) अन्तर्वेशितः (१५-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (द्वात्रिंशत्तमं संशोधनम्) अधिनियमः, १९७३ इत्यस्य ३-अनुभागेन एतौ अनुच्छेदौ संनिवेशितौ (१-७-१९७४ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 आन्ध्र-प्रदेश-पुनर्घटन-अधिनियमः, २०१४ (२०१४ वर्षस्य ६) ९७-अनुभागेन (२-६-२०१४ दिनाङ्कात् प्रवर्तमानप्रभावेण) "आन्ध्र-प्रदेशः-राज्यम्" इत्यस्य स्थाने संनिवेशितः।

5 आन्ध्र-प्रदेश-पुनर्घटन-अधिनियमः, २०१४ वर्षस्य ९७-अनुभागेन (२-६-२०१४ दिनाङ्कात् प्रवर्तमानप्रभावेण) खण्डः (१) इत्यस्य स्थाने संनिवेशितः।

(२) (१) खण्डाधीनं कृतः आदेशः विशेषतः-

(क) राज्यशासनात् एतत् अपेक्षितुं क्षमते यत् राज्यशासनं राज्यस्य नागरिकसेवापदानां कस्यचिद् वर्षस्य केषांचिद् वर्गाणाम्, अथवा राज्याधीनानां कस्यचिद्वर्गस्य, केषांचिद् वर्गाणां च नागरिकसेवापदानां राज्यस्य विभिन्नानां भागानाम् अर्थे भिन्नेषु स्थानीयसंवर्गेषु घटनं कुर्यात्; तथा च आदेशे विनिर्दिष्टानां तादृशानां सिद्धान्तानां प्रक्रियायाश्च अनुसारं तादृशान् पदान् धारयतां जनानां तादृशेषु संवर्गेषु आवण्टनं कुर्यात्;

(ख) राज्यस्य कंचिद् भागं, कांश्चिद् भागान् वा विनिर्देष्टुं क्षमते यः,ये वा;

(प्रथमः) राज्यशासनस्य अधीनं कस्मिन् अपि स्थानीये संवर्गे (स संवर्गः एतदनुच्छेदस्य अधीनं घटितः स्यात् अन्यथा वा) पदेषु प्रत्यक्षनियोजनार्थं; तथा

(द्वितीयः) राज्यस्य अभ्यन्तरे कस्यापि स्थानीयप्राधिकारिणः, अधीने कस्मिन् अपि संवर्गे पदेषु प्रत्यक्षनियोजनार्थं,

(तृतीयः) राज्यस्य अभ्यन्तरे कस्मिन् अपि विश्वविद्यालये अथवा राज्यशासनस्य नियन्त्रणाधीनायां कस्यामपि अन्यस्यां विद्यासंस्थायां प्रवेशप्रयोजनार्थं च, स्थानीयक्षेत्ररूपेण मन्येत, मन्येरन् वा;

(ग) एतद्विनिर्देष्टुं क्षमते यत् कियद् विस्तृति पर्यन्तं, कया रीत्या केषां प्रतिबन्धानाम् अधीनं, यथायथम् एतादृशस्य संवर्गस्य, विश्वविद्यालयस्य, अन्यस्याः शिक्षासंस्थायाः वा सम्बन्धे, आदेशे विनिर्दिष्टकालावधौ यैः स्थानीयक्षेत्रे निवासः कृतः अस्ति, अध्ययनं वा कृतम् अस्ति तेभ्यः अभ्यर्थिभ्यः-

(प्रथमः) (ख) उपखण्डे निर्दिष्टे तादृशे संवर्गे, यादृशः एतन्निमित्ते कृते आदेशे विनिर्दिष्टः स्यात्, पदेषु प्रत्यक्षनियोजनस्य विषये;

(द्वितीयः) (ख) उपखण्डे निर्दिष्टे एतादृशे कस्मिन् अपि विश्वविद्यालये, निर्दिष्टायाम् एतादृश्यां कस्यामपि विद्यासंस्थायां यस्य यस्याः वा एतन्निमिते आदेशे विनिर्देशः स्यात् प्रवेशविषये, अधिमानं दीयेत, रक्षणं क्रियेत वा।

(३) राष्ट्रपतिः आदेशेन [1][आन्ध्र-प्रदेश-राज्यस्य कृते अथवा तेलङ्गानाराज्यस्य कृते] एकस्य प्रशासनिकस्य अधिकरणस्य घटनाय उपबन्धयितुं, क्षमते यत् निम्नलिखितविषयाणां सम्बन्धे तादृशीम् अधिकारितां तादृशीः शक्तीः तादृशं प्राधिकारं प्रयुक्तान् करिष्यति, ये आदेशे विनिर्दिष्टाः स्युः [येषु अन्तर्भवन्ति तदृशाः अधिकारिताः, शक्तिः, प्राधिकाराश्च ये संविधानस्य (द्वात्रिंशत्तमं संशोधनम्) अधिनियमः, १९७३ इत्यस्य प्रारम्भात् अव्यवहितपूर्वम् उच्चतमन्यायालयात् भिन्नेन केनापि न्यायालयेन, न्यायाधिकरणेन, प्राधिकारिणा वा प्रयोक्तव्याः आसन्, तद्यथा-

---

1 आन्ध्र-प्रदेश-पुनर्घटन-अधिनियमः, २०१४ (२०१४ वर्षस्य ६) ९७-अनुभागेन (२-६-२०१४ दिनाङ्कात् प्रवर्तमानप्रभावेण) "आन्ध्र-प्रदेशः-राज्यस्य कृते" इत्यस्य स्थाने संनिवेशितः।

(क) तद्राज्यस्य कस्यामपि नागरिकसेवायां पदानाम् एतादृशे वर्गे, एतादृशेषु वर्गेषु वा; अथवा तद्राज्याधीनानां नागरिकपदानाम् एतादृशे वर्गे एतादृशेषु वर्गेषु वा, अथवा तद्राज्याभ्यन्तरे कस्यापि स्थानीयप्राधिकारिणः अधीनानां पदानां तादृशे वर्गे तादृशेषु वर्गेषु वा (ये आदेशे विनिर्दिष्टाः स्युः) नियुक्तिः, आवण्टनं, प्रोन्नतिः वा;

(ख) तद्राज्यस्य कस्यामपि नागरिकसेवायां तादृशे वर्गे, तादृशेषु वर्गेषु वा, अथवा तद्राज्याधीनानां नागरिकपदानां तादृशे वर्गे, तादृशेषु वर्गेषु, अथवा तद्राज्याभ्यन्तरे कस्यापि स्थानीयप्राधिकारिणः अधीनानां पदानां तादृशे वर्गे, तादृशेषु वर्गेषु वा ये आदेशे विनिर्दिष्टाः स्युः, नियुक्तानाम्, आवण्टितानां, प्रोन्नतानां वा जनानां ज्येष्ठता;

(ग) तद्राज्यस्य कस्यामपि नागरिकसेवायां पदानां तादृशे वर्गे तादृशेषु वर्गेषु वा; अथवा तद्राज्याधीनानां नागरिकपदानां तादृशे वर्गे तादृशेषु वर्गेषु वा, अथवा तद्राज्याभ्यन्तरे कस्यापि स्थानीयप्राधिकारिणः अधीनानां पदानां तादृशे वर्गे, तादृशेषु वर्गेषु वा नियुक्तानाम्, आवण्टितानां, प्रोन्नतानां वा जनानां सेवाविषयकानि तादृशानि अन्यानि प्रतिबन्धनानि यानि आदेशे विनिर्दिष्टानि स्युः,

(४) (३) खण्डाधीनं कृतः आदेशः-

(क) प्रशासनिकाधिकरणं तस्य अधिकारितान्तर्गतेन केनापि विषयेण सम्बद्धानां व्यथानां निवारणाय अभ्यावेदनानि ग्रहीतुं, यानि राष्ट्रपत्तिः आदेशे विनिर्दिशेत्, तत्सम्बन्धे च अधिकरणं यादृशान् उचितान् मन्यते ते तादृशान् आदेशान् कर्तुं च प्राधिकृतं कुर्यात्;

(ख) यादृशान् राष्ट्रपतिः आवश्यकान् प्रत्येति तादृशान् प्रशासनाधिकरणस्य शक्तीनाम् अधिकाराणां प्रक्रियायाश्च विषये उपबन्धान् अन्तर्वेशयेत् (येषु स्वस्य अवमाने दण्डनस्य शक्तिसम्बन्धिनः उपबन्धाः अपि अन्तर्विशन्ति);

(ग) कार्यप्रवृत्तीनाम् एतादृशवर्गाणां ये आदेशे विनिर्दिष्टाः भवेयुः, याश्च कार्यप्रवृत्तयः प्रशासनिकाधिकरणस्य अधिकारितान्तर्गतैः विषयैः सम्बद्धाः भवेयुः तथा च यास्तस्य आदेशस्य प्रारम्भाद् अव्यवहितपूर्वं (उच्चतमन्यायालयात् अन्यतमस्य) कस्यापि न्यायालयस्य समक्षम् अन्यस्य अधिकरणस्य प्राधिकरणस्य वा समक्षं लम्बिताः भवेयुः, प्रशासनाधिकरणाय अन्तरितुम्, उपबन्धान् कुर्यात्;

(घ) एतादृशान् अनुपूरकान्, आनुषङ्गिकान्, पारिणामिकान् च उपबन्धान् अन्तर्वेशयेत् यान् राष्ट्रपतिः आवश्यकान् मन्यते (येषु उपबन्धेषु प्रशुल्कविषयकाः, परिसीमाविषयकाः, साक्ष्यविषयकाः उपबन्धाः, केषांचित् अपवादानाम् उपान्तरणानां वा अधीनं कस्यापि विधेः तदानीं प्रवर्तनाय च उपबन्धाः अन्तर्विशन्तु)।

*(५) कस्यापि विवादविषयस्य अन्तिमरूपेण निर्वर्तनं कुर्वन् प्रशासनिकाधिकरणस्य आदेशः प्रभावी भवेत्, यदा सः राज्यशासनेन पुष्टीकृतः भवति, अथवा यस्मिन् दिनाङ्के आदेशः कृतः भवति तद्दिनाङ्कात् मासत्रयस्य समाप्तौ, द्वयोः यत् पूर्वतरं भवति-

परन्तु राज्यशासनं, लिखितरूपेण कृतेन विशेषादेशेन, तस्मिन् विनिर्देश्यानां कारणानाम् आधारेण, प्रशासनिकाधिकरणस्य कमपि आदेशं, सः प्रभावी भवेत् तस्मात् प्राक्, उपान्तरितं, विलुप्तं वा कर्तुं क्षमते; एतादृश्यां कस्यामपि दशायां प्रशासनिकाधिकरणस्य आदेशः यथायथम् एतादृशेन उपान्तरितरूपेण प्रभावी भवेत् अथवा प्रभावशून्यः भवेत्।

(६) (५) खण्डस्य पारन्तुकस्य अधीनं कृतः प्रत्येकं विशेषः आदेशः तस्य करणात् अनन्तरं राज्यविधानमण्डलस्य उभयोः सदनयोः समक्षं यथाशक्यं शीघ्रं स्थापितः भवेत्।

(७) राज्यस्य उच्चन्यायालयः प्रशासनिकाधिकरणस्य अधीक्षणाय शक्तिमान् न भवेत् तथा उच्चतमन्यायालयात् अन्यतमः कोऽपि न्यायालयः किमपि न्यायाधिकरणं वा प्रशासनिकाधिकरणस्य सम्बन्धे अथवा तस्य अधिकारितायाः, शक्तेः, प्राधिकारस्य अधीनत्वे स्थितस्य कस्यापि विषयस्य सम्बन्धे, कस्याः अपि अधिकारितायाः, शक्तेः, कस्यापि प्राधिकारस्य वा प्रयोगं न कुर्यात्,

(८) यदि राष्ट्रपतिः समाहितः भवति यत् प्रशासनिकाधिकरणस्य अविरतम् अनुवर्तित्वम् आवश्यकं न विद्यते, तर्हि राष्ट्रपतिः आदेशेन प्रशासनिकाधिकरणम् उत्सादयितुः क्षमते; तथा च एतादृशात् उत्सादनात् अव्यवहितपूर्वं तदधिकरणस्य समक्षं लम्बमानानां विवादविषयाणाम् अन्तरणाय, निर्वर्तनाय च सः यादृशान् समुचितान् मन्यते तादृशान् उपबन्धान् एतादृशे आदेशे कर्तुं क्षमते।

(९) कस्यापि न्यायालयस्य, अधिकरणस्य अन्यस्य वा प्राधिकारिणः कस्मिन् अपि निर्णये, आज्ञप्तौ, वा सत्यपि-

(क) (प्रथमः) १९५६-वर्षस्य नवम्बरमासस्य प्रथमदिनाङ्कात् प्राक्, यथास्थितस्य हैदराबादराज्यस्य शासनस्य अथवा एतदधीनं स्थितस्य कस्यापि स्थानीयप्राधिकारिणः अधीने तस्मात् दिनाङ्कात् पूर्वं कस्मिन् अपि पदे, अथवा

(द्वितीयः) संविधानस्य (द्वात्रिंशत्तमं संशोधनम्) अधिनियमः, १९७३ इत्यस्य प्रारम्भात् पूर्वम् आन्ध्रप्रदेशराज्यशासनस्य, कस्यापि स्थानीयस्य, अन्यस्य वा प्राधिकारिणः अधीने कस्मिन् अपि पदे-

कृतं कस्यापि जनस्य नियोजनं, पदस्थापनं, प्रोन्नतिः अन्तरणं वा, तथा च

(ख) (क) उपखण्डे निर्दिष्टेन केनापि जनेन तस्य समक्षं वा कृता कार्यप्रवृत्तिः कृतं कार्यं वा,अवैधम्, शून्यीभूतम् अस्ति, कदाचित् अपि अवैधं शून्यीभूतं वा अभूत् इति केवलम् एतदाधारेण न मन्येत यद एतादृशस्य जनस्य नियोजनं, पदस्थापनं, प्रोन्नतेः अन्तरणं वा

---

* उच्चतम-न्यायालयः *इत्यनेन पी. साम्बमूर्तिः तथा अन्यः इत्येतं विरुद्ध्य आन्ध्र-प्रदेश-राज्यं तथा एकः अन्यः* (१९८७) १ एस्. एस. सी. ३६२ इति, अनुच्छेदः ३७१घ इत्यस्य खण्डः (५) तस्य पारन्तुकम् असंवैधानिकं तथा प्रभावशून्यं घोषितम्।

तस्मिन् काले तादृश्याः प्रोन्नतेः, तादृशस्य नियोजनस्य, पदस्थापनस्य, अन्तरणस्य वा सम्बन्धे यथायथं हैदराबादराज्यस्य अभ्यन्तरे अथवा आन्ध्रप्रदेशराज्यस्य कस्यापि भागस्य अभ्यन्तरे निवासस्य आवश्यकताम् उपबन्धयतः तदानीं प्रवृत्तस्य विधेः अनुसारं न अक्रियत।

(१०) अस्य संविधानस्य उपबन्धाः तथा च एतदधीनं राष्ट्रपतिना कृतस्य कस्यचिद् आदेशस्य उपबन्धाः, अस्य संविधानस्य अन्यस्मिन् कस्मिन् उपबन्धे अथवा तदानीं प्रवृत्तेः कस्मिन् अपि विधौ किमपि सत्यपि, प्रभाविनः भवेयुः।

३७१ङ. आन्ध्रप्रदेशे केन्द्रीयविश्वविद्यालयस्य स्थापना- संसद् आन्ध्रप्रदेशराज्ये एकस्य विश्वविद्यालयस्य स्थापनार्थम् उपबन्धं कर्तुं क्षमते।]

[1][**३७१च. सिक्किमराज्यस्य सम्बन्धे विशेषोपबन्धाः-** अस्मिन् संविधाने किमपि सत्यपि-

(क) सिक्किमराज्यस्य विधानसभा त्रिंशतः अन्यूनैः सदस्यैः सम्भूता भवेत्;

(ख) संविधानस्य (षड्विंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य प्रारम्भदिनात् (यद् अस्मिन् अनुच्छेदे इतः परं "नियतदिनम्" इति अभिहितम् अस्ति)-

(प्रथमः) १९७४-वर्षस्य एप्रिलमासे कृतानां निर्वाचितानां परिणामरूपेण, उक्तेषु निर्वाचनेषु निर्वाचितः द्वात्रिंशत् सदस्यैः (ये अत्र इतः परम् आसीनाः सदस्याः इति अभिहिताः सन्ति) सिक्किमस्य कृते सम्भूता विधानसभा, सम्यग्रूपेण घटिता सिक्किमराज्यस्य विधानसभा मन्येत;

(द्वितीयः) आसीनाः सदस्याः अस्य संविधानस्य अधीनं सम्यग्रूपेण निर्वाचिताः सिक्किमराज्यस्य विधानसभायाः सदस्याः मन्येरन्; तथा च

(तृतीयः) सिक्किमराज्यस्य उक्ता विधानसभा अस्य संविधानस्य अधीनं राज्यस्य विधानसभायाः शक्तीः प्रयोजयेत् तस्याः कर्तव्यानां पालनं च कुर्यात्;

---

[1] संविधानस्य (षड्विंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य ३-अनुभागेन एषः अनुच्छेदः अन्तर्वेशितः (२९-४-१९७५ दिनाङ्कः प्रवर्तमानप्रभावेण)।

(ग) “ख” खण्डाधीनं सिक्किमराज्यस्य विधानसभारूपेण मतायाः विधानसभायाः स्थित्यां १७२-तमानुच्छेदस्य (१) खण्डे [1][पञ्चानां वर्षाणाम्] अवधिं प्रति निर्देशाः [2][चतुर्णां वर्षाणाम्] अवधेः प्रति निर्देशाः सन्ति इति अर्थः ग्राह्यः; उक्तः [2][चतुर्णां वर्षाणाम्] अवधिश्च नियतदिनात् प्रारभमाणः मन्येत।

(घ) संसदा विधिना यावत् अन्ये उपबन्धाः न क्रियेरन्, तावत् लोकसभायां सिक्किमराज्याय आवण्टितम् एकं स्थानं भवेत् तथा च सिक्किमराज्यं “सिक्किमसंसदीयनिर्वाचनक्षेत्रम्” इति अभिहितम् एकं संसदीयं निर्वाचनक्षेत्रं स्यात्;

(ङ) नियतदिने विद्यमानायां लोकसभायां सिक्किमराज्यस्य प्रतिनिधिः सिक्किमराज्यस्य विधानसभासदस्यैः निर्वाचितः भवेत्;

(च) संसद् सिक्किमराज्यजनतायाः विभिन्नविभागानाम् अधिकाराणां हितानां च संरक्षणार्थं सिक्किमराज्यस्य विधानसभायां यानि स्थानानि एतादृशविभागानाम् अभ्यर्थिभिः पूरितानि भवितुम् अर्हन्ति तेषां स्थानानां सम्बन्धे, तथा केवलम् एतादृशविभागानाम् अभ्यर्थिनः येभ्यः (निर्वाचनक्षेत्रेभ्यः) सिक्किमराज्यस्य विधानसभायैः निर्वाचनाय प्रत्याशिनः भवेयुः तेषां निर्वाचनक्षेत्राणां परिसीमाकरणाय, उपबन्धान् निर्मातुं क्षमते;

(छ) सिक्किमराज्यपालस्य विशेषोत्तरदायित्वं भवेत् यत् सः शान्त्यर्थं, तथा सिक्किकमजनतायाः विभिन्नानां विभागानां सामाजिकीम्, आर्थिकीं च प्रगतिं सुनिश्चितां कर्तुं साम्यापूर्णां व्यवस्थां कुर्यात्; तथा च एतत्खण्डाधीनं विशेषोत्तरदायितत्वस्य निर्वहणाय राज्यपालः, स्वविवेकम् अधिष्ठाय तादृशानां निदेशानाम् अधीनं कार्यं कुर्यात्, यादृशान् राष्ट्रपतिः काले काले दातुं समुचितं मन्येत;।

(ज) सिक्किमराज्याभ्यन्तर्गतेषु राज्यक्षेत्रेषु तद् बहिः वा विद्यमाना या सर्वा सम्पत्तिः यानि च सर्वस्वानि सिक्किमराज्यशासने वा सिक्किमराज्यप्रयोजनानाम् अर्थे अन्यस्मिन् कस्मिन् अपि प्राधिकारिणि वा, जने वा नियतदिनात् अव्यवहितपूर्वं निहितानि आसन् सा सर्वा सम्पत्तिः, तानि सर्वस्वानि च नियतदिनात्, सिक्किमराज्यस्य शासने निहितानि भवेयुः;

---

[1] संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५६-अनुभागेन “पञ्चानां वर्षाणां” स्थाने (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रतिष्ठापितः अनन्तरं, संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४३-अनुभागेन “षण्णां वर्षाणाम्” इत्येताभ्यां शब्दाभ्यां प्रति एतौ शब्दौ संनिवेशितौ (२६-४-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[2] संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५६-अनुभागेन “चतुर्णां वर्षाणां” स्थाने (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रतिष्ठापितः अनन्तरं, संविधानस्य (चतुश्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७८ इत्यस्य ४३-अनुभागेन “पञ्चानां वर्षाणाम्” इत्येताभ्यां शब्दाभ्यां प्रति एतौ शब्दौ संनिवेशितौ (६-९-१९७९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(झ) सिक्किमराज्ये समाविष्टेषु राज्यक्षेत्रेषु नियतदिनात् पूर्वं तद्रूपेण कार्यरतः उच्चन्यायालयः नियतदिनात् सिक्किमराज्यस्य कृते उच्चन्यायालयः मन्येत;

(ञ) सिक्किमराज्यस्य राज्यक्षेत्रे सर्वत्र व्यावहारिकीं, दाण्डिकीं, राजस्विकीम् अधिकारितां धारयन्तः सर्वे न्यायालयाः, न्यायिकाः, कार्यपालिकाः, अनुसचिवीयाः च सर्वे प्राधिकारिणः अधिकारिणश्च, नियतदिनात् स्वस्व कृत्यानां प्रयोगे, एतत्संविधानस्य अधीनम् अनुवर्तेरन्;

(ट) सिक्किमराज्यस्य, तस्य कस्यचिद् अपि भागस्य वा अन्तर्गतेषु राज्यक्षेत्रेषु नियतदिनात् पूर्वं प्रवृत्ताः सर्वे विधयः यावत् क्षमेण विधानमण्डलेन, अन्येन वा क्षमेण प्राधिकारिणा संशोधिताः निरस्ताः वा न भवेयुः तावत् प्रवृत्तौ अनुवर्तेरन्;

(ठ) (ट) खण्डे यथानिर्दिष्टस्य एतादृशस्य कस्यापि विधेः सिक्किमराज्यस्य प्रशासनसम्बन्धे प्रयोगसौकर्यार्थं, तथा च एतादृशस्य कस्यापि विधे; उपबन्धान् अस्य संविधानस्य उपबन्धैः अनुरूपान् कर्तुं, राष्ट्रपतिः नियतदिनात् वर्षद्वयावधौ, विधेः, निरसनरूपेण, संशोधनरूपेण वा एतादृशानि अनुकूलानि, उपान्तरणानि च कर्तुं क्षमते यादृशानि आवश्यकानि समीचीनानि वा स्युः; तथा एवं कृते एतादृशः प्रत्येकविधिः एवं कृतानाम् अनुकूलनानाम्, उपान्तरणानां च अधीनं प्रभावी भवेत्; तथा एतादृशम् अनुकूलनम् उपान्तरणं वा कस्मिन् अपि न्यायालये प्रश्नगतं न क्रियेत;

(ड) सिक्किमसम्बन्धे नियतदिनात् पूर्वं कृतात् निष्पादितात् वा कस्मात् अपि सन्धेः, समयात्, वचनबन्धात् अन्यस्मात् लिखितात् वा यस्मिन् भारतशासनम् अथवा तस्य किमपि पूर्ववर्तिशासनं पक्षकारः आसीत्, उद्भवतः विवादस्य, अन्यविषयस्य वा सम्बन्धे उच्चतमन्यायालयस्य अन्यस्य कस्यचिद् अपि न्यायालयस्य वा अधिकारिता न भवेत् किन्तु एतत्खण्डगतस्य कस्यचिद् अपि कथनस्य एवम् अर्थः न ग्राह्यः यत् तत् १४३-तमानुच्छेदस्य उपबन्धान् अल्पीकरोति इति;

(ढ) राष्ट्रपतिः लोकाधिसूचनया कस्याः अपि अधिनियमितेः या अधिसूचनायाः दिनाङ्कं भारतस्य कस्मिन् अपि राज्ये प्रवर्तमाना अस्ति, प्रवृत्तिं सिक्किमराज्ये तादृशैः प्रतिबन्धैः उपान्तरणैः वा सह यानि सः मन्येत विस्तारयितुं क्षमते;

(ण) एतदनुच्छेदस्य पूर्वगामिनाम् उपबन्धानां कस्यचिद् उपबन्धस्य प्रवर्तने यदि कापि बाधा उद्भवति, तर्हि राष्ट्रपतिः आदेशेन* तत् किमपि कर्तुं क्षमते (यस्मिन् कस्यापि अन्यस्य अनुच्छेदस्य अनुकूलनम्, उपान्तरणं च अन्तर्भवति) यत् तेन तादृश्याः बाधायाः निवारणाय आवश्यकं प्रतीयते-

---

* संविधानीयः (दुष्करत्वनिवारणम्) आदेशः ११-तमः (सां ० आ० ९९) द्रष्टव्यः।

परन्तु एतादृशः कोऽपि आदेशः नियतदिनात् वर्षद्वयस्य समाप्तेः अनन्तरं न क्रियेत;

(त) सिक्किमराज्ये तदन्तर्गतेषु राज्यक्षेत्रेषु वा, तस्य, तेषां सम्बन्धे वा नियतदिनात् आरभ्य यस्मिन् दिने संविधानस्य (षड्विंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्येतत् राष्ट्रपतेः अनुमतिं लभते तस्मात् दिनात् अव्यवहितपूर्वं समाप्ते कालावधौ कृतानि सर्वाणि कर्माणि, आचरितानि सर्वाणि कृत्यानि च यावत् पर्यन्तं तानि संविधानस्य (षड्विंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्येतेन संशोधितस्य एतत्संविधानस्य उपबन्धैः अनुरूपाणि सन्ति तावत् पर्यन्तं सर्वप्रयोजनानाम् अर्थे एवं संशोधितस्य संविधानस्य अधीनं विधिमान्यरूपेण कृतानि आचरितानि वा सन्ति इति मन्येत।]

[1][**३७१छ. मिजोरमराज्यस्य सम्बन्धे विशेषोपबन्धः**- अस्मिन् संविधाने किमपि सत्यपि-

(क) निम्नलिखितस्य विषये संसदः कोऽपि अधिनियमः मिजोरमराज्याय तावत्पर्यन्तं न प्रवर्तेत यावत्पर्यन्तं मिजोरमराज्यस्य विधानसभया सङ्कल्पेन न विनिश्चीयेत।

(प्रथमः) मिजोजनानां धार्मिकप्रथाः सामाजिकप्रथाः वा;

(द्वितीयः) मिजोजनानां रूढिजन्यविधिः प्रक्रिया च;

(तृतीयः) व्यवहारन्यायप्रशासनं, दाण्डिकन्यायप्रशासनं यत्र विनिश्चयः मिजोजनानां रूढिजन्यविध्यनुसारेण भवितव्यः;

(चतुर्थः) भूमेः स्वामित्वम् अन्तरणञ्च;

परञ्च एतत् खण्डगतं किमपि, संविधानस्य (त्रिपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८६ इत्यस्य प्रारम्भदिनात् प्राक् मिजोरमराज्यसङ्घे प्रवर्तमाने केन्द्रीयसर्वकारस्य कस्मिंश्चित् अपि अधिनियमे न प्रवर्तेत।

(ख) मिजोरमराज्यस्य विधानसभायां न्यूनातिन्यूनं चत्वारिंशत् (४०) सदस्याः भवेयुः।]

[2]**३७१ज. अरुणाचलप्रदेशराज्यस्य सम्बन्धे विशेषोपबन्धः**, अस्मिन् संविधाने किमपि सत्यपि-
(क) अरुणाचलप्रदेशस्य राज्यपालस्य अरुणाचलप्रदेशराज्ये विधिव्यस्थासम्बन्धेन विशेषमुत्तरदायित्त्वं भवेत् तद्विषये च कर्त्तव्यानां निर्वहणे राज्यपालः मन्त्रिपरिषदः परामर्शात् परम् अनुयोजनाविषये आत्मनः व्यक्तिगतं निर्णयं कुर्यात्।

---

1 संविधानस्य (त्रिपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८६ वर्षस्य २-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

2 संविधानस्य (पञ्चपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८६ वर्षस्य २-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

परन्तु यद्येवं प्रश्नः उदेति यत् कोऽपि विषयः तादृशः अस्ति न वा यद्विषये राज्यपालतः एतादृशी अपेक्षा कृता अस्ति यत्र राज्यपालः एतादृशं निर्णयं कुर्यात्, तर्हि राज्यपालेन स्वविवेकेन कृतः निर्णयः अन्तिमः स्यात्, तथा राज्यपालस्य एतादृशस्य कस्यापि निर्णयस्य विधिमान्यता एतदाधारेण प्रश्नगता न भवेत् यथा तेन स्वविवेकेन कार्यं कर्तव्यं न वा इति।

परन्तु यदि राज्यपालतः प्रतिवेदनस्य प्राप्तेः अनन्तरम् अन्यथा वा राष्ट्रपतिः समाहितो भवति यत् अरुणाचलप्रदेशराज्ये विधिव्यवस्थासम्बन्धे राज्यपालस्य विशेषोत्तरदायित्त्वस्य आवश्यकता नास्ति इति तर्हि सः आदेशद्वारा निर्दिशेत् यत् राज्यपालस्य तथाविधम् उत्तरदायित्त्वं तद्दिनाङ्कतः न भवेत् यः दिनाङ्कः आदेशे निर्दिष्टः भवेत्।

(ख) अरुणाचलप्रदेशस्य विधानसभायां न्यूनातिन्यूनं ४०-सदस्याः भवेयुः।]

[1]**३७१झ. गोवाराज्यस्य सम्बन्धे विशेषोपबन्धः-** अस्मिन् संविधाने किमपि सत्यपि, गोवाराज्यस्य विधानसभायां न्यूनातिन्यूनं त्रिंशत् (३०) सदस्याः भवेयुः।

[2][**३७१ञ. कर्णाटक-राज्यस्य सम्बन्धे विशेषोपबन्धाः-** (१) राष्ट्रपतिः, कर्णाटक-राज्यस्य सम्बन्धे आदेशेन राज्यपालस्य कस्यचित् विशेषोत्तरदायित्त्वस्य कृते उपबन्धं कर्त्तुं शक्नुयात्-

(क) कर्णाटकक्षेत्रीय-हैदराबादः इत्यस्य कृते पृथक् विकासमण्डलस्य स्थापाना अनेनोपबन्धेन भवेत् यदस्य विकासगणस्य कार्यकरणस्यैकं प्रतिवेदनं प्रत्येकस्मिन् वर्षे राज्यविधानसभायाः समक्षमुपस्थापयेत्।

(ख) सम्पूर्णराज्यस्य आवश्यकतां ध्यानावधार्य उक्तक्षेत्रस्य विकासव्ययाय निधीनां समावंटनाय, तथा

(ग) सम्पूर्णराज्यस्य आवश्यकतां ध्यानावधार्य उक्तक्षेत्रीयसम्बन्धितजनेभ्यः लोकनियोजनानां, शिक्षाणां, व्यवसायिकप्रशिक्षणानां समवसराय समसुविधायै च,

(२) खण्डः (१) इत्यस्य उपखण्डः (ग) इत्यस्य अधीनं कृतादेशेन-

(क) कर्णाटकक्षेत्रीय-हैदराबादः इत्यत्र शैक्षिकसंस्थासु तथा व्यवसायिकप्रशिक्षणसंस्थासु एतदृशानां छात्राणां कृते आनुपातिकारक्षणस्य उपबन्धः कर्तुं शक्नुयात्, ये जन्मना अधिवासिना तस्य क्षेत्रस्य सन्ति, तथा

---

1 संविधानस्य (षड्पञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८७ वर्षस्य २-अनुभागेन (३०-०५-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

2 संविधानस्य (अष्टनवतितमं संशोधनम्) अधिनियमः, २०१२ वर्षस्य २-अनुभागेन (१-१०-२०१३ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

(ख) कर्णाटकक्षेत्रीय-हैदराबादः इत्यत्र राज्यशासनस्य अधीने तथा राज्यशासनस्य नियन्त्रणाधीने च कस्मिंश्चिदपि निकाये सङ्घटने वा पदानां पदवर्गानाम् अभिज्ञानाय, तथा तेभ्यः जनेभ्यः ये जन्मना अधिवासिना तस्य क्षेत्रस्य सन्ति तथा एतादृशानां पदानाम् आनुपातिकारक्षणाय, तथा तेषु पदेषु साक्षात्कारेण, प्रोन्नत्या अथवा इत्थम् अन्यरीत्या यद् आदेशेन विनिर्दिश्येत, नियुक्तये उपबन्धः कर्तुं शक्नुयात्।

३७२. विद्यमानविधीनां प्रवृत्तेः अनुवर्तनं, तेषाम् अनुकूलनं च- (१) ३९५-तमानुच्छेदे निर्दिष्टानाम् अधिनियमितीनाम् एतत् संविधानेन निरसने अपि, किन्तु एतत्संविधानस्य अन्येषाम् उपबन्धानाम् अधीनम् एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं भारतराज्यक्षेत्रे सर्वः प्रवृत्तः विधिः तस्मिन् तावत् प्रवृत्तिम् अनुवर्तते यावत् क्षमेण विधानमण्डलेन अन्येन क्षमेण प्राधिकारिणा वा परिवर्तितः, निरस्तः, संशोधितः वा न भवति।

(२) भारतराज्यक्षेत्रे प्रवृत्तस्य कस्यापि विधेः उपबन्धान् एतस्य संविधानस्य उपबन्धैः सह अनुरूपान् कर्तुं राष्ट्रपतिः आदेशेन* तादृशविधेः तादृशानि अनुकूलनानि, उपान्तरणानि च निरसनेन संशोधनेन वा कर्तुं क्षमते यादृशानि आवश्यकानि समीचीनानि वा भवेयुः; इमम् उपबन्धं च कर्तुं क्षमते यत् सः विधिः तादृशदिनाङ्कात् आरभ्य यादृशः आदेशे विनिर्दिष्टः भवेत् एवं कृतानाम् अनुकूलनानाम् उपान्तरणानां च अधीनं प्रभावी भवेत्, तादृशं किमपि अनुकूलनम् उपान्तरणं च किमपि न्यायालये प्रश्नगतं न क्रियेत।

(३) (२) खण्डगतं किमपि-

(क) राष्ट्रपतये एतत्संविधानस्य प्रारम्भात् [1][वर्षत्रयस्य] समाप्तेः अनन्तरं कस्यापि विधेः किमपि अनुकूलनम् उपान्तरणं वा कर्तुं शक्तिं ददाति इति; अथवा

(ख) कस्यापि क्षमस्य विधानमण्डलस्य कस्यापि अन्यस्य क्षमस्य प्राधिकारिणः वा राष्ट्रपतिना उक्तखण्डस्य अधीनम् अनुकूलितस्य उपान्तरितस्य वा कस्यापि विधेः निरसनात् संशोधनात् वा निवारयति इति न मन्येत।

---

* भारतस्य असाधारणराजपत्रस्य द्वितीयभागस्य तृतीयखण्डे ५१-तमे पृष्ठे प्रकटितया सां० नि० आ०११५ क्रमाङ्कितया, ५-६-१९५० दिनाङ्कितया अधिसूचनया; भारतस्य असाधारणराजपत्रस्य द्वितीयभागस्य तृतीयखण्डे ९०३-तमे पृष्ठे प्रकटितया सां० नि० आ० ८७० क्रमाङ्कितया ४-११-१९५० दिनाङ्कितया अधिसूचनया; भारतस्य असाधारणराजपत्रस्य द्वितीयभागस्य तृतीयखण्डे २८७-तमे पृष्ठे प्रकटितया सां० नि० आ०५०८ क्रमाङ्कितया ४-४-१९५१ दिनाङ्कितया अधिसूचनया; भारतस्य असाधारणराजपत्रस्य द्वितीयभागस्य तृतीयखण्डे ६१६/१तमे पृष्ठे प्रकटितया सां० नि० आ० ११४० बी० क्रमाङ्कितया २-७-१९५२ दिनाङ्कितया अधिसूचनया च यथा संशोधितः १९५० २६-१-१९५० वर्षीयः विधीनाम् अनुकूलनाय आदेशः भारतस्य असाधारणराजपत्रे ४४९-तमे पृष्ठे प्रकटितः द्रष्टव्यः तथा च भारतस्य असाधारणराजपत्रस्य द्वितीयभागस्य तृतीयखण्डे ९२३ पृष्ठे प्रकटितः १९५२ वर्षस्य तिरुवांकुर-कोच्चि-भूम्यर्जनविधीनाम् अनुकूलनाय आदेशः क्रमाङ्कितः २०-११-१९५२ द्रष्टव्यः।

1 संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य १२-अनुभागेन "वर्षद्वयस्य" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

स्पष्टीकरणम् १-अस्मिन् अनुच्छेदे "प्रवृत्तः विधिः" इत्येतस्मिन् सः कोऽपि विधिः अन्तर्भवेत् यः एतत्संविधानस्य प्रारम्भात्पूर्वं भारतराज्यक्षेत्रे केनापि विधानमण्डलेन अन्येन क्षमेण प्राधिकारिणा वा पारितः निर्मितः वा अभूत्, न च पूर्वम् एव निरस्तः आसीत्, यद्यपि सः, तस्य भागाः वा तदा सर्वथा, केषुचित् विशिष्टक्षेत्रेषु वा प्रवृत्ताः न स्युः।

स्पष्टीकरणम् २- भारतराज्यक्षेत्रस्य केनापि विधानमण्डलेन अन्येन वा क्षमेण प्राधिकारिणा पारितस्य प्रणीतस्य वा कस्यापि विधेः यस्य एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं राज्यक्षेत्रातीतः प्रभावः तथा भारतराज्यक्षेत्रे अपि प्रभावः आसीत्, तादृशानाम् अनुकूलनानाम्, उपान्तरणानां च अधीनं, यादृशानि पूर्वम् उक्तानि, राज्यक्षेत्रातीतः प्रभावः अनुवर्तेत।

स्पष्टीकरणम् ३-एतदनुच्छेदे कस्यापि कथनस्य एवम् अर्थः न ग्राह्यः यत् तत् कमपि अस्थायित्वेन प्रवृत्तं विधिं तस्य समाप्तये नियतात् दिनाङ्कात् अथवा तस्मात् दिनाङ्कात् यस्मिन्, यदि एतत् संविधानं प्रवृत्तं न अभविष्यत् तर्हि सः समाप्तः अभविष्यत्, अनन्तराम् अनुवर्तयति इति।

स्पष्टीकरणम् ४- कस्यापि प्रान्तस्य राज्यपालेन १९३५ वर्षस्य भारतशासनाधिनियमस्य ८८-अनुभागस्य अधीनं प्रख्यापितः एतत्संविधानस्य च प्रारम्भात् अव्यवहितपूर्वं प्रवर्तितः अध्यादेशः यदि तत्स्थानीयराज्यस्य राज्यपालेन पूर्वम् एव प्रत्याहृतः न भवेत् तर्हि, तादृशस्य प्रारम्भात् अनन्तरं ३८२-तमानुच्छेदस्य प्रथमखण्डस्य अधीनं कार्यरतायाः तद्राज्यस्य विधानसभायाः प्रथमाधिवेशनात् षण्णां सप्ताहानां समाप्तौ प्रवर्तनात् प्रविरमेत्, तथा एतदनुच्छेदे कस्यापि कथनस्य एवम् अर्थः न ग्राह्यः यत् तत् किमपि एतादृशम् अध्यादेशम् उक्तकालावधेः अनन्तरम् अनुवर्तयति इति।

[1][**३७२क. विधीनाम् अनुकूलनाय राष्ट्रपतेः शक्तिः**- (१) संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य प्रारम्भात् अव्यवहितपूर्वं भारते तस्य कस्मिन् अपि भागे वा प्रवृत्तस्य विधेः उपबन्धान्, एवं संशोधितस्य अस्य संविधानस्य उपबन्धैः अनुरूपान् कर्तुं राष्ट्रपतिः १९५७ वर्षस्य नवम्बरमासस्य प्रथमदिनाङ्कात् प्राक् कृतेन आदेशेन* निरसनरूपेण, संशोधनरूपेण वा विधौ तादृशानि अनुकूलनानि उपान्तरणानि च कर्तुं क्षमते यादृशानि आवश्यकानि समीचीनानि वा स्युः; तथा च एतत् उपबन्धयितुं क्षमते यत् सः विधिः तादृशात् दिनाङ्कात् यः तस्मिन् (आदेशे) विनिर्दिष्टः स्यात् एवं कृतानाम् अनुकूलनानाम् उपान्तरणानां च अधीनं प्रवृत्तः भवेत्, तथाः च तादृशं किमपि अनुकूलनम् उपान्तरणं वा कस्मिन् अपि न्यायालये प्रश्नगतं न क्रियेत।

(२) (१) खण्डगतं किमपि क्षमं विधानमण्डलम्, अन्यं कमपि क्षमं प्राधिकारिणम् एतत् खण्डाधीनम् अनुकूलितस्य, उपान्तरितस्य वा विधेः निरसनात् संशोधनाद् वा निवारयति इति न मन्येत।]

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २३-अनुभागेन अन्तर्वेशितः।

* १९५९-१९५७ वर्षयोः विधीनाम् अनुकूलनाय आदेशाः द्रष्टव्याः।

३७३. निवारकनिरोधे स्थापितानां जनानां सम्बन्धे दशाविशेषेषु आदेशकरणे राष्ट्रपतेः शक्तिः- यावत् २२-तमानुच्छेदस्य (७) खण्डस्य अधीनं संसद् उपबन्धं न करोति, अथवा यावद् एतत्संविधानस्य प्रारम्भादनन्तरम् एकस्य वर्षस्य समाप्तिः न जायते, यद् अपि एनयोः पूर्वतरं भवति, तावत् उक्तः अनुच्छेदः, तस्य (४), (७) खण्डे च संसदं प्रति निर्देशस्य स्थाने राष्ट्रपतिं प्रति निर्देशः तथा तयोः खण्डयोः संसदा निर्मितं कमपि विधिं प्रति निर्देशस्य स्थाने राष्ट्रपतिना कृतम् आदेशं प्रति निर्देशः क्रियते इति इव प्रभावी भवेत्।

३७४. 'फेडरल' न्यायालयस्य न्यायाधीशानां तथा 'फेडरल' न्यायालये सपरिषदः सम्राजः समक्षं वा लम्बितानां कार्यप्रवृत्तीनां सम्बन्धे उपबन्धाः- (१) एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं "फेडरल' न्यायालये पदस्थाः न्यायाधीशा, यदि तैः अन्यथा वरणं न कृतं चेत्, एतादृशे प्रारम्भे उच्चतमन्यायालयस्य न्यायाधीशाः भवेयुः, तथा तदनन्तरम् एतादृशेषु वेतनेषु, भक्तेषु च, तथा अनुपस्थित्यनुमतेः, निवृत्तिवेतनस्य च विषये तादृशेषु अधिकारेषु तेषां स्वत्वं भवेत् यादृशाः उच्चतमन्यायालयस्य न्यायाधीशानां सम्बन्धे १२५-तमानुच्छेदस्य अधीनम् उपबन्धिताः विद्यन्ते।

(२) एतत्संविधानस्य प्रारम्भे 'फेडरल' न्यायालये लम्बिताः सर्वे व्यवहारवादाः, दाण्डिकवादाः, पुनर्विचारप्रार्थनाः, कार्यप्रवृत्तयश्च उच्चतमन्यायालयं नीताः तिष्ठेयुः तथा तेषां श्रवणस्य, अवधारणस्य च अधिकारिता उच्चतमन्यायालयस्य भवेत् तथा 'फेडरल' न्यायालयेन एतत्संविधानस्य प्रारम्भात् पूर्वम् उदीरितानां, कृतानां वा निर्णयानाम् आदेशानां च बलं प्रभावश्च उच्चतमन्यायालयेन ते उदीरिताः कृताः वा इति इव भवेत्।

(३) एतत् संविधाने किमपि, भारतस्य राज्यक्षेत्रे कस्यापि न्यायालयस्य कस्यापि निर्णयस्य आज्ञप्तेः आदेशस्य वा तद्विषये वा पुनर्विचारप्रार्थनायां याचिकायां वा व्यवस्थां दातुं सपरिषदः सम्राजः अधिकारितायाः प्रयोगं तावत् अमान्यं न कुर्यात् यावत् एतादृश्याः अधिकारितायाः प्रयोगः विधिना प्राधिकृतः वर्तते, तथा एतादृश्यां पुनर्विचारप्रार्थनायां, याचिकायां वा एतत्संविधानस्य प्रारम्भात् अनन्तरं कृतः सपरिषदः सम्राजः कोऽपि आदेशः सर्वेषां प्रयोजनानां कृते, सः उच्चतमन्यायालयेन तस्य अधिकारितायाः प्रयोगे यः एतादृशाय न्यायालयस्य एतत्संविधानेन कृतः विद्यते, कृतः कोऽपि आदेशः, विज्ञप्तिः वा भवेत् इति इव प्रभावी भवेत्।

(४) एतत्संविधानस्य प्रारम्भे प्रारम्भात् अनन्तरं च प्रथमानुसूच्याः (ख) भागे विनिर्दिष्टे कस्मिन् अपि राज्ये अन्तःपरिषदः रूपेण कार्यरतस्य प्राधिकारिणः तद्राज्ये कस्यापि न्यायालयस्य कस्यापि निर्णयस्य, आज्ञप्तेः आदेशस्य वा पुनर्विचारप्रार्थनां, याचिकां वा ग्रहीतुं तद्विषये व्यवस्थां दातुं, वा अधिकारिता समाप्ता भवेत्; तथा च एतादृशस्य प्राधिकारिणः समक्षम् एतादृशे प्रारम्भे लम्बिता सर्वाः पुनर्विचारप्रार्थनाः, अन्याश्च कार्यप्रवृत्तयः उच्चतमन्यायालयाय अन्तरिताः भवेयुः, तेन एव च तद्विषये व्यवस्था दीयेत।

(५) एतदनुच्छेदस्य उपबन्धान् प्रभाविनः कर्तुं संसद् विधिना अन्यम् उपबन्धं निर्मातुं क्षमते।

(भागः २१-अस्थायिनः, सङ्क्रमणकालिकाः, विशेषाश्च उपबन्धाः)

३७५. संविधानस्य उपबन्धानाम् अधीनं न्यायालयानां प्राधिकारिणां च कृत्यकरणे अनुवर्तनम्- भारतस्य राज्यक्षेत्रे सर्वत्र व्यवहारदण्ड-राजस्वाधिकारितां धारयन्तः सर्वे न्यायालयाः तथा सर्वाः न्यायपालिकाः, कार्यपालिकाः साचिविकाश्च प्राधिकारिणः अधिकारिणश्च एतत्संविधानस्य उपबन्धानाम् अधीनं स्वस्य कृत्यानि कुर्वन्तः अनुवर्तेरन्।

३७६. उच्चन्यायालयीयन्यायाधीशानां विषये उपबन्धाः (१) २१७-तमानुच्छेदस्य (२) खण्डे किमपि सत्यपि, एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं प्रान्तस्य उच्चन्यायालयस्य पदस्थाः न्यायाधीशाः, यदि तैः अन्यथा वरणं न कृतं चेत्, एतादृशे प्रारम्भे तत्स्थानिराज्यस्य उच्चन्यायालयस्य न्यायाधीशाः भवेयुः; तथा तदनन्तरम् एतादृशेषु वेतनेषु, भक्तेषु च तथा अनुपस्थित्यनुमतेः, निवृत्तिवेतनस्य च विषये तादृशेषु अधिकारेषु तेषां स्वत्वं भवेत् यादृशाः उच्चन्यायालयस्य न्यायाधीशानां सम्बन्धे २२१-तमानुच्छेदस्य अधीनम् उपबन्धिताः विद्यन्ते। [1][एतादृशः न्यायाधीशः, यदि भारतस्य नागरिकः न स्यात् तथापि, एतादृशस्य उच्चन्यायालयस्य मुख्यन्यायमूर्तिपदे, अथवा कस्यापि अन्यस्य उच्चन्यायालयस्य मुख्यन्यायमूर्तिपदे अथवा अन्यन्यायाधीशस्य पदे नियुक्तेः पात्रं भवेत्।]

(२) एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं प्रथमानुसूच्याः (ख)-भागे विनिर्दिष्टस्य कस्यचित् अपि राज्यस्य स्थानानि कस्मिन् अपि देशीयराज्ये उच्चन्यायालयस्य पदस्थाः न्यायाधीशाः, यदि तैः अन्यथा वरणं न कृतं चेत्, एतादृशे प्रारम्भे तादृशस्य विनिर्दिष्टस्य राज्यस्य उच्चन्यायालयस्य न्यायाधीशाः भवेयुः तथा च २१७-तमानुच्छेदस्य (१) खण्डे, (२) खण्डे च किमपि सत्यपि, किन्तु तस्य अनुच्छेदस्य (१) खण्डस्य पारन्तुकस्य अधीनम्, एतादृशं कालावधिं यावत् पदस्थाः अनुवर्तेरन् यादृशं राष्ट्रपतिः आदेशेन अवधारयितुं क्षमते।

(३) अस्मिन् अनुच्छेदे "न्यायाधीशः" इति शब्दे कार्यकारिन्यायाधीशः अपरन्यायाधीशः वा न अन्तर्भवति।

३७७. भारतस्य नियन्त्रकमहालेखापरीक्षकः विषये उपबन्धाः- एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं पदस्थः भारतस्य महालेखापरीक्षकः, यदि तेन अन्यथा वरणं न कृतं चेत् एतादृशे प्रारम्भे भारतस्य नियन्त्रकमहालेखापरीक्षकः भवेत् तथा तदनन्तरम् एतादृशेषु वेतनेषु तथा अनुपस्थित्यनुमतेः, निवृत्तिवेतनस्य च विषये एतादृशेषु अधिकारेषु तस्य स्वत्वं भवेत् यादृशाः भारतस्य विषये उपबन्धाः नियन्त्रकमहालेखापरीक्षकः सम्बन्धे १४८-तमानुच्छेदस्य (३) खण्डस्य अधीनम् उपबन्धिताः विद्यन्ते तथा स्वस्य तस्य पदावधेः, समाप्तिं यावत् यः एतादृशप्रारम्भात् अन्यवहितपूर्वं तस्य विषये अनुप्रयुक्तानाम् उपबन्धानाम् अधीनम् अवधारितः भवेत् पदधारणं कुर्वन् अनुवर्तेत।

---

1 संविधानस्य (प्रथमं संशोधनम्) अधिनियमः, १९५१ इत्यस्य १३-अनुभागेन अतिरिक्तरूपेण अन्तर्वेशितः।

(भागः २१-अस्थायिनः, सङ्क्रमणकालिकाः, विशेषाश्च उपबन्धाः)

३७८. लोकसेवायोगानां विषये उपबन्धाः- (१) एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं भारताधिनिवेशस्य लोकसेवायोगस्य पदस्थाः सदस्याः, यदि तैः अन्यथा वरणं न कृतं चेत्, एतादृशे प्रारम्भे सङ्घलोकसेवायोगस्य सदस्याः भवेयुः तथा ३१६-तमानुच्छेदस्य (१) खण्डे, (२) खण्डे च किमपि सत्यपि, किन्तु तदनुच्छेदस्य (२) खण्डस्य पारन्तुकस्य अधीनं स्वस्य एतत् पदावधेः समाप्तिं यावत् यः एतादृशप्रारम्भात् अव्यवहितपूर्वम् एतादृशसदस्यानां विषये प्रवर्तनीयनियमानाम् अधीनम् अवधारितः भवेत्, पदधारणं कुर्वन्तः अनुवर्तेरन्।

(२) एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं कस्यापि प्रान्तस्य अथवा प्रान्तानां समूहस्य आवश्यकतानां कृते सेवां कुर्वतः कस्यापि लोकसेवायोगस्य पदस्थाः सदस्याः यदि तैः अन्यथा वरणं न कृतं चेत् यथायथं तत्स्थानीयराज्यस्य लोकसेवायोगस्य सदस्याः अथवा तत्स्थानीयराज्यानाम् आवश्यकतानां कृते सेवां कुर्वतः संयुक्तराज्यसेवायोगस्य सदस्याः भवेयुः तथा ३१६-तमानुच्छेदस्य (१) खण्डे, (२) खण्डे च किमपि सत्यपि, किन्तु तदनुच्छेदस्य (२) खण्डस्य पारन्तुकस्य अधीनं, स्वस्य तत् पदावधेः समाप्तिं यावत् यः एतादृशप्रारम्भात् अव्यवहितपूर्वम् एतादृशसदस्यानां विषये प्रवर्तनीयनियमानाम् अधीनम् अवधारितः भवेत्, पदधारणं कुर्वन्तः अनुवर्तेरन्।

[1][**३७८क. आन्ध्रप्रदेशस्य विधानसभायाः अवधेः विषये विशेषोपबन्धाः-** १७२-तमानुच्छेदे किमपि सत्यपि, आन्ध्रप्रदेशस्य विधानसभाराज्यानां पुनर्घटनम् अधिनियमः, १९५६ आन्ध्रप्रदेशस्य इत्यस्य २८-अनुभागस्य; २९-अनुभागस्य च उपबन्धानाम् अधीनं, यदि सा तत्पूर्वघटिता न भवेत्, उक्ते २९-अनुभागे विनिर्दिष्टे पञ्चानां वर्षाणाम् अवधौ अनुवर्तेत किन्तु न तस्मात् दीर्घतरे कालावधौ; तथा च तादृशस्य अवधेः समाप्तिः तस्याः विधानसभायाः विघटनरूपेण प्रवर्तेत।]

***३७९**-[अन्तर्कालीनसंसत् तथा तस्याः अध्यक्षस्य तथा उपाध्यक्षस्य विषये उपबन्धाः]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

***३८०**-[राष्ट्रपतेः विषये उपबन्धाः]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

***३८१**-[राष्ट्रपतेः मन्त्रिपरिषद्]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

***३८२**-[प्रथमानुसूच्याः क-भागस्य राज्येषु अन्तर्कालीनविधानमण्डलानां विषये उपबन्धाः]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

***३८३**-[राज्यानां राज्यपालानां विषये उपबन्धाः]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २४-अनुभागेन अन्तर्वेशितः।

३८४-*[राज्यपालस्य मन्त्रिपरिषद्]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

३८५-*[प्रथमानुसूच्याः ख-भागस्य राज्येषु अन्तर्कालीनविधानमण्डलानां विषये उपबन्धाः]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

३८६-*[प्रथमानुसूच्याः ख-भागस्य राज्येषु मन्त्रिपरिषद्]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

३८७-*[केषांचित् निर्वाचनपरियोजनानां कृते जनसङ्ख्यायाः निर्धारणविषये उपबन्धाः]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

३८८-*[अन्तर्कालीनसंसत् तथा राज्यानाम् अन्तर्कालीनविधानमण्डलेषु आकस्मिकरक्तीनां विषये विशेषोपबन्धाः]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

३८९-*[डोमियनविधानमण्डलानां तथा राज्यानां तथा देशीयराज्यानां विधानमण्डलेषु लम्बितविधेयकानां विषये उपबन्धाः]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

३९०-*[अस्य संविधानस्य प्रारम्भात् तथा १९५०वर्षस्य मार्चमासस्य ३१-दिनात् मध्ये प्राप्तम् अथवा उत्थापितं तथा व्ययीकृतं धनम्]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

३९१-*[कासुचित् आकस्मिकतासु प्रथमानुसूच्याः तथा चतुर्थ्यनुसूच्याः संशोधनस्य राष्ट्रपतेः शक्तिः]- संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुसूच्या च निरसिताः।*

३९२. दुष्करत्वनिवारणे राष्ट्रपतेः शक्तिः- (१) राष्ट्रपतिः केषामपि दुष्करत्वानां, विशेषतः १९३५ वर्षस्य भारतशासनाधिनियमस्य उपबन्धेभ्यः एतत्संविधानस्य उपबन्धेषु सङ्क्रमणसम्बन्धे निवारणाय आदेशेन निदेष्टुं क्षमते यत् एतत्संविधानं तस्मिन् आदेशे विनिर्दिष्टकालावधौ उपान्तरणरूपेण वा परिवर्धनरूपेण वा लोपरूपेण वा, तादृशानाम् अनुकूलनानाम् अधीनं यादृशानि सः आवश्यकानि समीचीनानि वा मन्येत प्रभावी भवेत्-

परन्तु पञ्चमभागस्य द्वितीयाध्यायाधीनं सम्यग्रूपेण घटितायाः संसदः प्रथमाधिवेशनस्य अनन्तरम् एतादृशः कोऽपि आदेशः न क्रियेत।

(२) (१) खण्डाधीनं कृतः प्रत्येकमादेशः संसदः समक्षं स्थाप्येत।

(३) एतेन अनुच्छेदेन, ३२४-तमानुच्छेदेन, ३६७-तमानुच्छेदस्य तृतीयखण्डेन, ३९१-तमानुच्छेदेन च राष्ट्रपतेः प्रदत्ताः शक्तयः एतत्संविधानस्य प्रारम्भात् पूर्वं भारताधिनिवेशस्य “गवर्नरजनरल” इत्याख्येन प्रयोक्तव्याः भवेयुः।

भागः २२

संक्षिप्तं नाम, प्रारम्भः, [1][हिन्द्यां प्राधिकृतपाठः] निरसनानि च

३९३. संक्षिप्तं नाम- एतत्संविधानं "भारतस्य संविधानम्" इति अभिधीयेत।

३९४. प्रारम्भः एषः अनुच्छेदः तथा ५, ६, ७, ८, ९, ६०, ३२४, ३६६, ३६७, ३७९, ३८०, ३८८, ३९१, ३९२ तथा ३९३ इत्येते अनुच्छेदाः तत्कालं प्रवृत्ताः भवेयुः, तथा एतत्संविधानस्य अवशिष्टाः उपबन्धाः १९५० वर्षस्य जान्युअरीमासस्य २६-तमे दिने प्रवृत्ताः भवेयुः यत् दिनम् अस्मिन् संविधाने एतत्संविधानस्य प्रारम्भरूपेण निर्दिश्यते।

[2]**३९४क. हिन्दीभाषायां प्राधिकृतपाठः-** (१) राष्ट्रपतिः

(क) अस्य संविधानस्य हिन्दीभाषायाः अनुवादं, यत्र संविधानसभायाः सदस्यैः हस्ताक्षरितम्, एतादृशैः उपान्तरणैः सह यत् तं केन्द्रीयाधिनियमानां हिन्दीभाषायां प्राधिकृतपाठेषु स्वीकृतभाषायाः, शैल्याः, शब्दावल्याश्च अनुरूपं निर्मातुम् आवश्यकं भवेत्, तथा एतादृशात् प्रकाशनात् पूर्वं कृतानाम् अस्य संविधानस्य संशोधनानां तस्मिन् संनिवेशेन; तथा

(ख) आङ्ग्लभाषयां कृतं संविधानस्य प्रत्येकं संशोधनेन सह हिन्दीभाषायाः अनुवादं, स्वप्राधिकारेण प्रकाशयेत्।

(२) खण्डः (१) इत्यस्य अधीनं प्रकाशितस्य अस्य संविधानस्य तथा च अस्य प्रत्येकं संशोधितानुवादस्य स एव अर्थः अवगम्येत यः तस्य मूलस्य भवेत्, तथा च एतादृशस्य अनुवादस्य कस्यचित् अपि भागस्य अर्थावगमने क्लेशः जायते चेत् राष्ट्रपतिः तस्य उचितं परिशीलनं कारयेत्।

(३) अस्य संविधानस्य तथा च अस्य प्रत्येकसंशोधनस्य, अस्य अनुच्छेदस्य अधीनः प्रकाशितः अनुवादः, सर्वविधप्रयोजनार्थं, हिन्दीभाषायां प्राधिकृतपाठः मन्येत।

३९५. निरसनानि- भारतस्वाधीनताधिनियमः, १९४७ तथा च भारतशासनाधिनियमः १९३५ स्वस्य संशोधकैः अनुपूरकैः वा सर्वैः अधिनियमनैः सह एतेन निरस्येते किन्तु एषु अधिनियमनेषु 'प्रिविकौंसिल' अधिकारिताविलोपनाधिनियमः, १९४९ नान्तर्भवति।

---

1 संविधानस्य (अष्टपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८७ वर्षस्य (२) अनुभागेन (९-१२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

2 संविधानस्य (अष्टपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८७ वर्षस्य (३) अनुभागेन (९-१२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अनुच्छेदः- ३९४क इति अन्तर्वेशितः।

[1][प्रथमा अनुसूची

[अनुच्छेदौ १ तथा ४]

१- राज्यानि

राज्यानां नामानि	राज्यक्षेत्राणि
१. आन्ध्रप्रदेशराज्यम्	[2][तानि राज्यक्षेत्राणि यानि आन्ध्रराज्याधिनियमः, १९५३ इत्यस्य ३-अनुभागस्य (१) उपानुभागे, राज्यानां पुनर्घटनाधिनियमः, १९५६ इत्यस्य ३-अनुभागस्य (१) उपानुभागे, आन्ध्रप्रदेशस्य मद्रासस्य च (सीमापरिवर्तनम्) अधिनियमः, १९५९ इत्यस्य प्रथमानुसूच्यां, तथा आन्ध्रप्रदेशस्य मैसूरस्य च (राज्यक्षेत्रान्तरणम्) अधिनियमः, १९६८ इत्यस्य अनुसूच्यां च विनिर्दिष्टानि सन्ति; किन्तु तानि क्षेत्राणि एतस्मिन् नान्तर्भवति यानि आन्ध्रप्रदेशस्य मद्रासस्य च (सीमापरिवर्तनम्) अधिनियमः, १९५९ इत्यस्य द्वितीयानुसूच्यां [3][तथा आन्ध्रप्रदेश-पुनर्घटन-अधिनियमः, २०१४ इत्यस्य (३) अनुभागे] विनिर्दिष्टानि सन्ति।
२. असमराज्यम्	तानि राज्यक्षेत्राणि यानि एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वम् असमप्रान्ते, खासीराज्येषु तथा असमजनजातिक्षेत्रेषु समाविष्टानि आसन्, किन्तु तानि राज्यक्षेत्राणि एतस्मिन् नान्तर्भवन्ति यानि असमराज्यस्य (सीमापरिर्वतनम्) अधिनियमः, १९५१ इत्यस्य अनुसूच्यां विनिर्दिष्टानि सन्ति; [4][तथा च यानि नागालैण्डराज्याधिनियमः, १९६२ इत्यस्य ३-अनुभागस्य (१) उपानुभागे विनिर्दिष्टानि सन्ति] [तथा तानि राज्यक्षेत्राणि अपि अस्यान्तर्गते न सन्ति] [5][तथा च पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ इत्यस्य ५-अनुभागे, ६-अनुभागे, ७-अनुभागे च विनिर्दिष्टानि सन्ति। [6][तथा तानि राज्यक्षेत्राणि अपि अस्यान्तर्गते न सन्ति], यत् संविधानस्य (नवमं संशोधनम्) अधिनियमः, १९६० इत्यस्य (३) अनुभागस्य खण्डः (क) इत्यत्र कस्मिन् अपि विषये अन्तर्विष्टे सति, यावत् पर्यन्तं संविधानस्य (शततमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य द्वितीय-अनुसूच्याः भागः १ इत्यत्र निर्दिष्टेभ्यः राज्यक्षेत्रेभ्यः अस्ति,

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २-अनुभागेन प्रथमानुसूच्याः प्रति एषा अनुसूची संनिवेशिता।

2 आन्ध्रप्रदेशस्य मैसूरस्य च (राज्यक्षेत्रान्तरणम्) अधिनियमः, १९६८ (१९६८ वर्षस्य ३६-तमः) इत्यस्य ४-अनुभागेन पूर्ववर्तिन्याः प्रविष्ट्याः प्रति एषा प्रविष्टिः संनिवेशिता (१-१०-१९६८ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 आन्ध्रप्रदेश-पुनर्घटन-अधिनियमः, २०१४ (२०१४ वर्षस्य ६) इत्यस्य (१०) अनुभागेन (२-६-२०१४ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

4 नागालैण्डराज्याधिनियमः,१९६२ (१९७१ वर्षस्य २७-तमः) इत्यस्य ४-अनुभागेन एतत् परिवर्धितं (१-१२-१९६३ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

5 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य, ८१-तमः), इत्यस्य ९-अनुभागेन एतत् परिवर्धितम् (२१-१ -१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

6 संविधानस्य (शततमं संशोधनम्) अधिनियमः, २०१५ वर्षस्य (३) अनुभागेन (३१-७-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितः। उक्त-अधिनियमस्य पाठाय परिशिष्टं १ द्रष्टव्यम्।

[1](प्रथमा अनुसूची)

राज्यानां नामानि	राज्यक्षेत्राणि
	संविधानस्य (शततमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य द्वितीय-अनुसूच्याः भागः १ इत्यत्र निर्दिष्टानि सन्ति ।]
३. बिहारराज्यम्	[1][तानि राज्यक्षेत्राणि यानि एतत्संविधानस्य प्रारम्भात् व्यवहितपूर्वं बिहारप्रान्ते समाविष्टानि आसन्, अथवा यानि तत्प्रान्तस्य भागाः इव इति प्रशासितानि आसन्, तथा च तानि राज्यक्षेत्राणि यानि बिहारस्य, उत्तरप्रदेशस्य च (सीमापरिवर्तनम्) अधिनियमः, १९६८ इत्यस्य ३-अनुभागस्य (१) उपानुभागस्य (क) खण्डे विनिर्दिष्टानि सन्ति; किन्तु एतस्मिन् नान्तर्भवन्ति तानि राज्यक्षेत्राणि यानि बिहारस्य पश्चिमबङ्गालस्य च (राज्यक्षेत्रान्तरणम्) अधिनियमः, १९५६ इत्यस्य, ३-अनुभागस्य (१) उपानुभागस्य (ख) खण्डे विनिर्दिष्टानि सन्ति, तथा च यानि बिहारस्य उत्तरप्रदेशस्य च (सीमापरिवर्तनम्) अधिनियमः, १९६८ इत्यस्य ३-अनुभागस्य (१) उपानुभागे विनिर्दिष्टानि सन्ति। [2][तथा तानि राज्यक्षेत्राणि यत् बिहार-पुनर्घटन-अधिनियमः, २००० इत्यस्य (३) अनुभागे विनिर्दिष्टानि सन्ति ।]
[3][**४. गुजरातराज्यम्**	तानि राज्यक्षेत्राणि यानि मुम्बई-पुनर्घटनाधिनियमः, १९६० इत्यस्य- ३-अनुभागस्य (१) उपानुभागे निर्दिष्टानि सन्ति ।]
५. केरलराज्यम्	तानि राज्यक्षेत्राणि यानि राज्यानां पुनर्घटनाधिनियमः, १९५६ इत्यस्य ५-अनुभागस्य (१) उपानुभागे विनिर्दिष्टानि सन्ति ।
६. मध्यप्रदेशराज्यम्	तानि राज्यक्षेत्राणि यानि राज्यानां पुनर्घटनाधिनियमः, १९५६ इत्यस्य ९-अनुभागस्य (१) उपानुभागे [4][तथा च राजस्थानस्य मध्यप्रदेशस्य च; (राज्यक्षेत्रान्तरणम्) अधिनियमः, १९५९ इत्यस्य प्रथमानुसूच्यां] विनिर्दिष्टानि सन्ति। [5][किन्तु अस्यान्तर्गते मध्यप्रदेश-पुनर्घटन-अधिनियमः, २००० इत्यस्य (३) अनुभागेन विनिर्दिष्टानि राज्यक्षेत्राणि न सन्ति ।]

1 बिहारस्य उत्तरप्रदेशस्य च (सीमापरिवर्तनम्) अधिनियमः, १९६८ (१९६८ वर्षस्य २४-तमः) इत्यस्य ४-अनुभागेन पूर्ववर्तिन्याः प्रविष्ट्याः प्रति एषा संनिवेशिता (१०-६-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 बिहार-पुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य ३०) ५-अनुभागेन (१५-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितः।

3 मुम्बई-पुनर्घटनम् अधिनियमः, १९६० (१९६०वर्षस्य ११-तमः) इत्यस्य ४-अनुभागेन ४-प्रविष्ट्याः प्रति एषा संनिवेशिता (१-५-१९६० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 राजस्थानस्य मध्यप्रदेशस्य च (राज्यक्षेत्रान्तरणम्) अधिनियमः, १९५९ (१९५९-वर्षस्य ४७-तमः) इत्यस्य ४-अनुभागेन एतत् अन्तर्वेशितम् (१-१०-१९५९ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

5 मध्यप्रदेश-पुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य २८) ५-अनुभागेन (१-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितः।

(प्रथमा अनुसूची)

राज्यानां नामानि	राज्यक्षेत्राणि
[1][७. तमिलनाडुराज्यम्]	तानि राज्यक्षेत्राणि यानि संविधानस्य प्रारम्भात् अव्यवहितपूर्वं मद्रासप्रान्ते समाविष्टानि आसन्, अथवा यानि तत्प्रान्तस्य भागाः इव इति प्रशासितानि आसन्, तथा च राज्यानां पुनर्घटनाधिनियमः, १९५६ इत्यस्य ४-अनुभागे [2][तथा च आन्ध्रप्रदेशस्य मद्रासस्य च (सीमापरिवर्तनम्) अधिनियमः, १९५९ इत्यस्य द्वितीयानुसूच्यां] विनिर्दिष्टानि सन्ति; किन्तु एतस्मिन् नान्तर्भवन्ति तानि राज्यक्षेत्राणि यानि आन्ध्रराज्याधिनियमः, १९५३ इत्यस्य ३-अनुभागस्य (१) उपानुभागे, ४-अनुभागस्य च (१) उपानुभागे विनिर्दिष्टानि सन्ति, तथा च [3][यानि राज्यानां पुनर्घटनाधिनियमः, १९५६ इत्यस्य ५-अनुभागस्य (१) उपानुभागस्य (ख) खण्डे, ६-अनुभागे, तथा ७-अनुभागस्य (१) उपानुभागस्य (घ) खण्डे च विनिर्दिष्टानि सन्ति, अपरं च यानि आन्ध्रप्रदेशस्य मद्रासस्य च (सीमापरिवर्तनम्) अधिनियमः, १९५९ इत्यस्य प्रथमानुसूच्यां विनिर्दिष्टानि सन्ति ।]
[4][८. महाराष्ट्रराज्यम्	तानिः राज्यक्षेत्राणि यानि राज्यानां पुनर्घटनाधिनियमः, १९५६ इत्यस्य ८-अनुभागस्य (१) उपानुभागे विनिर्दिष्टानि सन्ति, किन्तु एतस्मिन् नान्तर्भवन्ति तानि राज्यक्षेत्राणि यानि मुम्बई-पुनर्घटनाधिनियमः, १९६० इत्यस्य ३-अनुभागस्य, (१) उपानुभागे निर्दिष्टानि सन्ति ।]
[5][[6][९.] कर्णाटकराज्यम्]	तानि राज्यक्षेत्राणि यानि राज्यानां पुनर्घटनाधिनियमः, १९५६ इत्यस्य ७-अनुभागस्य (१) उपानुभागे विनिर्दिष्टानि सन्ति; [7][किन्तु एतस्मिन् नान्तर्भवन्ति तानि राज्यक्षेत्राणि यानि आन्ध्रप्रदेशस्य मैसूरस्य च

---

1 मद्रासराज्यस्य (नामपरिवर्तनम्) अधिनियमः, १९६८ (१९६८ वर्षस्य ५३-तमः) इत्यस्य ५-अनुभागेन “मद्रास” इत्येतस्मात् प्रति एतत् संनिवेशितम् (१४-१-१९६९ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

2 आन्ध्रप्रदेशस्य मद्रासस्य च (सीमापरिवर्तनम्) अधिनियमः, १९५९ (१९५९ वर्षस्य ५६-तमः) इत्यस्य ६-अनुभागेन एतत् अन्तर्वेशितम् (१-४-१९६० दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

3 आन्ध्रप्रदेशस्य मद्रासस्य च (सीमापरिवर्तनम्) अधिनियम, १९५९ (१९५९ वर्षस्य ५६-तमः) इत्यस्य ६-अनुभागेन कतिपयेभ्यः शब्देभ्यः प्रति एतत् संनिवेशितम् (१-४-१९६० दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

4 मुम्बई-पुनर्घटनम् अधिनियमः; १९६० (१९६० वर्षस्य ११-तमः) इत्यस्य ४-अनुभागेन एषा प्रविष्टिः अन्तर्वेशिता (१-५-१९६० दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

5 मैसूरराज्यस्य (नामपरिवर्तनम्) अधिनियमः, १९७३ (१९७३ वर्षस्य ३१-तमः) इत्यस्य ५-अनुभागेन “९ मैसूर” इत्येतस्मात् प्रति एतत् संनिवेशितम् (१-११-१९७३ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

6 मुम्बई-पुनर्घटनम् अधिनियमः, १९६० (१९६० वर्षस्य ११ तमः) इत्यस्य ४-अनुभागेन ८ तः १४-यावत् प्रविष्टयः ९ तः १५ यावत् इति क्रमाङ्किताः ।

7 आन्ध्रप्रदेशस्य मैसूरस्य च (राज्यक्षेत्रान्तरणम्) अधिनियमः, १९६८ (१९६८ वर्षस्य ३६-तमः) इत्यस्य ४-अनुभागेन एतत् अन्तर्वेशितम् (१-१०-१९६८ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

[1](प्रथमा अनुसूची)

राज्यानां नामानि	राज्यक्षेत्राणि
	(राज्यक्षेत्रान्तरणम्) अधिनियमः, १९६८ इत्यस्य अनुसूच्यां विनिर्दिष्टानि सन्ति ।]
[1][[१०.] [2][ओडिशाराज्यम्]	तानि राज्यक्षेत्राणि यानि एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वम् ओडिशाप्रान्ते समाविष्टानि आसन् अथवा यानि तत्प्रान्तस्य भागाः इव इति प्रशासितानि आसन् ।
[1][११.] पञ्जाबराज्यम्	तानि राज्यक्षेत्राणि यानि राज्यानां पुनर्घटनाधिनियमः, १९५६ इत्यस्य ११-अनुभागे विनिर्दिष्टानि सन्ति, [3][तथा च यानि अर्जितराज्यक्षेत्राणां (विलयनम्) अधिनियमः, १९६० इत्यस्य प्रथमानुसूच्याः २-भागे निर्दिष्टानि सन्ति;] [4][किन्तु एतस्मिन् नान्तर्भवन्ति तानि राज्यक्षेत्राणि यानि संविधानस्य (नवमं संशोधनम्) अधिनियमः, १९६० इत्यस्य प्रथमानुसूच्याः २-भागे निर्दिष्टानि सन्ति;] [5][तथा च यानि पञ्जाब-पुनर्घटनम् अधिनियमः, १९६६ इत्यस्य ३-अनुभागस्य (१) उपानुभागे ४-अनुभागे तथा ५-अनुभागस्य (१) उपानुभागे विनिर्दिष्टानि सन्ति ।]
[1][१२.] राजस्थानराज्यम्	तानि राज्यक्षेत्राणि यानि राज्यानां पुनर्घटनाधिनियमः, १९५६ इत्यस्य १०-अनुभागे विनिर्दिष्टानि सन्ति; [6][किन्तु एतस्मिन् नान्तर्भवन्ति तानि राज्यक्षेत्राणि यानि राजस्थानस्य मध्यप्रदेशस्य च (राज्यक्षेत्रान्तरणम्) अधिनियमः, १९५९ इत्यस्य प्रथमानुसूच्यां विनिर्दिष्टानि सन्ति ।]

1 मुम्बई-पुनर्घटनम् अधिनियमः, १९६० (१९६० वर्षस्य ११ तमः) इत्यस्य ४-अनुभागेन ८ तः १४-यावत् प्रविष्टयः ९ तः १५ यावत् इति क्रमाङ्किताः ।

2 उडीसा (नामपरिवर्तनम्) अधिनियमः, २०११ वर्षस्य ६-अनुभागेन (१-११-२०११ दिनाङ्कात् प्रवर्तमानप्रभावेण) “उडीसा” इत्यस्य स्थाने संनिवेशितः ।

3 अर्जितराज्यक्षेत्राणां (विलयनम्) अधिनियमः, १९६० (१९६० वर्षस्य ६४-तमः) इत्यस्य ४-अनुभागेन, एतत् अन्तर्वेशितम् (१७-१-१९६१ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

4 संविधानस्य (नवमं संशोधनम्) अधिनियमः, १९६० इत्यस्य ३-अनुभागेन एतत् परिवर्धितम् (१७-१-१९६१, दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

5 पञ्जाब-पुनर्घटनम् अधिनियमः, १९६६ (१९६६ वर्षस्य ३१-तमः) इत्यस्य ७-अनुभागेन एतत् अन्तर्वेशितम् (१-११-१९६६ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

6 राजस्थानस्य मध्यप्रदेशस्य च (राज्यक्षेत्रान्तरणम्) अधिनियमः, १९५९ (१९५९ वर्षस्य ४७-तमः) इत्यस्य ४-अनुभागेन एतत् अन्तर्वेशितम् (१-१०-१९५९ दिनाङ्कात् प्रवर्तमानप्रभावेण)

(प्रथमा अनुसूची)

राज्यानां नामानि	राज्यक्षेत्राणि
[1][१३.] उत्तरप्रदेशराज्यम्	[2][तानि राज्यक्षेत्राणि यानि एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं संयुक्तप्रान्तः इतिः नाम्ना ज्ञाते प्रान्ते समाविष्टानि आसन् अथवा तत्प्रान्तस्य भागाः इव, इति प्रशासितानि आसन्; तानि राज्यक्षेत्राणि यानि बिहारस्य उत्तरप्रदेशस्य च (सीमापरिवर्तनम्) अधिनियमः,१९६८ इत्यस्य ४-अनुभागस्य (१) उपानुभागस्य (ख) खण्डे विनिर्दिष्टानि सन्ति; तथा तानि राज्यक्षेत्राणि यानि हरियाणोत्तरप्रदेशयोः (सीमापरिवर्तनम्) अधिनियमः, १९७९ इत्यस्य ४-अनुभागस्य (१) उपानुभागस्य (ख) खण्डे विनिर्दिष्टानि सन्ति; किन्तु एतस्मिन् नान्तर्भवन्ति तानि राज्यक्षेत्राणि यानि बिहारस्य उत्तरप्रदेशस्य च (सीमा-परिवर्तनम्) अधिनियमः, १९६८ इत्यस्य ३ अनुभागस्य (१) उपानुभागस्य (क) खण्डे विनिर्दिष्टानि सन्ति, तथा च तानि अपि राज्यक्षेत्राणि यानि हरियाणोत्तरप्रदेशयोः (सीमापरिवर्तनम्) अधिनियमः, १९७९ इत्यस्य ४-अनुभागस्य (१) उपानुभागस्य (क) खण्डे विनिर्दिष्टानि सन्ति। [3][तथा उत्तरप्रदेश-पुनर्घटन-अधिनियमः, २००० इत्यस्य (३) अनुभागेन] इत्यत्र विनिर्दिष्टानि सन्ति तथा तानि राज्यक्षेत्राणि अपि अस्यान्तर्गते न सन्ति, यानि हरियाणा तथा उत्तरप्रदेश-अधिनियमः, १९७९ इत्यस्य (४) अनुभागस्य उपखण्डः १ इत्यस्य खण्डः (क) इत्यत्र विनिर्दिष्टानि सन्ति ।]
[1][१४.] पश्चिमबङ्गालराज्यम्	तानि राज्यक्षेत्राणि यानि एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं पश्चिमबङ्गालप्रान्ते समाविष्टानि आसन् अथवा यानि तत्प्रान्तस्य भागाः इव इति प्रशासितानि आसन्, तथा चन्द्रनगरस्य (विलयनम्) अधिनियमः, १९५४ इत्यस्य २-अनुभागस्य (ग) खण्डे यथापरिभाषितचन्द्रनगरस्य राज्यक्षेत्रं, तथा च तानि राज्यक्षेत्राणि यानि बिहारस्य पश्चिमबङ्गालस्य च (राज्यक्षेत्रान्तरणम्) अधिनियमः, १९५६ इत्यस्य ३-अनुभागस्य (१) उपानुभागे विनिर्दिष्टानि सन्ति। [4][तथा तानि राज्यक्षेत्राणि यानि प्रथमानुसूच्याः भागः (३) इत्यस्मिन् निर्दिष्टानि किन्तु तानि राज्यक्षेत्राणि अस्यान्तर्गते न सन्ति], यत् संविधानस्य (नवमं संशोधनम्) अधिनियमः, १९६० इत्यस्य (३) अनुभागस्य खण्डः (ग) इत्यत्र अन्तर्विष्टे कस्मिन् अपि विषये सति, यावत् पर्यन्तं यस्य सम्बन्धः संविधानस्य (शततमं

1 मुम्बई-पुनर्घटन-अधिनियमः, १९६० (१९६० वर्षस्य ११ तमः) इत्यस्य ४-अनुभागेन ८ तः १४-यावत् प्रविष्टयः ९ तः १५ यावत् इति क्रमाङ्किताः।

2 हरियाणोत्तरप्रदेशयोः (सीमापरिवर्तनम्) अधिनियमः, १९७९ (१९७९ वर्षस्य ३१-तमः) इत्यस्य ५क-अनुभागेन पूर्ववर्तिन्याः प्रविष्ट्याः प्रति एषा प्रविष्टिः संनिवेशिताः (१५-९-१९८३ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 उत्तरप्रदेश-पुनर्घटनम् अधिनियमः, २००० (२००० वर्षस्य २९) इत्यस्य ५-अनुभागेन (९-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

4 संविधानस्य (शततमं संशोधनम्) अधिनियमः, २०१५ वर्षस्य ३-अनुभागेन (३१-७-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितः। उक्त-अधिनियमस्य पाठाय परिशिष्टं १ द्रष्टव्यम्।

[1](प्रथमा अनुसूची)

राज्यानां नामानि	राज्यक्षेत्राणि
	संशोधनम्) अधिनियमः, २०१५ इत्यस्य प्रथम-अनुसूच्याः भागः ३ इत्यत्र निर्दिष्टेभ्यः राज्यक्षेत्रेभ्यः तथा द्वितीय-अनुसूच्याः भागः ३ इत्यत्र निर्दिष्टेभ्यः राज्यक्षेत्रेभ्यः अस्ति, संविधानस्य (शततमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य द्वितीय-अनुसूच्याः भागः १ इत्यत्र निर्दिष्टानि सन्ति ।]
[1][[2][**	* * *]]
[3][[4][१५.] **नागालैण्डराज्यम्**	तानि राज्यक्षेत्राणि यानि नागालैण्डराज्याधिनियमः, १९६२ इत्यस्य २-अनुभागस्य (१) उपानुभागे विनिर्दिष्टानि सन्ति ।]
[3][[5][१६.] **हरियाणाराज्यम्**	[6][तानि राज्यक्षेत्राणि यानि पञ्जाबपुनर्घटनम् अधिनियमः, १९६६ इत्यस्य ३-अनुभागस्य (१) उपानुभागे विनिर्दिष्टानि सन्ति, तथा च यानि हरियाणोत्तरप्रदेशयोः (सीमापरिवर्तनम्) अधिनियमः, १९७९ इत्यस्य ४-अनुभागस्य (१) उपानुभागस्य (क) खण्डे विनिर्दिष्टानि सन्ति; किन्तु एतस्मिन् नान्तर्भवन्ति तानि राज्यक्षेत्राणि यानि एतदधिनियमस्य ४ अनुभागस्य (१) उपानुभागस्य (ख) खण्डे विनिर्दिष्टानि सन्ति ।]
[3][[7][१७.] **हिमाचलप्रदेशराज्यम्**	ते राज्यक्षेत्रे ये एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं हिमाचलप्रदेशः इति नामकः, 'बिलासपुरम्' इति नामकश्च मुख्यायुक्तयोः इव इति प्रशासिते आस्तां तथा तानि राज्यक्षेत्राणि यानि पञ्जाबपुनर्घटनम् अधिनियमः, १९६६ इत्यस्य ६-अनुभागस्य (१) उपानुभागे विनिर्दिष्टानि सन्ति ।]
[3][[8][१८.] **मणिपुरराज्यम्**	तद्राज्यक्षेत्रं यत् एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं मणिपुरनामकः मुख्यायुक्तस्य प्रान्तः इव इति प्रशासितम् आसीत् ।]

---

1 **जम्मू-कश्मीरपुनर्घटन-अधिनियमः, २०१९ (२०१९ वर्षस्य ३४) इत्यस्य ६-अनुभागेन (३१-१०-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) जम्मू-कश्मीरेण सम्बन्धितः प्रविष्टिः १५ इत्येता लोपित ।

2 मुम्बई-पुनर्घटनम् अधिनियमः, १९६० (१९६० वर्षस्य ११ तमः) इत्यस्य ४-अनुभागेन ८ तः १४-यावत् प्रविष्टयः ९ तः १५ यावत् इति क्रमाङ्किताः ।

3 जम्मू-कश्मीर-पुनर्घटन-अधिनियमः,२०१९ (२०१९ वर्षस्य ३४) इत्यस्य ६-अनुभागेन (३१-१०-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेणः) प्रविष्टेः १६ प्रविष्टिं २९ प्रविष्टेः १५ प्रविष्टिं २८ इति रूपेण पुनः सङ्ख्यायिता ।

4 नागालैण्डराज्याधिनियमः,१९६२ (१९६२ वर्षस्य २७-तमः) इत्यस्य ४-अनुभागेन एषा प्रविष्टिः अन्तर्वेशिता (१-१२-१९६३ दिनाङ्कात् प्रवर्तमानप्रभावेण)

5 पञ्जाब-पुनर्घटनम् अधिनियमः, १९६६ (१९६६ वर्षस्य ३१-तमः) इत्यस्य ७-अनुभागेन एषा प्रविष्टिः अन्तर्वेशिता (१-११-१९६६ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

6 हरियाणोत्तरप्रदेशयोः (सीमापरिवर्तनम्) अधिनियमः, १९७९ (१९७९ वर्षस्य ३१-तमः इत्यस्य ५ (ख) अनुभागेन पूर्ववर्तिन्याः प्रविष्ट्याः प्रति एषा प्रविष्टिः संनिवेशिता (१५-९-१९८३ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

7 हिमाचलप्रदेशराज्याधिनियमः १९७० (१९७० वर्षस्य ५३-तमः) इत्यस्य ४-अनुभागेन एषा प्रविष्टिः अन्तर्वेशिता (२५-१-१९७१ दिनाङ्कात् प्रवर्तमानप्रभावेण)

8 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ९-अनुभागेन एताः प्रविष्टयः अन्तर्वेशिताः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

(प्रथमा अनुसूची)

राज्यानां नामानि	राज्यक्षेत्राणि
[1][१९. त्रिपुराराज्यम्	तद्राज्यक्षेत्रं यत् एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं त्रिपुरानामकः मुख्यायुक्तस्य प्रान्तः इव इति प्रशासितम् आसीत्। [2][तथा तानि राज्यक्षेत्राणि], यत् संविधानस्य (नवमं संशोधनम्) अधिनियमः, १९६० इत्यस्य (३) अनुभागस्य खण्डः (क) इत्यत्र अन्तर्विष्टे कस्मिन् अपि विषये सति, यावत् पर्यन्तं येषां सम्बन्धः संविधानस्य (शततमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य प्रथम-अनुसूच्याः भागः २ इत्यत्र निर्दिष्टेभ्यः राज्यक्षेत्रेभ्यः अस्ति, संविधानस्य (शततमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य प्रथम-अनुसूच्याः भागः २ इत्यत्र निर्दिष्टानि सन्ति ।]
[1][२०. मेघालयराज्यम्	तद्राज्यक्षेत्रं यत् पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ इत्यस्य ५-अनुभागे विनिर्दिष्टम् अस्ति। [2][तथा तानि राज्यक्षेत्राणि, यानिप्रथम-अनुसूच्याः भागः १ इत्यत्र विनिर्दिष्टानि सन्ति, किन्तु तानि राज्यक्षेत्राणि अस्यान्तर्गते न सन्ति, संविधानस्य (शततमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य द्वितीय-अनुसूच्याः भागः २ इत्यत्र निर्दिष्टानि सन्ति ।]
[1][[3][२१.]सिक्किमराज्यम्	तद्राज्यक्षेत्रं यत् संविधानस्य (षड्विंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य प्रारम्भात् अव्यवहितपूर्वं सिक्किमे समाविष्टम् आसीत् ।]
[1][[4][२२.] मिजोरमः-	तानि राज्यक्षेत्राणि यानि पूर्वोत्तरक्षेत्र-(पुनर्घटन-)अधिनियमः, १९७१ इत्यस्य (६) अनुभागे विनिर्दिष्टानि सन्ति ।]
[1][[5]२३.] अरुणाचल-प्रदेशः	तानि राज्यक्षेत्राणि यानि पूर्वोत्तरक्षेत्र-(पुनर्घटन-)अधिनियमः, १९७१ इत्यस्य (७) अनुभागे विनिर्दिष्टानि सन्ति ।
[1][[6][२४.] गोवा	तानि राज्यक्षेत्राणि यानि गोवा, दमणः तथा दीवः-पुनर्घटन-अधिनियमः, १९८७ इत्यस्य (३) अनुभागे विनिर्दिष्टानि सन्ति ।

---

1 जम्मू-कश्मीर-पुनर्घटन-अधिनियमः, २०१९ (२०१९ वर्षस्य ३४) इत्यस्य ६-अनुभागेन (३१-१०-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टेः १६ प्रविष्टिं २९ प्रविष्टेः १५ प्रविष्टिं २८ इति रूपेण पुनः सङ्ख्यायिता ।

2 संविधानस्य (शततमं संशोधनम्) अधिनियमः, २०१५ वर्षस्य ३-अनुभागेन (३१-७-२०१५ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितः । उक्त-अधिनियमस्य पाठाय परिशिष्टम् १ द्रष्टव्यम् ।

3 संविधानस्य (षड्विंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य २-अनुभागेन एषा प्रविष्टिः अन्तर्वेशिता (२६-४-१९७५ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

4 मिजोरमराज्याधिनियमः, १९८६ (१९८६ वर्षस्य ३४ तमः) इत्यस्य ४-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः ।

5 अरुणाचलप्रदेश-राज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ६९) इत्यस्य ४-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः ।

6 गोवा, दमणः तथा दीवः-पुनर्घटन-अधिनियमः, १९८७ (१९८७ वर्षस्य १८) इत्यस्य ५-अनुभागेन (३०-५-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः ।

भारतस्य संविधानम्

[1](प्रथमा अनुसूची)

राज्यानां नामानि	राज्यक्षेत्राणि
[1][[2][२५.] छत्तीसगढ़ः	मध्यप्रदेश-पुनर्घटन-अधिनियमः, २००० इत्यस्य (३) अनुभागे विनिर्दिष्टानि सन्ति ।]
[1][[3][२६.] [4][उत्तराखण्डः]	तानि राज्यक्षेत्राणि यानि उत्तरप्रदेश-पुनर्घटन-अधिनियमः, २००० इत्यस्य (३) अनुभागे विनिर्दिष्टानि सन्ति ।]
[1][[5][२७.] झारखण्डः	तानि राज्यक्षेत्राणि यानि बिहार-पुनर्घटन-अधिनियमः, २००० इत्यस्य (३) अनुभागे विनिर्दिष्टानि सन्ति ।]
[1][[6][२८.] तेलंगाना	तानि राज्यक्षेत्राणि यानि आन्ध्रप्रदेश-पुनर्घटन-अधिनियमः, २०१४ इत्यस्य (३) अनुभागे विनिर्दिष्टानि सन्ति ।]

२. सङ्घराज्यक्षेत्राणि

नामानि	विस्तारः
१. दिल्लीक्षेत्रम्	तद्राज्यक्षेत्रं यत् एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं दिल्लीनाम्नि मुख्यायुक्तस्य प्रान्ते समाविष्टम् आसीत् ।
[7][*	* * *]
[8][२] **अण्डमाननिकोबारद्वीपक्षेत्रम्**	तद्राज्यक्षेत्रं यत् एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वम् अण्डमाननिकोबारद्वीपयोः मुख्यायुक्तस्य प्रान्ते समाविष्टम् आसीत् ।

---

1 जम्मू-कश्मीर-पुनर्घटन-अधिनियमः,२०१९ (२०१९ वर्षस्य ३४) इत्यस्य ६-अनुभागेन (३१-१०-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टेः १६ प्रविष्टिं २९ प्रविष्टेः १५ प्रविष्टिं २८ इति रूपेण पुनः सङ्ख्यायिता ।

2 मध्यप्रदेश-पुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य २८) इत्यस्य ५-अनुभागेन (१-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः ।

3 उत्तरप्रदेश-पुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य २९) इत्यस्य ५-अनुभागेन (९-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः ।

4 उत्तराञ्चल-(नामपरिवर्तनम्)-अधिनियमः, २००६ (२००६ वर्षस्य ५२) इत्यस्य ४-अनुभागेन (१-१-२००७ दिनाङ्कात् प्रवर्तमानप्रभावेण) “उत्तराञ्चल” शब्दस्य स्थाने संनिवेशितः ।

5 बिहार-पुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य ३०) इत्यस्य ५-अनुभागेन (१५-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः ।

6 आन्ध्रप्रदेश-पुनर्घटन-अधिनियमः, २०१४ (२०१४ वर्षस्य ६) इत्यस्य १०-अनुभागेन (२-६-२०१४ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः ।

7 हिमाचलप्रदेशराज्याधिनियमः, १९७० (१९७० वर्षस्य ५३-तमः) इत्यस्य ४-अनुभागेन हिमाचलप्रदेशसम्बन्धिनी २-प्रविष्टिः लोपिता (२५-१-१९७१ दिनाङ्कात् प्रवर्तमानप्रभावेण) । तथा च प्रविष्टयः ३तः १०पर्यन्तं प्रविष्टयः २तः ९ इति रूपेण पुनः सङ्ख्यायिता । पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ९-अनुभागेन मणिपुरसम्बन्धिनी, त्रिपुरासम्बन्धिनी च २ अथ च ३ प्रविष्टी लोपिते (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

8 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ९-अनुभागेन प्रविष्टयः ४तः ९पर्यन्तं प्रविष्टयः २तः ७ इति रूपेण पुनः सङ्ख्यायिता ।

राज्यानां नामानि	राज्यक्षेत्राणि
[1][३][2][लक्षद्वीपक्षेत्रम्]	तद्राज्यक्षेत्रं यत् राज्यानां पुनर्घटनस्य अधिनियमः, १९५६ इत्यस्य ६-अनुभागे विनिर्दिष्टम् अस्ति।
[3][[1][४.] दादरा तथा नगर-हवेली तथा दमणः तथा दीवः-	तानि राज्यक्षेत्राणि यानि १९६१-वर्षस्य अगस्तमासस्य ११-दिनात् सद्यः पूर्वं स्वतन्त्रः दादरा तथा नागर-हवेली इत्यत्र समाविष्टानि तथा तानि राज्यक्षेत्राणि यानि गोवा, दमणः तथा दीव-पुनर्घटन-अधिनियमः १९८७ इत्यस्य (४) अनुभागे विनिर्दिष्टानि सन्ति।]
[4][[1] [*] [3][	* * *]
[5][[1][[6]६.] [पुडुचेरी]	**[**तानि राज्यक्षेत्राणि यानि १९६२ वर्षस्य अगस्तमासस्य १६-तमदिनाङ्कात् अव्यवहितपूर्वं भारते पाण्डिचेरि-कारिकल-माही-यनम-नामसु फ्रांसीय वसतिषु समाविष्टानि आसन्।]
[7][[1][७] चण्डीगढक्षेत्रम्	तानि राज्यक्षेत्राणि यानि पञ्जाब-पुनर्घटनम् अधिनियमः, १९६६ इत्यस्य ४-अनुभागे विनिर्दिष्टानि सन्ति।]

---

1 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ९-अनुभागेन प्रविष्टयः ४तः ९पर्यन्तं प्रविष्टयः २तः ७ इति रूपेण पुनः सङ्ख्यायिता।

2 लक्षद्वीप-मिनिकोइ-अमीनदीवि-द्वीपानां (नामपरिवर्तनम्) अधिनियमः, १९७३ (१९७३ वर्षस्य ३४-तमः) इत्यस्य ५-अनुभागेन "लक्षद्वीप-मिनिकोई-अमीनदीवि-द्वीपक्षेत्रम्" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

3 दादरा तथा नागरा हवेली तथा दमणः तथा दीवः, (सङ्घराज्यक्षेत्राणां विलयनम्) अधिनियमः, २०१९ (२०१९ वर्षस्य ४४) इत्यस्य ५-अनुभागेन (१९-१२-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टेः ४ तथा प्रविष्टेः ५ इति स्थाने संनिवेशितः। संविधानस्य (दशमं संशोधनम्) अधिनियमः, १९६१ वर्षस्य २-अनुभागेन (११-०८-१९६१ दिनाङ्कात् प्रवर्तमानप्रभावेण) दादरा तथा नगर हवेली इत्यनया सम्बन्धिता प्रविष्टिः ४ अन्तर्वेशिता।

4 गोवा, दमणः तथा दीवः-पुनर्घटन-अधिनियमः, १९८७ (१९८७ वर्षस्य १८) इत्यस्य ५-अनुभागेन (३०-५-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टिः ५ इत्यस्याः स्थाने संनिवेशितः।

5 संविधानस्य (चतुर्दशं संशोधनम्) अधिनियमः, १९६२ इत्यस्य , ३-अनुभागेन भूतलक्षिप्रभावेण अन्तर्वेशितः।

6 पाण्डिचेरी-(नामपरिवर्तनम्)-अधिनियमः, २००६ (२००६ वर्षस्य ४४) इत्यस्य ५-अनुभागेन (१-१०-२००६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "पांडिचेरी" शब्दस्य स्थाने संनिवेशितः।

7 पञ्जाब-पुनर्घटनम् अधिनियमः, १९६६ (१९९६ वर्षस्य ३१-तमः) इत्यस्य ७-अनुभागेन अन्तर्वेशितम् (१-११-१९६६ दिनाङ्कात् प्रवर्तमानप्रभावेण)। ।

[1](प्रथमा अनुसूची)

[1][* * * *]

[1][* * * *]

[2][८.] जम्मू-कश्मीरः	तानि राज्यक्षेत्राणि यानि जम्मू-कश्मीर-पुनर्घटन-अधिनियमः, २०१९ इत्यस्य (४) अनुभागे विनिर्दिष्टानि सन्ति।
९. लद्दाखः	तानि राज्यक्षेत्राणि यानि जम्मू-कश्मीर-पुनर्घटन-अधिनियमः, २०१९ इत्यस्य (४) अनुभागे विनिर्दिष्टानि सन्ति।]

1 मिजोरमराज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ३४) इत्यस्य ४-अनुभागेन (१५-४-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) मिजोरम-सम्बन्धि-प्रविष्टिः ८ इति लोपिता तथा अरुणाचलप्रदेशसम्बन्धि-प्रविष्टिः ९ इतीमं प्रविष्टिः ८ इति रूपेण पुनर्सङ्ख्याङ्किता तथा अरुणाचलप्रदेश-सम्बन्धि-प्रविष्टिः ८ इति अरुणाचलप्रदेश-अधिनियमः, (१९६८ वर्षस्य) ४-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) लोपिता।

2 जम्मू-कश्मीर-पुनर्घटन-अधिनियमः, २०१९ (२०१९ वर्षस्य ३४) इत्यस्य ६-अनुभागेन (३१-१०-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

द्वितीया अनुसूची

[अनुच्छेदाः- ५९ (३), ६५ (३), ७५ (६), ९७, १२५, १४८ (३), १५८ (३), १६४ (५), १८६ तथा २२१]

क-भागः

राष्ट्रपतेः तथा [1][* * *] राज्यानां राज्यपालानां कृते उपबन्धाः-

१. राष्ट्रपतये तथा [1][* * *] राज्यानां राज्यपालेभ्यः निम्नलिखिताः उपलब्धयः प्रतिमासं सन्दीयेरन् तद्यथा-

राष्ट्रपतिः	....	१०,००० रुप्यकाणि[*]
राज्यस्य राज्यपालः	....	५५०० रुप्यकाणि[**]

२. राष्ट्रपतये तथा [2][* * *] राज्यानां राज्यपालेभ्यः तादृशानि भक्तानि अपि सन्दीयेरन् यादृशानि क्रमशः भारताधिनिवेशस्य 'गवर्नरजनरल' इति आख्याय तथा तत्स्थानिप्रान्तानां 'गवर्नर' इति आख्येभ्यः एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं सन्देयानि आसन्।

३. राष्ट्रपतेः तथा [3][* * *] राज्यानां राज्यपालानां स्वस्वपदावधौ निरन्तरं तादृशेषु विशेषाधिकारेषु स्वत्वं भवेत् यादृशेषु एतत्संविधानस्य प्रारम्भात् अव्यहितपूर्वं क्रमशः 'गवर्नरजनरल' इति आख्यस्य तथा तत्स्थानिप्रान्तानां 'गवर्नर' इति आख्यानाम् आसीत्।

४. यदा उपराष्ट्रपतिः, अन्यः कश्चित् जनः वा राष्ट्रपतेः कृत्यानि निवर्हति, तद्रूपेण वा कार्यं करोति अथवा अन्यः कश्चित् जनः राज्यपालस्य कृत्यानि निवर्हति, तदा तस्य तादृशेषु एव उपलब्धिषु, भक्तेषु, विशेषाधिकारेषु च स्वत्वं भवेत् यादृशेषु, यथायथं राष्ट्रपतेः राज्यपालस्य वा वर्तते यस्य कृत्यानि सः निर्वहति, यद्रूपेण वा सः कार्यं करोति।

[4][* * * *]

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागे अनुसूच्या च "प्रथमानुसूच्याः क-भागे उल्लिखितानाम्" इत्येते शब्दाः लोपिताः।

* वित्त-अधिनियमः, २०१८ (२०१८ वर्षस्य १३) इत्यस्य १३७-अनुभागेन (१-१-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अधुना एतत् "५,००,००० रुप्यकाणि" इति अस्ति।

** वित्त-अधिनियमः, २०१८ (२०१८ वर्षस्य १३) इत्यस्य १३७-अनुभागेन (१-१-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अधुना एतत् "३,५०,००० रुप्यकाणि" इति अस्ति।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागे अनुसूच्या च "एवम् उल्लिखित" इत्येतौ शब्दौ लोपितौ। (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण)

3 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागे अनुसूच्या च "एतादृश" इति शब्दः लोपितः।

4 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागे अनुसूच्या च (ख) भागः लोपितः।

(द्वितीया अनुसूची)

ग-भागः

लोकसभायाः अध्यक्षस्य, उपाध्यक्षस्य च तथा राज्यसभायाः सभापतेः, उपसभापतेश्च तथा [1]*** [2][राज्यस्य] विधानसभायाः अध्यक्षस्य, उपाध्यक्षस्य च तथा विधानपरिषदः सभापतेः उपसभापतेश्च सम्बन्धे उपबन्धाः

७. लोकसभायाः अध्यक्षाय, राज्यसभायाश्च सभापतये तादृशानि वेतनानि भक्तानि च सन्दीयेरन् यादृशानि भारताधिनिवेशस्य संविधानसभायाः अध्यक्षाय एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं सन्देयानि आसन्, तथा लोकसभायाः उपाध्यक्षाय, राज्यसभायाश्च उपसभापतये तादृशानि वेतनानि भक्तानि च सन्दीयेरन् यादृशानि भारताधिनिवेशस्य संविधानसभायाः उपाध्यक्षाय एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं सन्देयानि आसन्।

८. [3][* * *] राज्यस्य विधानसभायाः अध्यक्षाय, उपाध्यक्षाय च तथा [4][राज्यस्य] विधानपरिषदः सभापतये, उपसभापतये च तादृशानि वेतनानि भक्तानि च सन्दीयेरन् यादृशानि क्रमशः तत्स्थानिप्रान्तस्य विधानसभायाः अध्यक्षाय, उपाध्यक्षाय च तथा विधानपरिषदः सभापतये उपसभापतये च एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं सन्देयानि आसन्, यत्र च तत्स्थानिप्रान्ते एतादृशप्रारम्भात् अव्यवहितपूर्वं कापि विधानपरिषत् न आसीत् तत्र तद्राज्यस्य विधानपरिषदः सभापतये, उपसभापतये च तादृशानि वेतने भक्तानि च सन्दीयेरन् यादृशानि तद्राज्यस्य राज्यपालः अवधारयेत्।

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागे अनुसूच्या च "प्रथमानुसूच्याः क-भागः इत्यत्र कस्यचित् राज्यस्य" इत्येषः शब्दसमूहः लोपितः।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागे अनुसूच्या च "एतादृशस्य कस्यापि राज्यस्य" इति एते शब्दाः लोपिताः।

3 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २५-अनुभागेन अनुसूच्या च "प्रथमानुसूच्या; क-भागे उल्लिखित" इति एते शब्दाः लोपिताः (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागे अनुसूच्या च "एतादृश राज्यस्य" इत्यस्य स्थाने प्रतिष्ठापितम्।

(द्वितीया अनुसूची)

घ-भागः

उच्चतमन्यायालयस्य तथा [1][* * *] उच्चन्यायालयानां न्यायाधीशानां सम्बन्धे उपबन्धः-

९. [(१) उच्चतमन्यायालयस्य न्यायाधीशेभ्यः वास्तविकसेवायां यापितस्य कालस्य विषये निम्नलिखितमानेन प्रतिमासं वेतनं सन्दीयेत; तद्यथा-

मुख्यन्यायमूर्तिः [2][१०,००० रुप्यकाणि][*]

कोऽपि अन्यः न्यायाधीशः [3][९००० रुप्यकाणि][**]

परन्तु यदि उच्चतमन्यायालयस्य न्यायाधीशेन स्वनियुक्तिकाले भारतशासनस्य, तत्पूर्ववर्तिशासनेषु कस्यापि वा अथवा राज्यशासनस्य तत्पूर्ववर्तिशासनेषु कस्यापि वा पूर्वकृतायाः सेवायाः सम्बन्धे (अशक्यता मूलकम् अथवां क्षतिमूलकं निवृत्तिवेतनं विहाय) किमपि निवृत्तिवेतनं प्राप्यते तर्हि उच्चतमन्यायालयीयसेवाविषयकात् तस्य वेतनात् निम्नलिखितः राशिः [4][न्यूनीक्रियेत-

(क) तत् निवृत्तिवेतनस्य राशिः, तथा

(ख) यदि एतादृश्याः नियुक्तेः पूर्वं तेन एतादृश्याः पूर्वसेवायाः सम्बन्धे तस्मै सन्देयस्य निवृत्तिवेतनस्य भागात् प्रति एतस्य संराशितं मूल्यं प्राप्तम् अस्ति, तर्हि तत् निवृत्तिवेतनभागस्य राशिः; तथा

(ग) यदि तेन एतादृश्याः नियुक्तेः पूर्वम् एतादृश्याः पूर्वसेवायाः सम्बन्धे निवृत्युपदानं प्राप्तम् अस्ति, तर्हि तदुपदानस्य समतुल्यं निवृत्तिवेतनम्]

(२) उच्चतमन्यायालयस्य प्रत्येकन्यायाधीशः भाटकं विना एव पदावासस्य उपयोगे स्वत्ववान् भवेत्।

(३) एतत्प्रच्छेदस्य द्वितीयोपप्रच्छेदे गतं किमपि नानुप्रयुज्येत तस्य न्यायाधीशस्य विषये यः एतस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वं-

---

1 उपर्युक्ताधिनियमस्य २५-अनुभागेन "प्रथमानुसूच्याः क-भागस्य राज्यानाम्"" इत्येषः शब्दसमूहः लोपितः।

2 संविधानस्य (चतुःपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८६ वर्षस्य ४-अनुभागेन (१-४-१९८६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "५००० रुप्यकाणि" इत्यस्य स्थाने" १०००० रुप्यकाणि" इति संनिवेशितः।

* उच्चन्यायालयः तथा उच्चतमन्यायालयः इति न्यायाधीशः (वेतनानि तथा सेवानुबन्धनानि) संशोधनम् अधिनियमः, २०१८, (२०१८ वर्षस्य १०) इत्यस्य ६-अनुभागेन (१-१-२०१६) दिनाङ्कात् प्रभावेण अधुना एतत् "२,८०,००० रुप्यकाणि" इति अस्ति।

3 संविधानस्य (चतुःपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८६ वर्षस्य ४-अनुभागेन (१-४-१९८६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "४००० रुप्यकाणि" इत्यस्य स्थाने संनिवेशितः।

** उच्चन्यायालयः तथा उच्चतम-न्यायालयः इति न्यायाधीशः (वेतनानि तथा सेवानुबन्धनानि) संशोधनम् अधिनियमः, २०१८, (२०१८ वर्षस्य १०) इत्यस्य ६-अनुभागेन (१-१-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अधुना एतत् "२,५०,००० रुप्यकाणि" इति अस्ति।

4 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २५-अनुभागेन "तत् निवृत्तिवेतनस्य राशिः न्यूनीक्रियेत्" इत्येतत् प्रति एतत् संनिवेशितम्।

(क) “फेडरल्' न्यायालयस्य मुख्यन्यायमूर्तिरूपेण पदं धारयमाणः आसीत्, तथा च एतादृशे प्रारम्भे, ३७४-तमानुच्छेदस्य (१) खण्डाधीनम् उच्चतमन्यायालयस्य मुख्यन्यायमूर्तिः सञ्जातः वर्तते, अथवा

(ख) “फेडरल्” न्यायालयस्य कस्यापि न्यायाधीशस्य रूपेण पदं धारयमाणः आसीत्, तथा एतादृशे प्रारम्भे उक्तखण्डाधीनम् उच्चतमन्यायालस्य (मुख्यन्यायमूर्तेः अन्यः) न्यायाधीशः सञ्जातः वर्तते, उक्तकालावधौ, यस्मिन् सः एतादृशमुख्यन्यायमूर्तेः अन्यस्य वा न्यायाधीशस्य रूपेण पदधारणं करोति; तथा च प्रत्येकन्यायाधीशः, यः एवम् उच्चतमन्यायालयस्य मुख्यन्यायमूर्तिः अन्यः वा न्यायाधीशः सञ्जायते, यथायथम् एतादृशस्य मुख्यन्यायमूर्तेः अन्यस्य वा न्यायाधीशस्य रूपेण वास्तविकसेवायां यापितकालस्य सम्बन्धे एतत्प्रच्छेदस्य प्रथमोपप्रच्छेदे विनिर्दिष्टवेतनात् अतिरिक्तं विशेषवेतनस्य रूपेण तादृशस्य राशेः प्राप्तौ स्वत्ववान् भवेत् यः एवं विनिर्दिष्टवेतनस्य तथा एतादृशप्रारम्भात्, अव्यवहितपूर्वं तेन प्राप्यमाणवेतनस्य च अन्तरेण समः भवतिः।

(४) उच्चतमन्यायालयस्य प्रत्येकं न्यायाधीशः भारतराज्यक्षेत्रस्य अभ्यन्तरे स्वकर्त्तव्यस्य पालने कृतायां यात्रायां कृतव्ययानां प्रतिपूर्त्यै तादृशानि युक्तियुक्तानि भक्तानि प्राप्नुयात् तथा यात्रा-सम्बन्धीनि तादृशानि सौकर्याणि तस्मै प्रदीयेरन् यादृशानि राष्ट्रपतिः काले काले विहितानि कुर्यात्।

(५) उच्चतमन्यायालयस्य न्यायाधीशानाम् अनुपस्थत्यनुमतेः (अनुपर्थित्यनुमतिभक्तैः सह) तथा निवृत्ति वेतनस्य विषये अधिकाराः तैः उपबन्धैः शासिताः भवेयुः ये एतस्य संविधानस्य प्रारम्भात् अव्यवहितपूर्वं “फेडरलः” न्यायालयस्य न्यायाधीशानां विषये प्रवृत्ताः आसन्।

१०.[1][(१) उच्चन्यायालयानां न्यायाधीशेभ्यः वास्तविकसेवायां यापितकालस्य विषये निम्नलिखितमानेन प्रतिमासं वेतनं सन्दीयेत; तद्यथा-

मुख्यन्यायमूर्तिः	[2][९००० रुप्यकाणि]*
कोऽपि अन्यः न्यीयाधीशः	[3][८००० रुप्यकाणि]**

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २५-अनुभागेन (१) उपप्रच्छेदात् प्रति एषः उपप्रच्छेदः संनिवेशितः (१-११-१९५६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (चतुःपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८६ वर्षस्य ४-अनुभागेन (१-४-१९८६ दिनाङ्कात् प्रवर्तमानप्रभावेण) “४००० रुप्यकाणि” इत्यस्य स्थाने संनिवेशितः।

* उच्चन्यायालयः तथा उच्चतमन्यायालयः इति न्यायाधीशः (वेतनानि तथा सेवानुबन्धनानि) संशोधन-अधिनियमः, २०१८, (२०१८ वर्षस्य १०) इत्यस्य ४-अनुभागेन (१-१-२०१६ भूतलक्षिप्रभावेण दिनाङ्कात् प्रवर्तमानप्रभावेण) अधुना एतत् “२,५०,००० रुप्यकाणि” इति अस्ति।

3 संविधानस्य (चतुःपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८६ वर्षस्य ४-अनुभागेन (१-४-१९८६ दिनाङ्कात् प्रवर्तमानप्रभावेण) “३५०० रुप्यकाणि” इत्यस्य स्थाने संनिवेशितः।

** उच्चन्यायालयः तथा उच्चतमन्यायालयः इति न्यायाधीशः (वेतनानि तथा सेवानुबन्धनानि) संशोधन-अधिनियमः, २०१८, (२०१८ वर्षस्य १०) इत्यस्य २-अनुभागेन (१-१-२०१६ भूतलक्षिप्रभावेण दिनाङ्कात् प्रवर्तमानप्रभावेण) अधुना एतत् “२,२५,००० रुप्यकाणि” इति अस्ति।

(द्वितीया अनुसूची)

परन्तु यदि कस्यापि उच्चन्यायालयस्य केनापि न्यायाधीशेन स्वनियुक्तिकाले भारतशासनस्य, तत्पूर्ववर्तिशासनेषु कस्यापि वा, अथवा राज्यशासनस्य, तत्पूर्ववर्तिशासनेषु कस्यापि वा पूर्वं कृतायाः सेवायाः सम्बन्धे (अशक्ततामूलकम् अथवा क्षतिमूलकं निवृत्तिवेतनं विहाय) किमपि निवृत्तिवेतनं प्राप्यते, तर्हि उच्चन्यायालयीयसेवाविषयकात् तस्य वेतनात् निम्नलिखितः राशिः न्यूनीक्रियेत-

(क) तत् निवृत्तिवेतनस्य राशिः, तथा

(ख) यदि एतादृश्याः नियुक्तेः पूर्वं तेन एतादृश्याः पूर्वसेवायाः सम्बन्धे तस्मै सन्देयस्य निवृत्तिवेतनस्य भागात् प्रति एतस्य संराशितं मूल्यं प्राप्तम् अस्ति, तर्हि, तत् निवृत्तिवेतनभागस्य राशिः; तथा

(ग) यदि तेन एतादृश्याः नियुक्तेः पूर्वम् एतादृश्याः पूर्वसेवायाः सम्बन्धे निवृत्युपदानं प्राप्तम् अस्ति, तर्हि तदुपदानस्य समतुल्यं निवृत्तिवेतनम्।]

(२) यः कोऽपि जनः एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं-

(क) कस्मिन् अपि प्रान्ते उच्चन्यायालयस्य मुख्यन्यायमूर्तिरूपेण पदं धारयमाणः आसीत् तथा तादृशे प्रारम्भे ३७६-तमानुच्छेदस्य (१) खण्डाधीनं तत्स्थानीयराज्यस्य उच्चन्यायालयस्य मुख्यन्यायमूर्तिरूपेण सञ्जातः वर्तते, अथवा

(ख) कस्मिन् अपि प्रान्ते उच्चन्यायालयस्य कस्यापि इतरस्य न्यायाधीशस्य रूपेण पदं धारयमाणः आसीत् तथा एतादृशप्रारम्भे उक्तखण्डाधीनं तत्स्थानीयराज्यस्य उच्चन्यायालस्य (मुख्यन्यायमूर्तेः अन्यः) कोऽपि न्यायाधीशः सञ्जातः वर्तते;

सः यदि एतादृशप्रारम्भात् अव्यवहितपूर्वम् एतत् प्रच्छेदस्य प्रथमोपप्रच्छेदे विनिर्दिष्टमानात् अधिकेन मानेन वेतनं प्राप्नोत् तर्हि यथायथम् एतादृशस्य मुख्यन्यायमूर्तेः अन्यस्य वा न्यायाधीशस्य रूपेण वास्तविकसेवायां यापितकालस्य सम्बन्धे उक्तोपप्रच्छेदे विनिर्दिष्टवेतनात् अतिरिक्तं विशेषवेतनस्य रूपेण तादृशस्य राशेः प्राप्तौ स्वत्ववान् भवेत् यः एवं विनिर्दिष्टवेतनस्य तथा एतादृशप्रारम्भात् अव्यवहितपूर्वं तेन प्राप्यमाणवेतनस्य च अन्तरेण समः भवति।

[1][(३) एतादृशः कोऽपि जनः यः संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य प्रारम्भात् अव्यवहितपूर्वं प्रथमानुसूच्याः ख-भागे विनिर्दिष्टस्य कस्यापि राज्यस्य उच्चन्यायालयस्य मुख्यन्यायमूर्तिरूपेण पदं धारयमाणः आसीत् तथा सः एतादृशे प्रारम्भे उक्ताधिनियमेन यथासंशोधितायाम् उक्तानुसूच्यां विनिर्दिष्टस्य कस्यापि राज्यस्य उच्चन्यायालयस्य मुख्यन्यायमूर्तिः सञ्जातः वर्तते, यदि सः एतादृशप्रारम्भात् अव्यवहितपूर्वं स्ववेतनात् अतिरिक्तं कमपि राशिं भक्तरूपेण प्राप्नुवन् आसीत्, तर्हि एतादृशमुख्यायमूर्तिरूपेण वास्तविकसेवायां यापितकालस्य सम्बन्धे एतत् प्रच्छेदे विनिर्दिष्टवेतनात् अतिरिक्तं तत्समं राशिं भक्तरूपेण प्राप्त्यै स्वत्ववान् भवेत्।]

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २५-अनुभागेन (३) उपप्रच्छेदात् तथा (४) उपप्रच्छेदात् प्रति एषः उपप्रच्छेदः संनिवेशितः।

(द्वितीया अनुसूची)

११. अस्मिन् भागे यावत् सन्दर्भेण अन्यथा अपेक्षितं न भवति तावत्-

(क) "मुख्यन्यायमूर्तिः" इति पदे कार्यकारिमुख्यन्यायमूर्तिः अन्तर्भवति, तथा "न्यायाधीशः" इति पदे तदर्थन्यायाधीशः अन्तर्भवति।

(ख) "“वास्तविकसेवा" इति एतस्याम् अन्तर्भवति-

(१) न्यायाधीशरूपेणः कर्त्तव्यं कुर्वता अथवा तादृशानाम् अन्येषां कृत्यानां पालने, येषां निर्वहणस्य भारः, तेन राष्ट्रपतेः प्रार्थनायां सत्यां गृहीतः भवेत्, न्यायाधीशेन यापितः कालः;

(२) यस्मिन् सः न्यायाधीशः अनुमतिं गृहीत्वा अनुपस्थितः भवति तं कालं वर्जयित्वा, दीर्घावकाशाः; तथा

(३) उच्चन्यायालयात् उच्चतमन्यायालयं प्रति अथवा एकस्मात् उच्चन्यायालयात् अन्यम् उच्चन्यायालयं प्रति स्थानान्तरणे पदग्रहणकालः।

ङ-भागः

भारतस्य नियन्त्रकमहालेखापरीक्षकस्य सम्बन्धे उपबन्धाः

१२. (१) भारतस्य नियन्त्रकमहालेखापरीक्षकाय *चतुःसहस्ररूप्यकाणि प्रतिमासम् इति मानेन वेतनं सन्दीयेत।

(२) यः जनः एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं भारतस्य महालेखापरीक्षकस्य रूपेण पदं धारयमाणः आसीत्, तथा एतादृशप्रारम्भे ३७७-तमानुच्छेदस्य अधीनं भारतस्य नियन्त्रकमहालेखापरीक्षकः, सञ्जातः वर्तते सः एतत् प्रच्छेदस्य प्रथमोपप्रच्छेदे विनिर्दिष्टवेतनात् अतिरिक्तं विशेषवेतनस्य रूपेण तादृशराशेः प्राप्तौ स्वत्ववान् भवेत् यः (राशिः) एवं विनिर्दिष्टस्य वेतनस्य तथा एतादृशप्रारम्भात् अव्यवहितपूर्वं भारतस्य महालेखापरीक्षकस्य रूपेण तेन प्राप्यमाणवेतनस्य च अन्तरेण समः भवति|

(३) भारतस्य नियन्त्रकमहालेखपरीक्षकस्य अनुपस्थित्यनुमतेः तथा निवृत्तिवेतनस्य तथा अन्येषां सेवाप्रतिबन्धानां विषये अधिकाराः तैः उपबन्धैः यथायथं शासिताः भवेयुः, शासिताः वा अनुवर्तेरन्, ये एतत्संविधानस्य प्रारम्भात् अव्यवहितपूर्वं भारतस्य महालेखापरीक्षकस्य विषये प्रवृत्ताः आसन्, तथा तेषु उपबन्धेषु 'गवर्नरजनरल' इति आख्यं प्रति सर्वे निर्देशा राष्ट्रपतिं प्रति निर्देशाः इति अर्थः क्रियेत।

* नियन्त्रक-महालेखापरीक्षकः (कर्त्तव्यानि, शक्तयः, सेवानुबन्धान्) अधिनियमः, १९७१ (१९७१ वर्षस्य ५६) इत्यस्य ३-अनुभागेन भारतस्य नियन्त्रक-महालेखापरीक्षकम् उच्चतमन्यायालयस्य न्यायाधीशानां तुल्यं वेतनसन्दायं कुर्यात्, उच्चन्यायालयः तथा उच्चतमन्यायालयः इति न्यायाधीशः (वेतनानि तथा सेवानुबन्धानि) संशोधनम् अधिनियमः, २०१८, (२०१८ वर्षस्य १०) इत्यस्य ६-अनुभागेन (१-१-२०१६ भूतलक्षिप्रभावेण दिनाङ्कात् प्रवर्तमानप्रभावेण) उच्चतमन्यायालयस्य न्यायाधीशानां वेतनं "२,५०,००० रुप्यकाणि" इति प्रतिमासं यावत् वर्धितम्।

तृतीया अनुसूची

[अनुच्छेदाः ७५ (४), ९९, १२४ (६), १४८ (२), १६४ (३), १८८ तथा २१९]*

शपथानां प्रतिज्ञानानां वा प्ररूपाणि

१

सङ्घस्य मन्त्रिणः कृते पदशपथस्य प्ररूपम्-

"अहम् अमुकः $\frac{\text{ईश्वरस्य नाम्ना शपे}}{\text{सत्यनिष्ठया प्रतिजाने}}$ यद् अहं विधिना स्थापितं भारतस्य संविधानं प्रति सत्यां श्रद्धां, निष्ठां च धारयिष्यते, [1][भारतस्य प्रभुताम्, अखण्डतां च अक्षुण्णां रक्षिष्यामि], सङ्घस्य मन्त्रित्वेन स्वकर्तव्यानि श्रद्धापूर्वकं शुद्धान्तःकरणेन च निर्वक्ष्यामि, तथा; सर्वविधलोकान् प्रति भीतिं पक्षपातं वा रागं द्वेषं वा विहाय यथासंविधानं यथाविधिं च न्याय्यम्, आचरिष्यामि।"

२

सङ्घस्य मन्त्रिणः गोपनीयताशपथस्य प्ररूपम्-

ईश्वरस्य नाम्ना शपे

"अहम्, अमुकः $\frac{\text{ईश्वरस्य नाम्ना शपे}}{\text{सत्यनिष्ठया प्रतिजाने}}$ यत् कमपि विषयं, यः सङ्घस्य मन्त्रित्वेन मम विचारार्थम् आनीयेत, मया परिज्ञातः वा भवेत्, कमपि जनं, कान् अपि जनान् वा प्रति, एतादृशमन्त्रित्वेन मम कर्तव्यानां निर्वहणार्थं यद् अपेक्षितं भवेत् तद्विहाय, प्रत्यक्षरूपेण, अप्रत्यक्षरूपेण वा नहि संसूचयिष्यामि न वा प्रकटीकरिष्यामि।"

[2]३

क

संसदे निर्वाचनस्य कृते अभ्यर्थिना कर्तव्यस्य शपथस्य प्रतिज्ञानस्य वा प्ररूपम्-

---

* *८४ (क), १७३ (क) अनुच्छेदौ अपि अत्र द्रष्टव्यौ।

1 संविधानस्य (षोडशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य ५-अनुभागेन (१५-१०-१९६३ दिनाङ्कात् प्रवर्तमानप्रभावेण) एतत् अन्तर्वेशितम्।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन तृतीयात् प्ररूपात् प्रति संनिवेशितम्।

(तृतीया अनुसूची)

"अहम्, अमुकः, यः राज्यसभायां (वा लोकसभायां) स्थानपूर्त्यै अभ्यर्थिरूपेण नामनिर्देशितः अस्मि, ईश्वरस्य नाम्ना शपे / सत्यनिष्ठया प्रतिजाने यद् अहं विधिना स्थापितं भारतस्य संविधानं प्रति सत्यां श्रद्धां निष्ठां च धारयिष्ये तथा भारतस्य प्रभुताम् अखण्डतां च अक्षुण्णां रक्षिष्यामि"।

ख

संसदः सदस्येन कर्तव्यस्य शपथस्य प्रतिज्ञानस्य च प्ररूपम्-

"अहम्, अमुकः, यः राज्यसभायाः (वा लोकसभायाः) सदस्यत्वेन निर्वाचितः (वा नामनिर्देशितः) अस्मि ईश्वरस्य नाम्ना शपे / सत्यनिष्ठया प्रतिजाने यद् अहं विधिना स्थापितं भारतस्य संविधानं प्रति सत्यां, श्रद्धां निष्ठां च धारयिष्ये,

तथा भारतस्य प्रभुताम् अखण्डतां च अक्षुण्णां रक्षिष्यामि; तथा यत् पदं ग्रहीतुम् अहम् उद्यतः अस्मि तस्य कर्तव्यानि श्रद्धापूर्वकं निर्वक्ष्यामि।"]

४

उच्चतमन्यायालयस्य न्यायाधीशैः तथा भारतस्य नियन्त्रकमहालेखापरीक्षकेण कर्तव्यस्य शपथस्य प्रतिज्ञानस्य वा प्ररूपम्-

अहम्, अमुकः, भारतस्य उच्चतमन्यायालयस्य मुख्यन्यायमूर्तिरूपेण (न्यायाधीशरूपेण वा) (अथवा भारतस्य नियन्त्रकमहालेखपरीक्षकरूपेण) नियुक्तः, ईश्वरस्य नाम्ना शपे / सत्यनिष्ठया प्रतिजाने यद् अहं विधिना स्थापितं भारतस्य संविधानं प्रति सत्यां, श्रद्धां निष्ठां च धारयिष्ये [1][तथा भारतस्य प्रभुताम् अखण्डतां, च अक्षुण्णां रक्षिष्यामि] तथा अहं सम्यक् प्रकारेण श्रद्धापूर्वकं च तथा मम पूर्णया योग्यतया, पूर्णेन ज्ञानेन, पूर्णेन विवेकेन च स्वपदस्य, कर्तव्यानि भीतिं पक्षपातं वा, रागं द्वेषं वा विहाय पालयिष्यामि, तथा अहं संविधानस्य विधीनां च मर्यादां रक्षिष्यामि।"

---

[1] संविधानस्य (षोडशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य ५-अनुभागेन (१५-१०-१९६३ दिनाङ्कात् प्रवर्तमानप्रभावेण) एतत् अन्तर्वेशितम्।

५

कस्यापि राज्यस्य मन्त्रिणः कृते पदशपथस्य प्ररूपम्-

“अहम्, अमुकः, ईश्वरस्य नाम्ना शपे / सत्यनिष्ठया प्रतिजाने यद् अहं विधिना स्थापितस्य भारतस्य संविधानं प्रति सत्यां, श्रद्धां निष्ठां च धारयिष्ये [1][तथा भारतस्य प्रभुताम् अखण्डतां च अक्षुण्णां रक्षिष्यामि] तथा अहं…….. राज्यस्य मन्त्रित्वेन स्वकर्तव्यानि श्रद्धापूर्वकं, शुद्धान्तःकरणेन च निर्वक्ष्यामि, तथा सर्वविधलोकान् प्रति भीतिं पक्षपातं वा, रागं द्वेषं वा विहाय यथासंविधानं यथाविधिं च न्याय्यम् आचरिष्यामि।”

६

कस्यापि राज्यस्य मन्त्रिणः कृते गोपनीयताशपथस्य प्ररूपम्-

“अहम्, अमुकः ईश्वरस्य नाम्ना शपे / सत्यनिष्ठया प्रतिजाने यत् कमपि विषयं …….. यः राज्यस्य मन्त्रित्वेन मम विचारार्थम् आनीयेत, मया परिज्ञातः वा भवेत्, कमपि जनं, कान् अपि जनान् वा प्रति, एतादृशमन्त्रित्वेन मम कर्तव्यानां निर्वहणार्थं यद् अपेक्षितं स्यात् तद्विहाय, प्रत्यक्षरूपेण अप्रत्यक्षरूपेण वा नहि संसूचयिष्यामि न वा प्रकटीकरिष्यामि।”

[2][७

क

कस्यापि राज्यस्य विधानमण्डलाय निर्वाचनस्य कृते अभ्यर्थिना कर्तव्यस्य शपथस्य प्रतिज्ञानस्य च प्ररूपम्-

“अहम्, अमुकः यः विधानसभायां (विधानपरिषदि वा) स्थानपूर्त्यै अभ्यर्थिरूपेण नामनिर्देशितः अस्मि ईश्वरस्य नाम्ना शपे / सत्यनिष्ठया प्रतिजाने यद् अहं विधिना स्थापितं भारतरय संविधानं प्रति सत्यां, श्रद्धां निष्ठां च धारयिष्ये तथा भारतस्य प्रभुताम् अखण्डतां च रक्षिष्यामि।”

---

[1] संविधानस्य (षोडशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य ५-अनुभागेन (१५-१०-१९६३ दिनाङ्कात् प्रवर्तमानप्रभावेण) एतत् अन्तर्वेशितम्।

[2] संविधानस्य (षोडशं संशोधनम्) अधिनियमः, १ ९६३ इत्यस्य ५-अनुभागेन (१५-१०-१९६३ दिनाङ्कात् प्रवर्तमानप्रभावेण) एतत् संनिवेशितम्।

(तृतीया अनुसूची)

ख

कस्यापि राज्यस्य विधानमण्डलस्य सदस्येन कर्तव्यस्य शपथस्य प्रतिज्ञानस्य च प्ररूपम्-

"अहम्, अमुकः यः विधानसभायाः (विधानपरिषदः वा) सदस्यत्वेन निर्वाचितः (नामनिर्देशितः वा) अस्मि, ईश्वरस्य नाम्ना शपे / सत्यनिष्ठया प्रतिजाने यद् अहं विधिना स्थापितं भारतस्य संविधानं प्रति सत्यां, श्रद्धां निष्ठां च धारयिष्ये तथा भारतस्य प्रभुताम् अखण्डतां च अक्षुण्णां रक्षिष्यामि तथा यत् पदं ग्रहीतुम् अहम् उद्यतः अस्मि तस्य कर्तव्यानि श्रद्धापूर्वकं निर्वक्ष्यामि।"]

८

उच्चन्यायालयस्य न्यायाधीशैः कर्तव्यस्य शपथस्य प्रतिज्ञानस्य च प्ररूपम्-

"अहम्, अमुकः......................उच्चन्यायालयस्य मुख्यन्यायमूर्तिरूपेण (न्यायाधीशरूपेण वा) नियुक्तः ईश्वरस्य नाम्ना शपे / सत्यनिष्ठया प्रतिजाने यद् अहं विधिना स्थापितं भारतस्य संविधानं प्रति सत्यां, श्रद्धां निष्ठां च धारयिष्ये [1][तथा भारतस्य प्रभुताम् अखण्डतां च अक्षुण्णां रक्षिष्यामि] तथा अहं सम्यक्प्रकारेण श्रद्धापूर्वकं च तथा मम पूर्णया योग्यतया, पूर्णेन ज्ञानेन, पूर्णेन विवेकेन च स्वपदस्य कर्तव्यानि भीतिं पक्षपातं वा रागं द्वेषं वा विहाय पालयिष्यामि तथा अहं संविधानस्य, विधीनां च मर्यादां रक्षिष्यामि।"

---

[1] संविधानस्य (षोडशं संशोधनम्) अधिनियमः, १९६२ इत्यस्य ५-अनुभागेन (१५-१०-१९६३ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितम्।

[1][चतुर्थी अनुसूची

[अनुच्छेदौ ४ (१) तथा ८० (२)]

राज्यसभायां स्थानानाम् आवण्टनम्

निम्नलिखितायाः सारिण्याः प्रथमस्तम्भे विनिर्दिष्टाय प्रत्येकराज्याय, सङ्घराज्यक्षेत्राय वा यथायथं तस्य राज्यस्य, सङ्घराज्यक्षेत्रस्य वा सम्मुखं द्वितीयस्तम्भे विनिर्दिष्टसङ्ख्याकानि स्थानानि आवण्टितानि भवेयुः।

सारिणी

१.	आन्ध्रप्रदेशराज्यम्………………………………………	[2][११]
[3][२.	तेलंगाना……………………………………………	७]
[4][३.]	असमः……………………………………………	७
[4][४.]	बिहारः……………………………………………	[5][१६]
[6][[4][५.]	झारखण्डः……………………………………………	६]
[7][[8][[4][६.]	गोवा……………………………………………	१]]
[9][[8][[4][७.]	गुजरात……………………………………………	११]]
[10][[8][[4][८.]	हरियाणा……………………………………………	५]
[[8][[4][९.]	केरलः……………………………………………	९]
[1][[2][१०.]]	मध्यप्रदेशः……………………………………………	[3][११]

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य ३-अनुभागेन चतुर्थानुसूच्याः प्रति एषा संनिवेशिता।

2 आन्ध्र-प्रदेशपुनर्घटन-अधिनियमः, २०१४ (२०१४ वर्षस्य ६) इत्यस्य १२-अनुभागेन (२-६-२०१४ दिनाङ्कात् प्रवर्तमानप्रभावेण) "१८" इत्यस्य स्थाने संनिवेशितः।

3 आन्ध्र-प्रदेशपुनर्घटन-अधिनियमः, २०१४ (२०१४ वर्षस्य ६) इत्यस्य १२-अनुभागेन (२-६-२०१४ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

4 आन्ध्र-प्रदेशपुनर्घटन-अधिनियमः, २०१४ (२०१४ वर्षस्य ६) इत्यस्य १२-अनुभागेन (२-६-२०१४ दिनाङ्कात् प्रवर्तमानप्रभावेण) "२" इत्यतः ३०-पर्यन्तं प्रविष्टीः क्रमशः ३-इत्यतः ३१-पर्यन्तं प्रविष्टिरूपेण पुनः क्रमाङ्किताः।

5 बिहारपुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य ३०) इत्यस्य ७-अनुभागेन (१५-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) "२२" इत्यस्य स्थाने संनिवेशितः।

6 बिहारपुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य ३०) इत्यस्य ७-अनुभागेन (१५-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

7 गोवा-दमण-दीव-पुनर्घटन-अधिनियमः, १९८७ (१९८७ वर्षस्य १८) इत्यस्य (६क तथा ख) अनुभागेन (३०-५-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टयः ४-इत्यतः २६ इतीमाः क्रमशः प्रविष्टयः ५-इत्यतः २७-इति रूपेण पुनः सङ्ख्यायितः।

8 बिहारपुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य ३०) इत्यस्य ७-अनुभागेन (१५-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टयः ४-इत्यतः २९ इतीमाः क्रमशः प्रविष्टयः ५-इत्यतः ३०-इति रूपेण पुनः सङ्ख्यायितः।

9 मुम्बई-पुनर्घटन-अधिनियमः, १९६० (१९६० वर्षस्य ११) इत्यस्य ६-अनुभागेन (१-५-१९६० दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टेः "४" स्थाने प्रविष्टिः "६" पुनःक्रमाङ्किता।

10 पञ्जाब-पुनर्घटन-अधिनियमः, १९६६ (१९६६ वर्षस्य ३१) इत्यस्य ५-अनुभागेन (१-११-१९६६ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

(चतुर्थी अनुसूची)

4[1[2 [११.]	छत्तीसगढ़:..	५]]
5[1[2[१२.]	तमिलनाडुः..	6[१८]]
7[1[2[१३.]	महाराष्ट्रः..	१९]]
8[1[2[१४.]	कर्णाटकः..	१२]]
1[2[१५.]	9[ओडिशा]	१०]
1[2[१६.]	पञ्जाबः..	10७]
1[2[१७.]	राजस्थानम्..	१०]
1[2[१८.]	उत्तरप्रदेशः..	11[३१]
12[1[2[१९.]	13[उत्तराखण्डः]	३]]
1[2[२०.]	पश्चिमबङ्गालः..	१६]]
14[1[2[**]]	* * *....................	*]
15[16[1[2[२१.]	नागालैण्डः..	१]]
1[2[3[4[२२.]	हिमाचलप्रदेशः..	३]]]

---

1 बिहारपुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य ३०) इत्यस्य ७-अनुभागेन (१५-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टयः ४-इत्यतः २९ इतीमाः क्रमशः प्रविष्टयः ५-इत्यतः ३०-इति रूपेण पुनः सङ्ख्यायितः।

2 आन्ध्र-प्रदेशपुनर्घटन-अधिनियमः, २०१४ (२०१४ वर्षस्य ६) इत्यस्य १२-अनुभागेन (२-६-२०१४ दिनाङ्कात् प्रवर्तमानप्रभावेण) "२" इत्यतः ३०-पर्यन्तं प्रविष्टीः क्रमशः ३-इत्यतः ३१-पर्यन्तं प्रविष्टिरूपेण पुनः क्रमाङ्किताः।

3 मध्यप्रदेश-पुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य २८) इत्यस्य ७-अनुभागेन (१-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) "१६" इत्यस्याः स्थाने संनिवेशिता।

4 मध्यप्रदेश-पुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य २८) इत्यस्य ७-अनुभागेन (१-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तःस्थापितः।

5 मद्रासराज्य(नामपरिवर्तनम्) अधिनियमः, १९६८ (१९६८ वर्षस्य ५३) इत्यस्य ५-अनुभागेन (१४-१-१९६९ दिनाङ्कात् प्रवर्तमानप्रभावेण) "८मद्रास" ("११" इति रूपेण पुनः क्रमाङ्कितः) इत्यस्य स्थाने प्रतिष्ठापितः।

6 आन्ध्रप्रदेश-मद्रासराज्य(सीमापरिवर्तनम्) अधिनियमः, १९७३ (१९७३ वर्षस्य ३१) इत्यस्य ५-अनुभागेन (१-११-१९७३ दिनाङ्कात् प्रवर्तमानप्रभावेण) १७ इत्यस्य स्थाने प्रतिष्ठापितः।

7 मुम्बई-पुनर्घटन-अधिनियमः, १९६०, (१९६० वर्षस्य ११) इत्यस्य ६-अनुभागेन (१-५-१९६० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

8 मैसूरराज्य-(नामपरिवर्तनम्) अधिनियमः, १९७३ (१९७३ वर्षस्य ३१) ५-अनुभागेन (१-११-१९७३ दिनाङ्कात् प्रवर्तमानप्रभावेण) "१०. मैसूर" इति ("१३" इति रूपेण पुनः सङ्ख्यायितः) इत्यस्य स्थाने प्रतिष्ठापितः।

9 उडीसा (नामपरिवर्तनम्) अधिनियमः, २०११ (२०११ वर्षस्य १५) इत्यस्य ७-अनुभागेन "उडीसा" स्थाने (१-११-२०११ दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रतिष्ठापितः।

10 पञ्जाब-पुनर्घटन-अधिनियमः, १९६६ (१९६६ वर्षस्य ३१) इत्यस्य ९-अनुभागेन (१-११-१९६६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "११" इत्यस्य स्थाने प्रतिष्ठापितः।

11 उत्तरप्रदेश-पुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य २९) इत्यस्य ७-अनुभागेन (९-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) "३४" इत्यस्य स्थाने संनिवेशितः।

12 उत्तरप्रदेश-पुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य २९) इत्यस्य ७-अनुभागेन (९-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

13 उत्तराञ्चल-(नामपरिवर्तनम्)-अधिनियमः, २००६ (२००६ वर्षस्य ५२) इत्यस्य ५-अनुभागेन (१-१-२००७ दिनाङ्कात् प्रवर्तमानप्रभावेण) "उत्तराञ्चल" शब्दस्य स्थाने संनिवेशितः।

14 जम्मू-कश्मीर-पुनर्घटन-अधिनियमः,२०१९ (२०१९ वर्षस्य ३४) इत्यस्य ८-अनुभागेन (३१-१०-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) जम्मू-कश्मीरेण सम्बन्धितः प्रविष्टिं २१ इति लोपितः।

15 जम्मू-कश्मीर-पुनर्घटन-अधिनियमः,२०१९ (२०१९ वर्षस्य ३४) इत्यस्य ८-अनुभागेन (३१-१०-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टेः २२ प्रविष्टिं ३१ पर्यन्तं प्रविष्टेः २१ प्रविष्टेः ३० रूपेण पुनः सङ्ख्यायिता।

16 नागालैण्ड-राज्याधिनियमः, १९६२ (१९६२ वर्षस्य २७) इत्यस्य ६-अनुभागेन (१-१२-१९६३ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

[3][[2][[4][२३.]	मणिपुरम्..	१]
[3][[2][[4][२४.]	त्रिपुरा..	१]]
[3][[2][[4][२५.]	मेघालयः..	१]]
[5][[3][[2][[4][६.]	सिक्किमः..	१]]
[6][[3][[2][[4][२७.]	मिजोरमः..	१]]
[7][[3][[2][[4][२८.]	अरुणाचलप्रदेशः..	१]]
[3][[2][[4][२९.]	दिल्ली..	३]
[3][[2][[4][३०.]	[8][पुडुचेरी]	१]]
[9][[3][[2][[4][३१.]	जम्मू-कश्मीरः..	४]
	योगः	**[10][२३३]**

1 हिमाचलप्रदेश-राज्याधिनियमः, १९७० (१९७० वर्षस्य ५३) इत्यस्य ५-अनुभागेन (२५-१-१९७१ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

2 बिहारपुनर्घटन-अधिनियमः, २००० (२००० वर्षस्य ३०) इत्यस्य ७-अनुभागेन (१५-११-२००० दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टयः ४-इत्यतः २९ इतीमाः क्रमशः प्रविष्टयः ५-इत्यतः ३०-इति रूपेण पुनः सङ्ख्यायितः।

3 आन्ध्र-प्रदेशपुनर्घटन-अधिनियमः, २०१४ (२०१४ वर्षस्य ६) इत्यस्य १२-अनुभागेन (२-६-२०१४ दिनाङ्कात् प्रवर्तमानप्रभावेण) "२" इत्यतः ३०-पर्यन्तं प्रविष्टीः क्रमशः ३-इत्यतः ३१-पर्यन्तं प्रविष्टिरूपेण पुनः क्रमाङ्किताः।

4 जम्मू-कश्मीर-पुनर्घटन-अधिनियमः,२०१९ (२०१९ वर्षस्य ३४) इत्यस्य ८-अनुभागेन (३१-१०-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेण) प्रविष्टे: २२ प्रविष्टिं ३१ पर्यन्तं प्रविष्टेः २१ प्रविष्टेः ३० रूपेण पुनः सङ्ख्यायिता।

5 संविधानस्य (षड्विंशत्तमं संशोधनम्) अधिनियमः, १९७५ इत्यस्य ४-अनुभागेन (२६-४-१९७५ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशित:।

6 मिजोरमराज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ३४) इत्यस्य ५-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

7 अरुणाचलप्रदेश-राज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ६९) इत्यस्य ५-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

8 पांडिचेरी-(नामपरिवर्तनम्) अधिनियमः, २००६ (२००६ वर्षस्य ४४) इत्यस्य ४-अनुभागेन (१-१०-२००६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "पांडिचेरी" शब्दस्य स्थाने संनिवेशितः।

9 जम्मू-कश्मीर-पुनर्घटन-अधिनियमः,२०१९ (२०१९ वर्षस्य ३४) इत्यस्य ८-अनुभागेन (३१-१०-२०१९ दिनाङ्कात् प्रवर्तमानप्रभावेणः) अन्तःस्थापितः।

10 गोवा, दमणः तथा दीवः-पुनर्घटन-अधिनियमः, १९८७ (१९८७ वर्षस्य १८) इत्यस्य ६-अनुभागेन (३०-५-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) "२३२" इत्यस्य स्थाने संनिवेशितः।

पञ्चमी अनुसूची

[अनुच्छेदः २४४ (१)]

अनुसूचितक्षेत्राणाम् अनुसूचितजनजातीनां च प्रशासनस्य नियन्त्रणस्य च सम्बन्धे उपबन्धाः

क-भागः

साधारणम्

१. निर्वचनम्- एतस्याम् अनुसूच्यां यावत् सन्दर्भेण अन्यथा अपेक्षितं न भवति तावत् "राज्य"-पदे [1][***] [2][असमराज्यं[3][4][मेघालयः, त्रिपुरा तथा मिजोरमः]] इति राज्यानि] च नान्तर्भवतः]।

२. अनुसूचितक्षेत्रेषु कस्यापि राज्यस्य कार्यपालिकाशक्तिः- एतस्याः अनुसूच्याः उपबन्धानाम् अधीनं कस्यापि राज्यस्य कार्यपालिकाशक्तिः तस्य अनुसूचितक्षेत्राणि यावद् विस्तृता भवति।

३. अनुसूचितक्षेत्राणां प्रशासनविषये राष्ट्रपतिं प्रति राज्यपालस्य [5][* * *] **प्रतिवेदनम्-** प्रत्येकम् अनुसूचितक्षेत्रवतः राज्यस्य राज्यपालः [5][***] प्रतिवर्षं यदा यदा वा राष्ट्रपतिना एवम् अपेक्ष्यते, तस्य राज्यस्य अनुसूचितक्षेत्राणां प्रशासनविषये राष्ट्रपतिं प्रति प्रतिवेदनं कुर्यात्, सङ्घस्य कार्यपालिकाशक्तिश्च राज्याय उक्तक्षेत्राणां प्रशासनविषये निदेशदानं यावद् विस्तृता भवेत्।

ख-भागः

अनुसूचितक्षेत्राणाम् अनुसूचितजनजातीनां च प्रशासनं नियन्त्रणं च

४. जनजातिमन्त्रणापरिषत्- (१) अनुसूचितक्षेत्रवति प्रत्येकराज्ये तथा, राष्ट्रपतिः चेत् एवं निर्दिशति तर्हि, कस्मिंश्चित् अपि अनुसूचितजनजातिमति, किन्तु अनुसूचितक्षेत्रविरहिते राज्ये अपि च, एका जनजातिमन्त्रणापरिषत् स्थाप्येत, या विंशत्यनधिकैः सदस्यैः सम्भूय भवेत्, येषां यथाशक्यम् उपचतुर्थांशत्रयं तद्राज्यस्य विधानसभायाम् अनुसूचितजनजातीनां प्रतिनिधयः भवेयुः-

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "प्रथमानुसूच्याः क-भागे, ख-भागे वा उल्लिखितं किमपि राज्यम् अभिप्रेयते" इत्येतत् लोपितम्।

2 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१-अनुभागेन "असमराज्यं तदन्तर्गतं न भवति" इत्येतस्मात् प्रति एतत् संनिवेशितम्।

3 संविधानस्य (एकोनपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८४, वर्षस्य ३-अनुभागेन (१-४-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) "तथा मेघालयः" शब्दयोः स्थाने संनिवेशितः।

4 मिजोरमराज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ३४) इत्यस्य ३९-अनुभागेन (२०-२-१९८६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "मेघालयः तथा त्रिपुरा" शब्दानां स्थाने संनिवेशितः।

5 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राजप्रमुखस्य वा" इति शब्दौ लोपितौ।

परन्तु यदि तस्य राज्यस्य विधानसभायाम् अनुसूचितजनजातीनां प्रतिनिधीनां सङ्ख्या, जनजातिमन्त्रणापरिषदि एतादृशैः प्रतिनिधिभिः पूरयितव्यानां स्थानानां सङ्ख्यातः न्यूना भवति, तर्हि शेषस्थानानि तासां जातीनां अन्यैः सदस्यैः पूर्येरन्।

(२) जनजातिमन्त्रणापरिषदः एतत् कर्तव्यं भवेत् यत् सा राज्यपालेन [1][* * *] तां प्रति निर्दिष्टेषु तद्राज्यस्य अनुसूचितजनजातीनां कल्याणेन उन्नत्या च सम्बद्धेषु विषयेषु मन्त्रणां दद्यात् इति।

(३) राज्यपालः [2][* * *]

(क) परिषदः सदस्यानां सङ्ख्यायाः, तेषां नियुक्तेः, परिषदश्च अध्यक्षस्य तस्याः पदाधिकारिणां सेवकानां नियुक्तेः सम्बन्धिन्याः रीतेः,

(ख) तस्याः अधिवेशनानां सञ्चालनस्य साधारणप्रक्रियायाश्च,

(ग) अन्येषां सर्वेषाम् अनुषङ्गिकविषयाणां च, यथायथं विधानार्थं विनियमनार्थं वा नियमान् निर्मातुं क्षमते।

५. अनुसूचितक्षेत्रेषु अनुप्रयोज्यः विधिः- (१) एतत्संविधाने किमपि सत्यपि राज्यपालः [1][****] लोकाधिसूचनया निदेष्टुं क्षमते यत् संसदः तद्राज्यविधानमण्डलस्य वा कोऽपि विशेषः अधिनियमः अनुसूचितक्षेत्रे तस्य कस्मिन् अपि भागे वा नानुप्रयुज्यते अथवा तद्राज्यस्य अनुसूचितक्षेत्रे तस्य कस्मिन् अपि भागे वा एतादृशैः अपवादैः उपान्तरणैश्च अनुप्रयुज्येत यादृशान् सः अधिसूचनायां विनिर्दिशेत्, तथा एतस्य उपप्रच्छेदस्य अधीनं दत्तः कोऽपि निदेशः तथा दीयेत यथा तस्य भूतलक्षिप्रभावः भवेत्।

(२) राज्यपालः कस्मिन् अपि राज्ये कस्यापि तस्य क्षेत्रस्य शान्त्यै, सुशासनाय च नियमान् निर्मातुं क्षमते यत् (क्षेत्रम्) तदानीम् अनुसूचितक्षेत्रं वर्तते।

विशेषतः, तथा च पूर्वगामिशक्तेः व्यापकतायां प्रतिकूलप्रभावम् अन्तरेण,एतादृशाः विनियमाः-

(क) एतादृशक्षेत्रस्य अनुसूचितजनजातीनां सदस्यैः सदस्येषु वा भूमेः अन्तरणस्य प्रतिषेधं निर्बन्धनं वा;

(ख) एतादृशक्षेत्रेषु अनुसूचितजनजातीनां सदस्येषु भूमेः आवण्टनस्य विनियमनम्;

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "यथायथं राजप्रमुखेन वा" इत्येते शब्दाः लोपिताः।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागने अनुसूच्या च "राजप्रमुखो वा" इत्येतौ लोपितौ।

(ग) एताद्दशक्षेत्रस्य अनुसूचितजनजातीनां सदस्येभ्यः ऋणरूपेण धनस्य दातृभिः जनैः वृद्धिजीविरूपेण कार्यकरणस्य विनियमनम्, कर्तुं क्षमन्ते।

(३) एताद्दशस्य कस्यापि विनियमस्य निर्माणे याद्दशः एतत् प्रच्छेदस्य द्वितीयोपप्रच्छेदे निर्दिष्टः अस्ति, राज्यपालः [1][***] संसदः तद्राज्यस्य विधानमण्डलस्य वा अधिनियमं, कमपि विद्यमानं विधिं वा यः तदानीं प्रश्नगतक्षेत्रे अनुप्रयुज्यते, निरसितुं संशोधयितुं वा क्षमते।

(४) एतत्प्रच्छेदस्य अधीनं निर्मिताः सर्वे विनियमाः सद्यः राष्ट्रपतिं प्रति प्रेष्येरन् , यावत् च स तान् न अनुमन्यते तावत ते कार्यकराः न भवेयुः।

(५) एतत् प्रच्छेदस्य अधीनं कोऽपि विनियमः तावत् न निर्मीयेत, यावत् विनियमस्य निर्मात्रा राज्यपालेन [1][***], तद्राज्यार्थं जनजातिमन्त्रणापरिषद् विद्यते चेत्, ताद्दश्या परिषदा परामर्शः कृतः न भवति।

ग-भागः

अनुसूचितक्षेत्राणि

६. अनुसूचितक्षेत्राणि (१) अस्मिन् संविधाने "अनुसूचितक्षेत्राणि" इति पदेन ताद्दशानि क्षेत्राणि अभिप्रेयन्ते येषां राष्ट्रपतिः आदेशेन* अनुसूचितक्षेत्रत्वं घोषयेत्।

(२) राष्ट्रपति कस्मिन् अपि काले आदेशेन*-

(क) निदेष्टुं क्षमते यत् किमपि सम्पूर्णम् अनुसूचितक्षेत्रं तस्य कोऽपि विनिर्दिष्टः भागः वा, अनुसूचितक्षेत्रम्, एताद्दशक्षेत्रस्य भागः वा न भवेत्;

[2][(कक) कस्यापि राज्यस्य कमपि अनुसूचितजनजातिक्षेत्रं तद्राज्यस्य राज्यपालेन सह परामृश्य परिवर्धयितुं क्षमते];

(ख) किमपि अनुसूचितक्षेत्रसंशोधयितुं क्षमते किन्तु केवलं सीमानां शोधनद्वारा एव;

---

1 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "राजप्रमुखेन वा" इत्येतौ शब्दौ लोपितौ।
उपर्युक्ताधिनियमस्य उक्तेन अनुभागने अनुसूच्या च "राजप्रमुखेन वा" इत्येतौ लोपितौ।

* अनुसूचितक्षेत्राणां सम्बन्धे (क-भागीय राज्यानां कृते) आदेशः, १९५० (सां० आ०९) अनुसुचितक्षेत्राणां सम्बन्धे (ख) भागीय राज्यानां कृते आदेशः, १९५० (सां० आ० २६), अनुसूचितक्षेत्राणां सम्बन्धे (हिमाचलप्रदेशस्य कृते) आदेशः, १९७५ (सॉ० आ० १०२), तथा च अनुसूचितक्षेत्राणां सम्बन्धे (बिहार-गुजरात-मध्यप्रदेश-ओडिशा राज्यानां कृते) आदेशः, १९७५ (सां० आ० १०९) द्रष्टव्याः।

** मद्रासस्य अनुसूचितक्षेत्राणां (विरतीकरणम्) आदेशः, १९५० (सां० आ० ३०) तथा च आन्ध्रस्य अनुसूचितक्षेत्राणां विरतीकरणम् आदेशः, १९५५ (सां० आ० ५०) च द्रष्टव्यौ।

2 संविधानस्य पञ्चमी अनुसूची (संशोधनम्) अधिनियमः, १९७६ (१९७६ वर्षस्य १०१ तमः) इत्यस्य २-अनुभागेन पञ्चम्यनुसूच्या च अन्तर्वेशितः।

(पञ्चमी अनुसूची)

(ग) कस्यापि राज्यस्य सीमानां कस्मिन् अपि परिवर्तने, कस्यापि नूतनराज्यस्य सङ्घे अन्तःप्रवेशे वा स्थापनायां वा किमपि पूर्वतः कस्मिंश्चित् अपि राज्ये असमाविष्टं क्षेत्रम् अनुसूचितक्षेत्रत्वेन तस्य भागत्वेन वा घोषयितुं क्षमते;

[1][(घ) कस्यापि राज्यस्य राज्यानां वा सम्बन्धे एतत् प्रच्छेदाधीनं कृतम् आदेश विखण्डयितुम् अथवा सम्बन्धितराज्यस्य राज्यपालेन सह परामृश्य यानि अनुसूचितक्षेत्राणि भवेयुः तानि पुनः परिणिश्चेतुं नवम् आदेशं दातुं क्षमते];

ताद्दशः कोऽपि आदेशः ताद्दशान् आनुषङ्गिकान् पारिणामिकान् च उपबन्धान् अन्तर्भावयितुं क्षमते यान् राष्ट्रपतिः आवश्यकान् उचितान् च प्रत्येति; किन्तु उपर्युक्तां रीतिं विहाय एतत् प्रच्छेदस्य (१) उपप्रच्छेदस्य अधीनं कृतः आदेशः केनापि पश्चाद्वर्तिना आदेशेन परिवर्तितः न भवेत्।

घ-भागः

अनुसूच्याः संशोधनम्

७. अनुसूच्याः संशोधनम्- (१) संसद् काले काले विधिना परिवर्धनद्वारा, परिवर्तनद्वारा निरसनद्वारा वा एतस्याः अनुसूच्याः कस्यापि उपबन्धस्य संशोधनं कर्तुं क्षमते, यदा च अनुसूची एवं संशोधिता भवति तदा अस्मिन् संविधाने एताम् अनुसूचीं प्रति कोऽपि निर्देशः एवं संशोधिताम् एताद्दशीम् अनुसूचीं प्रति निर्देशः इति अर्थः ग्राह्यः।

(२) ताद्दशः कोऽपि विधिः याद्दशः एतत्प्रच्छेदस्य (१) उपप्रच्छेदे उल्लिखितः अस्ति, एतत्संविधानस्य ३६८-तमानुच्छेदस्य प्रयोजनानाम् अर्थे एतत्संविधानस्य संशोधनं न मन्येत।

---

[1] संविधानस्य पञ्चमी अनुसूची (संशोधनम्) अधिनियमः, १९७६ (१९७६ वर्षस्य १०१तमः) इत्यस्य २-अनुभागेन पञ्चम्यनुसूच्या च अन्तर्वेशितः।

षष्ठी अनुसूची

[अनुच्छेदौ २४४ (२) तथा २७५ (१)]

[1][असमः, मेघालयः, त्रिपुरा तथा मिजोरमः राज्यानि] इत्येषां जनजातिक्षेत्राणां प्रशासनविषये उपबन्धाः

[2]१. स्वशासिमण्डलानि, स्वशासिक्षेत्राणि च- (१) एतत्प्रच्छेदस्य उपबन्धानाम् अधीनम् एतदनुसूच्याः २०-प्रच्छेदेन संलग्नसारिण्याः [3][[4][भागः १, भागः २ तथा भागः २क] जनजातिक्षेत्राणाम् एकं स्वशासिमण्डलं भवेत्।

(२) यदि कस्मिन् अपि स्वशासिमण्डले विभिन्नाः अनुसूचितजनजातयः वर्तन्ते तर्हि राज्यपालः लोकाधिसूचनया ताभिः अध्युषितं क्षेत्र, क्षेत्राणि वा स्वशासिमण्डलेषु विभाजयितुं क्षमते।

(३) राज्यपालः लोकाधिसूचनया-

(क) उक्तसारिण्याः [3][कस्मिन् अपि भागे] किमपि क्षेत्रम् अन्तर्भावयितुम्;

(ख) उक्तसारिण्याः [3][कस्माद् अपि भागात्] किमपि क्षेत्रम् अपवर्जयितुम्;

(ग) नूतनं स्वशासिमण्डलं निर्मातुम्;

(घ) कस्यापि स्वशासिमण्डलस्य क्षेत्रं वर्धयितुम्;

(ङ) कस्यापि स्वशासिमण्डलस्य क्षेत्रं ह्रासयितुम्;

(च) द्वे, अधिकानि या स्वशासिमण्डलानि तद्भागान् वा संयोज्य एकं स्वशासिमण्डलं निर्मातुम्;

[5][(चच) [कस्यापि स्वशासिमण्डलस्य नाम परिवर्तयितुम्;]

(छ) कस्यापि स्वमासिमण्डलस्म सीमा परिणिश्चेतुम् क्षमते-

---

1 मिजोरम-राज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ३४) इत्यस्य ३९-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) केषाञ्चित् शब्दानां स्थाने संनिवेशितः।

2 संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, २००३ (२००३ वर्षस्य ४४) इत्यस्य २-अनुभागेन असमे प्रवर्तनाय प्रच्छेदः १-इत्यस्य २-उपप्रच्छेदस्य अनन्तरं निम्नलिखित-पारन्तुकम् अन्तःस्थाप्य संशोधितम्, अर्थात् :- "परन्तु अस्य उपप्रच्छेदस्य कोऽपि विषयः बोडोलैण्ड-प्रादेशिक-क्षेत्र-मण्डले (७-९-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) न प्रवर्तेत।"

3 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(१)-अनुभागेन अष्टमानुसूच्या च एषः "क-भागे" इत्येतत् प्रति एतेषां संनिवेशः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 संविधानस्य (एकोनपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८४, वर्षस्य ४-अनुभागेन (१-४-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) "भागः १ भागः २" इत्यनयोः स्थाने संनिवेशितः।

5 असमस्य पुनर्घटनम् (मेघालयः) अधिनियमः, १९६९ (१९६९ वर्षस्य ५५-तमः) इत्यस्य ७४-अनुभागेन चतुर्थानुसूच्या च एषः खण्डः अन्तर्वेशितः (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(षष्ठी अनुसूची)

परन्तु राज्यपालः एतदुपप्रच्छेदस्य (ग), (घ), (ङ), (च) खण्डानाम् अधीनं कमपि आदेशम् एतस्याः अनुसूच्याः १४-प्रच्छेदस्यः (१) उपप्रच्छेदस्य अधीनं नियुक्तस्य आयोगस्य प्रतिवेदने विचारं कृत्वा एव कुर्यात्, नान्यथा-

[1][अपरं च एतदुपप्रच्छेदस्य अधीनं राज्यपालेन कृते आदेशे, तादृशाः आनुषङ्गिकाः पारिणामिकाः उपबन्धाः (येषु अन्तर्भवति २०-प्रच्छेदस्य तथा उक्तसारिण्याः कस्यापि भागस्य कस्यापि अंशस्य किमपि संशोधनम्) अन्तर्विष्टाः भवितुं क्षमन्ते यान् राज्यपालः तादृशान् उपबन्धान् कार्यान्वितान् कर्तुम् आवश्यकान् प्रत्येति ।]

[2]**२. मण्डलपरिषदां, प्रादेशिकपरिषदां च घटनम्-** [3][(१) प्रत्येकस्वशासिमण्डलस्य कृते त्रिंशत्तः अनधिकसदस्यैः सम्भूता एका मण्डलपरिषद् भवेत् येषु (सदस्येषु) चतुः सङ्ख्यातः अनधिकजनाः राज्यपालेन नामनिर्दिष्टाः भवेयुः, शेषाश्च प्राप्तवयस्कमताधिकारस्य आधारेण निर्वाचिता भवेयुः ।]

---

1 पूर्वोत्तरक्षेत्राणाम् (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ) अनुभागेन अष्टमानुसूच्या च एषः पारन्तुकः अन्तर्वेशितः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, २००३ (२००३ वर्षस्य ४४) इत्यस्य २-अनुभागेन असमे प्रवर्तनाय प्रच्छेदः १-इत्यस्य २-उपप्रच्छेदस्य अनन्तरं निम्नलिखित-पारन्तुकम् अन्तःस्थाप्य संशोधितम्, अर्थात् :- "परन्तु एतत् यत् बोडोलैण्ड-प्रादेशिक-परिषदि षट्-चत्वारिंशत् नातिन्यूनान् सदस्यान् मिलित्वा विनिर्मयेत् यत्र चत्वारिंशत् सदस्यान् वयस्कमताधिकाराधारेण निर्वाचिताः भवेयुः, यत्र त्रिंशत्-अनुसूचितजनजातिभ्यः, पञ्च इतरजनजातीयसमुदायेभ्यः, पञ्चसर्वसमुदायेभ्यः रक्षिताः भवेयुः, तथा शेषाः षट् राज्यपालेन नामनिर्देशिताः भवेयुः येषाम् अधिकाराः तथा विशेषाधिकाराः यदन्तर्गते मतदानस्य अधिकाराः अपि सन्ति, तदेव भवेयुः, यत् अन्यसदस्यानां सन्ति। बोडोलैण्ड-प्रादेशिक-क्षेत्र-मण्डलस्य तेषु समुदायेषु, येषां प्रतिनिधित्वं नास्ति, न्यूनातिन्यूनं स्त्रियौ भवेताम्"।

संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९९५ (१९९५ वर्षस्य ४२) इत्यस्य २-अनुभागेन असमे प्रवर्तनाय प्रच्छेदः २-इत्यस्य ३-उपप्रच्छेदस्य अनन्तरं निम्नलिखित-पारन्तुकम् अन्तःस्थाप्य संशोधितम्, अर्थात् :- "परन्तु उत्तरी-कछार-पहाड़ी-मण्डलाय गठिता मण्डलपरिषद्, उत्तरी-कछार-पहाड़ी-स्वशासि-परिषद् अभिधीयेत तथा कार्बी-आंगलांग-मण्डलाय गठिता मण्डलपरिषद्, कार्बी-आंगलांग-स्वशासि-परिषद् अभिधीयेत"।

संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९९५ (१९९५ वर्षस्य ४२) इत्यस्य २-अनुभागेन असमे प्रवर्तनाय प्रच्छेदः २-इत्यस्य ३-उपप्रच्छेदस्य अनन्तरं निम्नलिखित-पारन्तुकम् अन्तःस्थाप्य संशोधितम्, अर्थात् :- "परन्तु उत्तरी-कछार-पहाड़ी-मण्डलाय गठिता मण्डलपरिषद्, उत्तरी-कछार-पहाड़ी-स्वशासि-परिषद् अभिधीयेत तथा कार्बी-आंगलांग-मण्डलाय गठिता मण्डलपरिषद्, कार्बी-आंगलांग-स्वशासि-परिषद् अभिधीयेत"।

3 असमस्य पुनर्घटनम् (मेघालयः) अधिनियमः, १९६९ (१९६६ वर्षस्य ५५-तमः) इत्यस्य ७४-अनुभागेन चतुर्थानुसूच्या च (१) उपप्रच्छेदात् प्रति एषः उपप्रेच्छदः संनिवेशितः (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(षष्ठी अनुसूची)

(२) एतदनुसूच्याः १-प्रच्छेदस्य (२) उपप्रच्छेदस्य अधीनं स्वशासिप्रदेशरूपेण घटितस्य प्रत्येकक्षेत्रस्य कृते एका पृथक् प्रादेशिकपरिषद् भवेत्।

(३) प्रत्येकमण्डलपरिषत् प्रत्येकप्रादेशिकपरिषत् च क्रमशः अमुक (मण्डलस्य नाम) मण्डलपरिषत् अमुक (प्रदेशस्य नाम) प्रादेशिकपरिषत् च इति नाम्ना निगमितः निकायः भवेत्, तस्याः शाश्वतः उत्तराधिकारः, एका सामान्यमुद्रा च भवेत् उक्तनाम्ना च सा वादिनी प्रतिवादिनी वा भवेत्।

(४) एतदनुसूच्याः उपबन्धानाम् अधीनं स्वशासिमण्डलस्य प्रशासनम् एतादृशमण्डलस्य मण्डलपरिषदि तावन्मात्रं निहितं भवेत् यावन्मात्रं तत् एतादृशमण्डलस्य कस्यामपि प्रादेशिकपरिषदि एतदनुसूच्याः अधीनं निहितं नास्ति; स्वशासिप्रदेशस्य च प्रशासनम् एतादृशप्रदेशस्य प्रादेशिकपरिषदि निहितं भवेत्।

(५) प्रादेशिकपरिषद्वति स्वशासिमण्डले प्रादेशिकपरिषदः प्राधिकाराधीनानां क्षेत्राणां विषये मण्डलपरिषदः एतदनुसूच्या एतादृशक्षेत्राणां विषये प्रदत्ताभ्यः शक्तिभ्यः अतिरिक्तं केवलं तादृश्यः शक्तयः भवेयुः या प्रादेशिकपरिषत् तस्यै प्रत्यायोजयेत्।

(६) राज्यपालः स्वशासिनां मण्डलानां प्रदेशानां वा अन्तर्गतैः वर्तमानैः जनजातिपरिषद्भिः अन्यैः प्रतिनिधित्ववद्भिः जनजातिसङ्घटनैः वा परामृश्य मण्डलपरिषदां, प्रादेशिकपरिषदां च प्रथमघटनार्थं, नियमान् निर्मिमीत, एतादृशाः नियमाश्च निम्नलिखितेषु विषयेषु उपबन्धान् कुर्युः

(क) मण्डलपरिषदां, प्रादेशिकपरिषदां च रचना, तासु स्थानानाम् आवण्टनं च;

(ख) तासां परिषदां कृते निर्वाचनप्रयोजनाय प्रादेशिकनिर्वाचनक्षेत्राणां परिसीमनम्;

(ग) एतादृशनिर्वाचनेषु मतदानार्थम् अर्हतानां कृते, तथा च तदर्थं निर्वाचकनामवलीनां परिकल्पनम्;

(घ) एतादृशनिर्वाचनेषु एतादृशपरिषदां सदस्यत्वेन निर्वाचनार्थम् अर्हताः;

(ङ) [1][प्रादेशिकपरिषदां] सदस्यानां पदावधिः;

---

[1] असमस्य पुनर्घटनं (मेघालयः) अधिनियमः, १९६९ (१९६९ वर्षस्य ५५-तमः) इत्यस्य ७४-अनुभागेन चतुर्थानुसूच्या च "एतादृशपरिषदाम्" इत्येतस्मात् प्रति एषः शब्दसमूहः संनिवेशितः (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(च) एतादृशपरिषद्भ्यः निर्वाचनैः नामनिर्देशनैश्च सम्बद्धः संसक्तः वा अन्यः कोऽपि विषयः;

(छ) मण्डलपरिषत्सु प्रादेशिकपरिषत्सु च प्रक्रिया कार्यसञ्चालनं च [1][(यस्मिन् कस्मिन् अपि स्थाने रिक्ते सत्यपि कार्यकरणाय शक्तिः अन्तर्भवति)];

(ज) मण्डलपरिषदां प्रादेशिकपदिषदां च अधिकारिणां कर्मचारिवृन्दस्य च नियुक्तिः।

[1][(६.क) मण्डलपरिषदः निर्वाचितसदस्याः परिषदः कृते साधारणनिर्वाचनस्य पश्चात् परिषदः प्रथमोपवेशनाय नियतदिनाङ्कात् पञ्चानां वर्षाणाम् अवधिं यावत् स्वपदं धारयेयुः यदि चेत् मण्डलपरिषत् तत्पूर्वं १६-प्रच्छेदाधीनं विघटिता न भवति, तथा च नामनिर्दिष्टः सदस्यः राज्यपालस्य प्रसादपर्यन्तं पदं धारयेत्-

परन्तु उक्तपञ्चानां वर्षाणाम् अवधिं, यदा आपातस्य उद्घोषणा प्रवर्तते अथवा यदा एतादृश्यः परिस्थितयः विद्यन्ते याः राज्यपालस्य मत्या निर्वाचनम् असाध्यं कुर्वन्ति तदा राज्यपालः समयं वर्धयितुं क्षमते, यद्वर्धनम् एकस्मिन् काले एकवर्षावधिं न अत्येत्; तथा यदा आपातस्य उद्घोषणा प्रवर्तमाना स्यात् तदा उद्घोषणायाः पर्यवसानोत्तरं षण्मासान् अतीत्य अवधिः कदापि वर्धितः न भवेत्-

अपरं च, आकस्मिकरिक्तेः पूर्त्यै निर्वाचितः सदस्य यस्य सदस्यस्य स्थानं सः गृह्णाति तस्य शेषपदावधेः समाप्तिपर्यन्तं पदं धारयेत्।]

(७) स्वकीयप्रथमघटनात् परं मण्डलपरिषत् प्रादेशिकपरिषद्वा [1][राज्यपालस्य अनुमोदनेन] एतत्प्रच्छेदस्य (६) उपप्रच्छेदे विनिर्दिष्टानां विषयाणां सम्बन्धे नियमान् निर्मातुं क्षमते, तथा च [1][तादृशेनैव अनुमोदनेन]-

(क) अधीनानां स्थानीयपरिषदां स्थानीयमण्डलीनां वा रचनायाः, तासां प्रक्रियायाश्च, तासां कार्यसञ्चालनस्य च; तथा

(ख) यथायथं मण्डलस्य, प्रदेशस्य वा प्रशासनविषयककार्यसम्पादनेन सम्बद्धानां साधारणतया सर्वेषां विषयाणां च,

विनियामकान् नियमान् निर्मातुं क्षमते-

---

[1] उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन उक्तानुसूच्या च एषः शब्दसमूहः अन्तर्वेशितः (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(षष्ठी अनुसूची)

परन्तु यावत् एतदुपप्रच्छेदस्य अधीनं मण्डलपरिषदा, प्रादेशिकपरिषदा वा नियमाः न निर्मीयन्ते तावत् एतादृश्याः प्रत्येकं परिषदः कृते निर्वाचनानां, तस्याः अधिकारिणां कर्मचारिवृन्दस्य च, तथा तस्याः प्रक्रियायाः कार्यसञ्चालनस्य च विषये एतत्प्रच्छेदस्य (६) उपप्रच्छेदस्य अधीनं राज्यपालेन निर्मिताः नियमाः प्रभाविनः भवेयुः।

[1][* * * *]

[2]३. **मण्डलपरिषदां प्रादेशिकपरिषदां च विधिनिर्माणस्य शक्तिः-** (१) स्वशासिप्रदेशस्य प्रादेशिकपरिषदः एतादृशप्रदेशाभ्यन्तरे सर्वेषां क्षेत्राणां सम्बन्धे तथा स्वशासिमण्डलस्य मण्डलपरिषदः स्वशासिमण्डलाभ्यन्तरे

---

[1] उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन उक्तानुसूच्या च द्वितीयः पारन्तुकः लोपितः (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण)

[2] संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, २००३ (२००३ वर्षस्य ४४) इत्यस्य २-अनुभागेन प्रच्छेदः (३) असमराज्य-प्रवर्तमानसन्दर्भे निम्नलिखितरूपेण येन उपप्रच्छेदः (३) निम्नलिखितरूपेण संनिवेशितः भवेत्, अर्थात् :-
(३) प्रच्छेदः ३क-इत्यस्य उपप्रच्छेदः (२) अथवा प्रच्छेदः ३ख-इत्यस्य उपप्रच्छेदः (२) इत्यत्र यथा अन्यथा उपबन्धितः अस्ति, तद्विहाय एषः प्रच्छेदः अथवा प्रच्छेदः ३क-इत्यस्य उपप्रच्छेदः (१) अथवा प्रच्छेद ३ख-इत्यस्य उपप्रच्छेदः (१) इत्यस्य अधीनं विनिर्मिताः सर्वे विधयः राज्यपालस्य समक्षं सद्यः प्रस्तुताः भवेयुः तथा यावत्पर्यन्तं सः तदुपरि न आज्ञापयेत् तावत्पर्यन्तं न प्रभाविताः भवेयुः"।
संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९९५ (१९९५ वर्षस्य ४२) इत्यस्य २-अनुभागेन असमराज्य-प्रवर्तमानाय प्रच्छेदः (३) इत्यस्य अनन्तरं निम्नलिखितगद्यांशः अन्तर्वेशितः, अर्थात् :-
"३क उत्तरी-कछार-पहाड़ी-स्वशासि-परिषदः तथा कार्बी-आंगलांग-स्वशासि-परिषदः विधिनिर्मातुम् अतिरिक्तशक्तयः प्रच्छेदः ३ इत्यस्य उपबन्धेषु प्रतिकूलप्रभावं विना, उत्तरी-कछार-पहाड़ी-स्वशासि-परिषदं तथा कार्बी-आंगलांग-स्वशासि-परिषदं सम्बन्धितमण्डलानाम् अन्ते निम्नलिखितविषये विधिनिर्मातुं शक्तयः भवेयुः।

अर्थात् :-

(क) सप्तमी-अनुसूच्याः सूची १ इत्यस्याः प्रविष्टेः ७ तथा प्रविष्टेः ५२ इत्यस्य उपबन्धाधीनं सति, उद्योगः ;
(ख) संचारः अर्थात् पन्थानः, सेतवः, हाटाः तथा अन्यसंचारसाधनानि यत् सप्तमी-अनुसूच्याः सूची १-इत्यत्र विनिर्दिष्टाः न सन्ति, नगरपालिकायां ट्रौमः, रज्जुमार्गः, अन्तर्देशीय-जलमार्गः इत्येषां सम्बन्धे सप्तमी-अनुसूच्याः सूची १ तथा सूची ३ इत्यस्य उपबन्धाधीनं सति अन्तर्देशीयजलमार्गेषु तथा तदुपुरि यातायातं, यन्त्र-नोदित-यानेभ्यः पृथक् यानम् ;
(ग) पशुधनस्य परिरक्षणं, संरक्षणं, तथा सुधारणं तथा जीवजन्तूनां रोगनिवारणं, पशुचिकित्साप्रशिक्षणं तथा व्यवसायः ;पशुबन्धगृहः ;
(घ) प्राथमिकी तथा माध्यमिकी शिक्षा ;
(ङ) कृषिः यदन्तर्गते कृषिशिक्षा तथा अनुसन्धानं, कीटेभ्यः संरक्षणं तथा पादपरोगाणां निवारणम् अस्ति ;
(च) मत्स्य-उद्योगः ;
(छ) सप्तमी-अनुसूच्याः सूची १ इत्यस्याः प्रविष्टेः ५६ इत्यस्य उपबन्धाधीनं सति, जलम्, अर्थात् जलप्रदायः, सेचनं तथा कुल्याः, जलनिकासी तथा जलभण्डारणं तथा जलशक्तिः ;
(ज) सामाजिकसुरक्षा तथा सामाजिक-अभिरक्षा(बीमा) ; नियोजनं विष्टिः ;
(झ) ग्रामाणां, व्रीहिक्षेत्राणाम्, आपणानां, नगरादीनां संरक्षणाय प्लवनियन्त्रणयोजनाः (यत् तकनीकी-प्रकृतेः न स्युः) ;
(ञ) नाट्यशाला तथा नाट्यप्रदर्शनं ; सप्तमी-अनुसूच्याः १ इत्यस्याः प्रविष्टेः ६० इत्यस्य उपबन्धाधीनं सति, चलचित्रं, क्रीडा, मनोरञ्जनं तथा आमोदः ;
(ट) लोकस्वास्थ्यं तथा स्वच्छता, रुग्णालयः तथा औषधालयः ;
(ठ) लघुसेचनं ;

(ड) खाद्यपदार्थस्य, पशुघासस्य, अपक्वकार्पासः तथा अपक्वशणस्य व्यापारः तथा वाणिज्यं तथा तेषाम् उत्पादनं, प्रदायः तथा वितरणं ;

(ढ) राज्येन नियन्त्रितं तथा वित्तपोषितपुस्तकालयः, सङ्ग्रहालयः तथा तादृशाः एव अन्याः संस्थाः संसदा विनिर्मितेन विधिना अथवा तदधीनं राष्ट्रियमहत्त्वरूपेण घोषितेभ्यः प्राचीनेभ्यः तथा ऐतिहासिक-संस्मारकेभ्यः तथा अभिलेखेभ्यः पृथक्प्राचीनाः तथा ऐतिहासिक-संस्मारकाः तथा अभिलेखाः ; तथा

(ण) भूमेः अन्यसङ्क्रामणम् ;

(२) प्रच्छेदः ३ इत्यस्य अधीनं वा अस्य प्रच्छेदस्य अधीनम् उत्तरी-कछार-पहाड़ी-स्वशासि-परिषद् तथा कार्बी-आंगलांग-स्वशासि-परिषद् इत्याभ्यां विनिर्मिताः समे विधयः, यावत् पर्यन्तम् एषां सम्बन्धः सप्तमी-अनुसूच्याः सूची ३-इत्यत्र विनिर्दिष्टविषयेभ्यः अस्ति, राज्यपालस्य समक्षं सद्यः प्रस्तुयात्, यत् तं राष्ट्रपतेः विचारार्थम् आरक्षिताः भवेयुः।

(३) यदा कोऽपि विधिः राष्ट्रपतेः विचारार्थम् आरक्षितः अस्ति तदा राष्ट्रपतिः घोषयेत् यत् सः उक्तविधौ आज्ञापयति उत अवरोधयति।

परन्तु राष्ट्रपतिः राज्यपालम् अयं निर्देशः दातुं शक्नुयात् यत् सः विधिं, यथास्थिति, उत्तरी-कछार-पहाड़ी-स्वशासि-परिषदं वा कार्बी-आंगलांग-स्वशासि-परिषदम् एतादृशेन संदेशेन सह अयम् अनुरोधमानः प्रत्यावर्तयेत् यत् उक्तपरिषद् विधेः अथवा तस्य केषांचित् विनिर्दिष्टेषु उपबन्धेषु पुनर्विचारं कुर्यात् तथा विशिष्टतया, केषुचित् एतादृशेषु संशोधनेषु पुरःस्थापनस्य वाञ्छनीयतायाः विषये विचारयेत् यस्य तेन स्वीयसंदेशे पुरःप्रशंसः कृतः तथा यदा विधिः इत्थं प्रत्यावर्तयति तदा एतादृशः संदेशस्य प्राप्तेः दिनाङ्कात् षड्-मासस्य अवधेः मध्ये परिषद् एतादृशे विधौ तदनुसारं विचारयेत् यदि विधिः उक्तपरिषद् संशोधनसहितम् अथवा तं विना पुनः पारितः भवेत् तर्हि तं राष्ट्रपतेः समक्षं विचारार्थं प्रस्तुयात्।

संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, २००३ (२००३ वर्षस्य ४४) इत्यस्य २-अनुभागेन असमराज्य-प्रवर्तमानाय प्रच्छेदः (३) इत्यस्य अनन्तरं निम्नलिखितगद्यांशः अन्तर्वेशितः, अर्थात् :-

३ख. बोडोलैण्ड-प्रादेशिक-परिषदः विधिनिर्मातुम् अतिरिक्तशक्तयः- (१) प्रच्छेदः ३ इत्यस्य उपबन्धेषु प्रतिकूलप्रभावं विना, उत्तरी-कछार-पहाड़ी-स्वशासि-परिषदं तथा कार्बी-आंगलांग-स्वशासि-परिषदं सम्बन्धितमण्डलानाम् अन्ते निम्नलिखितविषये विधिनिर्मातुं शक्तयः भवेयुः।

अर्थात् :-

(i) कृषिः यदन्तर्गते कृषिशिक्षा तथा अनुसन्धानं, कीटेभ्यः संरक्षणं तथा पादपरोगाणां निवारणम् अस्ति ;

(ii) पशुधनस्य परिरक्षणं, संरक्षणं, तथा सुधारणं तथा जीवजन्तूनां रोगनिवारणं, पशुचिकित्साप्रशिक्षणं तथा व्यवसायः ; पशुबन्धगृहः ;

(iii) सहकारिता ;

(iv) सांस्कृतिककार्याणि ;

(v) शिक्षा अर्थात् प्राथमिकी शिक्षा, उच्चतरमाध्यमिकी-शिक्षा यत्र व्यवासायिकप्रशिक्षणं, प्रौढी शिक्षा, महाविद्यालयी शिक्षा (सामान्या) अपि अस्ति ;

(vi) मत्स्य-उद्योगः ;

(vii) ग्रामाणां, व्रीहिक्षेत्राणाम्, आपणानां, नगरादीनां संरक्षणाय प्लवनियन्त्रणयोजनाः (यत् तकनीकी-प्रकृतेः न स्युः) ;

(viii) खाद्यं तथा नागरिकापूर्त्तिः ;

(ix) वनं (आरक्षितवनानि त्यक्त्वा) ;

(x) हस्तवेमः(हथ-करघा)तथा पटः ;

(xi) स्वास्थ्यं तथा कुटुम्बकल्याणम्;

(xii) सप्तमी-अनुसूच्याः सूची १ इत्यस्याः प्रविष्टेः ८४ इत्यस्याः उपबन्धाधीनं सति मादकमद्यः, पुलोमही तथा तस्य विकारः ;

(xiii) सेचनम् ;

(xiv) श्रमः तथा जीविका ;

(xv) भूमिः तथा राजस्वः ;

(xvi) पुस्तकालयसेवाः (राज्यशासनेन वित्तपोषितं तथा नियन्त्रितम्) ;

(xvii) धनभाग्ययोगः (देवन्यः) (सप्तमी-अनुसूच्याः सूची १ इत्यस्याः प्रविष्टेः ४० इत्यस्य उपबन्धाधीनम्) नाट्यशाला, नाट्यप्रदर्शनं तथा चलचित्रं (सप्तमी-अनुसूच्याः सूची १ इत्यस्याः प्रविष्टेः ६० इत्यस्य उपबन्धाधीनम्) ;

(xviii) आपणं तथा हाटः ;

(xix) नगरनिगमः, सुधारन्यासः मण्डलसङ्घः तथा अन्यस्थानीयप्राधिकारिणः ;

(xx) राज्येन नियन्त्रितं तथा वित्तपोषितपुस्तकालयः, सङ्ग्रहालयः तथा तादृशाः एव अन्याः संस्थाः संसदा विनिर्मितेन विधिना अथवा तदधीनं राष्ट्रियमहत्त्वरूपेण घोषितेभ्यः प्राचीनेभ्यः तथा ऐतिहासिक-संस्मारकेभ्यः तथा अभिलेखेभ्यः पृथक्प्राचीनाः तथा ऐतिहासिक-संस्मारकाः तथा अभिलेखाः ;

(xxi) पञ्चायतं तथा ग्रामीणविकासः ;

(xxii) योजना तथा विकासः ;

(xxiii) मुद्रणं तथा लेखनसामग्री ;

(xxiv) लोक-स्वास्थ्य-अभियान्त्रिकी ;

(xxv) लोकनिर्माणविभागः ;

(xxvi) प्रचारं तथा जनसम्पर्कः ;

(xxvii) जन्ममरणयोः पञ्जीकरणम् ;

(xxviii) सहायता तथा पुनर्वासः ;

(xxix) चीनांशुक-उत्पादनम् ;

(xxx) सप्तमी-अनुसूच्याः सूची १ इत्यस्याः प्रविष्टेः ७ तथा प्रविष्टेः ५२ इत्यस्य उपबन्धाधीनं सति लघु-कुटीरः तथा ग्रामीण-उद्योगः ;

(xxxi) समाजकल्याणम् ;

(xxxii) मृद्संरक्षणम् ;

(xxxiii) क्रीडा तथा युवकल्याणम् ;

(xxxiv) साङ्ख्यिकी ;

(xxxv) पर्यटनम् ;

(xxxvi) परिवहनं (पन्थानः, सेतवः, हाटाः तथा अन्यसंचारसाधनानि यत् सप्तमी-अनुसूच्याः सूची १-इत्यत्र विनिर्दिष्टाः न सन्ति, नगरपालिकायां ट्रौमः,रज्जुमार्गः, अन्तर्देशीय-जलमार्गः इत्येषां सम्बन्धे सप्तमी-अनुसूच्याः सूची १ तथा सूची ३ इत्यस्याः उपबन्धाधीनं सति अन्तर्देशीयजलमार्गेषु तथा तदुपरि यातायातं, यन्त्र-नोदित-यानेभ्यः पृथक् यानम्) ;

(xxxvii) राज्यशासनेन नियन्त्रितं तथा वित्तपोषितं जनजाति-अनुसन्धान-संस्थानम् ;

(xxxviii) नगरीयविकासः (नगरग्रामीणयोजना) ;

(xxxix) सप्तमी-अनुसूच्याः सूची १ इत्यस्याः प्रविष्टेः ५० इत्यस्याः उपबन्धाधीनं तुलामानं तथा मापकः ; तथा

(xl) समभूमि-जनजातीनां तथा पश्चवर्त्तिवर्गाणां कल्याणम् ;

परन्तु एतादृशानां विधीनां कोऽपि विषयः, -

(क) अस्य अधिनियमस्य प्रारम्भदिनाङ्के कस्यचित् नागरिकस्य तस्याः भूमेः सम्बन्धे विद्यमान-अधिकारान् तथा विशेषाधिकारान् न समापयेत् अथवा न परिवर्तयेत् ; तथा

(ख) कमपि नागरिकं दायादस्य, आवण्टनस्य, व्यवस्थापनस्य रूपेण अथवा अन्तरणस्य कयापि अन्या-रीत्या भूमेः अर्जनात् अनुज्ञातः न कुर्यात् यदि एतादृशः नागरिकः बोडो-लैण्ड-प्रादेशिक-क्षेत्र-मण्डलस्य अन्तः भूमेः एतादृशाय अर्जनाय अन्यथा पात्रम् अस्ति।

(२) प्रच्छेदः ३ इत्यस्य अधीनं वा अस्य प्रच्छेदस्य अधीनं विनिर्मिताः सर्वे विधयः, यावत् पर्यन्तम् एषां सम्बन्धः सप्तमी-अनुसूच्याः सूची ३-इत्यत्र विनिर्दिष्टविषयेभ्यः अस्ति, राज्यपालस्य समक्षं सद्यः प्रस्तुयात्, यत् तं राष्ट्रपतेः विचारार्थम् आरक्षिताः भवेयुः।

(३) यदा कोऽपि विधिः राष्ट्रपतेः विचारार्थम् आरक्षितः अस्ति तदा राष्ट्रपतिः घोषयेत् यत् सः उक्तविधौ आज्ञापयति उत अवरोधयति।

प्रादेशिकपरिषदां, ताश्चेत् भवन्ति, प्राधिकाराधीनक्षेत्राणि वर्जयित्वा, सर्वेषां क्षेत्राणां सम्बन्धे निम्नलिखितविषयेषु विधीनां निर्माणस्य शक्तिः भवेत्-

(क) कृषेः पशुचारणस्य वा प्रयोजनार्थम्, अथवा निवासस्य, कृषिभिन्नस्य कार्यस्य वा प्रयोजनार्थम् अथवा कस्यापि एतादृशस्य अन्यप्रयोजनस्य कृते येन कस्यापि ग्रामस्य नगरस्य वा निवासिनां हितानाम् अभिवृद्धिः सम्भाव्यते, कस्यापि आरक्षितवनस्य भूमेः भिन्नायाः भूमेः आवण्टनम्, अधिभोगः, उपयोगः, पृथक्स्थापनं वा-

परन्तु एतादृशेषु विधिषु किमपि, अनिवार्यतया अर्जनं प्राधिकृतं कुर्वतः तदानीं प्रवृत्तस्य विधेः अनुसारेण, [1][सम्बन्धितराज्यस्य शासनम्] कस्याः अपि अधिभुक्तायाः अनधिभुक्तायाः वा भूमेः: लोकप्रयोजनार्थम् अनिवार्यतया अर्जनात् न निवारयेत्;

(ख) आरक्षितवनेतरस्य कस्यापि वनस्य प्रबन्धः;

(ग) कृषिप्रयोजनार्थं कस्याः अपि कुल्यायाः जलसरण्याः वा उपयोगः;

(घ) "झूम" पद्धत्याः स्थानपरिवर्तनशीलायाः कृषेः अन्यप्रकाराणां वा विनियमनम्;

(ङ) ग्रामाणां नगराणां वा समितीनां परिषदां वा स्थापना, तासां शक्तयश्च;

(च) ग्रामारक्षिणं, नगरारक्षिणं वा लोकस्वास्थ्यं वा लोकस्वच्छतां वा अन्तर्भावयन्, ग्रामप्रशासनेन नगरप्रशासनेन वा सम्बद्धः कोऽपि अन्यः विषयः;

(छ) प्रमुखानां, मुख्यानां वा नियुक्तिः उत्तराधिकारः वा;

(ज) सम्पत्तेः दायभागः;

[2][(झ) विवाहः, विवाहविच्छेदश्च];

(ञ) सामाजिकरूढयः।

(२) एतत्प्रच्छेदे "आरक्षितवनम्" इत्येतेन एतादृशं क्षेत्रम् अभिप्रेतं यत् असमवनविनियमः, १८९१ इत्यस्य अधीनं, प्रश्नगतक्षेत्रे तदानीं प्रवृत्तस्य कस्यापि अन्यस्य विधेः अधीनं वा आरक्षितवनम् अस्ति।

परन्तु राष्ट्रपतिः राज्यपालम् अयं निर्देशः दातुं शक्नुयात् यत् सः विधिं, यथास्थिति, बोडो-लैण्ड-प्रादेशिक-परिषदं एतादृशेन संदेशेन सह अयम् अनुरोधमानः प्रत्यावर्तयेत् यत् उक्तपरिषद् विधेः अथवा तस्य केषांचित् विनिर्दिष्टेषु उपबन्धेषु पुनर्विचारं कुर्यात् तथा विशिष्टतया, केषुचित् एतादृशेषु संशोधनेषु पुरःस्थापनस्य वाञ्छनीयतायाः विषये विचारयेत् यस्य तेन स्वीयसंदेशे पुरःप्रशंसः कृतः तथा यदा विधिः इत्थं प्रत्यावर्तयति तदा एतादृशः संदेशस्य प्राप्तेः दिनाङ्कात् षड्-मासस्य अवधेः मध्ये परिषद् एतादृशे विधौ तदनुसारं विचारयेत् यदि विधिः उक्तपरिषद् संशोधनसहितम् अथवा तं विना पुनः पारितः भवेत् तर्हि तं राष्ट्रपतेः समक्षं विचारार्थं प्रस्तुयात्।

1 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च केभ्यश्चित् शब्देभ्यः प्रति एषः शब्दसमूहः संनिवेशितः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 असमस्य पुनर्घटनं (मेघालयः) अधिनियमः, १९६९ (१९६९ वर्षस्य ५५-तमः) इत्यस्य ७४-अनुभागेन चतुर्थानुसूच्या च (झ) खण्डात् प्रति एषः खण्डः संनिवेशितः (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(३) एतत्प्रच्छेदस्य अधीनं निर्मिताः सर्वे विधयः सद्यः राज्यपालस्य समक्षं स्थापिताः भवेयुः यावत् च सः तान् न अनुमन्यते तावत् ते प्रभाविनः न भवेयुः।

[1]**४. स्वशासिमण्डलेषु स्वशासिप्रदेशेषु च न्यायप्रशासनम्-** (१) स्वशासिप्रदेशस्य प्रादेशिकपरिषद् एतादृश- प्रदेशाभ्यन्तरक्षेत्राणां विषये, स्वशासिमण्डलस्य मण्डलपरिषत् च तन्मण्डलाभ्यन्तरप्रादेशिकपरिषदां, ताश्चेद् भवन्ति, प्राधिकाराधीनक्षेत्रेभ्यः भिन्नानां, तन्मण्डलाभ्यन्तरीयक्षेत्राणां विषये, तेषां व्यवहारवादानां, विवादविषयाणां च विचारणार्थं येषां सर्वे अपि विवादिनः एतादृशक्षेत्रान्तर्गतानुसूचितजनजातिभिः सम्बद्धाः सन्ति ये च तेभ्यः व्यवहारवादेभ्यः विषयेभ्यश्च भिन्नाः सन्ति येषु एतस्याः अनुसूच्याः ५ प्रच्छेदस्य (१) उपप्रच्छेदस्य उपबन्धाः अनुप्रयुज्यन्ते, तद्राज्यस्य कमपि न्यायालयम् अपवर्ज्य, ग्रामपरिषदः, ग्रामन्यायालयान् वा सङ्घटयितुं क्षमते, उचितजनान् च एतादृशानां ग्रामपरिषदां सदस्यत्वेन, एतादृशन्यायालयानां वा पीठासीन-अधिकारित्वेन नियोक्तुं क्षमते, एतादृशान् अधिकारिणश्चापि नियोक्तुं क्षमते मे एतदनुसूच्याः ३ प्रच्छेदस्य अधीनं निर्मितविधीनां प्रशासनार्थम् आवश्यकाः भवेयुः।

(२) एतत्संविधाने किमपि सत्यपि, स्वशासिप्रदेशस्य प्रादेशिकपरिषद् तत्प्रादेशिकापरिषदा तदर्थं घटितः कोऽपि न्यायालयाः वा स्वशासिमण्डलान्तर्गतस्य कस्यापि क्षेत्रस्य अर्थे प्रादेशिकपरिषदः अभावे वा एतादृशमण्डलस्य मण्डलपरिषत्, तन्मण्डलपरिषदा तदर्थं घटितः कोऽपि न्यायालयः वा, एतदनुसूच्याः ५ प्रच्छेदस्य (१) उपप्रच्छेदस्य, उपबन्धाः येषु व्यवहारवादेषु, विषयेषु च प्रवर्तन्ते तानि वर्जयित्वा, एतत्प्रच्छेदस्य (१) उपप्रच्छेदस्य अधीनं यथायथम् एतादृशस्य प्रदेशस्य क्षेत्रस्य वा अभ्यन्तरे घटितया ग्रामपरिषदा, ग्रामन्यायालयेन या विचारणीयेषु सर्वेषु व्यवहारवादेषु विवादविषयेषु च पुनर्विचारन्यायालयस्य शक्तीः प्रयोजयेत् तथा च उच्चन्यायालयम्, उच्चतमन्यायालयं च विहाय, अन्यस्य कस्यापि न्यायालयस्य एतादृशेषु व्यवहारवादेषु विवादविषयेषु वा अधिकारिता न भवेत्।

(३) एतत् प्रच्छेदस्य (२) उपप्रच्छेदस्य उपबन्धाः येषु व्यवहारवादेषु विवादविषयेषु तेषु [2][* * *] उच्चन्यायालयस्य तादृशी अधिकारिता भवेत्, सा च तेन प्रयोज्येत, यादृशीं राज्यपालः काले-काले आदेशेन विनिर्दिशेत्।

---

[1] संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, २००३ (२००३ वर्षस्य ४४) इत्यस्य २-अनुभागेन (७-९-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) असमराज्य-प्रवर्तमानाय प्रच्छेदः (४) इति निम्नलिखितरूपेण संशोधितः यतः उपप्रच्छेदः ५ इत्यस्य अनन्तरं निम्नलिखितरूपेण अन्तःस्थापयेत्, अर्थात् :-

"(६) अस्य प्रच्छेदस्य कोऽपि विषयः अस्याः अनुसूच्याः प्रच्छेदः २ इत्यस्य उपप्रच्छेदः (३) इत्यस्य पारन्तुकाधीनं गठितं बोडो-लैण्ड-प्रादेशिक-परिषदं प्रति न प्रवर्तेत"।

[2] पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च "असमस्य" इति शब्दः लोपितः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(४) यथायथं प्रादेशिकपरिषद्, मण्डलपरिषद् वा राज्यपालस्य पूर्वानुमोदनेन-

(क) ग्रामपरिषदां, ग्रामन्यायालयानां च घटनस्य एतत्प्रच्छेदस्य अधीनं प्रयोक्तव्यानां तेषां शक्तीनां च,

(ख) एतत्प्रच्छेदस्य (१) उपप्रच्छेदस्य अधीनं व्यवहारवादानां विषयाणां च विचारणायां परिषद्भिः न्यायालयैः वा अनुसरणीयायाः,

(ग) एतत्प्रच्छेदस्य (२) उपप्रच्छेदस्य अधीनं पुनर्विचारेषु अन्यकार्यप्रवृत्तिषु च प्रादेशिकपरिषदा मण्डलपरिषदा वा एतादृशपरिषदा घटितेन केनापि न्यायालयेन वा अनुसरणीयप्रक्रियायाः,

(घ) एतादृशानां परिषदां न्यायालयानां च ये विनिश्चयाः आदेशाश्च तेषां प्रवर्तनस्य,

(ङ) एतत्प्रच्छेदस्य (१) उपप्रच्छेदस्य (२) उपप्रच्छेदस्य च उपबन्धान् कार्यान्वितान् कर्तुम् अन्येषां सर्वेषाम् आनुषङ्गिकविषयाणां च, विनियमनार्थं नियमान् निर्मातुं क्षमते।

[1]*[(५) तस्मात् दिनाङ्कात् यं राष्ट्रपतिः [2][सम्बद्धराज्यशासनेन सह परामृश्य] अधिसूचनया एतदर्थं नियतं कुर्यात्, एषः प्रच्छेद: तस्य स्वशासिमण्डलस्य, स्वशासिप्रदेशस्य वा सम्बन्धे यद् अधिसूचनायां विनिर्दिष्टं भवेत् तथा प्रभावी भवेत् यथा इव-

(प्रथमः) (१) उपप्रच्छेदे "येषां सर्वे अपि विवादिनः एतादृश क्षेत्रान्तर्गतानुसूचितजनजातिभिः सम्बद्धाः भवन्ति ये च तेभ्यः व्यवहारवादेभ्यः विषयेभ्यश्च भिन्नाः सन्ति, येषु एतस्याः अनुसूच्याः ५-प्रच्छेदस्य (१) उपप्रच्छेदस्य उपबन्धाः अनुप्रयुज्यन्ते" इत्येतेभ्यः शब्देभ्यः प्रति "ये अस्याः अनुसूच्याः ५-प्रच्छेदस्य (१) उप-प्रच्छेदे विनिर्दिष्टप्रकाराः एतादृशाः वादाः विवादविषयाः वा न सन्ति यानि राज्यपालः एतदर्थं विनिर्देष्टुं क्षमते" इत्येते शब्दाः संनिवेशिताः स्युः;

(द्वितीयः) (२) उपप्रच्छेदः (३) उपप्रच्छेदश्च लोपिते स्याताम्;

(तृतीयः) (४) उपप्रच्छेदे-

(क) "यथायथं प्रादेशिकपरिषद्, मण्डलपरिषद् वा राज्यपालस्य पूर्वानुमोदनेन" इत्येतस्मात् शब्दसमूहात्प्रति "राज्यपालः" इति शब्दः संनिवेशितः स्यात्;

(ख) (क) खण्डात् प्रति निम्नलिखितः खण्डः संनिवेशितः स्यात्, तद्यथा-

---

[1] असमस्य पुनर्घटनं (मेघालयः) अधिनियमः, १९६९ (१९६९ वर्षस्य ५५-तमः) इत्यस्य ७४-अनुभागेन चतुर्थानुसूच्याः च एषः उपप्रच्छेदः अन्तर्वेशितः (२-४-१९०० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[2] पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च केभ्यश्चित् शब्देभ्यः प्रति एषः शब्दसमूहः संनिवेशितः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

"(क)" ग्रामपरिषदां ग्रामन्यायालयानां च घटनस्य, एतत्प्रच्छेदस्य अधीनं तैः प्रयोक्तानां शक्तीनां, तथा ग्रामपरिषदां, ग्रामन्यायालयानां च विनिश्चयानां पुनर्विचारणाभ्यर्थना येभ्य: क्रियेत तेषां न्यायालयानां च,"

(ग) (ग) खण्डात् प्रति निम्नलिखितः खण्डः संनिवेशितः स्यात्, तद्यथा-

"(ग) प्रादेशिकपरिषदः, मण्डलपरिषदः वा समक्षम् अथवा एतादृश्या परिषदा घटितस्य कस्यापि न्यायालयस्य समक्षं, नियतदिनाङ्कात् अव्यवहितपूर्वं लम्बितानां पुनर्विचारप्रार्थनानाम्, अन्य-प्रक्रियाणां च राष्ट्रपतिना अन्तरणस्य"; तथा च

(घ) (ङ) खण्डे "(१) उपप्रच्छेदस्य, (२) उपप्रच्छेदस्य च" इत्येतेभ्यः शब्देभ्यः कोष्ठकाभ्याम् अङ्काभ्यां च प्रति" (१) उपप्रच्छेदस्य" इत्येषः शब्दः, कोष्ठकम्, अङ्कश्च संनिवेशितानि स्युः ।]

५. केषांचित् व्यवहारवादानां विवादविषयाणाम् अपराधानां च विचारणार्थं प्रादेशिकपरिषद्भ्यः मण्डलपरिषद्भ्यश्च केभ्यश्चित् न्यायालयेभ्यः अधिकारिभ्यश्च व्यवहारप्रक्रियासंहिता १९०८ इत्यस्याः दण्डप्रक्रिया-संहिता, [1]१८९८ इत्यस्याश्च अधीनं शक्तीनां प्रदानम्- (१) राज्यपालः कस्मिन् अपि स्वशासिमण्डले स्वशासिप्रदेशे वा, तत्कृते राज्यपालेन विनिर्दिष्टात् कस्मादपि प्रवृत्तात् विधेः उद्भवतां व्यवहारवादानां विवाद-विषयाणां वा विचारणार्थम् अथवा भारतीयदण्डसंहितायाः अधीनम्, एतादृशे मण्डले, प्रदेशे वा तदानीं प्रवृत्तस्य कस्यापि विधेः अधीनं वा मृत्युना, आजीवनं निर्वासनेन, पञ्चवर्षावधेः अन्यूनेन कारावसेन वा दण्डनीयानाम् अपराधानां विचारणार्थम् एतादृशे मण्डले, प्रदेशे वा प्राधिकारवत्यै मण्डलपरिषदे प्रादेशिकपरिषदे वा एतादृशमण्डलपरिषदा घटितेभ्यः न्यायालयेभ्यः वा तदर्थं राज्यपालेन नियुक्ताय कस्मैचिद् अधिकारिणे वा यथायथं व्यवहारप्रक्रिया-संहिता १९०८ इत्यस्याः, दण्डप्रक्रियासंहिता [1]१८९८ इत्यस्याः वा अधीनं तादृशीः शक्तीः प्रदातुं क्षमते यादृशीः सः उचितं मन्यते, तदनन्तरं च उक्ता परिषद्, न्यायालयः, अधिकारी वा एवं प्रदत्तानां शक्तीनां प्रयोगेण व्यवहार-वादानां, विवादविषयाणाम् अपराधानां व विचारणं कुर्यात् ।

(२) राज्यपालः कस्मैचित् मण्डलपरिषदे, प्रादेशिकपरिषदे, कस्मैचित् न्यायालयाय, अधिकारिणे वा, एतत्प्रच्छेदस्य (१) उपप्रच्छेदस्य अधीनं प्रदत्तानां शक्तीनां कामपि प्रत्यादातुम् उपान्तरितो वा कर्तुं क्षमते ।

(३) एतत्प्रच्छेद अभिव्यक्तरूपेण उपबन्धितं विहाय, व्यवहारप्रक्रिया संहिता १९०८, दण्डप्रक्रियासंहिता, [1]१८९८ च कस्मिन् अपि स्वशासिमण्डले कस्मिन् अपि स्वशासिप्रदेशे, वा यत्र एतत्प्रच्छेदस्य उपबन्धाः अनुप्रयुज्यन्ते केषामपि व्यवहारवादानां, विवादविषयाणाम्, अपराधानां वा विचारणायां नानुप्रयुज्येताम् ।

---

[1] अधुना दण्डप्रक्रियासंहिता, १९७३ (१९७४ वर्षस्य २ (द्वितीयः) अधिनियमः) द्रष्टव्यः ।

[1][(४) राष्ट्रपतिना कस्यापि स्वशासिमण्डलस्य स्वशासिप्रदेशस्य वा सम्बन्धे ४-प्रच्छेदस्य (४) उप-प्रच्छेदस्य अधीनं नियतात् दिनाङ्कात् एव एतत्प्रच्छेदगतं किमपि तस्य तस्मिन् मण्डले प्रदेशे वा अनुप्रयोगस्य सम्बन्धे कस्यै अपि मण्डलपरिषदे, प्रादेशिकपरिषदे वा, अथवा मण्डलपरिषदा घटितन्यायालयेभ्यः वा एतत्-प्रच्छेदस्य (१) उपप्रच्छेदे निर्दिष्टाभ्यः शक्तिभ्यः कामपि शक्तिं राज्यपालं प्राधिकृतं करोति इति इव न मन्येत ।]

[2][**६. प्राथमिकविद्यालयादीन् स्थापयितुं मण्डलपरिषदः शक्तयः-** (१) स्वशासिमण्डलस्य मण्डलपरिषदः मण्डले प्राथमिकविद्यालयानाम्, औषधालयानाम्, विपणीणाम्, [3][पश्ववरोधानाम्], नौघट्टानाम्, मीनक्षेत्राणां मार्गाणां मार्गपरिवहणस्य, जलपथानां च स्थापनाम्, निर्माणम्, प्रबन्धं च कर्तुं क्षमते, तथा राज्यपालस्य पूर्वानुमोदनेन एतेषां विनियमनाय, नियन्त्रणाय च, विनियमान् निर्मातुं क्षमते, तथा च विशिष्टतया मण्डले प्राथमिकविद्यालयेषु प्राथमिकशिक्षा कस्यां भाषायां कया च रीत्या दीयेत इत्येतद् विहितं कर्तुं क्षमते ।

(२) राज्यपालः मण्डलपरिषदः सहमत्या एतत्परिषदे, एतस्याः अधिकारिभ्यः वा कृषेः, पशुपालनस्य, सामुदायिकपरियोजनानाम्, सहकारमण्डलीनाम्, समाजकल्याणस्य, ग्रामयोजनायाः अथवा कस्यापि अन्यस्य विषयस्य सम्बन्धे यस्मिन् [4][***] राज्यस्य कार्यपालिकाशक्तिः विस्तृता भवति, सप्रतिबन्धम् अप्रतिबन्धं वा, कृत्यानि न्यस्तुं क्षमते ।]

७. मण्डलनिधयः, प्रादेशिकनिधयश्च- (१) प्रत्येकस्वशासिमण्डलार्थं मण्डलनिधिः, प्रत्येकस्वशासिप्रदेशार्थं च प्रादेशिकनिधिः घटितः भवेत् यस्मिन् क्रमशः तन्मण्डलस्य मण्डलपरिषदा, तत्प्रदेशस्य प्रादेशिकपरिषदा च एतत्संविधानस्य उपबन्धानाम् अनुसारेण यथायथं तन्मण्डलस्य तत्प्रदेशस्य वा प्रशासनक्रमे प्राप्तानि सर्वाणि धनानि आकलितानि भवेयुः ।

---

1 असमस्य पुनर्घटनं (मेघालयः) अधिनियमः, १९६९ (१९६९ वर्षस्य ५५-तमः) इत्यस्य ७४-अनुभागेन चतुर्थानुसूच्या च एषः उपप्रच्छेदः अन्तर्वेशितः (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन उक्तानुसूच्या च ६-प्रच्छेदात् प्रति एषः प्रच्छेदः संनिवेशितः (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

3 निरसनं तथा संशोधनम् अधिनियमः, १९७४ (१९७४ वर्षस्य ५६-तमः) ४-अनुभागेन (२०-१२-१९७४ दिनाङ्कात् प्रवर्तमानप्रभावेण) "पश्ववरोधानाम्" इत्यस्य स्थाने प्रतिष्ठापितः ।

4 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च "असमस्य यथायथं मेघालयस्य वा" इत्येषः शब्दसमूहः लोपितः (२१-२-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

[1][(२) राज्यपालः, यथायथं मण्डलनिधेः प्रादेशिकनिधेः वा प्रबन्धार्थं तथा उक्तनिधौ धनस्य आकलनार्थम्, तस्मात् धनस्य प्रत्याहरणार्थम्, तस्मिन् धनस्य अभिरक्षार्थं च तथा उक्तविषयैः सम्बद्धस्य तेषां आनुषङ्गिकस्य वा कस्यापि विषयस्य सम्बन्धे अनुसरणीयप्रक्रियार्थम्, नियमान् निर्मातुं क्षमते।

(३) यथायथं मण्डलपरिषदः प्रादेशिकपरिषदः वा लेखाः एतादृशे प्रारूपे रक्षिताः भवेयुः यादृशं भारतस्य नियन्त्रकमहालेखापरीक्षकः राष्ट्रपतेः अनुमोदनेन विहितं कुर्यात्।

(४) नियन्त्रकमहालेखापरीक्षकः मण्डलपरिषदां, प्रादेशिकपरिषदां च लेखानां परीक्षां तथा रीत्या कारयेत् यां स उचितां मन्येत तथा नियन्त्रकमहालेखापरीक्षकस्य एतादृशलेखाभिः सम्बद्धानि प्रतिवेदनानि राज्यपालस्य समक्षं प्रस्तुतानि भवेयुः यः तानि परिषदः समक्षं स्थापितानि कारयेत्।]

८. भूराजस्वस्य निर्धारणाय, सङ्ग्रहणाय तथा च कराधिरोपणाय शक्तिः- (१) स्वशासिप्रदेशस्य प्रादेशिकपरिषदः एतादृशप्रदेशस्य अन्तर्गतानां सर्वासां भूमीनां विषये, स्वशासिमण्डलस्य मण्डलपरिषदश्च, मण्डलान्तर्गतानां प्रादेशिकपरिषदां, ताः भवन्ति चेत्, प्राधिकाराधीनेषु क्षेत्रेषु स्थिताः भूमीः विहाय, मण्डलान्तर्गतानां सर्वासाम् अन्यासां भूमीनां विषये [2][सामान्यतया राज्ये भूराजस्वस्य प्रयोजनार्थं भूमीनां परिगणने राज्यशासनेन] अनुस्रियमाणानां सिद्धान्तानाम् अनुसारेण भूराजस्वं निवारयितुं सङ्ग्रहीतुं च शक्तिः भवेत्।

(२) स्वशासिप्रदेशस्य प्रादेशिकपरिषदः एतादृशप्रदेशस्य अन्तर्गतानां क्षेत्राणां विषये, स्वशासिमण्डलस्य मण्डलपरिषदश्च मण्डलस्य अन्तर्गतानां प्रादेशिकपरिषदाम्, ताः भवन्ति चेत्, प्राधिकाराधीनं क्षेत्राणि विहाय, मण्डलान्तर्गतानां सर्वेषाम् अन्येषां क्षेत्राणां विषये भूमिषु गृहेषु च करान्, एतादृशेषु क्षेत्रेषु निवासं कुर्वद्भ्यः जनेभ्यश्च पथकरम् उद्ग्रहीतुं सङ्ग्रहीतुं च शक्तिः भवेत्।

(३) स्वशासिमण्डलस्य मण्डलपरिषदः एतादृशस्य मण्डलस्य अभ्यन्तरे निम्नलिखितेषु करेषु सर्वान् कांश्चित् वा उद्ग्रहीतुम्, सङ्ग्रहीतु च शक्तिः भवेत्, तद् यथा-

(क) वृत्तिषु, व्यापारेषु, आजीविकासु, नियोजनासु च कराः;

(ख) प्राणिषु, यानेषु, नौषु च कराः;

---

[1] असमस्य पुनर्घटनं (मेघालयः) अधिनियमः, १९६९ (१९६४ वर्षस्य ५५-तमः) इत्यस्य ७४-अनुभागेन चतुर्थानुसूच्या च (२) उपप्रच्छेदात् प्रति एते उपप्रच्छेदाः संनिवेशताः (२-४-१९७० दिनाङ्कात् प्रवर्तमान-प्रभावेण)।

[2] पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च केभ्यश्चित् शब्देभ्यः प्रति एषः शब्दसमूहः संनिवेशितः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(ग) कस्यामपि विपणौ तत्र विक्रयार्थं भाण्डानां प्रवेशे कराः; नौभिः उह्यमानेषु जनेषु भाण्डेषु च पथकरा; [1][***]

(घ) विद्यालयानाम्, औषधालयानाम्, मार्गाणां वा सुस्थित्यै कराः; [2][च]

[3][(ङ) मनोरञ्जने आमोदप्रमोदे च कराः ।]

(४) एतत्प्रच्छेदस्य (२) उपप्रच्छेदे, (३) उपप्रच्छेदे च विनिर्दिष्टेषु करेषु कस्यापि उद्ग्रहणं, सङ्ग्रहणं च उपबन्धितकर्तुं यथायथं प्रादेशिकपरिषद्, मण्डलपरिषद् वा विनियमान् निर्मातुं क्षमते; [4][एतादृशं प्रत्येकं विनियमश्च सद्यः राज्यपालस्य समक्षं स्थापयेत्; सः च, यावत् तेन न अनुमन्येत, तावत् कार्यकरः न भवेत् ।]

[5]**९. खनिजानां पूर्वेक्षणार्थं निष्कर्षणार्थं वा अनुज्ञप्तयः भाटकपत्रप्रदानं वा** (१) कस्यापि स्वशासि-मण्डलस्य अन्तर्गतस्य कस्यापि क्षेत्रस्य सम्बन्धे [6][राज्यस्य शासनेन] खनिजानां पूर्वेक्षणार्थम्, निष्कर्षणार्थं वा दत्तेभ्यः अनुज्ञप्तिभ्यः भाटकपत्रेभ्यः वा प्रतिवर्षं प्रोद्भूयमानस्य स्वामिस्वस्य एतादृशः अंशः तस्यै मण्डलपरिषदे तथा दीयेत यथा [6][राज्यस्य शासनस्य] एतादृशमण्डलस्य मण्डलपरिषदश्च मध्ये समयः कृतः भवेत् ।

(२) मण्डलपरिषदे प्रदातव्यस्य एतादृशस्य स्वामिस्वांशस्य विषये यदि कश्चिद् विवादः उत्पद्यते तर्हि सः राज्यपालाय अवधारणार्थं निर्देश्यः, राज्यपालेन च स्वविवेकानुसारम् अवधारितः राशिः एतत् प्रच्छेदस्य (१) उपप्रच्छेदस्य अधीनं मण्डलपरिषदे सन्देयः राशिः मन्येत, राज्यपालस्य विनिश्चयश्च अन्तिमः भवेत् ।

---

1 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६, १६(i)-अनुभागेन अन्ते विद्यमानः 'च'-शब्दः लोपितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण) "च" इति शब्दः विलोपितः ।

2 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६, १६(ii)-अनुभागेन एषः खण्डः अन्तर्वेशितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

3 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६, १६(iii)-अनुभागेन एषः खण्डः अन्तर्वेशितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

4 असमस्य पुनर्घटनं (मेघालयः) अधिनियमः, १९६९ (१९६९ वर्षस्य ५५-तमः) इत्यस्य ७४-अनुभागेन चतुर्थानुसूच्या च (२) उपप्रच्छेदात् प्रति एते उपप्रच्छेदाः संनिवेशताः (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

5 संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९८८ (१९८८ वर्षस्य ६७) इत्यस्य २-अनुभागेन (१६-१२-१९८८ दिनाङ्कात् प्रवर्तमानप्रभावेण) त्रिपुरा-मिजोरम-राज्य-प्रवर्तमानाय प्रच्छेदः (९) इति निम्नलिखितरूपेण संशोधितः यतः उपप्रच्छेदः २ इत्यस्य अनन्तरं निम्नलिखित-उपप्रच्छेद-रूपेण अन्तःस्थापयेत्, अर्थात् :-
"राज्यपालः अयं विनिर्देशेत् यत् अस्य प्रच्छेदस्य अधीनं मण्डलपरिषदं दीयमानं स्वामित्वस्य अंशः तां परिषदं यथास्थिति उपप्रच्छेदः (१) इत्यस्य अधीनं कोऽपि समयस्य अथवा उपप्रच्छेदः (२) इत्यस्य अधीनं कोऽपि अवधारणस्य दिनाङ्कात् आवर्षावधेः अन्तःकुर्यात्"

6 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च "असमस्य शासनस्य" इति एताभ्यां शब्दाभ्यां प्रति एतौ शब्दौ संनिवेशितौ (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

(षष्ठी अनुसूची)

[1]**१०. जनजातिभ्यः भिन्नजनानाम्, बुद्धिजीवित्वस्य व्यापारस्य च नियन्त्रणार्थं मण्डलपरिषदः विनियमनिर्माणस्य शक्तिः-** (१) स्वशासिमण्डलस्य मण्डलपरिषत् तस्मिन् मण्डले तत्र निवसन्तीभ्यः जनजातिभ्यः भिन्नानां जनानां वृद्धिजीवित्वस्य, व्यापारस्य च विनियमनार्थं नियन्त्राणार्थं च विनियमान् निर्मातुं क्षमते।

(२) विशेषतः, पूर्वगामिशक्तेः व्यापकतायां विपरीतप्रभावेण विना च एतादृशाः विनियमाः विधातुं क्षमन्ते यत्-

(क) तदर्थं दत्ताम् अनुज्ञप्तिम्, धारयन्तं जनम् अन्तरेण कोऽपि अन्यः वृद्धिजीवित्वस्य कार्यं न कुर्यात्;

(ख) वृद्धिजीविना आरोप्यं प्राप्यं वा वृद्धेः अधिकतमं मानं किं भवेत्;

(ग) वृद्धिजीविभिः लेखानां रक्षणस्य, मण्डलपरिषद्भिः तदर्थं नियुक्तैः अधिकारिभिः एतादृशलेखानां निरीक्षणस्य च उपबन्धं कुर्यात्;

(घ) कोऽपि जन: यः मण्डले निवसन्तीनां जनजातीनां जनः न वर्तते, मण्डलपरिषदा तदर्थं दत्तया अनुज्ञप्त्या एव कस्यापि वस्तुनः राशिशः, अल्पशः वा पण्यकार्यं कुर्यात्, नान्यथा परन्तु एतत्प्रच्छेदस्य अधीनम् एतादृशाः विनियमाः तावत् न निर्मीयेरन् यावत् ते मण्डलपरिषदः समस्तसदस्यानां सङ्ख्यायाः चतुर्थांशत्रयात् अन्यूनेन बहुमतेन पारिताः न भवेयुः;

---

[1] संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९८८ (१९८८ वर्षस्य ६७) इत्यस्य २-अनुभागेन (१६-१२-१९८८ दिनाङ्कात् प्रवर्तमानप्रभावेण) त्रिपुरा-मिजोरम-राज्य-प्रवर्तमानाय प्रच्छेदः (१०) इति निम्नलिखित-उपप्रच्छेद-रूपेण अन्तःस्थापयेत्, :-

(क.)शीर्षके "जनजातिभ्यः पृथक्-जनानां" शब्दानां लोपः कुर्यात् ;

(ख.)उपप्रच्छेदः (१) इत्यत्र "जनजातिभ्यः पृथक्" शब्दानां लोपः कुर्यात् ;

(ग.) उपप्रच्छेदः (२) इत्यत्र प्रच्छेदः (घ) इत्यस्य स्थाने निम्नलिखितः प्रच्छेदः स्थापयेत् अर्थात् :-

"(घ) कोऽपि जनः यः मण्डले निवासी अस्ति मण्डलपरिषदा अनेन निमित्तेन दत्तः अनुज्ञप्तेः अधीनं कोऽपि महाविक्रेता अथवा अल्प-विक्रेता व्यापारं करिष्यते न वा करिष्यते इति विधीयेत"

अपरं च, एतादृशानां केषामपि विनियमानाम् अधीनम् एतादृशानां विनियमानां निर्माणकालात् पूर्वं मण्डलस्य अभ्यन्तरे व्यापारं कुर्वते वृद्धिजीविने, व्यापारिणे वा अनुज्ञप्तिदाने निषेधस्य क्षमता न भवेत्।

(३) एतत्प्रच्छेदस्य अधीनं निर्मिताः सर्वे विनियमाः सद्यः राज्यपालस्य समक्षं स्थाप्येरन्;

यावत् च सः तान् नानुमन्यते तावत् ते प्रभाविनः न भवेयुः।

*   *   *   *

११. एतदनुसूच्याः अधीनं विनिर्मितानां विधीनां नियमानाम्, विनियमानां च प्रकाशनम्- मण्डलपरिषदा प्रादेशिकपरिषदा वा एतदनुसूच्याः अधीनं निर्मिताः सर्वे विधयः, नियमाः, विनियमाश्च राज्यस्य राजपत्रे सद्यः प्रकाश्येरन्, एतादृशे प्रकाशने च ते विधिवत् कार्यकराः भवेयुः।

*******१२. [1][असमराज्यस्य स्वशासिमण्डलेषु स्वशासिप्रदेशेषु च संसद् असमराज्यस्य विधानमण्डलस्य अधिनियमानाम् अनुप्रयोगः]**- (१) एतत्संविधाने किमपि सत्यपि-

---

* संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, २००३ (२००३ वर्षस्य ४४) इत्यस्य २-अनुभागेन (७-९-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) असमराज्य-प्रवर्तमानाय प्रच्छेदः (१०) इति निम्नलिखितरूपेण संशोधितः, यस्मिन् उपप्रच्छेदः (३) इतः परं निम्नलिखितरूपेण अन्तर्वेशितः।

"(४) अस्य प्रच्छेदस्य कोऽपि विषयः, अस्याः अनुसूच्याः २ इत्यस्य उप-प्रच्छेदः (३) इत्यस्य पारन्तुकस्य अधीनं गठितं बोडोलैण्डप्रादेशिकपरिषद् इत्यत्र न प्रवर्तेत"

** संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९९५ (१९९५ वर्षस्य ४२) इत्यस्य २-अनुभागेन (१२-९-१९९५ दिनाङ्कात् प्रवर्तमानप्रभावेण) असमराज्य-प्रवर्तमानाय प्रच्छेदः (१२) इति निम्नलिखितरूपेण संशोधितः अर्थात् :-

'प्रच्छेदः १२ इत्यस्य उपप्रच्छेदः (१) इत्यस्य प्रच्छेदः (क) इत्यत्र, "अस्याः अनुसूच्याः प्रच्छेदः ३ अथवा प्रच्छेदः ३क इत्यत्र एतादृशानां विषयाणां रूपेण विनिर्दिष्टः अस्ति" शब्दानाम्, अङ्कानां तथा अक्षराणां स्थाने, "अस्याः अनुसूच्याः प्रच्छेदः ३ अथवा प्रच्छेदः ३क अथवा प्रच्छेदः ३ख इत्यत्र एतादृशानां विषयाणां रूपेण विनिर्दिष्टः अस्ति" शब्दाः अङ्काः तथा अक्षराश्च स्थापयेयुः'।

*** संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, २००३ (२००३ वर्षस्य ४४) इत्यस्य २-अनुभागेन (७-९-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) असमराज्य-प्रवर्तमानाय प्रच्छेदः (१२) इति निम्नलिखितरूपेण संशोधितः अर्थात् :-

'प्रच्छेदः १२ इत्यस्य उपप्रच्छेदः (१) इत्यस्य प्रच्छेदः (क) इत्यत्र, "अस्याः अनुसूच्याः प्रच्छेदः ३ अथवा प्रच्छेदः ३क इत्यत्र एतादृशानां विषयाणां रूपेण विनिर्दिष्टः अस्ति" शब्दानाम्, अङ्कानां तथा अक्षराणां स्थाने, "अस्याः अनुसूच्याः प्रच्छेदः ३ अथवा प्रच्छेदः ३क अथवा प्रच्छेदः ३ख इत्यत्र एतादृशानां विषयाणां रूपेण विनिर्दिष्टः अस्ति" शब्दाः अङ्काः तथा अक्षराश्च स्थापयेयुः'।

[1] पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(भ)-अनुभागेन अष्टमानुसूच्या च शीर्षकात् प्रति एतत् संनिवेशितम् (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(षष्ठी अनुसूची)

(क) [1][असमराज्यस्य विधानमण्डलस्य] कोऽपि अधिनियमः यः तेषां विषयाणां सम्बन्धे विद्यते ये एतदनुसूच्याः ३-प्रच्छेदे तादृशविषयाः इव विनिर्दिष्टाः सन्ति, तेषां सम्बन्धे मण्डलपरिषद्-प्रादेशिकपरिषद् वा विधीन् निर्मातुं क्षमते, तथा असमराज्यस्य विधानमण्डलस्य कोऽपि अधिनियमः यः कस्यापि अनासुतस्य माद्यसारिकपानस्य उपभोगस्य प्रतिषेधं निबन्धनं वा करोति, [2][तद्राज्यस्य] कस्मिन् अपि स्वशासिमण्डले स्वशासिप्रदेशे वा तावत् नानुप्रयुज्येत यावत् अन्यतरस्यामपि स्थितौ, एतादृशस्य मण्डलस्य, एतादृशस्य प्रदेशस्य वा अधिकारितावती मण्डलपरिषद् लोकाधिसूचनया तथा न निदिशति, तथा च मण्डल-परिषत् कस्यापि अधिनियमस्य विषये एतादृशनिदेशनं कुर्वती एतद् अपि निदेष्टुं क्षमते यत् तादृशे मण्डले, प्रदेशे वा तस्य कस्मिन् अपि भागे वा अनुप्रयोगे अधिनियमः तादृशैः अपवादैः उपान्तरणैः वा सह कार्यकरः भवेत् यथा सा उचितं मन्यते।

(ख) राज्यपाल: लोकाधिसूचनया निदेष्टुं क्षमते यत् संसदः अथवा [1][असमराज्यस्य विधानमण्डलस्य] कोऽपि अधिनियमः यम् एतदुपप्रच्छेदस्य (क) खण्डस्य उपबन्धाः नानुप्रयुज्यन्ते, [2][तद्राज्यस्य] कस्मिन् अपि स्वशासिमण्डले, स्वशासिप्रदेशे वा नानुप्रयुज्येत अथवा एतादृशे मण्डले प्रदेशे वा तस्य कस्मिन् अपि भागे वा एतादृशैः अपवादैः उपान्तरणैः सह अनुप्रयुज्येत यथा सः तस्याम् अधिसूचनायां विनिर्दिशेत्।

(२) एतत्प्रच्छेदस्य (१) उपप्रच्छेदस्य अधीनं दत्तः कोऽपि निदेशः तथा दातुं शक्यते यथा तस्य भूतलक्षिप्रभावः अपि भवेत्।

[3][१२क. संसद्, मेघालयराज्यस्य विधानमण्डलस्य च अधिनियमानां मेघालयराज्यस्य स्वशासिमण्डलेषु, स्वशासिप्रदेशेषु च अनुप्रयोगः – एतत्संविधाने किमपि सत्यपि

---

1 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन उक्तानुसूच्या च "राज्यस्य विधानमण्डलस्य" इत्येताभ्यां शब्दाभ्यां प्रति एते शब्दाः संनिवेशिताः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन उक्तानुसूच्या एतत् पदम् अन्तर्वेशितम् (२१-१-१६७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन उक्तानुसूच्या च १२अ-प्रच्छेदात् प्रति एषः प्रच्छेदः संनिवेशितः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(क) एतदनुसूच्याः ३-प्रच्छेदस्य (१) उपप्रच्छेदे विनिर्दिष्टस्य कस्यापि विषयस्य सम्बन्धे मेघालय- राज्यस्य मण्डलपरिषदा प्रादेशिकपरिषदा वा निर्मितस्य विधेः कोऽपि उपबन्धः अथवा एतदनुसूच्याः ८-प्रच्छेदस्य १०-प्रच्छेदस्य वा अधीनं तद्राज्यस्य मण्डलपरिषदा प्रादेशिकपरिषदा वा निर्मितस्य कस्यापि विनियमस्य कोऽपि उपबन्धः यदि एतद्विषयस्य सम्बन्धे मेघालयराज्यस्य विधानमण्डलेन निर्मितस्य विधेः कस्यापि उपबन्धस्य विरोधी अस्ति, तर्हि यथायथं मण्डलपरिषदा, प्रादेशिकपरिषदा वा, मेघालयराज्यस्य विधानमण्डलेन विधिः निर्मितः भवति तत्पूर्वं, तत्पश्चात् वा, निर्मितः विधिः विनियमः वा यावत् पर्यन्तं सः विरोधी अस्ति तावत् पर्यन्तं, शून्यः भवेत्, मेघालयराज्यस्य विधानमण्डलेन निर्मितश्च विधिः तत्र अभिभावी भवेत्;

(ख) राष्ट्रपतिः संसदः कस्यापि अधिनियमस्य सम्बन्धे अधिसूचनया निदेष्टुं क्षमते, यत् मेघालयराज्यस्य कस्मिन् अपि स्वशासिमण्डले, स्वशासिप्रदेशे वा नानुप्रयुज्येत अथवा एतादृशे मण्डले, प्रदेशे वा तस्य कतमस्मिन् अपि भागे वा तादृशैः अपवादैः उपान्तरणैः वा सह अनुप्रयुज्येत यादृशानि सः अधिसूचनायां विनिर्दिशेत् तथा एतादृशः कोऽपि निदेशः तथा दीयेत यथा भूतलक्षिप्रभावेण कार्यकरः भवेत्।

[1][**१२कक. त्रिपुरा राज्ये स्वशासिमण्डलान् तथा स्वशासिपरिक्षेत्राणि संसदः तथा त्रिपुराराज्यस्य विधान-मण्डलस्य अधिनियमान् प्रवर्तेत-** अस्मिन् संविधाने यत् किमपि सत्यपि,

(क) त्रिपुराराज्यस्य विधान-मण्डलस्य कोऽपि अधिनियमः, यः एतादृशेषु विषयेषु कस्यचित् विषयस्य सम्बन्धे अस्ति, यम् अस्याः अनुसूच्याः (३) खण्डे एतादृशानां विषयाणां रूपे विनिर्दिष्टः, यद्विषये मण्डलपरिषद् अथवा क्षेत्रीयपरिषद् विधिनिर्मातुं शक्नुयात्, तथा त्रिपुराराज्यस्य विधान-मण्डलस्य कोऽपि अधिनियमः यः कस्यचित् "अनासुत-माद्यसारिकपानस्य" उपभोगं प्रतिषेधयति अथवा निर्बध्नाति, तस्मिन् राज्ये कञ्चित् स्वशासिमण्डलम् अथवा स्वशासिपरिक्षेत्रं तावत् पर्यन्तं न प्रवर्तेत यावत् पर्यन्तम् उभयोः दशयोः प्रत्येकं, तस्य मण्डलस्य मण्डलपरिषदि अथवा एतादृशे क्षेत्रे अधिकारिताम् आदधाना मण्डलपरिषद् लोकाधिसूचनया इत्थं न विनिर्दिशेत् तथा मण्डलपरिषद् कस्यचित् अधिनियमस्य सम्बन्धे इत्थं विनिर्दिष्टे काले अयं विनिर्दिष्टुं शक्नुयात् यत् सः अधिनियमः तस्य मण्डलस्य अथवा परिक्षेत्रस्य अथवा तस्य कस्मिन् अपि भागे प्रवर्तमाने एतादृशानाम् अपवादानाम् उपान्तरणानाम् अधीने सति प्रभावी भवेत् यत् सा उचिता अवगच्छेत्;

---

1 खण्डः १२कक संविधानस्य (एकोनपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८४, वर्षस्य ४-अनुभागेन (१-४-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः तथा तदनन्तरं संविधानस्य षष्ठी-अनुसूची-(संशोधनम्) अधिनियमः, १९८८ (१९८८ वर्षस्य ६७) इत्यस्य २-अनुभागेन (१६-१२-१९८८ दिनाङ्कात् प्रवर्तमानप्रभावेण) खण्डः १२कक तथा १२ख इत्यनयोः स्थाने संनिवेशितः।

(ख) राज्यपालः, लोकाधिसूचनया, निर्देशं दातुं शक्नुयात् यत् त्रिपुराराज्यस्य विधानमण्डलस्य कोऽपि अधिनियमः, यम् अस्य उपप्रच्छेदस्य खण्डः (क) इत्यस्य उपबन्धाः न प्रवर्तेरन्, तस्मिन् राज्ये कस्मिंश्चित् स्वशासिमण्डले अथवा स्वशासिपरिक्षेत्रे न प्रवर्तेरन् अथवा एतादृशे मण्डले अथवा परिक्षेत्रे तस्य च कस्मिंश्चित् भागे एतादृशानाम् अपवादानां तथा उपान्तरणानाम् अधीने सति प्रवर्तेत यत् सः अधिसूचनायां विनिर्दिशेत्;

(ग) राष्ट्रपतिः, संसदः कस्यापि अधिनियमस्य सम्बन्धे, अधिसूचनया निर्देशं दातुं शक्नुयात् यत् सः त्रिपुराराज्ये कस्मिंश्चित् स्वशासिमण्डले अथवा स्वशासिपरिक्षेत्रे न प्रवर्तेरन् अथवा एतादृशे मण्डले अथवा परिक्षेत्रे तस्य कस्मिंश्चित् भागे एतादृशानाम् अपवादानां तथा उपान्तरणानाम् अधीने सति प्रवर्तेत यत् सः अधिसूचनायां विनिर्दिशेत् तथा एतादृशः कोऽपि निर्देशः इत्थं दातुं शक्नुयात् यत् तस्य भूतलक्षिप्रभावः भवेत्।

[१२ख. संसदः, मिजोरमराज्यक्षेत्रस्य विधानमण्डलस्य च अधिनियमानां मिजोरमराज्यक्षेत्रस्य स्वशासिमण्डलेषु स्वशासिप्रदेशेषु च अनुप्रयोगः- एतत्संविधाने किमपि सत्यपि-

(क) मिजोरमराज्यस्य विधान-मण्डलस्य कोऽपि अधिनियमः, यः एतादृशेषु विषयेषु कस्यचित् विषयस्य सम्बन्धे अस्ति, यम् अस्याः अनुसूच्याः (३) खण्डे एतादृशानां विषयाणां रूपे विनिर्दिष्टः, यद्विषये मण्डलपरिषद् अथवा क्षेत्रीयपरिषद् विधिनिर्मातुं शक्नुयात्, तथा मिजोरमराज्यस्य विधान-मण्डलस्य कोऽपि अधिनियमः यः कस्यचित् "अनासुत-माद्यसारिकपानस्य" उपभोगं प्रतिषेधयति अथवा निर्बध्नाति, तस्मिन् राज्ये कञ्चित् स्वशासिमण्डलं अथवा स्वशासिपरिक्षेत्रं तावत् पर्यन्तं न प्रवर्तेत यावत् पर्यन्तम् उभयोः दशयोः प्रत्येकं, तस्य मण्डलस्य मण्डलपरिषदि अथवा एतादृशे क्षेत्रे अधिकारिताम् आदधाना मण्डलपरिषद् लोकाधिसूचनया इत्थं न विनिर्दिशेत् तथा मण्डलपरिषद् कस्यचित् अधिनियमस्य सम्बन्धे इत्थं विनिर्दिष्टे काले अयं विनिर्दिष्टुं शक्नुयात् यत् सः अधिनियमः तस्य मण्डलस्य अथवा परिक्षेत्रस्य अथवा तस्य कस्मिन् अपि भागे प्रवर्तमाने एतादृशानाम् अपवादानाम् उपान्तरणानाम् अधीने सति प्रभावी भवेत् यत् सा उचिता अवगच्छेत्;

(ख) राज्यपालः, लोकाधिसूचनया, निर्देशं दातुं शक्नुयात् यत् मिजोरमराज्यस्य विधानमण्डलस्य कोऽपि अधिनियमः, यम् अस्य उपप्रच्छेदस्य खण्डः (क) इत्यस्य उपबन्धाः न प्रवर्तेरन्, तस्मिन् राज्ये कस्मिंश्चित् स्वशासिमण्डले अथवा स्वशासिपरिक्षेत्रे न प्रवर्तेरन् अथवा एतादृशे मण्डले अथवा परिक्षेत्रे तस्य च कस्मिंश्चित् भागे एतादृशानाम् अपवादानां तथा उपान्तरणानाम् अधीने सति प्रवर्तेत यत् सः अधिसूचनायां विनिर्दिशेत्;

(ग) राष्ट्रपतिः, संसदः कस्यापि अधिनियमस्य सम्बन्धे, अधिसूचनया निर्देशं दातुं शक्नुयात् यत् सः मिजोरमराज्ये कस्मिंश्चित् स्वशासिमण्डले अथवा स्वशासिपरिक्षेत्रे न प्रवर्तेरन् अथवा एतादृशे मण्डले अथवा परिक्षेत्रे तस्य कस्मिंश्चित् भागे एतादृशानाम् अपवादानां तथा उपान्तरणानाम् अधीने सति प्रवर्तेत यत् सः अधिसूचनायां विनिर्दिशेत् तथा एतादृशः कोऽपि निर्देशः इत्थं दातुं शक्नुयात् यत् तस्य भूतलक्षिप्रभावः भवेत्।

१३. स्वशासिमण्डलैः सम्बद्धानां प्राक्कलितानां प्राप्तीनाम्, व्ययानां च वार्षिकवित्तविवरणे पृथक्प्रदर्शनम्- स्वशासिमण्डलेन सम्बद्धाः प्राक्कलिताः, प्राप्तयः, व्ययाश्च ये [1][***] राज्यस्य सञ्चितनिधौ आकलनीयाः, ततः वा करणीयाः विद्यन्ते प्रथमं मण्डलपरिषदः समक्षं विचारविमर्शार्थं स्थाप्येरन्, एतादृशात् विचारविमर्शात् परं च एतत्संविधानस्य २०२-तमानुच्छेदस्य अधीनं राज्यविधानमण्डलस्य समक्षं स्थापनीये वार्षिकवित्तविवरणे पृथक्तः प्रदर्श्येरन्।

[2]**१४. स्वशासिमण्डलानां स्वशासिप्रदेशानां च प्रशासनस्य परिप्रश्नार्थं तद्विषये प्रतिवेदनार्थं च आयोगस्य नियुक्तिः-** (१) राज्यपालः राज्यस्य स्वशासिमण्डलानां स्वशासिप्रदेशानां च प्रशासनेन सम्बद्धस्य तेन विनिर्दिष्टस्य कस्यापि विषयस्य एतदनुसूच्याः १ प्रच्छेदस्य (३) उपप्रच्छेदस्य (ग), (घ), (ङ), (च) खण्डेषु विनिदिष्टान् विषयान् अधिकृत्य परिप्रश्नार्थं प्रतिवेदनदानार्थं च कस्मिन् अपि काले आयोगं नियोक्तुं क्षमते, राज्यस्य स्वशासिमण्डलानां स्वशासिप्रदेशानां च साधारणतया प्रशासनस्य, विशेषतश्च

(क) तादृशेषु मण्डलेषु प्रदेशेषु च शिक्षायाः चिकित्सायाश्च सौकार्यस्य सञ्चारस्य च व्यवस्थायाः;

(ख) तादृशानां मण्डलानां प्रदेशानां च विषये कस्यापि नूतनस्य, विशेषस्य वा विधानस्य आवश्यकतायाः, तथा

(ग) मण्डलपरिषद्भिः प्रादेशिकपरिषद्भिः निर्मितानां विधीनाम्, नियमानाम्, विनियमानाम्, प्रशासनस्य च काले-काले परिप्रश्नार्थम्, प्रतिवेदनार्थं च आयोगं नियोक्तुं क्षमते, आायोगेन अनुसरणीयां प्रक्रियां च परिणिश्चेतुं क्षमते।

---

1 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च "असमः" इति शब्दः लोपितः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)

2 संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९९५ (१९९५ वर्षस्य ४२) इत्यस्य २-अनुभागेन (१२-९-१९९५ दिनाङ्कात् प्रवर्तमानप्रभावेण) असमराज्य-प्रवर्तमानाय प्रच्छेदः (१४) इति निम्नलिखितरूपेण संशोधितः अर्थात् :-

'प्रच्छेदः १४ इत्यस्य उपप्रच्छेदः (२) इत्यत्र, "राज्यपालस्य तत्सम्बन्धितः पुरःप्रशंसाभिः सह" शब्दानां लोपः कुर्यात्।

(२) तत्सम्बन्धी मन्त्री एताद्दशस्य प्रत्येकम् आयोगस्य प्रतिवेदनं राज्यपालस्य तद्विषयकेन पुरःप्रशंसनेन सह, तद्विषये [1][राज्यशासनेन] प्रस्थापनीयायाः क्रियायाः विषये स्पष्टीकारकज्ञापनेन सह च राज्यविधानमण्डलस्य समक्षं स्थापयेत्।

(३) शासनकार्यस्य स्वमन्त्रिषु आवण्टनं कुर्वन् राज्यपालः स्वमन्त्रिषु एकं विशेषतः राज्यस्य स्वशासिमण्डलानां स्वशासिप्रदेशानां च कल्याणस्य भारसाधकं कर्तुं क्षमते।

[2]**१५. मण्डलपरिषदां प्रादेशिकपरिषदां वा कार्याणां सङ्कल्पानां च विलोपनं निलम्बनं वा**-(१) यदि कस्मिन् अपि काले राज्यपालः समाहितः भवति यत् मण्डलपरिषदः प्रादेशिकपरिषदः वा केनापि कार्येण सङ्कल्पेन वा भारतस्य सुरक्षिततायाः भयापन्नता सम्भाव्यते [3][अथवा लोकव्यवस्थायां प्रतिकूलः प्रभावः सम्भाव्यते], तर्हि सः एताद्दशं कार्यं सङ्कल्पं वा विलोपयितुं, निलम्बयितुं वा क्षमते, एताद्दशान् उपायान् च (परिषदः निलम्बनेन, परिषदि निहितासु, तथा प्रयोक्तव्यासु वा शक्तिषु सर्वासां, कासांचित् वा स्वायत्तीकरणेन सह) आश्रयितुं क्षमते याद्दशान् सः एताद्दशकार्यस्य करणं, अनुवृत्तिं वा एताद्दशसङ्कल्पस्य च कार्यकरत्वं निवारयितुम् आवश्यकान् मन्यते।

(२) एतत्प्रच्छेदस्य (१) उपप्रच्छेदस्य अधीनं राज्यपालेन दत्तः आदेशः, तथाभूतस्य आदेशस्य कारणैः सह यथासम्भवं शीघ्रं राज्यविधानमण्डलस्य समक्षं स्थाप्येत; सः च आदेशः, यदि विधानमण्डलेन न प्रतिसंह्रियते, तर्हि यस्मिन् दिनाङ्के सः एवं दत्तः भवति तस्मात् दिनाङ्कात् द्वादशानां मासानां कालावधिं यावत् प्रवर्तने अनुवर्तेत-

परन्तु यदि यावद्वारं राज्यविधानमण्डलेन एताद्दशस्य आदेशस्य अनुवृत्यर्थम् अनुमोदनस्य सङ्कल्पः पार्यते, तर्हि तावद्वारं च सः आदेशः, राज्यपालेन शून्यीकृतः न भवति चेत्, तस्मात् दिनाङ्कात् यस्मिन् एतदनुच्छेदस्य अधीनं सः अन्यथा प्रवर्तनाद् विरतः अभविष्यत् द्वादशानां मासानाम् अन्यं कालावधिं यावत् प्रवर्तने अनुवर्तेत।

---

1 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च "असमशासनेन" इत्येतस्मात् पदात् प्रति एतत्पदं संनिवेशितम् (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)

2 संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९८८ (१९८८ वर्षस्य ६७) इत्यस्य २-अनुभागेन (१६-१२-१९८८ दिनाङ्कात् प्रवर्तमानप्रभावेण) त्रिपुरा-मिजोरम-राज्य-प्रवर्तमानाय निम्नलिखितरूपेण संशोधितः :-

(क.) 'प्रारम्भिकभागे, "राज्यस्य विधानमण्डलेन" शब्दानां स्थाने, "राज्यपालेन" शब्दः स्थापयेत्' ;

(ख.) पारन्तुकस्य लोपः कुर्यात्।

3 असमस्य पुनर्घटनं (मेघालयः) अधिनियमः, १९६९ (१९६९ वर्षस्य ५५-तमः) इत्यस्य ७४-अनुभागेन चतुर्थानुसूच्या च एते शब्दाः अन्तर्वेशिताः (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(षष्ठी अनुसूची)

[1]**१६. मण्डलपरिषदः प्रादेशिकपरिषदः वा विघटनम्** (१) [2][एतदनुसूच्याः १४-प्रच्छेदस्य अधीनं नियुक्तस्य आयोगस्य पुरःप्रशंसने प्राप्ते राज्यपालः लोकाधिसूचनया कस्यापि मण्डलपरिषदः प्रादेशिकपरिषदः विघटनं कर्तुं क्षमते, तथा च-

(क) परिषदः, पुनःसङ्घटनार्थं सद्यः एव नूतनं साधारणनिर्वाचनं कारयितुं क्षमते, अथवा

(ख) राज्यविधानमण्डलस्य पूर्वानुमोदनेन एतादृश-परिषदः प्राधिकाराधीनक्षेत्रस्य प्रशासनं राज्यपालः स्वायत्ती कर्तुं क्षमते, अथवा एतादृशक्षेत्रस्य प्रशासनम् उक्तप्रच्छेदस्य अधीनं नियुक्तस्य आयोगस्य, अथवा अन्यस्य निकायस्य वा अधीनं यः तेन योग्यः मन्यते, द्वादशमासेभ्यः अनधिककालावधिं यावत् स्थापयितुं क्षमते-

परन्तु यदा एतदुपप्रच्छेदस्य (क) खण्डस्य अधीनं कश्चित् आदेशः प्रदत्तः भवेत् तदा राज्यपालः प्रश्नगतक्षेत्रस्य प्रशासनस्य विषये साधारणनिर्वाचने निवृत्ते सति परिषदः पुनर्घटनस्य लम्बनावस्थां यावत् एतत्प्रच्छेदस्य (क) खण्डे निर्दिष्टां क्रियां कर्तुं क्षमते-

अपरं च, यथायथं मण्डलपरिषदे प्रादेशिकपरिषदे वा राज्यविधानमण्डलस्य समक्षं स्वाभिमतानि स्थापयितुं अवसरदानेन विना एतद् उपप्रच्छेदस्य (ख) खण्डस्य अधीनं कापि क्रिया न क्रियेत।

---

1 संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९८८ (१९८८ वर्षस्य ६७) इत्यस्य २-अनुभागेन (१६-१२-१९८८ दिनाङ्कात् प्रवर्तमानप्रभावेण) त्रिपुरा-मिजोरम-राज्य-प्रवर्तमानाय निम्नलिखितरूपेण संशोधितः :-

'(क.) उपप्रच्छेदः (१) इत्यस्य प्रच्छेदः (ख) इत्यन्तर्गते "राज्यस्य विधानमण्डलस्य पूर्वानुमोदनेन" शब्दानां तथा अन्यपारन्तुकानां लोपः कुर्यात् ;

(ग.) उपप्रच्छेदः (३) इत्यस्य स्थाने निम्नलिखितः उपप्रच्छेदः स्थापयेत् अर्थात् :-

"(३) अस्य प्रच्छेदस्य उपप्रच्छेदः (१) उपप्रच्छेदः (२) इत्यस्य अधीनं कृतः प्रत्येकम् आदेशः, तदर्थं यत्कारणम् अस्ति तत्सहितं, राज्यस्य विधानमण्डलस्य समक्षे स्थापयेत्।"

2 असमस्य पुनर्घटनं (मेघालयः) अधिनियमः, १९६९ (१९६९ वर्षस्य ५५-तमः) इत्यस्य ७४-अनुभागेन चतुर्थानुसूच्या च १६-प्रच्छेदः १६-प्रच्छेदस्य (१) उपप्रच्छेदरूपेण पुनः क्रमाङ्कितः (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[1][(२) यदि कस्मिन् अपि काले राज्यपालः समाहितः भवति यद् एतादृशी परिस्थितिः उत्पन्ना अस्ति यस्याम् एतदनुसूच्याः अधीनं स्वशासिमण्डलस्य, स्वशासिप्रदेशस्य वा प्रशासनस्य सञ्चालनम् अशक्यं विद्यते, तर्हि सः लोकाधिसूचनया, यथायथं मण्डलपरिषदि प्रादेशिकपरिषदि वा निहितानि तया प्रयोक्तव्यानि वा कर्तव्यानि शक्तीश्च स्वायत्तीकर्तुं क्षमते, तथा निदेशं प्रदातुं च क्षमते यत् तादृशानि कर्तव्यानि शक्तय: वा तादृशेन जनेन प्राधिकारिणा वा यं सः एतत्सम्बन्धे विनिर्दिशेत् प्रयोज्येरन् षड्भ्यः मासेभ्यः अनधिककालावधिं यावत्-

परन्तु राज्यपालः तदतिरिक्तेन आदेशेन आदेशैः वा मूलादेशस्य प्रवृत्तिं विस्तारयितुं क्षमते प्रत्येकवारं षड्भ्यः मासेभ्यः अनधिककालावधिं यावत्।

(३)(२) उपप्रच्छेदस्य अधीनं प्रदत्तः प्रत्येकम् आदेशः तथाभूतस्य आदेशस्य कारणैः सह राज्यस्य विधान- मण्डलस्य समक्षं स्थाप्येत; तथा च आदेशप्रदानात् परं राज्यस्य विधानमण्डलं यस्मिन् दिनाङ्के प्रथमम् उपविशति तस्मात् दिनाङ्कात् त्रिंशद्दिनानां समाप्तौ सः प्रवर्तनात् विरतः भवेत् यदि तदवधेः समाप्तेः प्राक् सः राज्य-विधानमण्डलेन अनुमोदितः न भवति।]

[2]**१७. स्वशासिमण्डलेषु निर्वाचनक्षेत्राणां निर्माणे एतादृशमण्डलेभ्यः क्षेत्राणाम् अपवर्जनम्-** [3][[असमस्य अथवा मेघालयस्य [[4][अथवा त्रिपुरायाः [5][अथवा मिजोरमस्य]] विधानसभायाः]] निर्वाचनप्रयोजनार्थं राज्यपालः आदेशेन घोषयितुं क्षमते [6][यथायथम् असमराज्यस्य मेघालयराज्यस्य [4][अथवा त्रिपुरायाः [5][अथवा मिजोरमस्य] कस्यापि स्वशासिमण्डलस्य अभ्यन्तरे किमपि क्षेत्रम् एतादृशाय कस्मैचित् मण्डलाय विधानसभायाम् आरक्षितस्य स्थानस्य स्थानानां वा प्रत्येकस्यापि निर्वाचनक्षेत्रस्य भागः न भवेत् किन्तु विधानसभायाम् एवम् आरक्षितस्य स्थानस्य स्थानानां वा पूर्व्यै आदेशे विनिर्दिष्टस्य निर्वाचनक्षेत्रस्य भागः भवेत्।

[7]**[१८.** * * * * *]

---

[1] उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन उक्तानुसूच्या च एतौ उपप्रच्छेदौ अन्तर्वेशितौ (२-४-१९७० दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[2] संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, २००३ (२००३ वर्षस्य ४४) इत्यस्य २-अनुभागेन (७-९-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) असमराज्य-प्रवर्तमानाय प्रच्छेदः (१७) इति निम्नलिखितं पारन्तुकम् अन्तःस्थाप्य संशोधितः अर्थात्:- "परन्तु अस्य प्रच्छेदस्य कोऽपि विषयः बोडो-लैण्ड-प्रादेशिक-क्षेत्र-मण्डले न प्रवर्तेत"।

[3] पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च "असमस्य विधानसभायै" इत्येतस्मात् प्रति एते शब्दाः संनिवेशिताः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[4] संविधानस्य (एकोनपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८४ वर्षस्य ४-अनुभागेन (१-४-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

[5] मिजोरमराज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ३४) इत्यस्य ३९-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

[6] पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च एते शब्दाः अन्तर्वेशिताः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

[7] पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च १८ प्रच्छेदः लोपितः (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(षष्ठी अनुसूची)

[1]**१९. सङ्क्रमणकालिकाः उपबन्धाः-** (१) एतत्संविधानस्य प्रारम्भात् परं यथासम्भवं शीघ्रम् एतदनुसूच्याः अधीनं राज्यपालः राज्यस्य प्रत्येकस्वशासिमण्डलस्य कृते मण्डलपरिषदः घटनार्थम् उपायान् कुर्यात्, यावत् च कस्यापि स्वशासिमण्डलस्य कृते मण्डलपरिषद् एवं घटिता न भवति तावत् एतादृशस्य मण्डलस्य प्रशासनं राज्यपाले निहितं भवेत् एतादृशमण्डलस्य च अभ्यन्तरे क्षेत्राणां प्रशासने एतदनुसूच्याः पूर्वगाम्युपबन्धानां स्थाने निम्नलिखिताः उपबन्धाः अनुप्रयुक्ताः भवेयुः, तद्यथा-

(क) संसदः, तद्राज्यविधानमण्डलस्य वा कोऽपि अधिनियमः, एतादृशे क्षेत्रे तावत् न अनुप्रयोक्तव्यः यावत् राज्यपालः लोकाधिसूचनया एवं निदेशं न करोति, कस्यापि अधिनियमस्य विषये च राज्यपालः एवं निदेशं कुर्वन् निदेष्टुं क्षमते यत् सः अधिनियमः तादृशे क्षेत्रे तस्य कस्मिन् अपि विनिर्दिष्टे भागे वा एतादृशैः अपवादैः उपान्तरणैश्च सह प्रवृत्तः भवेत् यथा सः उचितं मन्यते;

(ख) कस्यापि एतादृशस्य क्षेत्रस्य शान्त्यै, सुशासनार्थं च राज्यपालः विनियमान् निर्मातुं क्षमते; एवं निर्मिताः विनियमाश्च एतादृशे क्षेत्रे तदानीम् अनुप्रयुज्यमानं संसदः तद्राज्यस्य विधानमण्डलस्य वा कमपि अधिनियमं, कमपि विद्यमानं विधिं वा निरसितुं संशोधयितुं वा क्षमते।

(२) एतत्प्रच्छेदस्य (१) उपप्रच्छेदस्य (क) खण्डस्य अधीनं राज्यपालेन प्रदत्तः कोऽपि निदेशः तथा प्रदातुं शक्येत यथा तस्य भूतलक्षिप्रभावः अपि भवेत्।

---

[1] संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, २००३ (२००३ वर्षस्य ४४) इत्यस्य २-अनुभागेन (७-९-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) असमराज्य-प्रवर्तमानाय प्रच्छेदः (१९) इति निम्नलिखितरूपेण संशोधितः यतः उपप्रच्छेदः (३) इत्यस्य अनन्तरं निम्नलिखितः अन्तर्वेशितः अर्थात्:-

'(४) अस्य अधिनियमस्य प्रारम्भानन्तरं, यथाशीघ्रम् असमे बोडो-लैण्ड-प्रादेशिक-क्षेत्र-मण्डलाय एकः अस्थायि-कार्यपालक-परिषद्, राज्यपालेन बोडो-आन्दोलनस्य नेतृषु यदन्तर्गते संवित्-ज्ञापनस्य हस्ताक्षरकर्तारः अपि सन्ति, विनिर्मिता भवेत् तथा तत्र तस्य क्षेत्रस्य इतरजनजातीयसमुदायान् अपि पर्याप्तं प्रतिनिधित्वं दद्यात्;

परन्तु अस्थायि-परिषद् आषड्-मासावधये भवेत् यदन्तराले परिषदः निर्वाचनस्य प्रयासः भवेत्।

स्पष्टीकरणम्- अस्य उपप्रच्छेदस्य प्रयोजनार्थं "संविदः ज्ञापनं" पदेन भारतशासनस्य, असमशासनस्य तथा बोडो-लिब्रेशन-टाईगर्स इति मध्ये (१०-२-२००३) इत्यत्र हास्ताक्षरितः ज्ञापनम् अभिप्रेतम् अस्ति।

(३) एतत्प्रच्छेदस्य (१) उपप्रच्छेदस्य (ख) खण्डस्य अधीनं निर्मिताः सर्वे विनियमाः सद्यः राष्ट्रपतेः समक्षं स्थापयेरन् यावत् च सः तान् न अनुमन्यते तावत् ते प्रभाविनः न भवेयुः।

[1][**२०. जनजातिक्षेत्राणि-** (१) निम्नलिखितायाः सारिण्याः प्रथमभागे, द्वितीयभागे, [2][द्वितीये क-भागे] तृतीयभागे च विनिर्दिष्टानि क्षेत्राणि क्रमशः असमराज्यस्य, मेघालयराज्यस्य, [2]अथवा त्रिपुरायाः मिजोरम[3][राज्य-]क्षेत्रस्य च अभ्यन्तरे जनजातिक्षेत्राणि भवेयुः।

(२) [4][अधोलिखितायाः सारण्याः भागः १, भागः २, अथवा भागः ३ इत्यत्र] किमपि मण्डलं प्रति निर्देशस्य एवम् अर्थः ग्राह्यः यथा सः पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ इत्यस्य २-अनुभागस्य (ख) खण्डस्य अधीनं नियतदिनात् अव्यवहितपूर्वं विद्यमाने एतन्नामके स्वशासिमण्डले समाविष्टानि राज्यक्षेत्राणि प्रति निर्देशः अस्ति-

परन्तु एतदनुसूच्याः ३ प्रच्छेदस्य (१) उपप्रच्छेदस्य (ङ) खण्डस्य, (च) खण्डस्य च, ४ प्रच्छेदस्य, ५ प्रच्छेदस्य, ६ प्रच्छेदस्य, ८ प्रच्छेदस्य (२) उपप्रच्छेदस्य तथा (३) उपप्रच्छेदस्य (क) खण्डस्य, (ख) खण्डस्य, (घ) खण्डस्य च; तथा (४) उपप्रच्छेदस्य; तथा च १० प्रच्छेदस्य (२) उपप्रच्छेदस्य (घ) खण्डस्य च प्रयोजनानाम् अर्थे शिलाँगनगरपालिकायां समाविष्टस्य क्षेत्रस्य कस्यापि भागस्य विषये एवं न मन्येत यत् सः [5][खासीपर्वतीयमण्डलस्य] अभ्यन्तरे वर्तते।

[2][(३) अधोलिखितस्याः सारण्याः भागः २क इत्यत्र "त्रिपुराजनजातिक्षेत्रमण्डलं" प्रति निर्देशस्य अयम् अर्थः अवधारयेत् यत् सः त्रिपुरा-जनजातिक्षेत्र-स्वशासिमण्डल-परिषद्-अधिनियमः, १९७९ इत्यस्य प्रथमा-अनुसूच्यां विनिर्दिष्ट-जनजाति-क्षेत्रेषु समाविष्टराज्यक्षेत्रं प्रति निर्देशः अस्ति।]

---

1 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१ (झ) अनुभाग अष्टमानुसूच्या च २० प्रच्छेदात्, २०क प्रच्छेदात् च प्रति यथाक्रमम् एतौ प्रच्छेदौ संनिवेशितौ (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (एकोनपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८४ वर्षस्य ४-अनुभागेन (१-४-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

3 मिजोरमराज्य-अधिनियमः, १९८६ (१९८६ वर्षस्य ३४) इत्यस्य ३९-अनुभागेन (२०-२-१९८७ दिनाङ्कात् प्रवर्तमानप्रभावेण) "सङ्घराज्यक्षेत्रम्" इत्यस्य स्थाने संनिवेशितः।

4 संविधानस्य (एकोनपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८४ वर्षस्य ४-अनुभागेन (१-४-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

5 २३-६-१९७३ दिनाङ्कस्य मेघालय-राजपत्रस्य ५-अ-भागे २००-तमे पृष्ठे प्रकटितया, मेघालयशासनस्य डीसीए ३१७२११ क्रमाङ्कितया १४-६-१९७३ दिनाङ्कितया अधिसूचनया "तस्य मण्डलस्याभ्यन्तरे" इत्येतस्मात् शब्दसमूहात् प्रति एषः शब्दसमूहः संनिवेशितः।

(षष्ठी अनुसूची)

सारिणी

प्रथमः भागः

१. उत्तरीयं कछारपर्वतीयमण्डलम्।
२. [1][कार्बी-आंगलांग-मण्डलम्।]
[2][३. बोडोलैण्ड-प्रादेशिकक्षेत्रमण्डलम्।]

द्वितीयः भागः

[3][१. खासी पर्वतीयमण्डलम्।
२. जयन्तियापर्वतीयमण्डलम्।]
३. गारोपर्वतीयमण्डलम्।

[4][द्वितीयः (क)-भागः

त्रिपुराजनजातिक्षेत्रमण्डलम्।]

तृतीयः भागः

[5][* * *]
[6][१. चकमामण्डलम्
[7][२. मारामण्डलम्।
३. लाई-मण्डलम्।]]

[8][२०क. मिजोमण्डलपरिषदः विघटनम्- (१) एतदनुसूच्यां किमपि सत्यपि विहितदिनाङ्कात् अव्यवहितपूर्वं विद्यमाना मिजोमण्डलपरिषद् (या इतः परं “मिजोमण्डलपरिषद्” इति निर्दिष्टा अस्ति) विघटिता तिष्ठेत्, सत्तया विरता च भवेत्।

---

1 असमशासनेन दिनाङ्कः १४-१०-१९७६ इत्यस्य अधिसूचनया सं. टी. ए. डी./आर११५/७४/४७ इत्यनेन “मिकिरपर्वतीयमण्डलम्” स्थाने प्रतिष्ठापितः।

2 संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, २००३ (२००३ वर्षस्य ४४) इत्यस्य २-अनुभागेन (७-९-२००३ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

3 २३-६-१९७३ दिनाङ्कस्य मेघालय-राजपत्रस्य ५-अ-भागे २००-तम पृष्ठे प्रकटितया, मेघालयशासनस्य डीसीए ३१७२११ क्रमाङ्कितया १४-६-१९७३ दिनाङ्कितया अधिसूचनया “तस्य मण्डलस्याभ्यन्तरे” इत्येतस्मात् शब्दसमूहात् प्रति एषः शब्दसमूहः संनिवेशितः।

4 संविधानस्य (एकोनपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८४ वर्षस्य ४-अनुभागेन (१-४-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) अन्तर्वेशितः।

5 सङ्घराज्यक्षेत्रशासनं (संशोधनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८३-तमः) इत्यस्य १३-अनुभागेन “मिजो-मण्डलम्” इत्येतत् लोपितम् (२९-४-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

6 १९७२ वर्षीयस्य ५-५-१९७२ दिनाङ्कितस्य मिजोरमराजपत्रस्य प्रथमखण्डस्य द्वितीयभागे १७-तमे पृष्ठे प्रकटितेन, १९७२-तम-वर्षीयेन मिजोरमपरिषदां सम्बन्धे (प्रकीर्णोपबन्धानां कृते) आदेशेन एताः प्रविष्टयः अन्तर्वेशिताः।

7 संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९८८ (१९८८ वर्षस्य ६७) इत्यस्य २-अनुभागेन (१६-१२-१९८८ दिनाङ्कात् प्रवर्तमानप्रभावेण) क्रमसङ्ख्या २ तथा ३ तथा तयोः सम्बन्धित-प्रविष्टयोः स्थाने संनिवेशितः।

8 पूर्वोत्तरक्षेत्राणां (पुनर्घटनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८१-तमः) इत्यस्य ७१(झ)-अनुभागेन अष्टमानुसूच्या च (२१-१-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)। २० प्रच्छेदस्य स्थाने प्रतिष्ठापितः तथा तदनन्तरं संघराज्यक्षेत्रशासन (संशोधनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८३) इत्यस्य १३-अनुभागेन प्रच्छेदः २०क इत्यस्य इस्थाने प्रतिष्ठापितः (१६-२-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(२) मिजोरमराज्यक्षेत्रस्य प्रशासकः एकेन अधिकैः वा आदेशैः निम्नलिखितानां सर्वेषां, केषांचित् वा विषयाणां कृते उपबन्धान् कर्तुं क्षमते, तद्यथा-

(क) मिजोमण्डलपरिषदः सर्वस्वानाम् अधिकाराणां दायित्वानां च (येषु तया कृतायाः संविदः अधीनाः अधिकारा: दायित्वानि च अन्तर्भवन्ति) पूर्णतः, भागतः वा सङ्घाय अन्यस्मै प्राधिकारिणे वा अन्तरणम्;

(ख) यस्यां मिजोमण्डलपरिषत्पक्षकारः अस्ति तस्यां कस्यामपि वैधिकप्रक्रियायां पक्षकाररूपेण सङ्घस्य, अन्यस्य कस्यापि वा प्राधिकारिणः मण्डलपरिषदः प्रति संनिवेशः; अथवा सङ्घस्य अन्यस्य कस्यापि प्राधिकारिणः पक्षकाररूपेण संवर्धनम्;

(ग) मिजोमण्डलपरिषदः केषामपि कर्मचारिणां सङ्घाय अन्यस्मै प्राधिकारिणे वा अन्तरणं, सङ्घेन अन्येन प्राधिकारिणा वा तेषां पुनर्नियोजनम् एतादृशस्य अन्तरणस्य पुनर्नियोजनस्य वा पश्चात् तेषां विषये अनुप्रयोज्यानि सेवानिबन्धनानि प्रतिबन्धनानि च;

(घ) मिजोमण्डलपरिषदा निर्मितानां, तस्याः विघटनात् अव्यवहितपूर्वं च प्रवृत्तानां केषांचित् विधीनां तावत् अनुवर्तनम्, एतादृशानां निरसनरूपाणां वा संशोधनरूपाणां वा अनुकूलनानाम् अन्तरणानां च अधीनं, यानि प्रशासकः एतत्सम्बन्धे विदध्यात् यावत् एतादृशाः विधयः क्षमेण विधानमण्डलेन अन्येन क्षमेण प्राधिकारिणा वा परिवर्तिता, निरसिताः, संशोधिताः वा न भवेयुः;

(ङ) एतादृशाः आनुषङ्गिकाः, पारिणामिकाः, अनुपूरकाश्च विषयाः यान् प्रशासकः आवश्यकान् मन्येत।

स्पष्टीकरणम्- एतत्प्रच्छेदे तथा एतदनुसूच्याः २०आ प्रच्छेदे "विहितदिनाङ्कः" इति पदेन सः दिनाङ्कः अभिप्रेयते यस्मिन् सङ्घराज्यक्षेत्रशासनम् अधिनियमः, १९६३ इत्यस्य उपबन्धानाम् अधीनं तदनुसारं च मिजोरमराज्यक्षेत्रस्य विधानसभा सम्यक्तया घटिता भवति।

[1]**२०ख. मिजोरमराज्यक्षेत्रस्य स्वशासिप्रदेशानां स्वशासिमण्डलरूपेण स्थितिः, तत्पारिणामिकाः सङ्क्रमणकालिकाः उपबन्धाश्च**-(१) एतदनुसूच्यां किमपि सत्यपि-

(क) मिजोरमसङ्घराज्यक्षेत्रे विहितदिनाङ्कात् अव्यवहितपूर्वं विद्यमानः प्रत्येकं स्वशासिप्रदेश: एतस्मात् दिनाङ्कात् एव एतत्सङ्घराज्यक्षेत्रस्य स्वशासिमण्डलं (इतः परं "तत्स्थानिनूतनमण्डलम्" इति निर्दिष्टं) भवेत्; तथा तस्य प्रशासकः एकेन अधिकैः वा आदेशैः निदेशं प्रदातुं क्षमते यत् एतत्खण्डस्य उपबन्धान् प्रभावीकर्तुम् एतदनुसूच्याः २०

---

1 सङ्घराज्यक्षेत्रशासनं (संशोधनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८३-तमः) इत्यस्य १३-अनुभागेन २०-क प्रच्छेदात् प्रति एते प्रच्छेदाः संनिवेशिताः (२२-४-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

प्रच्छेदे (यस्मिन् एतत्प्रच्छेदस्य संलग्नसारिण्याः तृतीयः भागः अन्तर्भवति) एतादृशानि पारिणामिकानि संशोधनानि क्रियेरन् यानि आवश्यकानि भवेयुः, ततः परं च उक्त प्रच्छेदः उक्ततृतीयभागश्च तदनुसारं संशोधितौ इति मन्येत।

(ख) विहितदिनाङ्कात् अव्यवहितपूर्वं विद्यमाना मिजोरमराज्यक्षेत्रस्य स्वशासिप्रदेशस्य प्रत्येकप्रादेशिकपरिषत् (इतः परं "विद्यमानप्रादेशिकपरिषत्" इति निर्दिष्टा) तस्मिन् दिनाङ्के ततः परं च, तथा यावत् तत्स्थानिनूतनमण्डलस्य कृते मण्डलपरिषत् सम्यक्तया घटिता न भवेत् तावत् तन्मण्डलस्य मण्डलपरिषत् (इतः परं "तत्स्थानिनूतनमण्डलपरिषत्" इति निर्दिष्टा) इति मन्येत।

(२) विद्यमानप्रादेशिकपरिषदः निर्वाचितः वा नामनिर्दिष्टः वा प्रत्येकं सदस्यः तत्स्थानिनूतनमण्डलपरिषदि यथायथं निर्वाचितः नामनिर्दिष्टः वा अस्ति इति मन्येत तथा च सः तावत् पदधारणं कुर्यात् यावत् एतत् प्रच्छेदस्य अधीनं तत्स्थानिनूतनमण्डलस्य कृते मण्डलपरिषत् सम्यक्तया घटिता न भवति।

(३) यावद् एतदनुसूच्याः २ प्रच्छेदस्य (७) उपप्रच्छेदस्य, ४ प्रच्छेदस्य (४) उपप्रच्छेदस्य च अधीनं तत्स्थानिनूतनमण्डलपरिषदा नियमाः न निर्मिताः भवेयुः तावत् एतेषाम् उपबन्धानाम् अधीनं विद्यमानप्रादेशिकपरिषदा निर्मिताः विहितदिनाङ्कात् अव्यवहितपूर्वं च प्रवर्तमानाः नियमाः तत्स्थानिनूतनमण्डलपरिषदः सम्बन्धे प्रभाविनः भवेयुः तादृशानाम् अनुकूलनानां संशोधनानां च अधीनं, यादृशानि तेषु मिजोरमराज्यक्षेत्रस्य प्रशासकेन कृतानि भवेयुः।

(४) मिजोरमराज्यक्षेत्रस्य प्रशासकः एकेन अधिकैः वा आदेशैः निम्नलिखितानां सर्वेषां केषांचिद् वा विषयाणां कृते उपबन्धयितुं क्षमते; तद् यथा-

(क) विद्यमानप्रादेशिकपरिषदः सर्वस्वानाम् अधिकाराणां दायित्वानां च (येषु तया कृतायाः संविदः अधीनाः अधिकाराः दायित्वानि च अन्तर्भवन्ति) पूर्णतः भागतः वा तत्स्थानिनूतनमण्डलपरिषदे अन्तरणम्;

(ख) यस्यां विद्यमानप्रादेशिकपरिषत् पक्षकारः अस्ति तस्यां वैधिकप्रक्रियायां पक्षकाररूपेण विद्यमानप्रादेशिकपरिषदः प्रति तत्स्थानिनूतनमण्डलपरिषदः संनिवेशः;

(ग) विद्यमानप्रादेशिकपरिषदः केषामपि कर्मचारिणां तत्स्थानिनूतनमण्डलपरिषदे अन्तरणं, तत्स्थानिनूतनमण्डलपरिषदा वा तेषां पुनर्नियोजनम्, एतादृशस्य अन्तरणस्य पुनर्नियोजनस्य वा पश्चात् तेषां विषये अनुप्रयोज्यानि सेवायाः निबन्धनानि प्रतिबन्धनानि च;

(घ) विद्यमानप्रादेशिकपरिषदा निर्मितानां, तथा विहितदिनाङ्कात् अव्यवहितपूर्वं प्रवृत्तानां विधीनां तावत् अनुवर्तनम्, एतादृशानां निरसनरूपाणां संशोधनरूपाणां वा अनुकूलनानाम् उपान्तरणानां च अधीनं यादृशानि, एतत्सम्बन्धे प्रशासकः विदध्यात् यावत् एतादृशाः विधयः क्षमेण विधानमण्डलेन अन्येन क्षमेण प्राधिकारिणा या परिवर्तिताः, निरस्ताः संशोधिताः वा न भवेयुः;

(ङ) एतादृशाः आनुषङ्गिकाः, पारिणामिकाः, अनुपूरकाश्च विषयाः यान् प्रशासकः आवश्यकान् मन्यते।

[1][**२०खक. राज्यपालेन स्वीकृत्यानां निर्वहणे विवेकाधीनशक्तीनां प्रयोगः-** राज्यपालः, अस्याः अनुसूच्याः खण्डः १ इत्यस्य उपप्रच्छेदः (२) तथा उपप्रच्छेदः (३), प्रच्छेदः २ इत्यस्य उपप्रच्छेदः (१), उपप्रच्छेदः (६), उपप्रच्छेदः (६क) इत्यस्य प्रथमं पारन्तुकं विहाय तथा उपप्रच्छेदः (७), प्रच्छेदः ३ इत्यस्य उपप्रच्छेदः (३), प्रच्छेदः ४ इत्यस्य उपप्रच्छेदः (४), प्रच्छेदः ५, प्रच्छेदः ६ इत्यस्य उपप्रच्छेदः (१), प्रच्छेदः ७ इत्यस्य उपप्रच्छेदः (२), प्रच्छेदः ८ इत्यस्य उपप्रच्छेदः (४), प्रच्छेदः ९ इत्यस्य उपप्रच्छेदः (३), प्रच्छेदः १० इत्यस्य उपप्रच्छेदः (३), प्रच्छेदः १४ इत्यस्य उपप्रच्छेदः (१), प्रच्छेदः १५ इत्यस्य उपप्रच्छेदः (१) तथा प्रच्छेदः १६ इत्यस्य उपप्रच्छेदः (१) तथा उपप्रच्छेदः (२) इत्येतेषाम् अधीनं स्वीयकृत्यानां निर्वहणे मन्त्रिपरिषदः तथा, यथास्थिति उत्तरी-कछार-पहाड़ी-स्वशासि-परिषदा अथवा कार्बी-आंगलांग-पहाडी-परिषदा परामर्शानन्तरम् एतादृशः कार्यावाही कुर्यात्, यत् सः स्वविवेकानुसारम् आवश्यकं मन्येत।]

[2][**२०खख. राज्यपालेन स्वीकृत्यानां निर्वहणे विवेकाधीनशक्तीनां प्रयोगः-** राज्यपालः, अस्याः अनुसूच्याः प्रच्छेदः १ इत्यस्य उपप्रच्छेदः (२) तथा उपप्रच्छेदः (३), प्रच्छेदः २ इत्यस्य उपप्रच्छेदः (१) तथा उपप्रच्छेदः (७), प्रच्छेदः ३ इत्यस्य उपप्रच्छेदः (३), प्रच्छेदः ४ इत्यस्य उपप्रच्छेदः (४), प्रच्छेदः ५, प्रच्छेदः ६ इत्यस्य उपप्रच्छेदः (१), प्रच्छेदः ७ इत्यस्य उपप्रच्छेदः (२), प्रच्छेदः ९ इत्यस्य उपप्रच्छेदः (३), प्रच्छेदः १४ इत्यस्य उपप्रच्छेदः (१), प्रच्छेदः १५ इत्यस्य उपप्रच्छेदः (१) तथा प्रच्छेदः १६ इत्यस्य उपप्रच्छेदः (१) तथा उपप्रच्छेदः (२) इत्येतेषाम् अधीनं स्वीयकृत्यानां निर्वहणे मन्त्रिपरिषदः तथा, यदि सः आवश्यकं मन्येत तर्हि सम्बन्धितमण्डल-परिषदा अथवा प्रादेशिक-परिषदा परामर्शानन्तरं कार्यवाही कुर्यात्, यत् सः स्वविवेकानुसारम् आवश्यकं मन्येत।]

---

1 संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९९५ (१९९५ वर्षस्य ४२) इत्यस्य २-अनुभागेन (१२-९-१९९५ दिनाङ्कात् प्रवर्तमानप्रभावेण) असमे प्रवर्तनाय प्रच्छेदः २०खक अन्तर्वेशितः।

2 संविधानस्य षष्ठी अनुसूची (संशोधनम्) अधिनियमः, १९८८ (१९८८ वर्षस्य ६७) इत्यस्य २-अनुभागेन (१६-१२-१९८८ दिनाङ्कात् प्रवर्तमानप्रभावेण) त्रिपुर-मिजोरम-राज्ययोः प्रवर्तनाय प्रच्छेदः २०खख अन्तर्वेशितः।

[1][२०ग. **निर्वचनम्-** एतत्सम्बन्धे निर्मितानां उपबन्धानाम् अधीनम् एतदनुसूच्याः उपबन्धाः मिजोरमसङ्घराज्यक्षेत्रे प्रवर्तनस्य विषये तथा इव प्रभवेयुः-

(१) यथा राज्यस्य राज्यपालं प्रति, शासनं प्रति च निर्देशाः २३९-तमानुच्छेदस्य अधीनं नियुक्तं सङ्घराज्यक्षेत्रस्य प्रशासकं प्रति निर्देशाः स्युः तथा च राज्यं प्रति ("राज्यस्य शासनम्" इत्येतस्मात् शब्दसमूहादृते) निर्देशाः मिजोरमसङ्घराज्यक्षेत्रं प्रति निर्देशाः स्युः, तथा राज्यस्य विधानमण्डलं प्रति निर्देशाः मिजोरमराज्यक्षेत्रस्य विधानसभां प्रति निर्देशाः स्युः;

(२) यथा वा-

(क) ४ प्रच्छेदस्य (५) उपप्रच्छेदे सम्बद्धराज्यशासनेन सह परामर्शस्य उपबन्धः लोपितः स्यात्;

(ख) ६ प्रच्छेदस्य (२) उपप्रच्छेदे "यस्मिन् राज्यस्य कार्यपालिका शक्तिः विस्तृता भवति" इत्येतेभ्यः शब्देभ्यः प्रति "यस्मिन् मिजोरमराज्यक्षेत्रस्य विधानसभा विधीनां निर्माणे शक्तिं भजते" इत्येते शब्दाः संनिवेशिताः स्युः;

(ग) १३ प्रच्छेदे "२०२-तमानुच्छेदस्य अधीनम्" इत्येते अङ्काः शब्दौ च लोपिताः स्युः ।]

२१. अनुसूच्याः संशोधनम्- (१) संसद् काले काले विधिना परिवर्धनरूपेण, परिवर्तनरूपेण निरसनरूपेण वा एतदनुसूच्याः उपबन्धेषु कतमस्यापि संशोधनं कर्तुं क्षमते, यदा च अनुसूची एवं संशोधिता भवेत् तदा एतत्संविधाने एतदनुसूचीं प्रति कोऽपि निर्देशः एवं संशोधितानुसूचीं प्रति निर्देशः अस्ति इति अर्थः ग्राह्यः ।

(२) कोऽपि एतादृशः विधिः, यः एतत्प्रच्छेदस्य (१) उपप्रच्छेदे उल्लिखितः विद्यते, एतत्संविधानस्य ३६८-तमानुच्छेदस्य प्रयोजनार्थम् एतत्संविधानस्य संशोधनं न मन्येत ।

---

1 सङ्घराज्यक्षेत्रशासनं (संशोधनम्) अधिनियमः, १९७१ (१९७१ वर्षस्य ८३-तमः) इत्यस्य १३-अनुभागेन २०-क प्रच्छेदात् प्रति एते प्रच्छेदाः प्रतिष्ठापितः (१६-२-१९७२ दिनाङ्कात् प्रवर्तमानप्रभावेण) ।

सप्तमी अनुसूची
(अनुच्छेदः २४६)
सूची १- सङ्घसूची

१. भारतस्य तस्य प्रत्येकभागस्य च रक्षा, यस्याम् अन्तर्भवन्ति रक्षार्थ परिकल्पनं, सर्वाणि च तादृशानि कार्याणि यादृशानि युद्धकाले युद्धस्य सञ्चालनार्थं तत्समाप्तेः परं च सफलतापूर्वकं सैन्यवियोजने सहायकानि भवेयुः।

२. नौसेना, स्थलसेना, वायुसेना च सङ्घस्य किमप्यन्यत् सशस्त्रबलम्।

[1][२क. सङ्घस्य कस्यचित् अपि सशस्त्रबलस्य सङ्घाधीनस्य अन्यस्य कस्यचिद् वा बलस्य, तस्य भागस्य, एकांशस्य वा कस्मिन् अपि राज्ये असैनिकशक्तेः सहायतार्थम् अभिनियोजनम्; एतादृशाभिनियोजने एतदृशबलानां सदस्यानां शक्तयः, अधिकारिताः, विशेषाधिकाराः, दायित्वानि च]

३. कटकक्षेत्राणां परिसीमनम्, एतादृशक्षेत्रेषु स्थानीयं स्वशासनम्, एतादृशक्षेत्राणाम् अभ्यन्तरे कटकप्राधिकरणानां घटनं, शक्तयश्च, एतादृशक्षेत्रेषु गृहवास-सुविधायाः विनियमनं, (यस्मिन् भाटकस्य नियन्त्रणम् अन्तर्भवति)।

४. नौसेनानां, स्थलसेनानां वायुसेनानां च सङ्कर्माणि।

५. आयुधानि, अग्न्यायुधानि, अग्निचूर्णानि विस्फोटकानि च।

६. परमाणूर्जा, तस्याः उत्पादनार्थम् आवश्यका खनिजसम्पत् च।

७. संसदा प्रणीतेन विधिना रक्षाप्रयोजनार्थं युद्धस्य सञ्चालनार्थं वा आवश्यकाः इतिः घोषिताः उद्योगाः।

८. आसूचनायाः अन्वेषणस्य च केन्द्रीयविभागौ।

९. भारतस्य रक्षया, वैदेशिककार्यैः सुरक्षया वा सम्बद्धैः कारणं निवारकनिरोधः, एवं निरुद्धाः जनाश्च।

१०. वैदेशिककार्याणि, सर्वे विषयाः यैः सङ्घस्य केनापि विदेशेन सम्बन्धः जायते।

११. राजनयिकं, वाणिज्यदूतिकं, व्यापारेण सम्बद्धं च प्रतिनिधित्वम्।

१२. संयुक्तराष्ट्रसङ्घः।

१३.आन्ताराष्ट्रियेषु सम्मेलनेषु, सङ्गमेषु, अन्येषु निकायेषु च भागग्रहणम्, तत्र कृतानां विनिश्चयानां च कार्यान्वयनम्।

१४. विदेशैः सह सन्धीनां, समयानां च करणम्; तथा च विदेशैः सह कृतानां सन्धीनां, समयानाम् अभिसमयानां च कार्यान्वयनम्।

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५७-अनुभागेन अन्तर्वेशिता (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(सप्तमी अनुसूची)

१५. युद्धं, शान्तिश्च।

१६. वैदेशिकाधिकारिता।

१७. नागरिकता, देशीयकरणम्, अन्यदेशीयाश्च।

१८. प्रत्यर्पणम्।

१९. भारते प्रवेशः, ततः उत्प्रवासनं निष्कासनं च; पारपत्राणि दृष्टाङ्काश्च।

२०. भारतात् बाह्यस्थानेषु तीर्थयात्राः।

२१. जलदस्युता, महासमुद्रेषु आकाशे वा कृताः अपराधाश्च; स्थले महासमुद्रेषु आकाशे वा राष्ट्राणां विधेः विरुद्धं कृता अपराधाः।

२२. लोहमार्गाः।

२३. राजमार्गाः ये संसदा प्रणीतेन विधिना तदधीनं वा राष्ट्रियराजमार्गाः इति घोषिताः स्युः।

२४. यन्त्रनोदितानां जलयानानां विषये संसदा विधिना राष्ट्रियजलमार्गाः इति घोषितेषु देशाभ्यन्तरीयजलमार्गेषु पोतपरिवहणं, नौ-परिवहणं च; एतादृशजलमार्गेषु मार्गनियमः।

२५. समुद्रीयपोतपरिवहणं, नौपरिवहणं च यदन्तर्भवति वेलाजलेषु पोतपरिवहणं, नौपरिवहणं च; वणिक्पोतीयशिक्षायाः, प्रशिक्षणस्य च कृते व्यवस्था; तथा च राज्यैः, अन्यैः अभिकरणैश्च दीयमानयोः एतादृशयोः शिक्षाप्रशिक्षणयोः विनियमनम्।

२६. प्रकाशस्तम्भाः येषु पोतवहनस्य विमानानां च सुरक्षायै प्रकाशपोताः आकाशदीपाः अन्याः व्यवस्थाश्च अन्तर्भवन्ति।

२७. संसदा प्रणीतेन विधिना, विद्यमानविधिना वा तदधीनं वा महापत्तनानि इति घोषितानि वेलापत्तनानि; येषु अन्तर्भवन्ति तेषां परिसीमनं, तेषां प्राधिकरणानां घटनं, शक्तयश्च।

२८. वेलापत्तननिरोधनानि, येषु अन्तर्भवन्ति तैः सम्बद्धाः चिकित्सालयाः, नाविकाः समुद्रियाश्च चिकित्सालयाः।

२९. वायुमार्गाः वायुयानानि, विमानपरिवहणं च, विमानक्षेत्राणां व्यवस्था, विमानयातायातस्य विमानक्षेत्राणां च विनियमनं सङ्घटनं च वैमानिकशिक्षायाः प्रशिक्षणस्य च व्यवस्था, तथा राज्यैः अन्यैः अभिकरणैश्च दीयमानयोः एतादृशयोः शिक्षाप्रशिक्षणयोः विनियमनम्।

३०. लोहमार्गेण, समुद्रेण, वायुना वा यन्त्रनोदितयानेषु राष्ट्रियजलमार्गैः वा यात्रिणां, भाण्डानां च वहनम्।

(सप्तमी अनुसूची)

३१. प्रेषणी (डाकविभागः), तन्त्रिसन्देशि (तारविभागः) च; दूरभाषि, वितन्त्रि, प्रसारणम्, तथा च एवं विधानि अन्यानि सञ्चारस्य साधनानि।

३२. सङ्घस्य सम्पत्तिः, तदुद्भवत् राजस्वं च किन्तु [1][* * *] कस्मिन् अपि राज्ये स्थितायाः सम्पत्तेः विषये यावत् संसद्, अन्यथा उपबन्धं न करोति तावत् तद्राज्येन कृतस्य विधिनिर्माणस्य अधीनम्।

[2][३३. * * * *]

३४. देशीयराज्यशासकसम्बन्धिनीनां सम्पदानां कृते प्रतिपालकाधिकरणानि।

३५. सङ्घस्य लोकऋणम्।

३६. चलार्थः, टङ्कनिर्माणं, विधिकनिविदा, वैदेशिकमुद्राविनिमयश्च।

३७. वैदेशिकऋणानि।

३८. भारतस्य आरक्षितनिधानम् (रिजर्व बैंक)।

३६. प्रेषणीगृहरक्षितनिधानम्।

४०. भारतशासनेन कस्यापि राज्यस्य शासनेन सञ्चालिताः देवन्यः (लॉटरीज)।

४१. विदेशैः सह व्यापारः वाणिज्यं च; सीमाशुल्कसीमान्तानां बहिर्भागीयः आयातः निर्यातश्च; सीमाशुल्कसीमान्तानां परिणिश्चयः।

४२. अन्ताराज्यिकः व्यापारः; आन्ताराज्यिकं वाणिज्यं च।

४३. व्यापारसम्बन्धिनां निगमानां, येषु सहकारिसंस्थाः वर्जयित्वा महाजनकर्मनिगमाः, अनागतरक्षा निगमाः वित्तीयनिगमाश्च अन्तर्भवन्ति निगमनं, विनियमनं, परिसमापनं च।

४४. एकस्मिन् राज्ये असीमितोद्देश्यानां, व्यापारेण च सम्बद्धानाम् असम्बद्धानां वा, विश्वविद्यालयेभ्यः इतरेषां, निगमानां निगमनं विनियमनं, परिसमापनं च।

४५. महाजनकर्म।

४९.विनिमयपत्राणि, धनादेशपत्राणि, वचनपत्राणि, अन्यानि च एवं विधानि लिखितानि।

४७. अनागतरक्षा (बीमा)।

४८. श्रेष्ठचत्वराणि, भविष्यापणाश्च।

४९.एकस्वानि, आविष्काराः, अभिकल्पनानि च, अनुकृतिस्वाम्यं, व्यापारचिह्नानि, पण्यचिह्नानि च।

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च "प्रथमानुसूच्याः (क) भागे (ख) भागे वा उल्लिखिते" इत्येतत् लोपितम्।

[2] उपर्युक्ताधिनियमस्य २६-अनुभागेन ३३-तमा प्रविष्टिः लोपिता।

५०. परिमाणानां, प्रमाणानां च मानस्य स्थापनम्।

५१. भारताद् बहिः निर्यातव्यानाम्, एकस्मात् राज्यात् राज्यान्तरं परिवोढव्यानां वा भाण्डानां गुणवत्तायाः मानस्थापनम्।

५२. ते उद्योगाः येषां सङ्घेन नियन्त्रणं लोकहिताय समीचीनम् इति संसदा विधिना घोषितं भवेत्।

५३. तैलक्षेत्राणां, खनिजतैलसम्पदश्च विनियमनं विकासश्च; प्रस्तरतैलं प्रस्तरतैलोत्पादाश्च; संसदा विधिना भयानकरूपेण ज्वलनशीलाः इति घोषिताः अन्याः द्रवाः, अन्यानि द्रव्याणि च।

५४. तावन्मात्रं खनीनां विनियमनं, खनिजानां च विकासः यावन्मात्रं तादृशं विनियमनं विकासश्च सङ्घस्य नियन्त्रणे लोकहिताय समीचीने स्तः इति संसदा विधिना पोषितं भवेत्।

५५. खनिषु, तैलक्षेत्रेषु च श्रमस्य सुरक्षिततायाश्च विनियमनम्।

५६. तावन्मात्रं आन्ताराज्यिकीनां नदीनां नदीद्रोणीनां च विनियमनं, विकासश्च यावन्मात्रं तादृशं विनियमनं, विकासश्च सङ्घस्य नियन्त्रणे लोकहिताय समीचीने स्तः इति संसदा विधिना घोषितं भवेत्।

५७. राज्यक्षेत्रीयसागरखण्डात् परं मत्स्यग्रहणं, मीनक्षेत्राणि च।

५८. सङ्घस्य अभिकरणैः लवणस्य विनिर्माणं, प्रदाय, वितरणं च; अन्यैः अभिकरणैः लवणस्य विनिर्माणस्य, प्रदायस्य, वितरणस्य च विनियमनं, नियन्त्रणं च।

५९. अहिफेनस्य कृषिः, निर्माणं, निर्यातार्थं विक्रयश्च।

६०. चलचित्राणां प्रदर्शनार्थम् अनुमतिः।

६१. सङ्घस्य कर्मचारिभिः सम्बद्धाः औद्योगिकविवादाः।

६२. एतत्संविधानस्य प्रारम्भे राष्ट्रियपुस्तकालयः, भारतीय सङ्ग्रहालयः साम्राज्यिक-युद्धसङ्ग्रहालयः, विक्टोरियास्मारकं, भारतीय युद्ध स्मारकं च इत्येवं ज्ञाताः संस्थाः, भारतशासनेन पूर्णतः अंशतः वा वित्तपोषिताः, संसदा च विधिना राष्ट्रियमहत्वमयी इत्येवं घोषिता, अन्या च एवं विधा कापि संस्था।

६३. एतत्संविधानस्य प्रारम्भे काशीहिन्दूविश्वविद्यालयः अलीगढ़मुस्लिम विश्वविद्यालयः [1][दिल्ली विश्वविद्यालयश्च इत्येवं ज्ञाताः संस्थाः ३७१ङ-अनुच्छेदस्य अनुसारं स्थापिताः विश्वविद्यालयाः]; संसदा च विधिना राष्ट्रियमहत्वमयी इत्येवं घोषिता कापि अन्या संस्था।

---

[1] संविधानस्य (द्वात्रिंशत्तमं संशोधनम्) अधिनियमः, १९७३ इत्यस्य ४-अनुभागेन "दिल्ली विश्वविद्यालयश्च" इत्येतस्मात् प्रति एतत् संनिवेशितम् (१-७-१९७४ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(सप्तमी अनुसूची)

६४. भारतशासनेन पूर्णतः अंशतः वा वित्तपोषिताः संसदा च विधिना राष्ट्रियमहत्वमय्यः इति एवं घोषिताः वैज्ञानिक्यः, शिल्पसम्बन्धिन्यः वा शिक्षासंस्थाः।

६५. सङ्घस्य अभिकरणानि संस्थाश्च यानि-

(क) वृत्तिविषयकस्य, व्यवसायविषयकस्य, शिल्पविषयकस्य च प्रशिक्षणस्य कृते (यस्मिन् आरक्षि-अधिकारिणां प्रशिक्षणम् अन्तर्भवति), विद्यन्ते; अथवा

(ख) विशेषस्य अध्ययनस्य गवेषणायाः या अभिवृद्धये विद्यन्ते; अथवा

(ग) अपराधस्य अन्वेषणे, अवगमने वा वैज्ञानिक्याः शिल्पसम्बन्धिन्याः वा सहायतायाः कृते विद्यन्ते।

६६. उच्चतरशिक्षासंस्थासु शोधसंस्थासु, वैज्ञानिकीषु शिल्पसम्बन्धिनीषु च संस्थासु मानानां समन्वयः अवधारणं च।

६७. [1][संसदा प्रणीतेन विधिना तदधीनं वा] राष्ट्रियमहत्वमयानि इति [1][घोषितानि] प्राचीनानि, ऐतिहासिकानि च स्मारकाणि, अभिलेखाश्च, पुरातत्वसम्बन्धीनि च स्थानानि अवशेषाश्च।

६८. भारतीयसर्वेक्षणं, भौमिकीयं, वानस्पतिकीयं, प्राणिकीयं च सर्वेक्षणं; ऋतुप्रभावशास्त्रीयाः संस्थाश्च।

६९. जनगणना।

७०. सङ्घलोकसेवाः, अखिलभारतीयसेवाः, सङ्घलोकसेवायोगः।

७१. सङ्घनिवृत्तिवेतनानि, अर्थात् भारतशासनेन, भारतस्य सञ्चितनिधितः वा सन्दातव्यानि निवृत्तिवेतनानि।

७२. संसदः, राज्यानां विधानमण्डलानां च कृते तथा राष्ट्रपतेः उपराष्ट्रपतेश्च पदस्य कृते निर्वाचनानि; निर्वाचनायोगः।

७३. संसदः सदस्यानां, राज्यपरिषदः सभापतेः, उपसभापतेश्च, लोकसभायाः अध्यक्षस्य, उपाध्यक्षस्य च वेतनानि, भक्तानि च।

७४. संसदः प्रत्येकसदनस्य, प्रत्येकसदनस्य च सदस्यानां समितीनां च शक्तयः, विशेषाधिकाराः; उन्मुक्तयश्च; संसदः समितीनां, संसदा नियुक्तानां च आयोगानां पुरतः साक्ष्यदानार्थं, लेख्यानाम् उपस्थापनार्थं वा जनानाम् उपस्थित्यै विवशीकरणम्।

७५. राष्ट्रपतेः, राज्यपालानां च उपलब्धयः, भक्तानि, विशेषाधिकाराः, अनुपस्थित्यनुमतिविषये अधिकाराश्च; सङ्घमन्त्रिणां वेतनानि भक्तानि च; नियन्त्रकमहालेखापरीक्षकस्य वतेनानि, भक्तानि, अनुपस्थित्यनुमतिविषये च अधिकाराः, अन्ये सेवाप्रतिबन्धाश्च।

---

[1] संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २७-अनुभागेन "संसदा विधिना" इत्येतस्मात् प्रति एते शब्दा संनिवेशिताः।

७६. सङ्घस्य राज्यानां च लेखानां परीक्षा।

७७. उच्चतमन्यायालयस्य घटनं, सङ्घटनम्, अधिकारिता, शक्तयश्च यासु तस्य न्यायालयस्य अवमानविषये अधिकारिता, शक्तयश्च अन्तर्भवन्ति; तत्र गृह्यमाणाः प्रशुल्काश्च; उच्चतमन्यायालयस्य समक्षं विधिव्यवसाये स्वत्ववन्तः जनाः।

७८. उच्चन्यायालयानाम्, अधिकारिणां, सेवकानां, च विषये उपबन्धान् वर्जयित्वा उच्चन्यायालयानां घटनं सङ्घटनं [1][(यस्मिन् दीर्घावकाशाः अन्तर्भवन्ति)]; उच्चन्यायालयानां समक्षं विधिव्यवसाये सत्ववन्तः जनाः।

[2][७९. कस्मिन् अपि सङ्घराज्यक्षेत्रे उच्चन्यायालयस्य अधिकारितायाः विस्तारः एतादृशस्य उच्चन्यायालयस्य अधिकारितायाः तस्मात् अपवर्जनं च।]

८०. कस्यचिद् अपि राज्यस्य आरक्षिबलस्य सदस्यानां शक्तीनाम्, अधिकारितायाश्च तद्राज्याद् बहिः कस्मिन् अपि क्षेत्रे विस्तारः, किन्तु न एवं प्रकारेण यत् एकराज्यस्य आरक्षी तद्राज्याद् बहिः कस्मिन् अपि क्षेत्रे तत् क्षेत्रवतः राज्यस्य शासनस्य सहमतिं विना शक्तीनाम् अधिकारितायाश्च प्रयोगं कर्तुं शक्नुयात्; कस्यचिद् अपि राज्यस्य आरक्षिबलस्य सदस्यानां, शक्तीनाम्, अधिकारितायाश्च तद्राज्याद् बहिः लोहमार्गक्षेत्रेषु विस्तारः।

८१. आन्ताराज्यिकं प्रव्रजनम्; आन्ताराज्यिकं निरोधनम्।

८२. कृष्यायात् इतरस्मिन् आये कराः।

८३. सीमाशुल्काः, येषु निर्यातशुल्काः अन्तर्भवन्ति।

[3][(८४) भारते निर्मितेषु उत्पादितेषु वा निम्नलिखितेषु भाण्डेषु उत्पादनशुल्कानि-

(क) अपरिष्कृतपेट्रोलियम्

(ख) शीघ्रगतिकारकडीजलम्

(ग) मोटरस्पिरिटम् (सामान्यतः पेट्रोलरूपेण ज्ञातं)

(घ) प्राकृतिक-वातिः

(ङ) विमानस्य टर्बाइन्-इन्धनम्

(च) तमाखुः तमाखुनिर्मितवस्तूनि च]

८५. निगमकरः।

---

1 संविधानस्य (पञ्चदशं संशोधनम्) अधिनियमः, १९६३ इत्यस्य १२-अनुभागेन एते शब्दाः अन्तर्वेशिताः (भूतलक्षिप्रभावेण)।

2 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २९-अनुभागेन अनुसूच्या च ७९-तम-प्रविष्टिं प्रति एषा संनिवेशिता।

3 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६, १७(क)(i)-अनुभागेन "८४-प्रविष्टिः" इत्यस्य स्थाने प्रतिष्ठापितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(सप्तमी अनुसूची)

८६. व्यक्तीनां समवायानां च, कृषिभूमिवर्जं, सर्वस्वस्य मूलधनमूल्ये कराः; समवायानां मूलधने कराः।

८७. कृषिभूमिवर्जम् अन्यसम्पत्तिविषये सम्पत्-शुल्काः।

८८. कृषिभूमिवर्जम् अन्यसम्पत्तेः उत्तराधिकारविषये शुल्काः।

८९. लोहमार्गेण, समुद्रेण, वायुमार्गेण वा ऊढेषु, भाण्डेषु, यात्रिषु वा सीमाकराः लोहमार्गस्य यात्रिभाटकेषु भाण्डभाटकेषु च कराः।

९०. श्रेष्ठिचत्वरस्य, भविष्यापणस्य च पण्यव्यवहारेषु, मुद्राङ्कशुल्कान् विहाय, इतरे कराः।

९१. विनिमयपत्राणां, धनादेशपत्राणां, वचनपत्राणां, वहनपत्राणां, प्रत्ययपत्राणाम्, अनागतरक्षापत्राणाम्, अंशानां हस्तान्तरणस्य, ऋणपत्राणां, प्रतिनिधित्वपत्रिकाणां, प्राप्तीनां च सम्बन्धे मुद्राङ्कशुल्कस्य मानानि।

[1][९२ * * * * *]

[2][९२क. समाचारपत्रेभ्यः इतरेषां भाण्डानां क्रये विक्रये वा कराः यत्र एतादृशः क्रयः विक्रयः वा आन्ताराज्यिकस्य व्यापारस्य वाणिज्यस्य अभ्यन्तरे भवति।]

[3][९२ख. भाण्डानां परेषणे कराः (परेषणं भवेत् भाण्डपरेषकाय अन्यस्मै जनाय वा) यत्र एतादृशं परेषणम् आन्ताराज्यिकस्य व्यापारस्य वाणिज्यस्य वा अभ्यन्तरे भवति।]

[4][९२(ग) * * * * *]

९३. एतत्सूच्याः विषयेषु केनापि सम्बद्धानां विधीनां विरुद्धम् अपराधाः।

९४. एतत्सूच्याः विषयेषु कस्यापि प्रयोजनार्थं परिप्रश्नाः, सर्वेक्षणानि, सङ्ख्यानानि च।

९५. उच्चतमन्यायालयम् अन्तरेण, सर्वेषां न्यायालयानाम् एतत्सूच्याः विषयेषु कस्यापि सम्बन्धे अधिकारिता, शक्तयश्च; नावधिकरणविषये अधिकारिता।

९६. कस्मिन् अपि न्यायालये गृह्यमाणप्रशुल्कान् विहाय, एतत्सूच्याः विषयेषु कस्यापि सम्बन्धे प्रशुल्काः।

९७. द्वितीयतृतीयसूच्योः कस्यामपि अप्रगणितेन केनापि करेण सह तयोः सूच्योः अप्रगणितः कोऽपि विषयः।

---

1 संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६, १७(क)(ii)-अनुभागेन लोपितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

2 संविधानस्य (षष्ठं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २-अनुभागेन एषा प्रविष्टिः अन्तर्वेशिता।

3 संविधानस्य (षट्चत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९८२ इत्यस्य ५-अनुभागेन एषा प्रविष्टिः अन्तर्वेशिता।

4 संविधानस्य (अष्टाशीतितमं संशोधनम्) अधिनियमः, २००३, ४-अनुभागेन एषः खण्डः अन्तर्वेशितः (दिनाङ्कः न अधिसूचितः) तथा च संविधानस्य (एकाधिक-एकशततमं संशोधनम्) अधिनियमः, २०१६, १७(क)(ii)-अनुभागेन लोपितः (१६-९-२०१६ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(सप्तमी अनुसूची)

सूची २- राज्यसूची

१. लोकव्यवस्था, (किन्तु असैनिकशक्तेः सहायतार्थं [1][सङ्घस्य नौसेनायाः, स्थलसेनायाः, वायुसेनायाः वा कस्यापि अन्यस्य सशस्त्रबलस्य वा, सङ्घस्य नियन्त्रणाधीनस्य कस्यापि अन्यस्य बलस्य, तस्य भागस्य, एकांशस्य वा प्रयोगः अस्यां नान्तर्भवति])।

[2][२. प्रथमसूच्याः २क-प्रविष्टयाः उपबन्धानाम् अधीनम् आरक्षी, यस्मिन् लोहमार्गारक्षी, ग्रामारक्षी चापि अन्तर्भवतः]।

३. [3][* * *] उच्चन्यायालयस्य अधिकारिणः सेवकाश्च, भाटकन्यायालयानां राजस्वन्यायालयानां च प्रक्रिया, उच्चतमन्यायालयं विहाय सर्वेषु न्यायालयेषु गृह्यमाणाः प्रशुल्काः।

४. कारागाराः, बालसुधारणालयाः, "बौर्स्टल" संस्थाः, अन्याश्च एवं विधाः संस्थाः, तासु च निरुद्धाः जनाः; कारागाराणाम् अन्यसंस्थानां च उपयोगार्थम् अन्यराज्यैः सह प्रबन्धः।

५. स्थानीयशासनम्, अर्थात् नगरनिगमानां, सुधारणन्यासानां, मण्डलमण्डलीनां, खननवसतिप्राधिकरणानां स्थानीयस्वशासनस्य, ग्रामप्रशासनस्य वा प्रयोजनार्थम् अन्येषां स्थानीयप्राधिकरणानां च घटनं शक्तयश्च।

६. लोकस्वास्थ्यं स्वच्छता च; चिकित्सालयाः औषधालयाश्च।

७. भारताद्बहिः स्थितानां स्थानानां तीर्थयात्राभ्यः इतराः तीर्थयात्राः।

८. मादकपानानि, अर्थात् मादकपानानाम् उत्पादनं, विनिर्माणं, भुक्तिः, परिवहणं, क्रयः विक्रयश्च।

९. निःशक्तानां जनानां नियोजनाय अयोग्यानां जनानां च सहायता।

१०. शवनिखननानि, निखननस्थानानि च; शवदाहाः श्मशानानि च।

[4][११. * * * * *]

१२. राज्येन नियन्त्रिताः वित्तपोषिताः वा पुस्तकालयाः, सङ्ग्रहालयाः अन्याश्च एवं विधाः संस्थाः, [5][संसदा प्रणीतेन विधिना तदधीनं वा] राष्ट्रियमहत्वमयानि इति [5][घोषितेभ्यः] इतराणि प्राचीनानि, ऐतिहासिकानि च स्मारकाणि, अभिलेखाश्च।

---

1 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५७-अनुभागेन केभ्यश्चित् शब्देभ्यः प्रति एते शब्दाः संनिवेशिताः।

2 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन द्वितीयप्रविष्टयाः प्रति एषा संनिवेशिता (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 उपर्युक्ताधिनियमस्य उक्तेन अनुभागेन केचित् शब्दाः लोपिताः (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

4 संविधानस्य (द्विचत्वारिंशत्तमं संशोधनम्) अधिनियमः, १९७६ इत्यस्य ५७-अनुभागेन ११-तमा प्रविष्टिः लोपिता (३-१-१९७७ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

5 संविधानस्य (सप्तमं संशोधनम्) अधिनियमः, १९५६ इत्यस्य २७-अनुभागेन "संसद् विधिना" इत्येतस्मात् प्रति एते शब्दाः संनिवेशिताः।

(सप्तमी अनुसूची)

१३. सञ्चारसाधनानि अर्थात् मार्गाः, सेतवः, नौकाघट्टाः प्रथमसूच्याम् अनुल्लिखितानि सञ्चारस्य अन्यानि साधनानि च; नगररथ्यालोहमार्गाः, रज्जुमार्गाः अन्तर्देशीयाः जलमार्गाः, तेषु प्रथमसूच्याः तृतीयसूच्याः च उपबन्धानाम् अधीनं यातायातं च, यन्त्रनोदितयानेभ्यः इतराणि यानानि।

१४. कृषिः यस्याम् अन्तर्भवन्ति कृषेः शिक्षा, अनुसन्धानं नाशकजन्तुभ्यः रक्षा, पादपरोगाणां निवारणं च।

१५. पशुधनस्य परिरक्षणं, संरक्षणम्, उन्नतिश्च; पशुरोगाणां निवारणं च; पशुचिकित्साविषयकं प्रशिक्षणं, व्यवसायश्च।

१६. पश्ववरोधाः पशूनाम् अतिचारस्य निवारणं च।

१७. प्रथमसूच्याः ५६-तमप्रविष्टेः उपबन्धानाम् अधीनं, जलम्, अर्थात् जलप्रदायाः, सेचनं, कुल्याश्च; जलनिसारणं, तटबन्धाश्च; जलसङ्ग्रहः, जलशक्तिश्च।

१८. भूमिः, अर्थात् भूमौ, भूमेः उपरि वा अधिकारः; भूधृतयः यासु भू-स्वामिनः कृषकाणां च सम्बन्धः अन्तर्भवति;

भाटकसङ्ग्रहणं च कृषिभूमेः अन्तरणम् अन्यसङ्क्रामणं च भूमिविकासः, कृषिसम्बन्धिनः उद्धाराश्च, उपनिवेशनं च।

२७३. राजस्थान-उपनिवेशनं (संशोधनम्) अधिनियमः, १९८९ (१९८९ वर्षस्य राजस्थान-अधिनियमः १२)।

---

[1] संविधानस्य (अष्टसप्ततितमं संशोधनम्) अधिनियमः, १९९५ वर्षस्य २-अनुभागेन (३०-८-१९९५ दिनाङ्कात् प्रवर्तमानप्रभावेण) २५८तः २८४-पर्यन्तम् प्रविष्टयः संनिवेशिताः।

२७४. तमिलनाडु-भूमि-सुधारणा (अधिकतमं-भूमि-सीमा-निर्धारणं) संशोधनम् अधिनियमः, १९८३ (१९८४ वर्षस्य तमिलनाडु-अधिनियमः ३)।

२७५. तमिलनाडु-भूमि-सुधारणा (अधिकतमं भूमि-सीमा-निर्धारणं) संशोधनम् अधिनियमः, १९८६ (१९८६ वर्षस्य तमिलनाडु-अधिनियमः ५७)।

२७६. तमिलनाडु-भूमि-सुधारणा (अधिकतमं भूमि-सीमा-निर्धारणं) द्वितीयसंशोधनम् अधिनियमः, १९८७ (१९८८ वर्षस्य तमिलनाडु-अधिनियमः ४)।

२७७. तमिलनाडु-भूमि-सुधारणा (अधिकतमं भूमि-सीमा-निर्धारणं) (संशोधनम्) अधिनियमः, १९८९ (१९८९ वर्षस्य तमिलनाडु-अधिनियमः ३०)।

२७८. पश्चिमबङ्गाल-भूमि-सुधारणा (संशोधनम्) अधिनियमः, १९८१ (१९८१ वर्षस्य पश्चिमबङ्गाल-अधिनियमः ५०)।

२७९. पश्चिमबङ्गाल-भूमि-सुधारणा (संशोधनम्) अधिनियमः, १९८६ (१९८६ वर्षस्य पश्चिमबङ्गाल-अधिनियमः ५)।

२८०. पश्चिमबङ्गाल-भूमि-सुधारणा (द्वितीयसंशोधनम्) अधिनियमः, १९८६ (१९८६ वर्षस्य पश्चिमबङ्गाल-अधिनियमः १९)।

२८१. पश्चिमबङ्गाल-भूमि-सुधारणा (तृतीयसंशोधनम्) अधिनियमः, १९८६ (१९८६ वर्षस्य पश्चिमबङ्गाल-अधिनियमः ३५)।

२८२. पश्चिमबङ्गाल-भूमि-सुधारणा (संशोधनम्) अधिनियमः, १९८९ (१९८९ वर्षस्य पश्चिमबङ्गाल-अधिनियमः २३)।

२८३. पश्चिमबङ्गाल-भूमि-सुधारणा (संशोधनम्) अधिनियमः, १९९० (१९९० वर्षस्य पश्चिमबङ्गाल-अधिनियमः २४)।

२८४. पश्चिमबङ्गाल-भूमि-सुधारणा-अधिकरण-अधिनियमः, १९९१ (१९९१ वर्षस्य पश्चिमबङ्गाल-अधिनियमः १२)।]

स्पष्टीकरणम्:- राजस्थान-अभिधृति-अधिनियमः, १९९५ (१९९५ वर्षस्य राजस्थानाधिनियमः, सं. ३) इत्यस्य अधीनम् अनुच्छेदः, ३१क इत्यस्य खण्डः (१) इत्यस्य द्वितीयपारन्तुकस्य उल्लङ्घने कृतम् अर्जनं तदुल्लङ्घनस्य मात्रां यावत् शून्यं भवेत्)।

[1][दशमी अनुसूची

[(अनुच्छेदौ १०२ (२), १९१ (२) च)]

दलपरिवर्तनस्य आधारेण निरर्हताविषयकाः उपबन्धाः

१. निर्वचनानि- एतस्याम् अनुसूच्यां प्रसङ्गेन अन्यथा अपेक्षितं चेत् न भवति-

(क) "सदनम्" इत्येतेन संसदः अन्यतरत्सदनं राज्यस्य यथायथं विधानसभा, विधानमण्डलस्य अन्यतरत् सदनं वा अभिप्रेयते;

(ख) सदनस्य कस्यचित् सदस्यस्य विषये यः यथायथं २-प्रच्छेदस्य, [2][***], ४-प्रच्छेदस्य वा उपबन्धानाम् अनुरोधेन कस्यचिद्राजनीतिकदलस्य सदस्यः वर्तते, "विधानमण्डलदलः" इत्येतेन अभिप्रेयते तत्सदनस्य तादृशानां सर्वेषां सदस्यानां समूहः यादृशाः उक्तोपबन्धानाम् अनुरोधेन तदानीम् उक्तस्य राजनीतिक दलस्य सदस्याः वर्तन्ते;

(ग) सदनस्य कस्यचित् सदस्यस्य विषये "आद्यः राजनीतिकदलः" इत्येतेन सः राजनीतिकदलः अभिप्रेयते यस्य सः २-प्रच्छेदस्य (१) उप-प्रच्छेदस्य प्रयोजनानाम् अर्थे सदस्यः वर्तते;

(घ) "प्रच्छेदः" इत्येतेन अस्याः अनुसूच्याः प्रच्छेदः अभिप्रेयते।

२. दलपरिवर्तनस्य आधारेण निरर्हता-(१) [3][4- गद्यांशः तथा च ५- गद्यांशः]च उपबन्धानाम् अधीनं सदनस्य कोऽपि सदस्यः, यः कस्यचिद्राजनीतिकदलस्य सदस्यः वर्तते, सदनस्य सदस्यत्वाय निरर्हः भवेत्-

(क) यदि सः, यस्य दलस्य सदस्यः वर्तते, तस्य सदस्यत्वं स्वेच्छया त्यजति; अथवा

(ख) यदि सः, यस्य दलस्य सदस्यः वर्तते, तेन अथवा तेन तन्निमित्तं प्राधिकृतेन केनचित् जनेन, प्राधिकारिणा वा प्रदत्तस्य निदेशस्य विरुद्धं तादृशस्य राजनीतिकदलस्य जनस्य, प्राधिकारिणः वा पूर्वानुज्ञां विना, तस्मिन् सदने मतं ददाति, मतदानात् विरतः वा भवति; तथा च तादृशं मतदानं, मतदानात् विरतिर्वा तेन दलेन जनेन, प्राधिकारिणा वा तयोः अन्यतरस्यां दशायां तादृशमतदानदिनात् मतदानविरतेः दिनात् वा पञ्चदशदिनकालावधौ न क्षम्यते।

स्पष्टीकरणम्– एतत्प्रच्छेदस्य प्रयोजनानाम् अर्थे-

(क) सदनस्य कस्यचिदपि निर्वाचितसदस्यस्य विषये एतत् मन्येत यत् सः तस्य राजनीतिकदलस्य, यदि कश्चित् स्यात्, सदस्यः वर्तते, येन सः स्वसदस्यः इति मत्वा निर्वाचनार्थम् अभ्यर्थित्वेन वृतः आसीत्।

(ख) सदनस्य कस्यचिदपि नामनिर्देशितः सदस्यस्य विषये-

---

1 संविधानस्य (द्विपञ्चाशततमं संशोधनम्) अधिनियमः, १९८५ इत्यस्य ६-अनुभागेन (१-३-१९८५ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितः।

2 संविधानस्य (एकनवतितमं संशोधनम्) अधिनियमः, २००३, ५-अनुभागेन केचन शब्दाः लोपिताः (१-१-२००४ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

3 संविधानस्य (एकनवतितमं संशोधनम्) अधिनियमः, २००३, ५-अनुभागेन " ३,४,५- गद्यांशः इत्यस्य स्थाने प्रतिष्ठापितः (१-१-२००४ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

(प्रथमः) यदि सः तादृशसदस्यत्वाय नामनिर्देशन दिनाङ्के कस्यचिद्राजनीतिकदलस्य सदस्यः वर्तते, तर्हि सः तस्य राजनीतिकदलस्य सदस्यः वर्तते इति मन्येत;

(द्वितीयः) अन्यथा च सः यथायथं ९९-तमानुच्छेदस्य १८८-तमानुच्छेदस्य वा अपेक्षाणाम् अनुपालनात्परं स्वस्थानग्रहणदिनाङ्कात् षण्मासकालावधेः समाप्तेः पूर्वं यस्य राजनीतिकदलस्य यथायथं सदस्यत्वं स्वीकरोति, प्रथमतः सदस्यः भवति वा, तस्य सदस्यः वर्तते इति मन्येत।

(२) सदनस्य कोऽपि निर्वाचितः सदस्यः यः कस्यचिद्राजनीतिकदलस्य अभ्यर्थित्वात् इतररूपेण निर्वाचितः आसीत्, यदि निर्वाचनात् परं कस्यचिद्राजनीतिकदलस्य सदस्यत्वं स्वीकरोति, तर्हि सः सदनस्य सदस्यत्वाय निरर्हः भवेत्।

(३) सदनस्य कोऽपि नामनिर्देशितः सदस्यः सदनस्य सदस्यत्वाय निरर्हः भवेत्, यदि सः यथायथं ९९-तमानुच्छेदस्य १८८-तमानुच्छेदस्य वा अपेक्षाणाम् अनुपालनात्परं स्वस्थानग्रहणा-दिनाङ्कात् षण्मासकालावधेः समाप्तेः परं कस्यचिदपि राजनीतिकदलस्य सदस्यत्वं स्वीकरोति।

(४) एतत्प्रच्छेदस्य पूर्वगामिषु उपबन्धेषु यत् किमपि सत्यपि, कस्यचित्तादृशस्य जनस्य विषये यः संविधानस्य (द्विपञ्चाशत्तमं संशोधनम्) अधिनियमः, १९८५ इत्येतस्य प्रारम्भसमये सदस्यः वर्तते (सः चेत् निर्वाचितः सदस्यः (स्यात् नामनिर्देशितः सदस्यः वा स्यात्)-

(प्रथमः) यदि सः एतादृशात् प्रारम्भात् अव्यवहितपूर्वं कस्यचिद्राजनीतिकदलस्य सदस्यः आसीत्, तर्हि एतस्य प्रच्छेदस्य (१) उपप्रच्छेदस्य प्रयोजनानाम् अर्थे इदं मन्येत यत् सः तेन राजनीतिकदलेन अभ्यर्थित्वेन वृतो भूत्वा निर्वाचितः सदस्यः वर्तते;

(द्वितीयः) अन्यथा च यथायथम्, एतस्य प्रच्छेदस्य (२) उपप्रच्छेदस्य प्रयोजनानाम् अर्थे इदं मन्येत यत् सः कस्यचिद्राजनीतिकदलस्य अभ्यर्थित्वात् इतररूपेण निर्वाचितः सदस्यः वर्तते; अथवा एतस्य प्रच्छेदस्य (३) उपप्रच्छेदस्य प्रयोजनानाम् अर्थे इदं मन्येत यत् सः सदनस्य नामनिर्देशितः सदस्यः वर्तते I

[1][* * * * *]

४. दलपरिवर्तनस्य आधारेण सञ्जातायाः निरर्हतायाः दलविलये सति नानुप्रयोगः- (१) सदनस्य कोऽपि सदस्यः २-प्रच्छेदस्य (१) उपप्रच्छेदस्य अधीनं निरर्हः न भवेत् यदि तस्य आद्यः राजनीतिकदलः अन्यस्मिन् राजनीतिकदले विलीयते सः च अध्यर्थयति यत् सः, आद्यराजनीतिकदलस्य अन्ये सदस्याश्च-

(क) यथायथं तादृशस्य राजनीतिकदलस्य अथवा तादृशविलयानन्तरं घटितस्य नूतनस्य राजनीतिकदलयस्य सदस्यत्वं स्वीकुर्वन्ति; अथवा

(ख) तैः विलयः न स्वीक्रियते तथा पृथग्भूतस्य समूहस्य रूपेण वर्तनं विनिश्चीयते,

---

1 संविधानस्य (एकनवतितमं संशोधनम्) अधिनियमः, २००३, ५-अनुभागेन ३-प्रच्छेदः लोपितः (१-१-२००४ दिनाङ्कात् प्रवर्तमानप्रभावेण)।

तथा च तादृशात् विलयात् परं यथायथं तादृशस्य अन्यस्य राजनीतिकदलस्य, अथवा नूतनस्य राजनीतिकदलस्य, अथवा समूहस्य विषये एतत् मन्येत यत् सः दलः २- प्रच्छेदस्य (१) उपप्रच्छेदस्य प्रयोजनान् अर्थे तादृशः राजनीतिकदलः विद्यते यस्य सः सदस्यः वर्तते तथा च सः दलः एव एतस्य उपप्रच्छेदस्य प्रयोजनानाम् अर्थे तस्य आद्यः राजनीतिकदलः विद्यते।

(२) एतस्य प्रच्छेदस्य (१) उपप्रच्छेदस्य प्रयोजनानाम् अर्थे, सदनस्य कस्यचित् सदस्यस्य आद्यः राजनीतिकदलः अन्यस्मिन् विलीनः इति तदैव मन्येत यदा सम्बध्यमानस्य विधानमण्डलस्य सदस्यानां द्वाभ्यां तृतीयांशाभ्यां तादृशे विलये सहमतिः सञ्जायते।

५. विमुक्तिः- एतस्याम् अनुसूच्यां यत् किमपि सत्यपि यः कोऽपि जनः लोकसभायाः अध्यक्षरूपेण, उपाध्यक्षरूपेण वा, राज्यसभायाः उपसभापतिरूपेण वा, कस्यचिद्राज्यस्य विधानपरिषदः सभापतिरूपेण, उपसभापतिरूपेण वा कस्यचिद्राज्यस्य विधानसभायाः अध्यक्षरूपेण, उपाध्यक्षरूपेण वा निर्वाचितः भवति सः एतस्याः अनुसूच्याः अधीनं निरर्हः न भवेत्-

(क) यदि सः तादृशपदाय निर्वाचनात् परं तस्य राजनीतिकदलस्य सदस्यतां स्वेच्छया त्यजति यस्य सः तन्निर्वाचनात् अव्यवहितपूर्वं सदस्यः आसीत्, ततः परं च यावत् तत् पदं तेन ध्रियते तावत् तस्मिन् राजनीतिकदले पुनः न प्रविशति अथवा अन्यस्य राजनीतिकदलस्य सदस्यत्वं न स्वीकरोति; अथवा

(ख) यदि सः तादृशाय पदाय निर्वाचनकारणात् तस्य राजनीतिकदलस्य सदस्यतां त्यजति यस्य सः तन्निर्वाचनात् अव्यवहितपूर्वं सदस्यः आसीत् तथा च तत्पदात् विरतौ तस्मिन् राजनीतिकदले पुनः प्रविशति।

६. दलपरिवर्तनस्य आधारेण सञ्जातां निरर्हतां विषयीकृत्य समुत्पन्नानां प्रश्नानां विनिश्चयः- (१) यदि एषः प्रश्न समुत्पद्यते यत् सदनस्य कोऽपि सदस्यः एतस्याः अनुसूच्याः अधीनं निरर्हताग्रस्तः अस्ति न वा, तर्हि सः प्रश्नः यथायथं तस्य सदनस्य सभापतिना अध्यक्षेण वा कृताय विनिश्चयाय निर्देशितः भवेत् तस्य विनिश्चयश्च अन्तिमः भवेत्-

परन्तु यदि एषः प्रश्नः समुत्पद्यते यत् सदनस्य सभापतिर्वा अध्यक्षः वा निरर्हताग्रस्तः अस्ति न वा, तर्हि सः प्रश्नः तेन सदस्येन कृताय विनिश्चयाय निर्देशितः भवेत् यस्तेन सदनेन एतत् प्रयोजनार्थं निर्वाचितः स्यात्; तस्य विनिश्चयश्च अन्तिमः भवेत्।

(२) एतस्याः अनुसूच्याः अधीनं कस्यचिदपि सदस्यस्य निरर्हताविषयके प्रश्ने एतत् प्रच्छेदस्य (१) उप-प्रच्छेदस्य अधीनं कृतानां सर्वासां कार्यप्रवृत्तीनां विषये एवं मन्येत यथा ताः यथायथं १२२ तमानुच्छेदस्य अर्थानुरोधेन कृताः संसदः कार्यप्रवृत्ताः सन्ति, अथवा २१२-तमानुच्छेदस्य अर्थानुरोधेन कृताः राज्यविधानमण्डलस्य कार्य-प्रवृत्तयः सन्ति।

(दशमी अनुसूची)

*७. **न्यायालयानाम् अधिकारितायाः निषेधः**-अस्मिन् संविधाने यत् किमपि सत्यपि एतस्याः अनुसूच्याः अधीनं सदनस्य कस्यापि सदस्यस्य निरर्हतया सम्बध्यमाने कस्मिन्नपि विषये कस्यापि न्यायालस्य कापि अधिकारिता न भवेत्।

८. **नियमाः**- (१) एतत्प्रच्छेदस्य (२) उपप्रच्छेदस्य अधीनं, सदनस्य सभापतिः अध्यक्षः वा एतस्याः अनुसूच्याः उपबन्धान् कार्यान्वितान् कर्तुं नियमान् प्रणेतुं क्षमते; तथा च विशिष्टतया, पूर्वोक्तानां शक्तीनां व्यापकतायां प्रतिकूलं प्रभावम् अकृत्वा च तादृशेषु नियमेषु निम्नलिखितान् विषयान् अधिकृत्य उपबन्धाः क्रियेरन्, तद्यथा-

(क) सदनस्य सदस्याः येषां राजनीतिकदलानां सदस्याः सन्ति तत्सम्बध्यमानं पञ्जीकरणम् अन्यथा अभिलेखनं वा विषयीकृत्य;

(ख) सदनस्य कञ्चिदपि सदस्यं विषयीकृत्य विधानमण्डलदलस्य नेत्रा स्वदलस्य उक्तसदस्यस्य विषये २- प्रच्छेदस्य (१) उपप्रच्छेदस्य (ख) खण्डे निर्दिष्टस्वरूपं क्षमाप्रदानम् अधिकृत्य प्रतिवेदनं, यस्मिन् प्रतिवेदनं देयं तं कालावधिं यस्मै प्राधिकारिणे प्रतिवेदनं देयं तं प्राधिकारिणं च विषयीकृत्य;

(ग) तादृशानि प्रतिवेदनानि यादृशानि कश्चिद्राजनीतिकदलः सदनस्य कस्यचित् सदस्यस्य स्वदले प्रवेशविषये दद्यात् तादृशं च अधिकारिणं यादृशाय तानि प्रतिवेदनानि देयानि विषयीकृत्य; तथा च

(घ) ६- प्रच्छेदस्य (१) उपप्रच्छेदे निर्दिष्टस्य कस्यचित् प्रश्नस्य विनिश्चयाय प्रक्रियां विषयीकृत्य यस्याम् अन्तर्भवति तस्य परिप्रश्नस्य प्रक्रिया यः तादृशस्य प्रश्नस्य विनिश्चयार्थं क्रियेत।

(२) एतत्प्रच्छेदस्य (१) उपप्रच्छेदस्य अधीनं सभापतिः, अध्यक्षः वा प्रणीतं नियमं प्रणयनात्परं यावच्छक्यं शीघ्रं सदनस्य समक्षं सङ्कलितत्रिंशद्दिनकालावधिपर्यन्तं निधापयेत्। एषः कालावधिः एकस्मिन्नेव सत्रे, सत्रद्वये, निरभाविषु तदधिकेषु सत्रेषु वा पूर्णः भवितुं क्षमते। सः नियमः तस्य त्रिंशद्दिनकालावधेः समाप्तौ कार्यकरः भवेत् यदि तत्पूर्वमेव अन्तरणैः सह, तद्विना वा, सदनस्य अनुमोदनम्, अननुमोदनं वा न लभते। यदि नियमः एवम् अनुमोदनं लभते तर्हि यथायथं तस्मिन् रूपे यस्मिन् सः निधापितः आसीत् अथवा यथान्तरिते रूपे कार्यकरः भवेत्। यदि च नियमः अननुमोदनं लभते तर्हि अकार्यकरः भवेत्।

(३) सदनस्य सभापतिः अध्यक्षः वा यथायथं १०५ तमानुच्छेदस्य १९४- तमानुच्छेदस्य वा उपबन्धेषु तेन एतस्य संविधानस्य अधीनं प्राप्तासु अन्यासु शक्तिषु च प्रभावम् अकुर्वन् एतत् निदेष्टुं क्षमते यत् यदि कश्चित् जनः एतत् प्रच्छेदस्य अधीनं प्रणीतानां नियमानां सुविमृश्य उल्लङ्घनं करोति तर्हि तद्विषये तया रीत्या कार्यप्रवृत्तयः करणीयाः यया रीत्या सदनस्य विशेषाधिकारस्य हननविषये कार्यप्रवृत्तयः क्रियन्ते।

---

* ७-प्रच्छेदं "किहोतो हेलोहन इति मध्ये विरुद्धय जेचिल्हु इति तथा अन्यानि ए.आई.आर. १९९३ एस.सी. ४१२ इत्यत्र बहुमतेन अनुच्छेदः ३६८ इत्यस्य खण्डः (२) पारन्तुकानुसारम् अनुसमर्थनस्याभावे, अविधिमान्यः घोषितः।

[1][एकादशी अनुसूची

(अनुच्छेदः २४३छ)

१. कृषिः, यदन्तर्गते कृषि-विस्तारः अस्ति।
२. भूमिविकासः, भूमि-सुधारणस्य कार्यान्वयनं, चकबन्दी तथा भूमि-संरक्षणम्।
३. लघु-सेचनस्य, जलप्रबन्धस्य तथा जलविभाजकक्षेत्रस्य विकासः।
४. पशुपालनं, गव्य-(डेरी)-उद्योगः तथा कुक्कुट-पालनम्।
५. मत्स्य-उद्योगः।
६. सामाजिक-वानिकी तथा कृषि-वानिकी।
७. लघु-वन-उपजम्।
८. लघु-उद्योगः, यदन्तर्गते खाद्य-प्रसंस्करण-उद्योगा: अपि सन्ति।
९. खादी, ग्रामोद्योग: तथा कुटीर-उद्योग:।
१०. ग्रामीण-आवासनम्।
११. पेयजलम्।
१२. इन्धन: तथा घासाः।
१३. पन्थानः, लघु-सेतवः, सेतवः, हाटः, जलमार्गाणि तथा अन्यसञ्चारसाधनानि।
१४. ग्रामीण-विद्युतीकरणं, यदन्तर्गते विद्युत्वितरणम् अस्ति।
१५. अपारम्परिक-ऊर्जास्रोतांसि।
१६. दरिद्रता-उन्मूलन-कार्यक्रमाः।
१७. शिक्षा, यदन्तर्गते प्राथमिकाः तथा माध्यमिकः विद्यालयाः अपि सन्ति।
१८. तकनीकिप्रशिक्षणं तथा व्यवसायिकी शिक्षा।
१९. प्रौढी तथा अनौपचारिकी शिक्षा।
२०. पुस्तकालयः।
२१. सांस्कृतिक-क्रियाकलापाः।
२२. आपणानि तथा हाटकानि।
२३. स्वास्थ्यं तथा स्वच्छता, यदन्तर्गते रुग्णालयः, प्राथमिक-स्वास्थ्य-केन्द्रः तथा औषधालयः अपि अस्ति।
२४. कुटुम्ब-कल्याणम्।
२५. महिला तथा बालविकासः।
२६. समाज-कल्याणं, यदन्तर्गते दिव्याङ्गानां तथा मानसिकरूपेण मन्दजनानां कल्याणम् अपि अस्ति।
२७. दुर्बल-वर्गाणां तथा विशेषरूपेण अनुसूचितजातीनां तथा अनुसूचित-जनजातीनां कल्याणम्।
२८. सार्वजनिक-वितरण-प्रणाली।
२९. सामुदायिकसम्पत्तीनाम् अनुरक्षणम्।]

---

[1] संविधानस्य (त्रिसप्ततितमं संशोधनम्) अधिनियमः, १९९२ वर्षस्य ४-अनुभागेन (२४-४-१९९३ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितः।

[1][द्वादशी अनुसूची

(अनुच्छेदः २४३ब)

१. नगरीययोजना, यदन्तर्गते नगरयोजना अपि अस्ति।

२. भूमि-उपयोगस्य विनियमनं तथा भवनानां निर्माणम्।

३. आर्थिकी तथा सामाजिकी विकासयोजना।

४. पन्थानः तथा सेतवः।

५. गृहार्थम्, औद्योगिक-वाणिज्यिकप्रयोजनाय जलदानम्।

६. लोकस्वास्थ्यम्, स्वच्छता, मार्जनं तथा घनी-अवशिष्टप्रबन्धः।

७. अग्निशमन-सेवाः।

८. नगरीय-वानिकी, पर्यावरणस्य संरक्षणं तथा पारस्थितिकी-आयामानाम् अभिवृद्धिः।

९. समाजस्य दुर्बलवर्गाणां, यदन्तर्गते दिव्याङ्गानां तथा मानसिकरूपेण मन्दजनानां हितसंरक्षणम्।

१०. मलिना-पल्लीनां सुधारणं तथा प्रोन्नयनम्।

११. नगरीय-निर्धनता-उन्मूलनम्।

१२. नगरीय-सुखसहायानां तथा सुविधानां, यथा- उद्यान-उपवन-क्रीडक्षेत्राणां व्यवस्था।

१३. सांस्कृतिक-शैक्षणिक-सुन्दरता-आयामानाम् अभिवृद्धिः।

१४. शवनिखनानि, निखनस्थानानि च; शवदाहाः, श्मनानि तथा विद्युत्शवदाहगृहम्।

१५. पशुबन्धगृह : पशून् प्रति क्रूरतायाः निवारणम्।

१६. जन्म-मरण-सांख्यिकी, यदन्तर्गते जन्ममृत्य्वोः पञ्जीकरणम् अपि अस्ति।

१७. सार्वजनिक-सुखसहायानां, यदन्तर्गते पथिषु प्रकाशः, यानाङ्गणं, लोकयानस्थानकं तथा जनसुविधाः अपि सन्ति।

१८. वधशालानां तथा चर्मशोधनशालानां विनियमनम्।]

---

[1] संविधानस्य (चतुस्सप्ततितमं संशोधनम्) अधिनियमः, १९९२ वर्षस्य ४-अनुभागेन (१-६-१९९३ दिनाङ्कात् प्रवर्तमानप्रभावेण) संनिवेशितः।

परिशिष्टम्-१

संविधानस्य (शततमं संशोधनम्) अधिनियमः, २०१५

[२८-५-२०१५]

भारतशासनस्य तथा बाङ्ग्लादेशशासनस्य मध्ये कृतः समयः तत्संविदः अनुकरणे राज्यक्षेत्राणां भारतेन अर्जनं तथा कतिपय-राज्यक्षेत्राणां बाङ्ग्लादेशं प्रति-अन्तरणं प्रवर्तनार्थं भारतस्य संविधानस्य तथा संशोधनार्थम् अधिनियमः।

भारतगणराज्यस्य ६६-तमे वर्षे संसदा निम्नलिखित रूपेण अयम् अधिनियमेत-

१. संक्षिप्त-नाम-अस्य अधिनियमस्य नाम संविधानस्य (१००-तमं संशोधनम्) अधिनियमः, २०१५ अस्ति।

२. परिभाषाः- अस्मिन् अधिनियमे,-

(क) "अर्जितं राज्यक्षेत्रम्" इत्यनेन भारत-बाङ्ग्लादेश-समये तथा तत्संविदि समाविष्टे तथा प्रथम-अनुसूच्यां निर्दिष्टानि तावन्तः राज्यक्षेत्राणि अभिप्रेतानि सन्ति, येषां खण्डः (ग) इत्यत्र निर्दिष्टसमयस्य तथा तत्संविदः अनुकरणे भारतेन बाङ्ग्लादेशात् अर्जितुं प्रयोजनाय अभ्यङ्कनं कृतम्।

(ख) *"नियत-दिनम्" इत्यनेन एतादृशं दिनम् अभिप्रेतम् अस्ति, यत् केन्द्रीयशासनस्य, राजपत्रे, अधिसूचनया, भारत-बाङ्ग्लादेश-समयः तथा तत्संविदः अनुकरणे प्रथम-अनुसूच्यां तथा द्वितीय-अनुसूच्यां यथानिर्दिष्टं केषांचित् राज्यक्षेत्राणां, येषाम् इत्थम् अर्जनं तथा अन्तरणं कार्यमाणे तथा तत्प्रयोजनाय अभ्यङ्कनं कार्यमाणानन्तरं बाङ्ग्लादेशतः राज्यक्षेत्राणाम् अर्जनाय तथा बाङ्ग्लादेशं राज्यक्षेत्राणाम् अन्तरणाय दिनं नियतं कुर्यात्।

(ग) "भारत-बाङ्ग्लादेश-समयः" इत्यनेन भारत-बाङ्ग्लादेशयोः मध्ये भूमि-सीमायाः अभ्यङ्कनस्य तथा सम्बद्धविषयाणां सम्बन्धे भारतगणराज्यस्य शासनस्य तथा बाङ्ग्लादेश-जनवादि-गणराज्यस्य शासनस्य मध्ये दिनं १९७४-वर्षस्य मई-मासस्य १६-दिने सम्पन्नः समयः, १९७४-वर्षस्य दिसम्बरमासस्य २६-दिनं, १९७४-वर्षस्य दिसम्बर-मासस्य ३०-दिनं, १९८२-वर्षस्य अक्टूबरमासस्य ७-दिने तथा १९९२-वर्षस्य मार्चमासस्य २६-दिनम् इत्येषां पत्रविनिमयः तथा भारतशासनस्य तथा च बाङ्ग्लादेशशासनस्य मध्ये २०११-वर्षस्य सितम्बर-मासस्य ६-दिनम् इति जातसमयस्य संविद् अभिप्रेता अस्ति, यस्य सुष्ठूद्धरणं तृतीय-अनुसूच्याम् उल्लिखिताः सन्ति;

---

* २०१५-वर्षस्य जुलाई मासस्य ३१-दिनम्, अधिसूचना सं. का.आ. २०९४(अ) इत्यनया अधिसूचिता।

(परिशिष्टम्-१)

(घ) “अन्तरित-राज्यक्षेत्रम्” इत्यनेन भारत-बाङ्गलादेशसमये तथा तत्संविदि समाविष्टे तथा द्वितीय-अनुसूच्यां निर्दिष्टानि तावन्ति राज्यक्षेत्राणि अभिप्रेतानि सन्ति, येषां खण्डः (ग) इत्यत्र निर्दिष्टसमयस्य तथा तत्संविदः अनुकरणे भारतेन बाङ्ग्लादेशम् अन्तरितक्रियमाणस्य प्रयोजनाय अभ्यङ्कनं कृतम्।

३. संविधानस्य प्रथम-अनुसूच्याः संशोधनं संविधानस्य प्रथम-अनुसूच्यां, नियतदिनम् इत्यतः एव,-

(क) असमराज्यस्य राज्यक्षेत्रैः सम्बन्धिते गद्यांशे, “तथा तानि राज्यक्षेत्राणि अपि एतदन्तर्गते न सन्ति”, यत् संविधानस्य (९-तमं संशोधनम्) अधिनियमः, १९६० इत्यस्य (३) अनुभागेन खण्डः (३) इत्यत्र किमपि सत्यपि, यावत् तस्य सम्बन्धः संविधानस्य (१००-तमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य द्वितीय-अनुसूच्याः (१) भागे निर्दिष्टराज्यक्षेत्रैः अस्ति, संविधानस्य (१००-तमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य द्वितीय-अनुसूच्याः (१) भागे निर्दिष्टाः सन्ति” शब्दः, कोष्ठकम्, अङ्कः तथा अक्षरम्, अन्ते योजयेयुः;

(ख) पश्चिमबङ्गालराज्यस्य राज्यक्षेत्रैः सम्बन्धिते गद्यांशे, “तथा तानि राज्यक्षेत्राणि अपि, यत् प्रथम-अनुसूच्याः भागः ३ इत्यत्र निर्दिष्टम् अस्ति किन्तु तानि राज्यक्षेत्राणि एतदन्तर्गते न सन्ति” यत् संविधानस्य (९-तमं संशोधनम्) अधिनियमः, १९६० इत्यस्य (३) अनुभागेन खण्डः (३) इत्यत्र किमपि सत्यपि, यावत् तस्य सम्बन्धः संविधानस्य (१००-तमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य प्रथम-अनुसूच्याः (३) भागे निर्दिष्टराज्यक्षेत्रैः तथा द्वितीय-अनुसूच्याः (३) भागे निर्दिष्टराज्यक्षेत्रैः अस्ति, संविधानस्य (१००-तमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य द्वितीय-अनुसूच्याः (३) भागे निर्दिष्टाः सन्ति” शब्दः, कोष्ठकम्, अङ्कः तथा अक्षरम्, अन्ते योजयेयुः;

(ग) मेघालयराज्यस्य राज्यक्षेत्रैः सम्बन्धिते गद्यांशे, “तथा तानि राज्यक्षेत्राणि यानि प्रथम-अनुसूच्याः भागः १ इत्यत्र निर्दिष्टानि सन्ति किन्तु तानि राज्यक्षेत्राणि एतदन्तर्गते न सन्ति, यत् संविधानस्य (१००-तमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य द्वितीय-अनुसूच्याः (२) भागे निर्दिष्टाः सन्ति” शब्दः, कोष्ठकम्, अङ्कः तथा अक्षरम्, अन्ते योजयेयुः;

(घ) त्रिपुराराज्यस्य राज्यक्षेत्रैः सम्बन्धिते गद्यांशे, “तथा तानि राज्यक्षेत्राणि यानि संविधानस्य (९-तमं संशोधनम्) अधिनियमः, १९६० इत्यस्य (३) अनुभागेन खण्डः (घ) इत्यत्र अन्तर्विष्टे किमपि सत्यपि, यावत् तस्य सम्बन्धः संविधानस्य (१००-तमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य प्रथम-अनुसूच्याः (२) भागे निर्दिष्टराज्यक्षेत्रैः अस्ति, संविधानस्य (१००-तमं संशोधनम्) अधिनियमः, २०१५ इत्यस्य प्रथम-अनुसूच्याः (२) भागे निर्दिष्टाः सन्ति” शब्दः, कोष्ठकम्, अङ्कः तथा अक्षरम्, अन्ते योजयेयुः;

(परिशिष्टम्-१)

प्रथमा अनुसूची

[*अनुभागः २(क), अनुभागः २(ख) तथा अनुभागः ३ इति पश्येत्*]

भागः १

१९७४-वर्षस्य मईमासस्य १६-दिनम् इत्यस्य समयस्य अनुच्छेदः २ तथा २०११-वर्षस्य सितम्बरमासस्य ६-दिनम् इत्यस्य संविदः अनुच्छेदः ३ (I)(ख)(ii)(iii)(iv)(v) इत्यस्य सम्बन्धे अर्जितानि राज्यक्षेत्राणि।

भागः २

१९७४-वर्षस्य मईमासस्य १६-दिनम् इत्यस्य समयस्य अनुच्छेदः २ तथा २०११-वर्षस्य सितम्बरमासस्य ६-दिनम् इत्यस्य संविदः अनुच्छेदः ३ (I)(ग)(i) इत्यस्य सम्बन्धे अर्जितानि राज्यक्षेत्राणि।

भागः ३

१९७४-वर्षस्य मईमासस्य १६-दिनम् इत्यस्य समयस्य अनुच्छेदः १(१२) तथा अनुच्छेदः २ तथा २०११-वर्षस्य सितम्बरमासस्य ६-दिनम् इत्यस्य संविदः अनुच्छेदः २(II),३(I)(क)(iii)(iv)(v)(vi) इत्यस्य सम्बन्धे अर्जितानि राज्यक्षेत्राणि।

द्वितीया अनुसूची

[*अनुभागः २(ख), अनुभागः २(घ) तथा अनुभागः ३ इति पश्येत्*]

भागः १

१९७४-वर्षस्य मईमासस्य १६-दिनम् इत्यस्य समयस्य अनुच्छेदः २ तथा २०११-वर्षस्य सितम्बरमासस्य ६-दिनम् इत्यस्य संविदः अनुच्छेदः ३ (I)(घ)(i)(ii) इत्यस्य सम्बन्धे अन्तरितानि राज्यक्षेत्राणि।

भागः २

१९७४-वर्षस्य मईमासस्य १६-दिनम् इत्यस्य समयस्य अनुच्छेदः २ तथा २०११-वर्षस्य सितम्बरमासस्य ६-दिनम् इत्यस्य संविदः अनुच्छेदः ३ (I)(ख)(i) इत्यस्य सम्बन्धे अन्तरितानि राज्यक्षेत्राणि।

भागः ३

१९७४-वर्षस्य मईमासस्य १६-दिनम् इत्यस्य समयस्य अनुच्छेदः १(१२) तथा अनुच्छेदः २ तथा २०११-वर्षस्य सितम्बरमासस्य ६-दिनम् इत्यस्य संविदः अनुच्छेदः २(II),३(I)(क)(i)(ii),(vi) इत्यस्य सम्बन्धे अन्तरितानि राज्यक्षेत्राणि।

(परिशिष्टम्-१)

तृतीया अनुसूची

[*अनुभागः २(ग) द्रष्टव्यः*]

1. भारतगणराज्यस्य शासनस्य तथा बाङ्ग्लादेश-जनवादि-गणराज्यस्य शासनस्य मध्ये भारत-बाङ्ग्लादेशयोः मध्ये भूमि-सीमायाः अभ्यङ्कनस्य तथा सम्बद्धविषयाणां सम्बन्धे दिनं १९७४-वर्षस्य मई-मासस्य १६-दिने सम्पन्नः समयात् उद्धरणम्

अनुच्छेदः १(१२) : विदेशी-अन्तःक्षेत्रम् (एन्क्लेव)

बाङ्ग्लादेशे स्थितभारतीय-अन्तःक्षेत्राणाम् (एन्क्लेवानां) तथा भारते स्थितबाङ्ग्लादेशअन्तःक्षेत्राणां १४-गद्यांशे उल्लिखितानि अन्तःक्षेत्राणि परित्यज्य, बाङ्ग्लादेशे गम्यमानातिरिक्तक्षेत्राय प्रतिपूर्तेः अधिकारित्वं विहाय शीघ्रातिशीघ्रं विनिमयेयुः।

अनुच्छेदः २:

भारतस्य तथा बाङ्ग्लादेशस्य शासनानाम् एतद्-विषये मतैक्यम् अस्ति यत् प्राक्-अभ्यङ्कितक्षेत्रेषु प्रातिकूल्य-अधिकृतं राज्यक्षेत्रं, येषां सम्बन्धे सीमापट्टी-मानचित्रं पूर्वमेव सज्जीकृताः सन्ति, अधिकृताधिकारिभिः सीमापट्टी-मानचित्रेषु हस्ताक्षराङ्कितानन्तरम् आषड्-मासेभ्यः विनिमयेयुः। ते सुसंगत-मानचित्रेषु यथाशीघ्रं तथा कस्यामपि दशायां दिनं १९७४-वर्षस्य दिसम्बरमासस्य ३१-दिनं प्राक्-हस्ताक्षरं कर्तुं शक्नुयात्। एतादृशानां क्षेत्राणां, येषां विषये अभ्यङ्कनं पूर्वमेव कृतं, मानचित्राणां मुद्रणाय शीघ्रोपायं कुर्यात्। एतानि १९७५-वर्षस्य मईमासस्य ३१-दिनं यावत् मुद्रितानि भवेयुः तथा तदनन्तरं तेषु अधिकृताधिकारिभिः हस्ताक्षराङ्कनं भवेत् यतः एतेषु क्षेत्रेषु प्रतिकूलता-धारित-अधिकृतेः विनियमनं १९७५-वर्षस्य दिसम्बरमासस्य ३१-दिनं पर्यन्तं कर्तुं शक्नुयात्। येषां क्षेत्राणाम् अधुनापि अभ्यङ्कनं भवितव्यं तेषु राज्यक्षेत्रीयाधिकारितायाः अन्तरणसम्बन्धितेषु सीमा-पट्टी मानचित्रेषु अधिकृताधिकारिभिः हस्ताक्षराङ्कनानन्तरं षड्-मासानां प्राक् भवितुं शक्यते।

II. भारतगणराज्यस्य शासनस्य तथा बाङ्ग्लादेश-जनवादि-गणराज्यस्य शासनस्य मध्ये भारत-बाङ्ग्लादेशयोः मध्ये भूमि-सीमायाः अभ्यङ्कनस्य तथा सम्बद्धविषयाणां सम्बन्धे दिनं २०११-वर्षस्य सितम्बर-मासस्य ६-दिने सम्पन्नः समयात् उद्धरणम्

अनुच्छेदः २:

(II) १९७४ वर्षस्य समयस्य अनुच्छेदः १, खण्डः १२ इत्ययं कार्यान्वितनिम्ननुसारम् -

(परिशिष्टम्-१)

अन्तःक्षेत्रम् –

संयुक्तरूपेण सत्यापितः तथा डी.जी.एल.आर.एंड एस., बाङ्ग्लादेशस्य तथा डी.एल.आर.एंड एस., पश्चिमबङ्गालस्य (भारतम्) स्तरे १९९७-वर्षस्य अप्रैलमासे हस्ताक्षराङ्कितः अन्तःक्षेत्रमानचित्राणाम् अनुसारं बाङ्ग्लादेशे १११-इति भारतीय-अन्तःक्षेत्राणां तथा भारते ५१-इति बाङ्ग्लादेश-अन्तःक्षेत्राणां बाङ्ग्लादेशे गम्यमानातिरिक्त-क्षेत्राणां कृते प्रतिपूर्तेः अधिकारित्वं विहाय विनिमयेयुः।

अनुच्छेदः ३ :

(I) १९७४-वर्षस्य समयस्य अनुच्छेदः (२) निम्नानुसारेण कार्यान्वितः कुर्यात्:

भारतशासनस्य तथा बाङ्ग्लादेशशासनस्य मध्ये अयं समयः जातः यत् प्रतिकूलाधिकृतौ धारितराज्यक्षेत्रेभ्यः, यथा संयुक्तसर्वेक्षणमाध्यमेन अवधारितः कृतः तथा स्व-स्वप्रतिकूलाधिकृति-भू-क्षेत्रसूचके मानचित्रे (एपीएल मानचित्रं) इत्यत्र, यत् २०१०-वर्षस्य दिसम्बरमासस्य तथा २०११-वर्षस्य अगस्तमासस्य मध्ये उभयोः देशयोः मध्ये भू-अभिलेखेन तथा सर्वेक्षणविभागैः अन्तिमं रूपितं, पूर्णतया चित्रितं, येषां पूर्णतयावर्णनं नीच्चैः खण्डः (क) इत्यतः खण्डः (घ) इत्यत्र कृतं, नियतसीमायाः रूपेण सीमारेखाङ्कनं करिष्यते।

सुसङ्गतसीमापट्ट्या मानचित्राणां मुद्रणं करिष्यते तथा तेषु अधिकृताधिकारिभिः हस्ताक्षराणि करिष्यन्ते तथा राज्यक्षेत्रीय-अधिकारितायाः अन्तरणं अन्तःक्षेत्रस्य विनियमेन सह पूर्णं करिष्यते। उपरि वर्णितेषु सूचकमानचित्रेषु यथा चित्रितं सीमायाः अभ्यङ्कनं निम्नानुसारं भवेत् :

(क) पश्चिम-बङ्गाल-क्षेत्रम्

(i) बौसमारी-मधुगरी (कुश्तिया-नाडिया) क्षेत्रम्

विद्यमानसीमास्तम्भ-सं. १५४/५-एस इत्यतः १५७/१-एस इतः आरभ्य मथबंगानद्याः पुरातनप्रवाहमार्गस्य मध्यपर्यन्तं, यथा १९६२-वर्षस्य चकबंदी-मानचित्रे चित्रितम् अस्ति एकसीमारेखायाः अङ्कनं करिष्यते, यथा २०११वर्षस्य जूनमासे संयुक्तरूपेण सर्वेक्षितः तथा सम्मतिः जाता।

(ii) अंधारकोटा (कुश्तिया-नाडिया) क्षेत्रम्

विद्यमानसीमास्तम्भ-सं. १५२/५-एस इत्यतः १५३/१-एस इतः आरभ्य मथबंगानदी-तटं यावत् एकसीमारेखायाः अङ्कनं करिष्यते, यथा २०११वर्षस्य जूनमासे संयुक्तरूपेण सर्वेक्षितः तथा सम्मतिः जाता।

(iii) पकुरिया (कुश्तिया-नाडिया) क्षेत्रम्

विद्यमानसीमास्तम्भ-सं. १५१/१-एस इत्यतः १५२/२-एस इतः आरभ्य मथबंगानदी-तटं यावत् एकसीमारेखायाः अङ्कनं करिष्यते, यथा २०११वर्षस्य जूनमासे संयुक्तरूपेण सर्वेक्षितः तथा सम्मतिः जाता।

(iv) चार-महिष्कुंडी (कुश्तिया-नाडिया) क्षेत्रम्

विद्यमानसीमास्तम्भ-सं. १५३/१-एस इत्यतः १५३/९-एस इतः आरभ्य मथबंगानदी-तटं यावत् एकसीमारेखायाः अङ्कनं करिष्यते, यथा २०११वर्षस्य जूनमासे संयुक्तरूपेण सर्वेक्षितः तथा सम्मतिः जाता।

(v) हरिपाल/खुतादाह/बटोली/सपामेरी/एलएन पुर (पटारी) (नौगांव-मालदा) क्षेत्रम्

विद्यमानसीमास्तम्भ-सं. २४२/एस/१३ इत्यतः २४३/एस/५ इति योज्यमानायाः सीमारेखायाः अङ्कनं करिष्यते, यथा २०११वर्षस्य जूनमासे संयुक्तरूपेण सर्वेक्षितः तथा सम्मतिः जाता।

(vi) बेरूबाड़ी (पंचगढ़-जलपाईगुड़ी) क्षेत्रम्

बाङ्ग्लादेशी-द्वारा प्रतिकूलतः धारितं बेरूबाड़ीक्षेत्रं (पंचगढ़-जलपाईगुड़ी) तथा भारत-द्वारा प्रतिकूलधारितं बेरूबाड़ी तथा सिंघपारा-खुडीपारा (पंचगढ़-जलपाईगुड़ी) इत्यत्र सीमारेखायाः १९९६-१९९८ इत्यस्य संयुक्तरूपेण अभ्यङ्कनानुसारं रेखाङ्कनं करिष्यते।

(ख) मेघालयक्षेत्रम्

(i) लोबाचेरा-नूनचेराक्षेत्रम्

लईलांग-बलिचेरा इत्यत्र विद्यमानसीमास्तम्भ-सं. १३१५/४-एस इति सीमा-स्तम्भ-सङ्ख्यातः १३१५/१५-एस-पर्यन्तं लईलांग-नूनचेरा इत्यत्र विद्यमानसीमास्तम्भसं. १३१६/१-एस इति सीमा-स्तम्भ-सङ्ख्यातः १३१६/११-एस-पर्यन्तं, लईलांग-लहिलिंग इत्यत्र विद्यमानसीमास्तम्भ-सं. १३१७ इति सीमा-स्तम्भ-सङ्ख्यातः १३१७/१३-एस-पर्यन्तं तथा लईलांग-लुभाचेरा इत्यत्र विद्यमानसीमास्तम्भ-सं. १३१८/१-एस इति सीमा-स्तम्भ-सङ्ख्यातः १३१८/२-एस इतः चाय-उद्यानानां तटं यावत् सीमारेखायाः अङ्कनं करिष्यते, यथा २०१०-वर्षस्य दिसम्बरमासे संयुक्तरूपेण सर्वेक्षितः तथा सम्मतिः जाता।

(परिशिष्टम्-१)

(ii) *पिरडीवाह/पडुआ-क्षेत्रम्*

विद्यमानसीमास्तम्भ-सं. १२७०/१-एस इत्यतः १२७१/१-टी पर्यन्तं, संक्तरूपेण सर्वेक्षितं तथा परस्पर-सम्मत्यनुसारेण सीमारेखायाः अङ्कनं करिष्यते। पक्षकाराणां मध्ये सम्मतिः संजाता यत् पिरडीवाहग्रामतः भारतीयराष्ट्रिकानां तस्य मानचित्रस्य, यत्र सम्मतिः संजाता, बिन्दुसङ्ख्या ६-इत्यस्य निकटं पियांगनद्याः जलादानस्य अनुमतिः दद्यात्।

(iii) *लिंगखाट-क्षेत्रम्*

(कक) लिंगखाट-I/कुलुमचेरा तथा लिंगखाट-II/कुलुमचेरा

विद्यमानसीमास्तम्भ-सं. १२६४/४-एस इत्यतः १२६५ तथा सीमास्तम्भसं. १२६५/एस इत्यतः सीमास्त्मभसं. १२६५/९-एस यावत् तस्याः सीमारेखायाः अनुसारं सीमारेखायाः अङ्कनं करिष्यते, यथा २०११वर्षस्य जूनमासे संयुक्तरूपेण सर्वेक्षितः तथा सम्मतिः जाता।

(कख) लिंगखाट-III/सोनारहाटः

विद्यमानसीमास्तम्भ-सं. १२६६/१३-एस दक्षिणदिशः नालिकायाः युगपत् तावत्पर्यन्तं सीमारेखां यावत्पर्यन्तं सा पूर्व-पश्चिमदिशि अन्यनालिकया मिलति, रेखाङ्कनं करिष्यते तदनन्तरम् एतत् पूर्वदिशि नालिकायाः उत्तर-तटेन साकं तावत्पर्यन्तं गच्छेत्, यावत् सा संदर्भस्तम्भ-सं. १२६७/४-आर. बी. तथा १२६७/३-आर. आई इत्यस्य उत्तरे विद्यमान-अन्तरराष्ट्रीयसीमया मिलति।

(iv) *दावकी/तमाबिल-क्षेत्रम्*

विद्यमानसीमास्तम्भ-सं. १२७५/१-एस इत्यतः सीमा-स्तम्भ १२७५/७-एस इति योज्यमानायाः एकसरलरेखायाः सीमारेखाङ्कनं करिष्यते। पक्षकारः अस्मिन् क्षेत्रे “शून्यरेखा” इत्यत्र रोधसंयोजने सम्मतिः अस्ति।

(v) नलजूरी/श्रीपुर-क्षेत्रम्

(कक) नलजूरी-I

सीमारेखायाः दक्षिणदिशि विद्यमानसीमास्तम्भ-सं. १२७७/२-एस इत्यतः पट्टी-मानचित्र-सं. १६६ इत्यत्र यथादर्शितं त्रि-भू-खण्ड-पर्यन्तं सा सीमास्तम्भ-सं. १२७७/५-टी इत्यतः प्रवाहमानया नालिकया मिलति तदनन्तरं सः दक्षिणदिशि नालिकायाः पश्चिम-तटेन साकमेव बाङ्ग्लादेशं प्रति द्वि-भू-खण्डं यावत् गच्छेत् तदनन्तरं सा पूर्वं प्रति तत्पर्यन्तं गच्छेत् यत् पर्यन्तं सीमास्तम्भ-सं. १२७७/४-एस इत्यतः दक्षिणदिशि क्रमाङ्कितया रेखया मिलति।

(कख) नलजूरी-iii

विद्यमानसीमास्तम्भ-सं. १२७८/२-एस इत्यतः सीमा-स्तम्भ १२७९/३-एस इति पर्यन्तं सीमारेखा एकसरलरेखायाः रूपेण अभ्यङ्कनं करिष्यते।

(vi) मुक्तापुर/डिबिर-हावोर-क्षेत्रम्

पक्षकाराः अस्मिन् विषये सम्मताः सन्ति यत् भारतीयराष्ट्रिकान् काली-मन्दिरं गन्तुं अनुमतिः भवेत् तथा तान् मुक्तापुरं प्रतितटं मुक्तापुर/डिबिर-हावोर-क्षेत्रे स्थितजलाशयात् जलादानस्य तथा मीनाहरणस्य अधिकाराणां प्रयोगितुम् अपि अनुज्ञा भवेत्।

(ग) त्रिपुराक्षेत्रम्

(i) त्रिपुरा/मौलवी बाज़ार-क्षेत्रे चन्दन-नगर-चंपराई-चायोद्यानक्षेत्रे

विद्यमानसीमास्तम्भ-सं. १९०४ इत्यतः सीमास्तम्भ-सं. १९०५-पर्यन्तं सोनार-चेरी-नद्या साकं सीमारेखायाः अङ्कनं करिष्यते, यथा २०११वर्षस्य जुलाईमासे संयुक्तरूपेण सर्वेक्षितः तथा सम्मतिः जाता।

(परिशिष्टम्-१)

(घ) असमक्षेत्रम्

(I) असमक्षेत्रे कालाबाड़ी (बोरोईबारी) क्षेत्रम्

विद्यमानसीमास्तम्भ-सं. १०६६/२४-टी इत्यतः सीमास्तम्भ-सं. १०६७/१६-टी पर्यन्तं सीमारेखायाः अङ्कनं करिष्यते, यथा २०११वर्षस्य अगस्तमासे संयुक्तरूपेण सर्वेक्षितः तथा सम्मतिः जाता।

(ii) असम-क्षेत्रे पल्लाथाल-क्षेत्रम्

विद्यमानसीमास्तम्भ-सं. १३७०/३-एस इत्यतः सीमास्तम्भ-सं. १३७१/६-एस इत्यतः आरभ्यः चायोद्यानानां बहिःतटात्-आरभ्य पान-बागान-क्षेत्रस्य बहिःतटेन साकमेव सीमास्तम्भ-सं. १३७२-इत्यतः १३७३/२-एस पर्यन्तं सीमारेखाङ्कनं करिष्यते।

III. १९७४-वर्षस्य मईमासस्य १६-दिने जातसमयस्य अनुच्छेदः १(१२) तथा २०११-वर्षस्य सितम्बरमासस्य ६-दिने जातसमयस्य संविदनुकरणे भारतबाङ्ग्लादेशयोः मध्ये अन्तःक्षेत्राणां विनिमयस्य सूची

1. बाङ्ग्लादेशे विनिमययोग्यं भारतीय-अन्तःक्षेत्रं, क्षेत्रफलसहितम्-

क्रम-सङ्ख्या	छिटानां नामानि	छिट-सङ्ख्या	बाङ्ग्लादेशस्य आरक्षी-स्थानकस्य अन्ते स्थितः	पश्चिम-बङ्गालस्य आरक्षी-स्थानकस्य अन्ते स्थितः	क्षेत्रफलम्, एकड़-मापे
१	२	३	४	५	६
		क. *स्वतन्त्रछिटाः इति अन्तःक्षेत्राणि*			
१	गराटी	७५	पोचगरः	हल्दीबाडी	५८.२३
२	गराटी	७६	पोचगरः	हल्दीबाडी	०.७९
३	गराटी	७७	पोचगरः	हल्दीबाडी	१८
४	गराटी	७८	पोचगरः	हल्दीबाडी	९५८.६६
५	गराटी	७९	पोचगरः	हल्दीबाडी	१.७४
६	गराटी	८०	पोचगरः	हल्दीबाडी	७३.७५
७	बिंगीमारी-भागः-१	७३	पोचगरः	हल्दीबाडी	६.०७

(परिशिष्टम्-१)

१	२	३	४	५	६
८	नजीरगञ्जः	४१	बोडा	हल्दीबाडी	५८.३२
९	नजीरगञ्जः	४२	बोडा	हल्दीबाडी	४३४.२९
१०	नजीरगञ्जः	४४	बोडा	हल्दीबाडी	५३.४७
११	नजीरगञ्जः	४५	बोडा	हल्दीबाडी	१.०७
१२	नजीरगञ्जः	४६	बोडा	हल्दीबाडी	१७.९७
१३	नजीरगञ्जः	४७	बोडा	हल्दीबाडी	३.८९
१४	नजीरगञ्जः	४८	बोडा	हल्दीबाडी	७३.२७
१५	नजीरगञ्जः	४९	बोडा	हल्दीबाडी	४९.०५
१६	नजीरगञ्जः	५०	बोडा	हल्दीबाडी	५.०५
१७	नजीरगञ्जः	५१	बोडा	हल्दीबाडी	०.७७
१८	नजीरगञ्जः	५२	बोडा	हल्दीबाडी	१.०४
१९	नजीरगञ्जः	५३	बोडा	हल्दीबाडी	१.०२
२०	नजीरगञ्जः	५४	बोडा	हल्दीबाडी	३.८७
२१	नजीरगञ्जः	५५	बोडा	हल्दीबाडी	१२.१८
२२	नजीरगञ्जः	५६	बोडा	हल्दीबाडी	५४.०४
२३	नजीरगञ्जः	५७	बोडा	हल्दीबाडी	८.२७
२४	नजीरगञ्जः	५८	बोडा	हल्दीबाडी	१४.२२
२५	नजीरगञ्जः	६०	बोडा	हल्दीबाडी	०.५२
२६	पुटीमारी	५९	बोडा	हल्दीबाडी	१२२.८
२७	दैखाता-छटः	३८	बोडा	हल्दीबाडी	४९९.२१
२८	सल्बरी	३७	बोडा	हल्दीबाडी	११८८.९३
२९	काजल-दिघी	३६	बोडा	हल्दीबाडी	७७१.४४
३०	नटकटोका	३२	बोडा	हल्दीबाडी	१६२.२६
३१	नटकटोका	३३	बोडा	हल्दीबाडी	०.२६
३२	बेउलाडांगा-छटः	३५	बोडा	हल्दीबाडी	०.८३
३३	बलापारा-इगराबारः	३	देबीगञ्जः	हल्दीबाडी	१७५२.४४
३४	बला-खनकिखरीजा-सितलदहा	३०	डिमला	हल्दीबाडी	७.७१

(परिशिष्टम्-१)

१	२	३	४	५	६
३५	बला-खनकिखरीजा-सितलदहा	२९	डिमला	हल्दीबाडी	३६.८३
३६	बराखनगीरः	२८	डिमला	हल्दीबाडी	३०.५३
३७	नगरजीकोबरी	३१	डिमला	हल्दीबाडी	३३.४१
३८	कुचलीबारी	२६	पटग्रामः	मेकलीगञ्जः	५.७८
३९	कुचलीबारी	२७	पटग्रामः	मेकलीगञ्जः	२.०४
४०	बरा-कुचलीबारी	थाना-मेकलीगंज इत्यस्य जे. एल. १०७ इत्यस्य अपखण्डः	पटग्रामः	मेकलीगञ्जः	४.३५
४१	जमालोह-बेलापुखारी	६	पटग्रामः	मेकलीगञ्जः	५.२४
४२	उपनचौकी-कुचलीबारी	११५/२	पटग्रामः	मेकलीगञ्जः	०.३२
४३	उपनचौकी-कुचलीबारी	७	पटग्रामः	मेकलीगञ्जः	४४.०४
४४	भोथनरी	११	पटग्रामः	मेकलीगञ्जः	३६.८३
४५	बालापुखारी	५	पटग्रामः	मेकलीगञ्जः	५५.९१
४६	बाराखानगीरः	४	पटग्रामः	मेकलीगञ्जः	५०.५१
४७	बाराखानगीरः	९	पटग्रामः	मेकलीगञ्जः	८७.४२
४८	छठ-बिगडोकरा	१०	पटग्रामः	मेकलीगञ्जः	४१.७
४९	रतनपुरम्	११	पटग्रामः	मेकलीगञ्जः	५८.९१
५०	बोगडोकरा	१२	पटग्रामः	मेकलीगञ्जः	२५.४९
५१	पुलकर डाबरी	थाना-मेकलीगंज इत्यस्य जे. ए. एल्. १०७ इत्यस्य अपखण्डः	पटग्रामः	मेकलीगञ्जः	०.८८

(परिशिष्टम्-१)

१	२	३	४	५	६
५२	खरखरीया	१५	पटग्रामः	मेकलीगञ्जः	६०.७४
५३	खरखरीया	१३	पटग्रामः	मेकलीगञ्जः	५१.६२
५४	लोटामारी	१४	पटग्रामः	मेकलीगञ्जः	११०.९२
५५	भूतबारी	१६	पटग्रामः	मेकलीगञ्जः	२०५.४६
५६	कोमट-चांग्रबधा	१६ए	पटग्रामः	मेकलीगञ्जः	४२.८
५७	कोमट-चांग्रबधा	१७ए	पटग्रामः	मेकलीगञ्जः	१६.०१
५८	पनीसाला	१७	पटग्रामः	मेकलीगञ्जः	१३७.६६
५९	द्वारीकामारी-खासबाश	१८	पटग्रामः	मेकलीगञ्जः	३६.५
६०	पनीसाला	१५३/पी	पटग्रामः	मेकलीगञ्जः	०.२७
६१	पनीसाला	१५३/ओ	पटग्रामः	मेकलीगञ्जः	१८.०१
६२	पनीसाला	१९	पटग्रामः	मेकलीगञ्जः	६४.६३
६३	पनीसाला	२	पटग्रामः	मेकलीगञ्जः	५१.४
६४	लोटामारी	२०	पटग्रामः	मेकलीगञ्जः	२८३.५३
६५	लोटामारी	२२	पटग्रामः	मेकलीगञ्जः	९८.८५
६६	द्वारिकामारी	२३	पटग्रामः	मेकलीगञ्जः	३९.५२
६७	द्वारिकामारी	२५	पटग्रामः	मेकलीगञ्जः	४५.७३
६८	छट-भोथाटः	२४	पटग्रामः	मेकलीगञ्जः	५६.११
६९	बाकाटा	१३१	पटग्रामः	हथभंगा	२२.३५
७०	बाकाटा	१३२	पटग्रामः	हथभंगा	११.९६
७१	बाकाटा	१३०	पटग्रामः	हथभंगा	२०.४८
७२	भोग्रामगुरी	१३३	पटग्रामः	हथभंगा	१.४४
७३	चेनाकाटा	१३४	पटग्रामः	मेकलीगञ्जः	७.८१
७४	बांसकाटा	११९	पटग्रामः	मथबंगा	४१३.८१
७५	बांसकाटा	१२०	पटग्रामः	मथबंगा	३०.७५
७६	बांसकाटा	१२१	पटग्रामः	मथबंगा	१२.१५
७७	बांसकाटा	११३	पटग्रामः	मथबंगा	५७.८६
७८	बांसकाटा	११२	पटग्रामः	मथबंगा	३१५.०४
७९	बांसकाटा	११४	पटग्रामः	मथबंगा	०.७७

(परिशिष्टम्-१)

१	२	३	४	५	६
८०	बांसकाटा	११५	पटग्रामः	मथबंगा	२९.२
८१	बांसकाटा	१२२	पटग्रामः	मथबंगा	३३.२२
८२	बांसकाटा	१२७	पटग्रामः	मथबंगा	१२.७२
८३	बांसकाटा	१२८	पटग्रामः	मथबंगा	२.३३
८४	बांसकाटा	११७	पटग्रामः	मथबंगा	२.५५
८५	बांसकाटा	११८	पटग्रामः	मथबंगा	३०.९८
८६	बांसकाटा	१२५	पटग्रामः	मथबंगा	०.६४
८७	बांसकाटा	१२६	पटग्रामः	मथबंगा	१.३९
८८	बांसकाटा	१२९	पटग्रामः	मथबंगा	१.३७
८९	बांसकाटा	११६	पटग्रामः	मथबंगा	१६.९६
९०	बांसकाटा	१२३	पटग्रामः	मथबंगा	२४.३७
९१	बांसकाटा	१२४	पटग्रामः	मथबंगा	०.२८
९२	गोटमारी-छिटः	१३५	हातिबंधा	सितलकुची	१२६.५९
९३	गोटमारी-छिटः	१३६	हातिबंधा	सितलकुची	२०.०२
९४	बनापचाई	१५१	लालमोनिरहाटः	दिनहाटा	२१७.२९
९५	बनापचाई-भीतरकुथी	१५२	लालमोनिरहाटः	दिनहाटा	८१.७१
९६	दसिआर-छारा	१५०	फुलबारी	दिनहाटा	१६४३.४४
९७	दकुरहाट-दकिनिरकुथी	१५६	कुरीग्रामः	दिनहाटा	१४.२७
९८	कलामती	१४१	भुंगामारी	दिनहाटा	२१.२१
९९	भाहोबगञ्जः	१५३	भुंगामारी	दिनहाटा	३१.५८
१००	बाओतिकुरसा	१४२	भुंगामारी	दिनहाटा	४५.६३
१०१	बरा कोआचुल्का	१४३	भुंगामारी	दिनहाटा	३९.९९
१०२	गावचुल्का II	१४७	भुंगामारी	दिनहाटा	०.९
१०३	गावचुल्का I	१४६	भुंगामारी	दिनहाटा	८.९२
१०४	दिघालतरी II	१४५	भुंगामारी	दिनहाटा	८.८१
१०५	दिघालतरी I	१४४	भुंगामारी	दिनहाटा	१२.३१
१०६	छोटूगरलझोरा	१४९	भुंगामारी	दिनहाटा	१७.८५

(परिशिष्टम्-१)

१	२		३	४	५	६
१०७	छोटू-गरलझोरा I		१४८	भुंगामारी	दिनहाटा	३५.७४
१०८	जे. एल. सं. ३८ इत्यस्य दक्षिणकोणे तथा जे. एल. सं. ३९ इत्यस्य दक्षिणकोणे नाम विना तथा जे. एल. सं. १ छिटः* (स्थानीयरूपेण अशोकाबाड़ी **इत्यस्य रूपेण ज्ञातः)			पटग्रामः	मथभंगा	३.५
	अपखण्डः छिटः इति अन्तःक्षेत्रम्					
१०९	(i)	बेवलाडांगा	३४	हल्दीबाडी	बोडा	८६२.४६
	(ii)	बेवलाडांगा	अपखण्डः	हल्दीबाडी	देबीगञ्जः	
११०	(i)	कोतभाजनी	२	हल्दीबाडी	देबीगञ्जः	२०१२.२७
	(ii)	कोतभाजनी	अपखण्डः	हल्दीबाडी	देबीगञ्जः	
	(iii)	कोतभाजनी	अपखण्डः	हल्दीबाडी	देबीगञ्जः	
	(iv)	कोतभाजनी	अपखण्डः	हल्दीबाडी	देबीगञ्जः	
१११	(i)	दहाला	खागराबारी	हल्दीबाडी	देबीगञ्जः	२६५०.३५
	(ii)	दहाला	अपखण्डः	हल्दीबाडी	देबीगञ्जः	
	(iii)	दहाला	अपखण्डः	हल्दीबाडी	देबीगञ्जः	
	(iv)	दहाला	अपखण्डः	हल्दीबाडी	देबीगञ्जः	

* २००२वर्षस्य सितम्बरमासस्य २९-दिनात् २००२वर्षस्य अक्टूबरमासस्य २-दिनं पर्यन्तम् कोलकातायाम् आयोजितं १५०-तमं (चतुःपञ्चाशत्तमं) भारत-बाङ्ग्लादेशसीमासम्मेलनेन संशोधितः।

** २००३वर्षस्य सितम्बरमासस्य १८-दिनात् २००३वर्षस्य सितम्बरमासस्य २०-दिनं पर्यन्तम् कूचबिहारे (भारते) आयोजितं १५२-तमं (५६-तमं) भारत-बाङ्ग्लादेशसीमासम्मेलनेन संशोधितः।

१	२		३	४	५	६
	(v)	दहाला	खागराबारी	हल्दीबाडी	देबीगञ्जः	
	(vi)	दहाला	अपखण्डः	हल्दीबाडी	देबीगञ्जः	
						१७१६०.६३

अन्तःक्षेत्राणाम् उपरोक्तविवरणानां १९९६-वर्षस्य अक्टूबरमासस्य ९-दिनात्, १९९६-वर्षस्य अक्टूबरमासस्य १२-दिनं पर्यन्तं कलकत्तायाम् आयोजितं भारत-बाङ्ग्लादेशसम्मेलनावधौ एवञ्च १९९६-वर्षस्य नवम्बरमासस्य २१-दिनात् १९९६-वर्षस्य नवम्बरबरमासस्य २४-दिनं पर्यन्तं जलपाईगुड़ी-(पश्चिम-बङ्गाल)-पांचागढ-(बाङ्ग्लादेश)-क्षेत्रे संयुक्तक्षेत्रनिरीक्षणावधौ भारतबाङ्लादेशद्वारा धारिताभिलेखेषु संयुक्तरूपेण तुलना कृता तथा तान् समाधानप्रदं विरचितम्।

टिप्पनी : क्षेत्र-सीमन-कालः १९९६-९७ इत्यवधौ संयुक्त-भूमि-सत्यापनेन उपर्युक्तक्रम-सं. १०८-इत्यस्य अन्तःक्षेत्रस्य नाम्नः अशोकबाड़ी अन्तःक्षेत्रस्य रूपेण अभिज्ञातम्।

ब्रिगेडियर-जे. आर. पीटर
निदेशकः, भू-अभिलेखः तथा सर्वेक्षणम्
(पदेन), पश्चिमी-बङ्गालः, भारतम्
तथा निदेशकः, पूर्वी-क्षेत्रम्
भारतीय-सर्वेक्षणं, कलकत्ता

मो.शफी-उद्दीनः
महनिदेशकः, भू-अभिलेखः तथा
सर्वेक्षणं, बाङ्ग्लादेशः

ख. भारते विनिमययोग्यं बाङ्ग्लादेश-अन्तःक्षेत्रं, क्षेत्रफलसहितम्-

क्रम-सङ्ख्या	छिटानां नामानि	पश्चिम-बङ्गालस्य आरक्षी-स्थानकस्य अन्ते स्थितः	बाङ्ग्लादेशस्य आरक्षी-स्थानकस्य अन्ते स्थितः	जे. एल. सं.	क्षेत्रफलम्, एकड़-मापे
१	२	३	४	५	६
		क. *स्वतन्त्रछिटाः इति अन्तःक्षेत्राणि*			
१	छिट-कुचलीबारी	मेकलीगञ्जः	पटग्रामः	२२	३७०.६४
२	कुचलीबारी इत्यस्य छिट-भूमिः	मेकलीगञ्जः	पटग्रामः	२४	१.८३
३	बालापुखारी	मेकलीगञ्जः	पटग्रामः	२१	३३१.६४
४	पनबारी सं २ इत्यस्य छिट-भूमिः	मेकलीगञ्जः	पटग्रामः	२०	१.१३

(परिशिष्टम्-१)

१	२	३	४	५	६
५	छिट-पनबारी	मेकलीगञ्जः	पटग्रामः	१८	१०८.५९
६	धाबलसाती-मिर्गीपुरम्	मेकलीगञ्जः	पटग्रामः	१५	१७३.८८
७	बामनदलम्	मेकलीगञ्जः	पटग्रामः	११	२.२४
८	छिट-धाबलसाती	मेकलीगञ्जः	पटग्रामः	१४	६६.५८
९	धाबलसाती	मेकलीगञ्जः	पटग्रामः	१३	६०.४५
१०	श्रीरामपुरम्	मेकलीगञ्जः	पटग्रामः	८	१.०५
११	जोते-निज्ज़मा	मेकलीगञ्जः	पटग्रामः	३	८७.५४
१२	जगतबेर-सं. ३ इत्यस्य छिट-भूमिः	मथबंगा	पटग्रामः	३७	६९.८४
१३	जगतबेर-सं. १ इत्यस्य छिट-भूमिः	मथबंगा	पटग्रामः	३५	३०.६
१४	जगतबेर-सं. २ इत्यस्य छिट-भूमिः	मथबंगा	पटग्रामः	३६	२७.०९
१५	छिट-कोकोआबारी	मथबंगा	पटग्रामः	४७	२९.४९
१६	छिट-भंदारदाहा	मथबंगा	पटग्रामः	६७	३९.९६
१७	धाबलगुड़ी	मथबंगा	पटग्रामः	५२	१२.५
१८	छिट-धाबलगुड़ी	मथबंगा	पटग्रामः	५३	२२.३१
१९	धाबलगुड़ी सं. ३ इत्यस्य छिट-भूमिः	मथबंगा	पटग्रामः	७०	१.३३
२०	धाबलगुड़ी सं. ४ इत्यस्य छिट-भूमिः	मथबंगा	पटग्रामः	७१	४.५५
२१	धाबलगुड़ी सं. ५ इत्यस्य छिट-भूमिः	मथबंगा	पटग्रामः	७२	४.१२
२२	धाबलगुड़ी सं. १ इत्यस्य छिट-भूमिः	मथबंगा	पटग्रामः	६८	२६.८३
२३	धाबलगुड़ी सं. २ इत्यस्य छिट-भूमिः	मथबंगा	पटग्रामः	६९	१३.९५
२४	महिशमारी	सितलकुची	पटग्रामः	५४	१२२.७७
२५	बुरा-सराडुबी	सितलकुची	हातिंबधा	१३	३४.९६

(परिशिष्टम्-१)

१	२	३	४	५	६
२६	फलनापुरम्	सितलकुची	पटग्रामः	६४	५०६.५६
२७	अमझोलः	सितलकुची	हातिंबधा	५७	१.२५
२८	किसमत-भातरीगाछः	दिनहाटा	कालीगञ्जः	८२	२०९.९५
२९	दुर्गापुरम्	दिनहाटा	कालीगञ्जः	८३	२०.९६
३०	बंसुआ-खामर-गितालदाहा	दिनहाटा	लालमोनिरहाटः	१	२४.५४
३१	पाओतुकुथी	दिनहाटा	लालमोनिरहाटः	३७	५८९.९४
३२	पश्चिम-बाकालीर-छरा	दिनहाटा	भुंगमारी	३८	१५१.९८
३३	मध्य-बाकालीर-छरा	दिनहाटा	भुंगमारी	३९	३२.७२
३४	पूरबा-बाकालीर-छरा	दिनहाटा	भुंगमारी	४०	१२.२३
३५	मध्य-मसलडांगा	दिनहाटा	भुंगमारी	३	१३६.६६
३६	मध्य-छिट-मसलडांगा	दिनहाटा	भुंगमारी	८	११.८७
३७	पश्चिम-छिट-मसलडांगा	दिनहाटा	भुंगमारी	७	७.६
३८	उत्तर-मसलडांगा	दिनहाटा	भुंगमारी	२	२७.२९
३९	कचुआ	दिनहाटा	भुंगमारी	५	११९७४
४०	उत्तर-बंसजानी	तूफानगञ्जः	भुंगमारी	१	४७.१७
४१	छत-तिलाई	तूफानगञ्जः	भुंगमारी	१७	८१.५६

खं. *अपखण्डः छिटः इति अन्तःक्षेत्रम्*

४२	(i) नलग्रामः	सितलकुची	पटग्रामः	६५	१३९७.३४
	(ii) नलग्रामः	सितलकुची	पटग्रामः	६५	
	(अपखण्डः)	सितलकुची	पटग्रामः	६५	
	(iii) नलग्रामः				
	(अपखण्डः)				

भारतस्य संविधानम्

(परिशिष्टम्-१)

१	२	३	४	५	६
४३	(i) छिट-नलग्रामः	सितलकुची	पटग्रामः	६६	४९.५
	(ii) छिट-नलग्रामः (अपखण्डः)	सितलकुची	पटग्रामः	६६	
४४	(i) बतरीगाछः	दिनहाटा	कालीगञ्जः	८१	५७७.३७
	(ii) बतरीगाछः (अपखण्डः)	दिनहाटा	कालीगञ्जः	८१	
	(iii) बतरीगाछः (अपखण्डः)	दिनहाटा	फुलबारी	९	
४५	(i) कराला	दिनहाटा	फुलबारी	९	२६९.९१
	(ii) कराला (अपखण्डः)	दिनहाटा	फुलबारी	९	
	(iii) कराला (अपखण्डः)	दिनहाटा		८	
४६	(i) सिबप्रसाद-मुस्तती	दिनहाटा	फुलबारी	८	३७३.२
	(ii) सिबप्रसाद-मुस्तती (अपखण्डः)	दिनहाटा	फुलबारी	६	
४७	(i) दक्षिण-मसालडांगा	दिनहाटा	भुंगमारी	६	५७१.३८
	(ii) दक्षिण-मसालडांगा (उपखण्डः)	दिनहाटा	भुंगमारी	६	
	(iii) दक्षिण-मसालडांगा (उपखण्डः)	दिनहाटा	भुंगमारी	६	
	(iv) दक्षिण-मसालडांगा (उपखण्डः)	दिनहाटा	भुंगमारी	६	
	(v) दक्षिण-मसालडांगा (उपखण्डः)	दिनहाटा	भुंगमारी	६	
	(vi) दक्षिण-मसालडांगा (उपखण्डः)	दिनहाटा	भुंगमारी	६	

(परिशिष्टम्-१)

१	२	३	४	५	६
४८	(i) पश्चिम-मसालडांगा	दिनहाटा	भुंगमारी	४	२९.४९
	(ii) पश्चिम-मसालडांगा (अपखण्डः)	दिनहाटा	भुंगमारी	४	
४९	(i) पूरबा-छिट-मसालडांगा	दिनहाटा	भुंगमारी	१०	३५.०१
	(ii) पूरबा-छिट-मसालडांगा (अपखण्डः)	दिनहाटा	भुंगमारी	१०	
५०	(i) पूरबा-मसालडांगा	दिनहाटा	भुंगमारी	११	१५३.८९
	(ii) पूरबा-मसालडांगा (अपखण्डः)	दिनहाटा	भुंगमारी	११	
५१	(i) उत्तर-धालडांगा	तूफानगञ्जः	भुंगमारी	१४	२४.९८
	(ii) उत्तर-धालडांगा (अपखण्डः)	तूफानगञ्जः	भुंगमारी	१४	
	(iii) उत्तर-धालडांगा (अपखण्डः)	तूफानगञ्जः	भुंगमारी	१४	
	कुलक्षेत्रम्		७,११०.०२		

अन्तःक्षेत्राणाम् उपरोक्तविवरणानां १९९६-वर्षस्य अक्टूबरमासस्य ९-दिनात्, १९९६-वर्षस्य अक्टूबरमासस्य १२-दिनं पर्यन्तं कलकत्तायाम् आयोजितं भारत-बाङ्ग्लादेशसम्मेलनावधौ एवञ्च १९९६-वर्षस्य नवम्बरमासस्य २१-दिनात् १९९६-वर्षस्य नवम्बरबरमासस्य २४-दिनं पर्यन्तं जलपाईगुड़ी-(पश्चिम-बङ्गाल)-पांचागढ(बाङ्ग्लादेश)-क्षेत्रे संयुक्तक्षेत्रनिरीक्षणावधौ भारतबाङ्लादेशद्वारा धारिताभिलेखेषु संयुक्तरूपेण तुलना कृता तथा तान् समाधानप्रदं विरचितम्।

ब्रिगेडियर-जे. आर. पीटर
निदेशकः, भू-अभिलेखः तथा सर्वेक्षणम्
(पदेन), पश्चिमी-बङ्गालः, भारतम्
तथा निदेशकः, पूर्वी-क्षेत्रम्
भारतीय-सर्वेक्षणं, कलकत्ता

मो.शफी-उद्दीनः
महनिदेशकः, भू-अभिलेखः तथा
सर्वेक्षणं, बाङ्ग्लादेशः

परिशिष्टम्-२

[1]संविधानस्य (जम्मू-कश्मीरे प्रवर्तितः) आदेशः, २०१९

सं.आ. २७२

संविधानस्य अनुच्छेदः ३७० इत्यस्य खण्डः (१) इत्यनेन प्रदत्तशक्तीनां प्रयोज्यमानः, राष्ट्रपतिः, जम्मू-कश्मीरराज्यशासनस्य सहमत्या निम्नलिखिताः आदेशाः कुर्वन्ति-

१. (१) अस्य आदेशस्य नाम संविधानस्य (जम्मू-कश्मीरे प्रवर्तितः) आदेशः, २०१९ अस्ति।

(२) अयं सद्यः प्रवर्तेत तथा एतदनन्तरं यथाकालं यथासंशोधितं संविधानस्य (जम्मू-कश्मीरे प्रवर्तितः) आदेशः, १९५४ इतीमम् अधिक्रमेत।

२. यथाकालं यथासंशोधितं संविधानस्य सर्वे उपबन्धाः जम्मू-कश्मीरराज्यस्य सम्बन्धे प्रवर्तेत तथा येषाम् अपवादानां तथा संशोधनानाम् अधीनम् इमे निम्नप्रकारेण प्रवर्तेरन् :-

अनुच्छेदः ३६७ इत्यत्र निम्नलिखितः खण्डः योजयेत्, अर्थात् :-

"(४) संविधानं प्रयोजनाय, यावत्पर्यन्तम् इमे जम्मू-कश्मीरस्य सम्बन्धे प्रवर्तन्ते-

(क) अस्य संविधानस्य अथवा अस्य उपबन्धानां निर्देशान्, उक्तराज्यस्य सम्बन्धे यथाप्रवर्तितसंविधानस्य तथा तस्य उपबन्धानां निर्देशः मन्येत;

(ख) यं जनं राज्यस्य विधानसभायाः पुरःप्रशंसया राष्ट्रपतिना जम्मू-कश्मीरस्य राजप्रमुखः (सदर-ए-रियासत) यः तत्स्थानिकरूपेण पदासीनराज्यस्य मन्त्रि-परिषदः परामर्शानुसारेण कार्यं कुर्वन् अस्ति, इति रूपे तत्स्थानिकरूपेण मान्यता प्रदत्ता अस्ति, तदर्थं निर्देशान् जम्मू-कश्मीरस्य राज्यपालाय निर्देश मन्येत;

(ग) उक्तराज्यस्य शासनस्य निर्देशान्, तस्य मन्त्रि-परिषदः परामर्शानुसारेण कार्यं कुर्वन् जम्मू-कश्मीरस्य राज्यपालाय निर्देशान् समावेशयन् मन्येत; तथा

(घ) अस्य संविधानस्य अनुच्छेदः ३७० इत्यस्य पारन्तुके "खण्डः (२) इत्यत्र उल्लिखितराज्यस्य विधानसभा" इति अभिव्यक्तिं "राज्यस्य विधानसभा" इति पठेत्।"।

---

[1] विधिः तथा न्यायमन्त्रालयः (विधायिविभागः) इत्यस्य अधिसूचना सं. सा.का.नि. ५५१ (अ), २०१९वर्षस्य अगस्तमासस्य ५-दिने भारतस्य राजपत्रे, असाधारणं, भागः २, खण्डः ३, उपखण्डः (i) इत्यत्र प्रकाशिता।

परिशिष्टम्-३

[1]संविधानस्य अनुच्छेदः ३७०(३) इत्यस्य अधीना घोषणा

सं.आ. २७३

राष्ट्रपतिः संसदः पुरःप्रशंसा भारतस्य संविधानस्य अनुच्छेदः ३७० इत्यस्य खण्डः (१) इत्यनेन साकं पठितः अनुच्छेदः ३७० इत्यस्य खण्डः (३) इत्यनेन प्रदत्तशक्तीनां प्रयुञ्जन् इयं घोषणा करोति यत् २०१९वर्षस्य अगस्तमासस्य ६-दिनात् उक्तानुच्छेदः ३७० इत्यस्य सर्वान् खण्डान्, अतिरिच्य निम्नलिखितस्य, यदधोलिखितानुसारम् अस्ति, प्रचालने न स्यात्, अर्थात् :-

> "३७० अस्य संविधानस्य यथाकालं यथासंशोधितं, सर्वे उपबन्धाः कानि अपि उपान्तरणानि विना अथवा अपवादानाम् अनुच्छेदः १५२ अथवा अनुच्छेदः ३०८ अथवा अस्य संविधानस्य कस्यचित् अन्यानुच्छेदस्य, अथवा जम्मू-कश्मीरस्य संविधाने कोऽपि अन्यः उपबन्धः अथवा कोऽपि विधिः, अभिलेखः, निर्णयः, अध्यादेशः, आदेशः, उपविधिः, नियमः, विनियमः, अधिसूचना अथवा भारतस्य राज्यक्षेत्रे विधेः बलवती कापि रूढ़िः अथवा प्रथा अथवा कोऽपि अन्य-लिखितः, सन्धिः अथवा सम्मतिः यदनुच्छेदः ३६३ इत्यस्य अधीनं यथाकल्पितम् अथवा अन्यथा अस्ति, इति तत्प्रतिकूलं कस्यचित् विषयस्य अन्तर्विष्टे सत्यपि, जम्मू-कश्मीरराज्ये प्रवर्तेरन्।

[1] विधिः तथा न्यायमन्त्रालयः (विधायिविभागः) इत्यस्य अधिसूचना सं. सा.का.नि. ५६२ (अ), २०१९वर्षस्य अगस्तमासस्य ६-दिने भारतस्य राजपात्रे, असाधारणं, भागः २, खण्डः ३, उपखण्डः (i) इत्यत्र प्रकाशिता।

NTM

Language consultancy and translation facilitated by
National Translation Mission
Central Institute of Indian Languages, Mysore